2716
210
F
compbb

नं०: २८१६-घ

श्रीमद्भगवद्गीतायाः षष्ठोऽध्यायः

(षोडशटीकासहितम् एवञ्च सप्तदश सं०
भाषानुवादसहितम्

~~पत्राणि~~ २१८

षष्ठाध्याय

शांकर भाष्य
आनंदगिरिकृत टी०
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

श्रीभगवानुवाच अनाश्रितः कर्मफलं कार्यं कर्म क
रोति यः स संन्यासी च योगी च न निरग्निर्न चाक्रियः १

शङ्करभाष्यं

अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यन्तरङ्गस्य सूत्रभूताः श्लो
काः स्पर्शान् कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोध्याय आर यं
भ्यते तत्र ध्यानयोगस्य बहिरङ्गं कर्मेति यावद्ध्यानयोगारोहणसमर्थस्ताव
द्गृहस्थेनाधिकृतेन कर्तव्यं कर्मेति अतस्तत् स्तौति अनाश्रित इति ननु कि
मर्थं ध्यानयोगारोहणसीमाकरणं यावतानुष्ठेयमेव विहितं कर्म यावज्जीव
न्नारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति विशेषणादारूढस्य च शमेनैव स
म्बन्धकरणादारुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत्
स्यात्तदारुरुक्षोरारूढस्येति शमकर्मविषयभेदेन विशेषणं विभागकरणं
चानर्थकं स्यात् तत्राश्रमिणां कश्चित् योगमारुरुक्षुर्भवत्यारूढश्च कश्चिद
न्ये नारुरुक्षवो न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य चेति विशेषणं विभाग
करणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनात् पुनर्योगग्रहणाच्च योगारू
ढस्येति य आसीत् पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्तव्यं का
रणं योगफलं प्रत्युच्यत इत्यतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि क
र्मणः योगविभ्रष्टवचनाच्च गृहस्थस्य चेत् कर्मिणो योगो विहितः षष्ठे
ध्याये स योगविभ्रष्टोपि कर्मगतिं कर्मफलं प्राप्नोतीति तस्य नाशाशङ्कानु
पपन्ना स्यादवश्यं हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वे
पि स्वं फलमारभत एव नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात् फलेन
भवितव्यमित्यवोचामान्यथा वेदस्यानर्थक्यप्रसङ्गादिति न च कर्मणि सत्यु
भयविभ्रष्टवचनमर्थवत् कर्मणो विभ्रंशकारणानुपपत्तेः कर्म कृतमी
श्वरे संन्यस्यत्यतः कर्तुः कर्म फलं नारभत इति चेन्नेश्वरे संन्यासस्याधिकत
रफलहेतुत्वोपपत्तेर्मोक्षायैवेति चेत् स्वकर्मणां कृतानामीश्वरे संन्यासो मो
क्षायैव न फलान्तराय योगसहितः योगाच्च विभ्रष्टः इत्यतस्तं प्रति नाशाशङ्का
युक्तैवेति चेन्नैकाकी यतचित्तात्मा निराशीरपरिग्रहः ब्रह्मचारिव्रते स्थित इ
ति कर्मसंन्यासविधानात् न चात्र ध्यानकाले स्त्रीसहायत्वाशङ्का येनैकाकि
त्वं विधीयते न च गृहस्थस्य निराशीरपरिग्रह इत्यादिवचनमनुकूलं उभयत्र

गी· टी· ५·

छप्रत्रानुपपन्नमेव अनाश्रित इत्यनेन कर्म्मिण एव सन्न्यासित्वं योगित्वं चोक्तं प्र
तिषिद्धं च निरग्नेरक्रियस्य च सन्न्यासित्वं योगित्वं चेति चेन्न ध्यानयोगं प्रति बहि न
रङ्गस्य सतः कर्म्मणः फलाकांक्षासन्न्यासस्तुतिपरत्वात् केवलं निरग्निरक्रिय
एव सन्न्यासी योगी च किं तर्हि कर्म्म्यपि कर्म्मफलासङ्गं सन्न्यस्य कर्म्मयोग
मनुतिष्ठन् सत्त्वशुद्ध्यर्थं सन्न्यासी योगी च भवतीति स्तूयते नैकेन वाक्येन
कर्म्मफलासङ्गसन्न्यासस्तुतिश्चतुर्थाश्रमप्रतिषेधश्चोपपद्यते न च प्रसिद्धं
निरग्नेरक्रियस्य परमार्थसन्न्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रे
षु विहितं सन्न्यासित्वं योगित्वं च प्रतिषेधति भगवान् स्ववचनविरोधाच्च स
र्वकर्म्माणि मनसा सन्न्यस्य नैव कुर्वन्न कारयन्नासीत मौनी सन्तुष्टो येन केनचिद
निकेतः स्थिरमतिर्विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः सर्वारम्भप
रित्यागीति च तत्र तत्र भगवता स्ववचनानि दर्शितानि तैर्विरुध्येत चतुर्था
श्रमविप्रतिषेधस्तस्मात् मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादि
कर्म्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं सत्त्वशुद्धिद्वारे
ण प्रतिपद्यत इति स सन्न्यासी च योगी चेति स्तूयते अनाश्रित इति अनाश्रितो
न आश्रितोऽनाश्रितः किं कर्म्मफलं कर्म्मणः फलं कर्म्मफलं यत् तदनाश्रितः
कर्म्मफलतृष्णारहित इत्यर्थः यो हि कर्म्मफले तृष्णावान् स कर्म्मफलमाश्रि
तो भवति अयन्तु तद्विपरीतोऽतोऽनाश्रितः कर्म्मफलमेवम्भूतः सन् कार्य्यं कर्त्त फ
व्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्त्तयति यः कश्चित् ई
दृशः कर्म्मी स कर्म्यन्तरेभ्यो विशिष्यत इत्येवमर्थमाह स सन्न्यासी च योगी
चेति सन्न्यासः परित्यागः स यस्यास्ति स सन्न्यासी च योगी च योगश्चित्तसमा
धानं स यस्यास्ति स योगी चेत्येवं गुणसम्पन्नोऽयं मन्तव्यो न केवलं निरग्निरक्रि
य एव सन्न्यासी योगी चेति मन्तव्यः निर्गता अग्नयः कर्म्माङ्गभूता यस्मात् स
२ निरग्निरक्रियश्च अनग्निसाधना अप्यविद्यमानाः क्रियास्तपोदानादिका यस्या
सावक्रियः ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु सन्न्यासित्वं यो
गित्वं च प्रसिद्धं कथमिह साग्नेः सक्रियस्य सन्न्यासित्वं योगित्वं चाप्रसिद्ध
मुच्यते इति नैष दोषः कयाचिद् गुणवृत्त्या उभयस्य सम्पिपादयिषितत्वा
त् तत् कथं कर्म्मफलसंकल्पसन्न्यासात् सन्न्यासित्वं योगाङ्गत्वेन च कर्म्मानु
ष्ठानात् कर्म्मफलसङ्कल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्योगित्वं चेति १ ॥

आनन्दगिरिटीका

ध्यानयोगप्रस्तावानन्तरं तद्योग्यताहेतुकर्म्मणः स्तुतिं भगवानुक्तवानित्याह
श्रीभगवानिति एवमन्तराध्याययोः सङ्गतिमभिदधानो वृत्तमनूद्याध्यायान्तर-
मवतारयति अतीतेति सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसङ्गाभावं व्युद-
स्यति सम्यगिति संग्रहविवरणयोरतीतानन्तराध्याययोरुक्ते हेतुहेतुमत्त्वमि-
तिभावः अध्यायसम्बन्धमभिधायानाश्रितः कर्म्मफलमित्यादिश्लोकद्वयस्य
तात्पर्यमाह तत्रेति कर्म्मयोगस्य सन्न्यासहेतोर्म्मर्य्यादां दर्शयितुं साङ्ख्ययो-
गे विचारयितुमध्याये प्रवृत्ते सतीति समस्यार्थः सन्न्यासिना कर्त्तव्यं कर्म्मेत्येवं
प्रतिभासं व्युदस्यति गृहस्थेनेति कर्त्तव्यत्वे स्तुतियोग्यत्वमतः शास्त्रार्थः समु-
च्चयवादी सीमाकरणमालिपति न वेति यावज्जीवश्रुतिवशात् ध्यानारोहण-
सामर्थ्येप्यपि कर्म्मानुष्ठानस्य दुर्वारत्वादिति हेतुमाह यावतेति भार्य्यावि-
योगादिप्रतिबन्धाद्यावज्जीवश्रुतिचोदितकर्म्मानुष्ठानवत् वैराग्यप्रतिबन्धा-
दपि तदननुष्ठानसम्भवाद्भगवतो विशेषवचनाच्च न यावज्जीवं कर्म्मानुष्ठानप्रस-
क्तिरिति परिहरति नारुरुक्षोरिति उक्तमेवार्थं व्यतिरेकद्वारेण विवृणोति आरु-
रुक्षोरित्यादिना आरोढुमिच्छतीत्यारुरुक्षुस्तस्यारोहणेच्छा विशेषणमारोह-
णं कृतवानित्यत्र पुनरिच्छाविषयभूतमारोहणं विशेषणमेवं शमकर्म्मवि-
षयोर्भेदेन विशेषणं मर्य्यादाकरणं तत्स्वीकरणं विरुद्धमापद्येत तयोरेव विभा-
गकरणाच्च भागवत सीमास्वीकारेण युज्येतेत्यर्थः विशेषणविभागकरण-
योरन्यथोपपत्तिमाशङ्कते तद्वेति व्यवहारभूमिः समस्यार्थः षष्ठीनिर्द्देशो भवत्व-
धिकारिणो भेदे विधेयत्वेन यो विप्रकृते विशेषणं किमायातमित्याशङ्क्यात्रतृतीयापे-
त्तया तदुपपत्तिरित्याह नानपेक्षेति आरुरुक्षोरारूढस्य च भेदेनैव विप्रकृ-
तपरामर्शानुपपत्तिरिति निरूपयति तत्रस्येति यद्यनारुरुक्षुं पुरुषमपेक्ष्यारुरु-
क्षोरिति विशेषणं तस्यैव कर्म्मारोहणकारणमनारूढस्य पुरुषमपेक्ष्यारूढ-
स्येति विशेषणं तस्यैव शमः सन्न्यासो योगफलप्राप्तौ कारणमिति विशेषण-
विभागकरणयोरुपपत्तिस्तदारुरुक्षोरारूढस्य च भिन्नत्वात् प्रकृतपरामर्शि-
नः तच्छब्दस्यानुपपत्तेर्न प्रकृतमिदं विशेषणद्वयोपादानमित्यर्थः किञ्च योग-
मारुरुक्षोस्तदारोहणकारणं कर्म्मेत्युक्तं पुनर्योगारूढस्येति योगशब्दप्रयोगा-
त् यो योगः पूर्वमारुरुक्षुत्वेन सीमस्यैवापेक्षितं योगमारूढस्य तत्फलप्राप्तौ क-
र्म्मसन्न्यासः शमशब्दवाच्योऽनेनैव कर्त्तव्य इति वचनादारुरुक्षोरारूढस्य चा

गी॰
टी॰
६

भिन्नत्वप्रत्यभिज्ञानान्न तयोर्भिन्नत्वं शङ्क्यं तं शङ्कामित्याह पुनरिति यत्तया
वज्जीवश्रुतिविरोधात् योगारोहणसीमाकरणं कर्मणोनुचितमिति तत्राह इ उच्यते
ति पूर्वोक्तरीत्या कर्मतत्त्यागयोर्विभागोपपत्तौ श्रुतेरन्यविषयत्वात् योगमारूढ
स्य मुमुक्षोर्जितात्मनस्य नित्यनैमित्तिककर्मस्वपि परित्यागसिद्धिरित्यर्थः।
इतस्य यावज्जीवं कर्मकर्तव्यत्वं न भवतीत्याह योगेति सन्न्यासिनो योगभ्रष्टस्य
विनाशशङ्कावचनान्न यावज्जीवं कर्मकर्तव्यं प्रतिभातीत्यर्थः ननु योगभ्रष्टश
ब्देन गृहस्थस्यैवाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्य
त्वे सत्यपि यावज्जीवं कर्मकर्तव्यमिति नेत्याह गृहस्थस्येति तेनापि मुमुक्षुणा
कृतस्य कर्मणो मोक्षातिरिक्तफलानारम्भकत्वाद्योगभ्रष्टोसौ छिन्नाभ्रमिव न
श्यतीति शङ्कासावकाशेत्याशङ्क्याह अवश्यमिति अपौरुषेयान्निर्दोषाद्वेदा
त् फलदायिनी कर्मणः स्वाभाविकी शक्तिरवगतस्य भावस्य च स्वतः सिद्धत्वा
त्कर्मफलवत्त्वमतो मोक्षातिरिक्तस्यैव फलस्य कर्मारम्भकमिति कर्मिणो
योगभ्रष्टेपि कर्मगतिं गच्छतीति निरवकाशा शङ्केत्यर्थः ननु मुमुक्षुणा का
म्यप्रतिषिद्धयोरकरणात् कृतयोश्च नित्यनैमित्तिकयोरफलत्वात् कथं तदीय
स्य कर्मणो नियमेन फलारम्भकत्वं तत्राह निमित्तस्य चेति चकारेण नैमित्तिकं
कर्मानुकृष्यते वेदप्रमाणकत्वेपि नित्यनैमित्तिकयोरफलत्वे दोषमाह वा
च्येति कर्मणोनुष्ठितस्य फलारम्भकत्वध्रौव्यात् गृहस्थो योगभ्रष्टोपि कर्म
गतिं गच्छतीति न तस्य नाशशङ्केति शेषः इतोपि गृहस्थो योगभ्रष्टो नाशवाच्यो
न भवतीत्याह न चेति स्नानकर्मवत्तु भयं ततो भ्रष्टश्च नश्यतीति वचनं गृहस्थ
कर्मिणि सति नार्थवद्भवितमलं तस्य कर्मनिष्ठस्य कर्मणो विभ्रंशहेत्वभा
वात् तत्फलस्यावश्यकत्वादित्यर्थः कृतस्य कर्मणो मुमुक्षुणा भगवति
समर्पणात् कर्तरि फलानारम्भकत्वादस्ति विभ्रंशकारणमिति शङ्कते कर्मे। कृ
ति राजाराधनबुद्ध्यापत्यादिसमर्पणस्याधिकफलहेतुत्वोपलम्भादीश्वरे
समर्पणं न भ्रंशकारणमिति दूषयति तेत्यादिना अधिकफलहेतुत्वेपि मोक्षहे
तुत्वमिष्यतामिति शङ्कते मोक्षायेति न देवतोद्देशविहीनेन तु स्वकर्मणामि
ति सहकारिसामर्थ्यात्तस्य फलान्तरे प्रसूपायत्वासिद्धिरिति हेतुं सूचयति यो
गेति ध्यानसहितस्य सन्न्यासस्य मोक्षोपायिकत्वे कुतो योगभ्रष्टमधिकृत्य नाशा
ङ्काशङ्क्याह योगाच्चेति सहकार्यभावे सामग्र्याभावात् फलानुपपत्तेः शङ्का

नाशाशङ्क्यार्थः ध्यानसहितमीश्वरे कर्म्मसमर्पणं मोक्षायेत्यत्र प्रमाणा
भावात् गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीति दूषयति नेति गृहस्थस्य
योगभ्रष्टशब्दवाच्यत्वाभावे हेत्वन्तरमाह एकाकीति न खल्वेतानि विशेष
णानि गृहस्थसमवायीनि सम्भवन्ति तेन तस्य ध्यानयोगविध्यभावात् नतं
प्रति योगभ्रष्टशब्दवचनमुचितमित्यर्थः एकाकित्ववचनेन गृहस्थस्यापि
ध्यानकाले स्त्रीसहायत्वाभावाभिप्रायेण भविष्यतीत्याशङ्क्य अग्निहोत्रा
दिवद्ध्यानस्य पत्नीसाध्यत्वाभावादप्रामप्रतिषेधप्रसङ्गान्मैवमित्याह न
चेति विशेषणान्तरपर्य्यालोचनयापि नायमेकाकिशब्दो गृहस्थपरो
भवितुमर्हतीत्याह नचेति किन्तु गृहस्थस्यैवैकाकित्वादिविवक्षितत्वाद्ध्या
नयोगविधौ तस्य उभयभ्रष्टप्रश्नो नोपपद्यत इत्याह उभयेति नहि गृह
स्थं प्रति उभयस्मात् ज्ञानात् कर्म्मणश्च विभ्रष्टत्वमुपेत्य प्रष्टुं युज्यते त
स्य ज्ञानात् भ्रंशेपि कर्म्मणस्तदभावादनुष्ठीयमानकर्म्मभ्रंशेपि प्राग
नुष्ठितकर्म्मवशात् फलप्रतिलम्भादतो यथोक्तप्रश्नालोचनया न गृह
स्थं प्रति ध्यानविधानोपपत्तिरित्यर्थः ननु भगवता सन्न्यासस्य प्रतिषि
द्धत्वात् गृहस्थस्यैव योगविधानात्तस्यैव योगभ्रष्टशब्दवाच्यत्वमिति शा
ङ्कते अनाश्रित इत्यनेनेति भगवद्वाक्यं न प्रतिषेधपरमिति परिहरति
तथ्यानेति स्तुतिपरत्वमेव स्फोरयति न केवलमिति सत्वशुद्ध्यर्थमनु
तिष्ठन्निति सम्बन्धः वाक्यस्योभयपरत्वमाशङ्क्य वाक्यभेदप्रसङ्गान्मैव
मित्याह नचेति इतोपि भगवतः सन्न्यासाश्रमप्रतिषेधोभिप्रेतो न भ
वतीत्याह नचप्रसिद्धमिति तस्य प्रसिद्धं सन्न्यासित्वं योगित्वञ्चेति सम्ब
न्धः प्रसिद्धत्वमेव व्याकरोति श्रुतीति इतोपि सन्न्यासाश्रमं भगवान्प्रति [त्र]
षेधतीत्याह स्ववचनेति विरोधमेव साधयति सर्वकर्म्माणीत्यादिना।
अनाश्रित इत्यादिवाक्यस्य यथाश्रुतार्थत्वानुपपत्तेः स्तुतिपरत्वमुपपादि
तमुपसंहरति तस्मादिति कर्म्मफलसन्न्यासित्वमत्र प्रतिशब्दार्थः स्तु
तिपरं वाक्यमक्षरयोजनार्थमुदाहरति अनाश्रित इति कर्म्मफले अभिलाषो
नास्तीत्येतावता कथं तदनाश्रितत्ववाचोयुक्तिरित्याशङ्क्य व्यतिरेकमुखेन।
विशदयति यो हीति कार्य्यमित्यादि व्याकरोति एवम्भूतः सन्निति कथं
कर्म्मिणः सन्न्यासित्वं योगित्वञ्च कर्म्मित्वविरोधादित्याशङ्क्याह यद्दश

गी॰
टी॰
ष

3

इति स्तुतेरत्र विवक्षितत्वात्तानुपपत्तिश्चोदनीयेति मन्वानः सन्नाह इत्येवमिति
न निरग्निरित्यादेरर्थमाह नकेवलमिति अग्नयो गार्हपत्याहवनीयान्वाहार्यप
चनप्रभृतयः ननु न निरग्निरेव सिद्धमक्रियत्वमग्निसाध्यत्वात्क्रियाणां तथा च न निर
ग्निरित्येतावतैवापेक्षितसिद्धेर्नचाक्रिय इत्यनर्थकमर्थपुनरुक्तेरिति तत्राह
अनग्नीति उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्यावर्त्यामाशङ्कां दर्शयति ननु वे
ति प्रसिद्धपरिभाषया मसिद्धिरुपादीयमाना प्रसिद्धिविरुद्धेति दोषं दूषयति
नैष दोष इति उभयस्य साग्नेः सक्रियत्वमत्रास्ति तस्य वेत्यर्थः गुणवृत्त्योभय
सन्न्यासत्वे प्रश्नपूर्वकं प्रकटयति ननु कथमित्यादिना १ ॥

स्वामिकृतटीका

शुद्धे चित्तेपि न ध्यानं विना संन्यासमात्रतः मुक्तिः स्यादिति षष्ठेस्मिन् ध्यानयो
गो वितन्यते १ पूर्वाध्यायान्ते संक्षेपेणोक्तं योगं प्रपंचयितुं षष्ठाध्यायारंभः त
त्र तावत्सर्वकर्माणि मनसा संन्यस्येत्यारभ्य संन्यासपूर्विकाया ज्ञाननिष्ठा
याः स्तावर्येणाभिधानात् दुःखरूपत्वाच्च कर्मणः सहसा संन्यासातिप्रसंगं शमे
वारयितुं संन्यासादपि श्रेष्ठत्वेन कर्मयोगं स्तौति अनाश्रित इति द्वाभ्यां कर्मफ
°सन् लमनाश्रितः अनपेक्षमाणः अवश्यं कर्तव्यतया विहितं कर्म यः करोति स ए
व संन्यासी योगी च न निरग्निः अग्निसाध्येष्टाख्यकर्मत्यागी च न चाक्रियः अनग्नि
साध्यपूर्ताख्यकर्मत्यागी च १ ॥

पिशाचभाष्ये

अतीताध्यायान्ते योगस्य सम्यग्दर्शनं प्रति अन्तरंगस्य ध्यानस्य सूत्रभूताः श्लो
काः स्पर्शान्कृत्वा बहिर्बाह्यानित्यादयः उपदिष्टास्तेषां वृत्तिस्थानीयोयं षष्ठो
ध्याय आरभ्यते अनाश्रितः कर्मफलमित्यादि स संन्यासी च अनाश्रितः नाश्रि
तः कर्मफलं तस्य यानमपुञ्ज्यत इत्यर्थः कार्यं कर्म कर्तव्यं नित्यं कर्माग्निहोत्रा
दि करोति यः स संन्यासी च योगी च फलसंन्यासी च योगी च योगांगत्वेन कर्मा
नुष्ठानात्मनः न केवलमनग्निरक्रियः नैव सिद्धो लोक इति तत्संपादयति भ
गवान् १ ॥

रामानुजभाष्ये

अतः कर्मयोगः सपरिकरः इदानीं ज्ञानयोगकर्मयोगसाध्यात्मावलोकन
रूपयोगाभ्यासविधिरुच्यते न तु कर्मयोगस्य निरपेक्षयोगसाधनत्वं द्रष्टयि

तेज्ञानाकारकर्मयोगोयोगशिरस्कः अदर्शयनेकर्मफलंस्वर्गादिकमनाश्रितः
कार्यंकर्मकर्मानुष्ठानमेवकार्यं सर्वात्मनाऽस्मत्स्वरूपपरमपुरुषाराधन
रूपतयाकर्मैवममप्रयोजनं तत्साध्यंनकिंचिदितियःकर्मकरोतिससंन्यासी
चज्ञानयोगनिष्ठश्चयोगीचकर्मयोगनिष्ठश्च आत्मावलोकनसाधनभूताभ्या
यनिष्ठश्चनतुनिरग्निर्नचाक्रियः नचोदितयज्ञादिकर्मस्वप्रवृत्तः नकेवलज्ञान
निष्ठः तस्यहिज्ञाननिष्ठैव कर्मयोगनिष्ठस्यतूभयमित्यभिप्रायः ॥१॥

अभिनवगुप्तकृतटीका

ना॰ एवंप्राक्तनेध्यायगणेनसाधितोर्थः श्लोकद्वयेननिगम्यते कार्यंयज्ञाध्यादि
विहितं सन्न्यासीति योगीतिपर्यायावेतौ अतएवाह ॥१॥

परमार्थप्रपाटीका

अथ एवंकार्यतयाविहितंकर्मयःकरोतिसएवसंन्यासीयोगीच कर्मफलानपे
क्षत्वमेवकर्मसंन्यासः विहिताचरणमेवकर्मयोगःएतदन्यथात्वंनिषेधयति
ननिरग्निर्नचाक्रियइति अयमर्थः कश्चिदमूढान्तःकरणःशाठ्यप्रतीतिमा
त्रेणाहंमुक्तइतिमत्वाऽग्निहोत्रादिकंत्यजति सनिरग्निःनिर्गतोऽग्निर्यस्मात्स
तथातद्वद्वशीकृतान्तःकरणःकरचरणचेष्टारहितःसन्नर्धनेत्रेतिमील
मिथ्याचारस्तिष्ठतिसोऽक्रियस्तथाविधः संन्यासीयोगीवानभवतीत्यर्थः॥१

वनमालीटीका

एवंमोतेवदयोगंसंक्षेपेणरमापतिः तस्यव्याख्यानरूपोयंषष्ठाध्यायःप्रतन्य
ते॰ तत्रसर्वकर्मानारंभेणयोगनिष्ठावक्तव्यातत्रत्याज्यत्वेनकर्मयोगस्य
हीनत्वशंकास्पाननिरासायाधिकारिणांकर्मयोगंस्तौति अनाश्रितइतिद्वा
भ्यांकर्मणांफलमनाश्रितोऽनपेक्षमाणः सन्कार्यंस्वस्यकर्तव्यतयाशा
स्त्रेणविहितंनित्यमग्निहोत्रादिकर्मकरोतियः ससकर्मापि संन्यासी
चयोगीचेति संन्यासोहित्यागः चित्तगतविक्षेपाभावश्चयोगःतौचास्यतत्
फलत्यागात्फलतृष्णारूपचित्तविक्षेपाभावाच्च कर्मफलतृष्णात्यागएवात्र
गौण्यावृत्त्यासंन्यासयोगशब्दाभ्यामभिधीयेते सकामानपेक्ष्यप्राशस्त्यकथ
नाय एतादृशकर्मानुष्ठानंसंन्यासयोगावश्यंभाविनावित्यर्थः अतोयद्यपि व॰
ननिरग्निरग्निसाध्यश्रौतकर्मत्यागी नचानिःक्रियःअग्निनिरपेक्षश्रौतस्मा
र्तक्रियात्यागी तथापिसंन्यासीयोगीचेतिमन्तव्यः अनाश्रितइत्यनेनैवसर्वक

र्मसंन्यासित्वलक्षणं निरग्निरिति व्यर्थं स्यादित्याशङ्क्याह न सर्वाणि कर्माणि फलं नि
रग्निरिति संन्यासी क्रियाशब्देन चित्तवृत्तिरूपफलस्याक्रियश्चेति निरुद्धचित्तवृत्तिर्यो
गी च कथ्यते तेन न निरग्निः संन्यासी मन्तव्यो न चाक्रियो योगी मन्तव्य इति यथा
संख्येनोभयव्यतिरेको दर्शनीयः एवं सति न तन्न हृदयमप्युपपन्नमिति द्रष्टव्यम् ॥१॥

ब्रह्मवैजयन्तीटीका

पञ्चमान्ते समभूतो यो योगः परिकीर्तितः तस्यार्थो विस्तरः प्रोक्तः षष्ठेऽस्मिन्स्थि
तप्रज्ञये १ इत्येवं ज्ञानगर्भकः स्वस्वरूपदर्शनासाधारणसाधनभूतः सपरिक
रः कर्मयोगः प्रोक्तः इदानीं यः पञ्चमान्ते स्रोकत्रयेण ज्ञानकर्मसाध्यात्म
दर्शनाभ्यासरूपः साङ्गः सविस्तरः सपरिकरोऽष्टाङ्गयोगः स प्रोच्यते तत्रादौ
योगस्यासाधारणसाधनरूपं कर्मयोगं वक्ति योगशिरस्कस्य कर्मयोगस्य ज्ञा
नकारत्वं पार्थसारथिर्भगवान्पार्थं प्रोवाच अनाश्रित इति यथेह कर्मजितो
लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते परीक्ष्य लोकान् कर्मजिता
न् ब्राह्मणो निर्वेदमायादित्यादिश्रुत्युक्तमिहामुत्र च कर्मफलं तत्तद्भोगरूपमना
श्रितोऽनाकाङ्क्षितवान्सन् यो मुमुक्षुः कार्यं श्रीपुरुषोत्तमस्य मदितकारिणा
मदुपदेष्टृनारायणरूपं मम परमपुरुषार्थभूतमेतद्व्यतिरिक्तं किंचिदपि वस्तु
तत्त्वं मम प्रयोजनं नास्तीत्येवं प्रयोजनेन तन्निश्चयेन करणीयं कर्मानुष्ठानं करोति
एकस्य शब्दोऽवधारणार्थको यः स योगमवच्छेदरूपाद्वितीयस्तृतीयश्च पुनरर्थ
कः स संन्यासी एव ज्ञानयोगनिष्ठ एव च पुनः स योगी एव कर्मयोगनिष्ठ एव
भवति स उभयनिष्ठ एव भवतीत्यर्थः न निरग्निः निर्गतोऽग्निहोत्रलक्षणं कर्म
यस्मात्स तथा पूर्वोक्तयज्ञादिकर्माप्रहतो न किन्तु तेषु प्रहत एव न चाक्रियः स
व केवलं ज्ञानयोगनिष्ठ एव भवतीति न किं तु कर्मयोगनिष्ठोऽस्यर्थः १॥

मधुसूदनीटीका

कर्मणो फलमनाश्रितोऽनपेक्षमाणः फलाभिसंधिरहितः सन् कार्यं कर्तव्यत
या शास्त्रेण विहितं नित्यमग्निहोत्रादिकर्म करोति यः स कर्म्यपि सन् संन्यासी
च योगी चेति स्तूयते संन्यासो हि त्यागः चित्तगतविक्षेपाभावश्च योगः तौ चास्य
विद्येते फलत्यागात्फलतृष्णारूपचित्तविक्षेपाभावाच्च कर्मफलत्यागमात्रमेव
गौण्या वृत्त्या संन्यासयोगशब्दाभ्यामभिधीयते सकामानपेक्ष्य प्रशंसार्थं कथना
य प्रवणं भावितो हि निष्कामकर्मानुष्ठानं मुख्यौ संन्यासयोगौ

योगस्तु त्रिभिः श्लोकैः पञ्चमान्ते यदीरितं षष्ठ आरभ्यते ध्यायस्तु द्या ख्यानाय विस्तरात् अत्र सर्वकर्मत्यागेन योगवि धास्यन् तत्याज्यत्वेन हीनत्वमाशङ्क्य कर्मयोगं द्वाभ्यां स्तुवन्

नचाक्रियः अग्निनिरपेक्षस्मार्तक्रिया
त्यागी च न भवति

तस्मादयद्यप्ययं न निरग्निः अग्निसाध्यश्रौतकर्मत्यागी न भवति तथापि संन्या
सी च योगी चेति मंतव्यः अथवा न निरग्निर्न चाक्रियः संन्यासी योगी चेति मंतव्यः
किंतु साग्निः सक्रियश्च निष्कामकर्मानुष्ठायी संन्यासी योगी चेति मंतव्य इति लक्ष्य
ते अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इत्यत्रेव प्रशंसालक्षणया तत्त्वंद्वयोप
पत्तिः अथवाक्रिय इत्यनेनैव सर्वकर्मसंन्यासिनि लब्धे निरग्निरिति व्यर्थं स्यादि
त्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य निरग्निरिति संन्यासी क्रियाशब्देन चित्तवृ
त्तीरुपलक्ष्याक्रिय इति निरुद्धचित्तवृत्तिर्योगी च कथ्यते तेन न निरग्निः संन्यासी मं
तव्यो न चाक्रियो योगी मंतव्य इति यथासंख्यमुभयव्यतिरेको दर्शनीयः एवं
सति तत्त्वंद्वयमप्युपपन्नमिति द्रष्टव्यं १ ॥

सदानंदीटीका

षष्ठेऽध्याये ध्यायसज्जननुनिवेद्यं मधुरिपोर्गुणानस्मारं स्मारं भवजलधिपारंगम।
यतः रसं पायं पायं यदुपतिगिरो वेदशिरसामृतं भूयो भूयो मम हरिपदाब्जे प्रवि
शत १ ज्ञानयोगः पुरा प्रोक्तः ससंन्यासो विमुक्तिदः कर्मापि चित्तशुद्ध्यर्थं प्रोक्तं।
कृत्स्नार्चने परं २ चित्तशुद्धावपीदानीं विक्षेपसति योगिनां निर्वाणशांतिरूपं यत्त
त्वं न स्यात्तदंजसा ३ येनोपायेन तत्सिद्धिः स्यादुपायः स उच्यते तत्तद्रूपतया यो
गः पंचमोत्तमपीरितः ४ स एव विस्तरेणात्र षष्ठाध्याये प्रपंच्यते तत्रादौ कर्म।
णां चित्तशुद्धिहेतुतया स्तुतिः ५ क्रियते कामसंत्यागाद्योगसंन्याससाम्यतः फ ना
लाभिसंधिशून्यः सन्नित्यं कर्म करोति यः ६ श्रोतस्मान्न स संन्यासयोगयोः फल।
मश्नुते निरग्निरक्रियो यस्तु संन्यासस्तस्य आश्रमः ७ ननु निषिद्धो हरिणा क्रियते क
र्मणां स्तुतौ किं तु कामपरित्यागमात्रेणैव सत्कर्मिणः ८ क्रियते स्तुतिरित्येवमा
श्रयो गम्यते हरेः फलाभिलाषसंत्यागी विक्षाराधनतत्परः ससंन्यासी फलत्या।
गाद्योगी चित्तसमाधितः निरग्निरित्यनेनोक्तः संन्यासी कर्मवर्जितः ९ अक्रिय।
श्चित्तसंरोधाद्योगीत्यत्र विवेचनं यद्यपीदृक् कर्मण्यस्ति तथापि स्तूयते न तथा ११ का
मनात्यागसाम्येन संन्यासीत्यादिशब्दितः १२ ॥ १ ॥

नीलकंठीटीका

इतोऽध्यायांते सूचितं ध्यानयोगं विवरीतुमिच्छंस्तत्राधिकारहेतुत्वात्कर्मयोगं स्ता
वत्तौति द्वाभ्यां अनाश्रित इति यः कर्मणां फलं अनाश्रितोऽनपेक्षमाणः कार्यं अ
वश्यकर्तव्यं नित्यं कर्म करोति स एवं फलसंकल्पत्यागात् संन्यासी च योगी च भव

ति न तु निरग्निर्यो विधितः श्रौतस्मार्तकर्मत्यागी स एवं संन्यासी नापि अक्रियस्त्यक्तवाङ्मनःकायक्रिय एव वा योगीति १ ॥

आनन्दीटीका

अतीतानंतराध्याये हि योगधारणास्तत्फलं च प्रपंचयितुं संन्यासस्य महत्वाद्धोऽङः त्वमासुमयोगतः इति प्रक्रांतं तत्र संन्यासयोगशब्दयोरनिर्वचनादर्जुनस्य चतुर्थाश्रमे कर्मसंन्यासशंकानिवारणार्थं श्रीभगवानुवाच कर्मणः फलमनाश्रितः फलासंगं त्यक्त्वा कार्यं चोदितमवश्यकरणीयं यः कर्म करोति स एव यत्र क्वाप्याश्रमे वर्तमानः पुरुषः संन्यासी च कर्म कुर्वन्नेव फलत्यागात्संन्यासिशब्दवाच्यश्च भवति योगी च पुनर्यथा ज्ञानपूर्वकं कर्मानुष्ठाना योगिशब्दवाच्यश्च भवति चकारद्वयमेकस्यैवैकदा द्वावेवानुष्ठातं समुच्चयार्थं न निरग्निर्न चाक्रियः अग्नित्यागात्कर्मत्यागाच्च संन्यासशब्दवाच्यो न भवति १ ॥

रामकंठीटीका

आत्मज्ञानविहितकर्मसमुच्चयानुष्ठानरूपस्य सकलप्रकरणसिद्धांतस्य प्रथमेनाध्यायेन प्रस्तावनामात्रमुपक्रांतम् द्वितीयेन ज्ञानकर्मणोः स्वरूपमुपदर्शितम् तृतीयेन तयोर्ज्ञानकर्मणोर्भिन्नानुष्ठानविषयत्वभ्रांतिरपाकृता चतुर्थेनैवंविधसमुच्चयानुष्ठानरूपस्य योगस्य परस्मात्कारणात्प्रवृत्तिरुपदर्शिता कर्मणश्च नानारूपत्वं पंचमेन तयोर्ज्ञानकर्मणोः संन्यासयोगाविति प्रदर्शितम् इदानीं तयोर्ज्ञानकर्मणोः समुच्चयेनानुष्ठानमनयोरुपदिष्टयोः किं सर्ववर्णैः सर्वाश्रमाच्चारपि क्रियंते उत नियताः केचनेति संशयनिरासार्थं सर्वसाधारणमस्य प्रतिपादयितुमध्यायांतरेणाह श्रीभगवानुवाच कर्मफलं तस्य तस्य कर्मणो यज्ञादेः क्रियमाणस्य फलं स्वर्गादिभोगात्मकमनाश्रितोऽनभिसंधानादनालंबितः सन् यः पुमान् कार्यं शास्त्रकर्तव्यमिति वर्णाश्रमनियमेन वेदितं कर्म करोति अनुतिष्ठति स संन्यासी त्यागवान् योगी च समाहित उच्यते तेन सर्ववर्णैः सर्वाश्रमिणां मात्रमेतत्फलसमुच्चयानुष्ठानेऽपि कृता ॥

इत्युक्तम् कर्मफलानभिसंध्यानमात्रेण संन्यासलक्षणं तदुक्तविहित
कर्मानुष्ठानेन च योग इति संग्रहेण सकलप्रकरणप्रतिपाद्योर्थः सिद्धांती
कृतः तत्र यथाप्रतिपादितात्मज्ञानैकतानतान्तःकरणतया व्यति
रिक्तसर्वात्मकफलनिरभिकांक्षः सन् रागादिदोषनिर्मुक्तस्वभाव
त्वादधिकारकालात्प्रभृति प्रशस्तं कर्म योनुतिष्ठति स ब्राह्मणोक्षत्र
वियोवैश्यः शूद्रोवा ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा सर्वएव संन्यास
सी योगी च भवति न पुनर्निरग्निरेवाक्रिय एव वा निरग्न्यक्रियशब्दाभ्यां
ब्रह्मचारी यतिश्च लक्ष्यते यतः केचिदनयोरेवाश्रमयोः पर्यालोचितप
रमार्थता नैष्कर्म्याभिमानिनो मोहेन तं मन्यमाना ब्रह्मचारियती प
व संन्यासिनौ योगिनौ च प्रतिजानते यो हि ब्रह्मचर्यादेव परिव्राजकध
र्ममाश्रितः सदारपरिग्रहाभावादनाहिताग्निः सन्मूलादेव परित्यक्तय
ज्ञादिक्रियो ब्रह्मचार्येकः संन्यासी च योगी च तेषां मतः यो वाश्रमत्रया
नुष्ठितः स्वाध्यायप्रयोगदानाध्यापनयजनप्रतिग्रहादिकाः सकलाः क्रि
याः परित्यज्य निराशिषमाश्रममाश्रितः स यतिर्द्वितीयः संन्यासी यो
गी च तेषां च मतः द्वयोरप्यनयोरेवं वं परे तु नाक्रियाणां त्यागे सति मो
क्षफलभागित्वानि [illegible]
[illegible] ॥ लौकिकी वल्लभमरीका

एवं कर्मयोगेनाविधानयोगं विना मुक्तिमावहन् ज्ञानकाष्ठाधिरोहेन
स्यादित्यतः षष्ठाध्याय आरभ्यते तत्र प्राक्तनेनाध्यायगणेन साधितमर्थं
श्लोकद्वयेन श्रीभगवानुवाच यः कर्मफलमनभिसंधानादनाश्रितः
कार्यमवश्यकर्तव्यं शास्त्रीयं स्वाभाविकं वा कर्म करोति स एव फलानभि
लाषेण संन्यासी स एव स्वस्वभावविहितत्याग्योगी वोच्यते इति शेषः न
उक्तलक्षणोपि सर्वकर्माणि संन्यस्य नष्टाकांक्षो देहयात्रिणा त्यजेत्कर्मफलं
यो वा सत्यागीत्यभिधीयते अग्निशब्दः शास्त्रविहितकर्मोपलक्षकः तेन
निरग्निः शास्त्रीयकर्मत्यागी संन्यासी योगी वा न मंतव्यः न चाक्रियः स्वा
भाविककर्मत्यागी उक्तप्रकारसंन्यासी योगी वा मंतव्यः न निरग्निरित्या
दिना यमर्थोपि धन्यते निरग्निश्च न भवति निष्क्रियश्च न भवति अपि च सं

न्यासीत्यत्रुतम [illegible]
[illegible]
[illegible] १ ॥

पंचोलीटीका

पंचमोध्याये ध्यानयोगस्य सम्यग्दर्शनं प्रति अंतरंगस्य साधनस्य सू
त्रभूताः श्लोकाः स्पर्शान्कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोयं
षष्ठोध्यायः आरभ्यते तत्र सम्यग्दर्शनं प्रति संन्यासात् ध्यानयोगो बहि
रंगमपि कर्म यावद् ध्यानयोगारोहणसमर्थस्तावत् गृहस्थेन अधि
कृतेन तमारोढुमिच्छता पुरुषेण कर्म कर्तव्यमित्यनेन संस्तौति अना
श्रितेति यः कर्मफलमनाश्रितः कर्मफलेतिःस्पृहः कार्यं नित्यं नैमित्ति
कं कर्म करोति च पुनः स संन्यासी च पुनः स योगी चित्तसमाधानयुक्तो
ज्ञातव्यः च पुनः न निरग्निः अग्निसाध्यक्रियारहितः च पुनः नाक्रियः न
स्मार्तक्रियारहितः एवं संन्यासी योगी च भवति कथं कर्मफलसंन्या
सात् संन्यासीत्वं योगांगत्वेन च कर्मानुष्ठानात् कर्मफलसंकल्पस्य चा
चित्तविक्षेपहेतोः परित्यागात् योगित्वं चेति १ ॥

भगवीरसमिद्बोधिनी ॥

ॐ श्रीकार्तवीर्यार्जुनाय नमः ॥ अथ पूर्वैरध्यायगणेन प्रति-
पादितमर्थं पुनरपि निश्चयार्थाय भगवानुवाच अनाश्रि
त इति कर्मणां स्ववर्णाश्रमोचितानां युद्धादिव्यापाराणां फलं
ज्ञातिहिंसाजन्यं पापमनाश्रितो मनसाकलयन् कार्यं मास्तेन
चोदनात् अवश्याचरणीयं कर्म स्ववर्णाश्रमोचितं युद्धादिलक्षणं
व्यापारं यः करोति अनुतिष्ठति स संन्यासी योगी च भवति अन्य
थाप्रतिपन्नानां पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः स्वज
नं हि कथं हत्वा सुखिनः स्याम माधव इत्यादिरूपाणां संकल्पानां सं
न्यसनात् अवश्यानवत्वेनावश्याचरणीयेषु कर्मसु प्रवृत्तिलक्षणा

कोफलत्वत्वाच्च ननिरग्निरिति निरग्निरनाहिताग्निरकृतदार
परिग्रह इतियावत् सर्वपरिग्रहस्वीकारेनेतरंतत्त्यागीवा त
द्धाहिताग्निराहिताग्निनावगार्हस्थ्यंलक्षते तथाच अग्नेगार्हस्थ्याति
क्रांतोनिरग्निर्दारादित्यागीसंन्यासीनभवति संकल्पनामत्या
गात्नवाक्रियइति क्रियाःस्वजात्युचिताव्यापारास्तद्रहितो॰
क्रियः सचयोगीनभवति कर्ममात्ररहितस्य लक्षणमध्यस्थिते:
शरीरयात्राप्रसिद्धेश्चकर्मणामवश्यपाचरणीयत्वेसिद्धेसमाहि
ततालक्षणयोगासिद्धेरितिभावः अथवाच निरग्निरग्निसाध्ये
ष्टाख्यकर्मत्यागी अक्रियोनग्निसाध्यपूर्ताख्यकर्मत्यागीच
नसंन्यासीति योगीतिच किंतुइष्टपूर्ते आचरन्नेवसंन्यासी
विरुद्धसंकल्पत्यागात् योगीच नत्वसावधानमनस्कत्वादि
तिभावः १॥

अथभाष्य

ज्ञानांतरंगंसमाधियोगमारुरुक्षनेनध्यायेन विवक्षितंसन्या
समाह योगेनसहनाश्रितइति चतुर्थाश्रमिणोप्यग्निः कि
याचोक्ता दैवमेवत्यादौ अग्निर्ब्रह्मचतत्त्वजाक्रियान्यासाश्र
मेस्स्मतेतिच तस्मान्निरग्निरक्रियः सन्यासीयोगीचनभवा
त्येव सन्यासोपियोगांतर्भूतइत्याह १

भाषानुवाद

श्रीधरस्वामी छठयें अध्यायके आरम्भमे वर्णन करते हैं कि मनु
ष्यों को चित्तशुद्ध होनेसे भी ध्यानके विना केवल सन्न्यास मात्रसे मुक्ति
नहीं मिलती है इसी हेतु से श्रीभगवानछठयें अध्यायमे ध्यानयोग
विस्तार करि कहते हैं कि पञ्चम अध्यायके अन्तभागमे संक्षेप से क
हा गया जो ध्यानयोग सोई विस्तार करने को छठयें अध्यायका आर
म्भअर्थात् सर्व कर्म्माणि मनसा सन्न्यस्यास्ते सुखं वशी इस ५ अध्यायके ११
श्लोक से सबकर्म त्याग पूर्वक ज्ञाननिष्ठा की प्रशंसा करने से और
कर्म्म अनुष्ठान क्लेशकारी है इससे हठात् कर्मत्याग की अवस्था विना
भी कर्म्म का त्याग मनुष्यों के मनमे होय उठै है सो तिसके निवारन
के अर्थ कर्म्म छोड़ने से कर्म करना श्रेष्ठ है यह कहि कर्म्मयोगकी
बड़ाई करते हुये भगवान कहते हैं कि अनाश्रित कहे कर्म्म फल
की आकाङ्क्षा रहित होय कर सब कर्म्म अवश्य ही कर्तव्य है इस वि
चार से जो विहित कर्म्म का अनुष्ठान करै सोई सन्न्यासी औ सोई योगी
है नहीं तो निरग्नि कहे अग्निसाध्य यज्ञादि कर्म्म त्यागी औ अक्रिय
अर्थात् वेअग्नि के कर्म्म कुआं ताल बावड़ी खननतथा दानादि कर्म्म
त्यागी होके लोग अपनेको योगी समझैंगे किन्तु ऐसा नहीं है ता
त्पर्य यह कि फल ही का त्याग उचित कर्म्मका त्याग नहीं अर्थात्
उपर लिखे सब कर्म्म विष्णुअर्पण करना ही चाहिये सोई कहा अ
नाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः १॥

दोहा॥

कर्मफलआश्रयत्यागकेकार्यकर्मकरेजोय सोसंन्यासीयो
गीसोनहिनिरग्निअक्रियहोय १॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव नह्यसं।
न्यस्तसंकल्पो योगी भवति कश्चन २॥

शाङ्करभाष्यं

गौणमुभयं तत्र न मुख्यसंन्यासित्वं योगित्वं चाभिमतमित्येतमर्थं दर्शयि
तुमाह यं संन्यासमिति यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसंन्यासं सं
न्यासमिति प्राहुः श्रुतिस्मृतिविदो योगं कर्मानुष्ठानलक्षणं तं परमार्थसं।
न्यासं विद्धि जानीहि हे पाण्डव कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन नि
वृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमंगीकृत्य तद्भाव उच्यत
इत्यपेक्षायामिदमुच्यते अस्ति परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्म।
योगस्य यो हि परमार्थसंन्यासी सत्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्
फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति अयमपि कर्मयोगी
कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्येतमर्थं दर्शयिष्यन्नाह नहि।
यस्मादसंन्यस्तसंकल्पोऽसंन्यस्तोऽपरित्यक्तः फलविषयसंकल्पोऽभिसन्धिर्येन
सोऽसंन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति न सं
भवतीत्यर्थः फलसंकल्पस्य चित्तविक्षेपहेतुत्वात्तस्माद्यः कश्चन योगी कर्मी
संन्यस्तफलसंकल्पो भवेत् स योगी समाधानवान् भवति न विक्षिप्तचित्तो भ
वति चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वात् इत्यभिप्रायः योगाङ्गत्वे
न कर्मानुष्ठानात् कर्मफलसंकल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्यो।
गित्वं चेति संन्यासित्वं चाभिप्रेतमुच्यते एवं परमार्थसंन्यासकर्मयोगयोः
कर्तृद्वारकं संन्याससामान्यमपेक्ष्य यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्ड
वेति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वमुक्तं २॥

आनन्दगिरिटीका

सम्भवति मुख्ये संन्यासित्वादौ किमिति गौणमुभयमभीष्टमित्याशंक्य मु
ख्यस्य कर्मण्यसम्भवाद्गौणमेव सत्वं निषिद्धार्थे तदिष्टमित्यभिप्रेत्याह न पुन
रिति चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वं कर्मि
णोऽपि युक्तं संन्यासित्वं तु तस्य विरुद्धमिति शङ्कमानं प्रत्युक्तेऽर्थे श्लोकमव।
तारयति इत्येतमिति परमार्थसंन्यासं प्राहुरिति सम्बन्धः इतीदं संन्यास
स्य प्रामाणिकाभ्युपगतत्वादितीति शब्दार्थो योगफलत्वोपरित्यागसमा

अभिनवगुप्तटीका

सं७

यंसंन्यासमिति नयाच्चयोगमंतरेण संन्यासोनोपपद्यते एवंकल्पसंन्या

तप सेविनायोगोनयुज्यते तस्मात्तेनसंबद्धोयोगसंन्यासौ ननिरग्निरिति

दिनायमर्थोधन्यते निरग्निस्तुनभवतिनिष्क्रियश्चनभवति अयंसंन्या

सीत्युच्यते २ ॥

परमार्थप्रपाटीका

अथसाहचर्यंप्रकटयन्नाहयमिति भोपाण्डवस्तुस्त्वप्रकारेणयंसंन्यासं

प्राहुः प्रकर्षेणश्रेष्ठत्वेनाहुस्तंयोगंविद्धिहियस्मात्कारणादसंन्यस्तसं

कल्पः नसंन्यस्तः संकल्पोयेनसतथा कर्मनिष्ठोज्ञाननिष्ठोवानत्रकर्मनि

ष्ठस्यसंन्यस्तफलसंकल्पः ज्ञाननिष्ठस्यासंन्यस्तचित्तविक्षेपरूपसंकल्प

एवंविधः कश्चिद्योगीनभवति अत्रभगवदभिमतःसंन्यासशब्दार्थस्तु।

त्प सम्यक्प्रकारेणमनेचित्तशुद्धिद्वाराज्ञानमुन्यायस्मात्तएवकर्मोपरमःक

र्मसंन्यासःनतुकर्मत्यागः तदुक्तमध्यात्ममीमांसायां सम्यक्न्यासःस

मासिविमलतरधियःकर्मणांसंविदर्थेसंन्यासोयद्वदध्वास्वयमुपरमति

ग्रामवक्त्रंप्रवेश्य रेभान्तावदिहद्विभजतिफलभरंयावदुच्चैःप्रसूतेक्षामेप

श्चात्तथैवास्तमभिलषतोज्ञानमुन्याय कर्मेति भाष्यंचसम्यक्प्रकारेणवि

मलतरधियःशुद्धान्तःकरणस्यन्यसःसंविदर्थोज्ञानप्राप्त्यर्थंकर्मणांया

समाप्तिःसंपूर्णतासैवसंन्यासशब्दवाच्यानतुकर्मत्यागः अत्रदृष्टान्तमाह

यद्वदिति यथाअध्वामार्गःपथिकंग्रामवक्त्रंग्राममुखंप्रवेश्यस्वयमुपरम

ति यः पथिकेनापिग्राममुखंप्राप्तिव्यतिरेकेण अतएवमार्गोनत्यज्यतेकिन्तुमा

र्गःग्राममुखंदर्शयित्वास्वतएवोपरमति पुनर्दृष्टान्तान्तरमाह रंभेति रंभा

कदलीतावदेवोच्चैर्द्विभजतियावत्फलभरंप्रसूते पश्चात्फलभरप्रसवा

नन्तरंक्षामसमुपरमंभजति तथैवअस्तंमोक्षंअभिलषतोमोक्षार्थिनःपुरु

षस्यकर्मज्ञानमुन्यायस्वयमुपरमति २ ॥

भावमालीटीका

अथसंन्यासेपिसंन्यासपदप्रयोगनिमित्तंगुणयोगमाह यमितियंकर्मतत्फ

लपरित्यागंसंन्यासमितिप्राहुःश्रुतयः पुत्रैषणायाश्चवित्तैषणायाश्चलोकै

षणायाश्चव्युत्थायाथभिक्षाचर्यंचरन्तीत्याद्याः योगंफलेच्छाकर्तृत्वाभिमान

योस्त्यागेनविहितकर्मानुष्ठानात्संन्यासंविद्धि अत्रहेतुंस्वदतमित्याह नेवयं सा०

नस्यामेरेवस्यदतमस्रणोयमितिन्यायादन्यवाचकशब्दोमत्रप्रयुज्यमानःसार

यं बोधयति गौणाहमस्य सादृश्यमेवाह नहीति हि यतो संन्यस्तसंकल्पो
त्यक्तफलसंकल्पः कश्चिदपि योगी न भवत्यपि तु सर्वो योगी त्यक्तफलसं
कल्प एव भवतीति फलत्यागसाम्यात्सारूप्यं चित्तवृत्तिनिरोधसाम्याच्च गौ।
णा कर्मैव संन्यासी च योगी च भवतीत्यर्थः तथाह भगवान्पतंजलिः योग।
श्चित्तवृत्तिनिरोध इति २॥

ऊसैवेनपत्नीटीका

ननु सकलकरणवृत्तिवहिः प्रसरणात्मके कर्मयोगे निखिलकरणवृत्ति
निरोधरूपो ज्ञानयोगो भवता कथारोप्यते इति चेत्तत्राह यं संन्यासमि
ति हे पाण्डव पाण्डुनंदन नो तम कुलप्रसूत तत्त्वान्नवापं प्रश्नः सम्प्रवित्त एव निश्च
चितः यं ज्ञानयोगं संन्यासमिति त्वम्तापकारेणाशङ्कसे त्वं के ज्ञानयोगकर्म
योगात्मस्वरूपता: तमेव ज्ञानयोगं मोहवयोपायोगं कर्मयोगमेवत्वं विद्धि।
जानीहि रीति दर्शयति हि यस्मात् असंन्यस्तसंकल्पः संन्यस्तः परित्यक्तः स्य
संकल्पः फलाभिलाषो भोगाद्यभिलाषस्वयेन स तथा न संन्यस्तसंकल्पो ऽसंन्यस्तसं
कल्पो जनः कश्चन कश्चिदपि योगी कर्मयोगी न भवति किन्तु यः संन्यस्तसंक
ल्पः स एव ज्ञानयोगी भवेत् स एव कर्मयोगी चापि भवेत् यदैव ब्रह्मण्याधा
य कर्माणि नवद्वारे पुरे देही नैव कुर्वन्न कारयन् कर्तृत्वेन कर्माणि लोकस्य न
सृजति प्रभुरित्यायुक्तरीत्या तयाधात्म्यज्ञानेन प्रकृतौ परित्यक्ते हि कामुष्मि
कफलभोगादिसंकल्पः पुरुषो भवेन्न दैवाभयास्तौ न कर्मणोः कर्ता स भवे।
न्नान्यथेति भावः २॥

मधुसूदनीटीका

असंन्यासे ऽपि संन्यासत्वाह प्रयोगनिमित्तमनंगुणयोगं दर्शयितुमाह यं स
र्वकर्म तत्फलपरित्यागं संन्यासमिति शाङ्कः श्रुतयः न्यासमेवातिरेचयन्ती।
म ति ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षा
चर्यं चरन्ति न्यायायोगफलत्वस्य कर्तृत्वाभिमानयोः परित्यागेन विहितकर्मा
नुष्ठानेन संन्यासं विद्धि हे पाण्डव ब्रह्मवदन्ने ब्रह्मवादिनमिन्माहुः नेव यं संन्यासहे
ब्रह्मवदनमदर्शायमिति न्यायान्परशाह: परत्र प्रयुज्यमानः सादृश्यं बोधयति गो
णाहन्यान ह्यावारोपेणावा प्रकृतेन तु किं सादृश्यमिति तदाह नहीति हि यस्मा
त् असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पः कश्चन कश्चिदपि योगी न भवति

अपितु सर्वो योगी त्यक्तफलसंकल्प एव भवतीति फलत्यागसाम्यात् स्वात्रूप
चित्तवृत्तिनिरोधसाम्याद्गौण्या वृत्त्या कर्मैव संन्यासी च योगी च भवतीत्यर्थः
तथाहि योगः चित्तवृत्तिनिरोधः प्रमाणविपर्ययविकल्पनिद्रास्मृतयः इति चि
त्तवृत्तयः पंचविधाः तत्र प्रत्यक्षानुमानशाब्दोपमानार्थापत्त्यभावाख्यानि।
प्रमाणानि षडिति वैदिकाः प्रत्यक्षानुमानागमाः प्रमाणानि त्रीणीति योगाः अ
न्तर्भाव बहिर्भावाभ्यां संकोचविकासौ द्रष्टव्यौ अनयैव तार्किकादीनां मतभेदाः
विपर्ययस्तु मिथ्याज्ञानं तस्य पंचभेदाः अविद्यास्मितारागद्वेषाभिनिवेशाः त।
एव पंचक्लेशाः शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः प्रमाभ्रमविलक्षणः
सदर्थव्यवहारः शशविषाणमसत्पुरुषस्य चैतन्यमित्यादिः अभावप्रत्यया
लंबना वृत्तिर्निद्रा च तमरूपवृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदा
लंबना वृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रमित्यर्थः अनुभूतविषयाऽसंप्र
मोषः प्रत्ययः स्मृतिः पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः सर्ववृत्तिजन्यत्वादेते
कथनं लज्जादिवृत्तीनामपि एष्वेवान्तर्भावो द्रष्टव्यः एतादृशीनां सर्वासां चित्त
वृत्तीनां निरोधो योग इति च समाधिरिति च कथ्यते फलसंकल्पस्तु रागाख्य
स्तृतीयो विपर्ययभेदस्तन्निरोधमात्रमपि गौण्या वृत्त्या योग इति संन्यास इति
चोच्यते इति न विरोधः २॥

सदानंदीटीका

असंन्यासेपि संन्यासशब्दयोगयोः कारणं गुणयोगं हरिः शाह समुल्लणोद्दिना
यच १ येकर्मतत्फलत्यागप्राज्ञसंन्याससमागमाः फलाभिलाषकर्तृत्वाभि
मानत्यागयोगतः २ योगेनैव विडितत्वात्मसाधनत्वसमान्यतः अकर्णोक
र्णोम्मिप्राह संन्यासमहेश्वरे ३ कर्णेतत्सायमित्येवमायायाज्ञेण प्रयुज्यते।
परशाहः परत्रैव सारूप्यं ज्ञापनेज्जनैः सारूप्यमन्त्रेण पस्तिकामत्यागादि
कर्मिणः नात्यक्तफलसंकल्पो योगी भवति कश्चन ५ २॥

नीलकंठीटीका

केन साम्येनायं संन्यासी योगी चेति तत्र यतेऽतत आह यमिति यो हि त्यक्त
सर्वसंकल्पः स संन्यासी तादृश एव ध्यानयोगी अतो न तयोर्भेदः निःसंकल्प
स्तदस्य क्लिष्टदेतमोलक्षणमिति मैत्रायणीयोपनिषदुक्तस्य मोक्षल
क्षणस्य निःसंकल्पत्वस्योभयत्रापि तुल्यत्वात् अतोऽयमपि कर्मयोगी फ
लसंकल्पत्यागात् निःसंकल्पत्वसाम्यात्संन्यासी योगी च भवतीति तत्त्व

गी॰
टी॰
६॰

तदयमर्थः योगाधिकारसिद्धये निष्कामकर्माण्यनुष्ठेयानीति श्लोकद्वयतात्पर्यार्थः २ ॥

आनन्दटीका

एवं संन्यासिशास्त्रार्थं निरूपयित्वा योगिशास्त्रार्थमपि निरूपयति ॥ इति
प्रागुक्तनीत्या यं संन्यासं कर्मफलत्यागार्थमाहुः तं कर्मणां क्रियमाणा
नां ब्रह्मणि समर्पणरूपया न्यासयोजनया योगं योगशास्त्रार्थं विद्धि कर्मयोग
मेवोक्तनीत्या संन्यासशास्त्रार्थं जानीहीत्यर्थः अत्र हेतुमाह यस्मात् न सं
न्यस्तः संकल्पः फलास्पृहा येन तादृशः कश्चन योगी ज्ञानकर्मसमुच्चया
नुष्ठाता भवति अयं च संयमेन यं संन्यासं जित्वा वशीकृतया भूमेरुत्त
रभूमिजिगीषया त्यागमाहुः तं योगं चित्तवृत्तिनिरोधात्मकं जानीहि न ह्यसंन्य
स्तेन निरुद्धसंकल्पचित्तवृत्तिर्येन तादृशः कश्चन योगी योगाभ्यासी न भ
वतीत्यर्थः [illegible] २ ॥

तदेतत्केवलज्ञानवादिमतमनुपपन्न **रामकंठीटीका** मेवेति प्रतिपादयितुमाह ॥

एते ज्ञानमात्रवादिनः संन्यासं संज्ञायानैष्कर्म्यज्ञानरूपमर्थं कथयंति
ते योगं कर्मानुष्ठानमेव तं जानीहि यस्मात् संन्यासं विना योगस्ते भवता
स्ति किंतु स संन्यासः संकल्पस्य फलाभिलाषस्यैवोपपद्यते न तु कर्म
णः सर्ववर्णानां सर्वाश्रमेषु च कर्मावि रहात् यो किल यति ब्रह्मचारिणो
परिव्राजकौ कर्मत्यागेनाभिमतौ तौ गृहस्थवानप्रस्थाविव कर्मत्या
जतः स्वतयति ना दिसिद्धिकारणाकंविकर्मविशेषमनुतिष्ठत एव यथे
ष्टाचरणाद्धि तयोर्विकर्मस्यैव प्रर्यवस्यति तस्मात्संकल्पमात्रसंन्यासि
त्वात्संन्यासित्वं सिध्यतीति योगीयः सर्वदा सर्वथा स्वानेदामतनित्यत्वप
रमात्मलक्षणे ब्रह्मणि प्रतिष्ठां हेमत्यपतया संन्यस्तकर्मफलसंकल्पः
स योगी कार्यं कर्मणि समाधिमान् भवति नान्य इति यथोक्तयोः संन्यास
योगयोरेकेपुरुषानुष्ठानत्वेष्टयोः सर्वेवर्णाः सर्वाश्रमिणश्चाधिकृता
अनेन श्लोके न प्रतिपादिताः [illegible]
[illegible] २

लाक्षिकी [illegible] टीका

संन्यासयोगशब्दावन्योन्यपर्यायौ तथा च योगमंतरेण संन्यासो नोपपद्यते एवं
संकल्पसंन्यासं विना योगो न युज्यते तस्मात्ततत्संबद्धौ योगसंन्यासावित्याह ॥

ज्ञानमात्रवादिनो यमर्थं नैष्कर्म्यरूपं संन्यासमेवाभिरोचयन्तीत्यादि स्फुरति एवं
माश्रित्य संन्यासं संज्ञ्याकथयन्ति योगमुक्तप्रकाराकर्मानुष्ठानमेव तं संन्या
सं जानीहि ननु यथा सांख्यपादश्चारोपो ऽत्र च किं सादृश्यमित्याह नहीति न
संन्यस्तः कर्मफलयोः संकल्पो येन सो ऽसंन्यस्तसंकल्पो योगी न हि भवति
य एव सर्वदात्मनि समृद्ध्यो ऽहं सन्न्यस्त यात्यक्तकर्मफलसंकल्पः स एव योगी
कार्यं कर्म तत्फलसमाधानवान् नाम्नः कर्मत्यागी उक्तप्रकाराकर्माविरहात्
तस्मात्संकल्पत्यागेन चित्तविक्षेपाभावात् योगस्यापि संन्यासत्वं तदुक्तं
लाराव्ये उत्पन्नसहजानंदस्तत्त्वज्ञानरतः प्रिये सर्वसंकल्पसंन्यस्तः स वि
द्वान्कर्म संत्यजेत् मत्वं भाष्ययथाह्वलः पत्रं त्यजति निःस्पृहं तत्त्वं भाष्यत
थायोगी त्यजेत्कर्मपरिग्रहमिति [illegible]
[illegible] २ ॥

पंडोलीटीका

योगस्तुभयं न मुख्यं संन्यासित्वं योगित्वं च शक्ति अभिप्रायं दर्शयितुमाह यं
संन्यासमिति हे पांडव श्रुतिस्मृतिविदः यं संन्यासं सकर्मनत्फलत्यागल
क्षणं परमार्थसंन्यासमिति प्राहुः तं योगं कर्मानुष्ठानलक्षणं परमार्थसं
न्यासं विद्धि हि यस्मात् असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पः कश्चन यो
गी न भवति २ ॥

रसावीरसमिश्रोधिनी ॥

अथ संन्यासयोगयोरैक्यं प्रतिपादयति यं संन्यासमिति यं प्रा
रभ्यमाणाकर्मप्रत्यावकसंकल्पजातत्यागं संन्यासमिति संन्यास
पदाभिधेयं प्राहुः कथयंति पंडिता इति शेषः हे पांडव तं योगं
योगशब्दाभिधेयमपि विद्धि ननु कुतो नयोरैक्यमित्यत आह नही
ति हि यतः असंन्यस्तसंकल्पः अत्यक्तान्यथाप्रतिपन्नपापमेवा
श्रये दस्मानित्यादिरूपसंकल्पः कश्चिद्योगी सावधानो न भवत्यत
एव च कर्मसु प्रवृत्तिमांश्च न भवति अयं भावः संन्यासं विना योग

स्यान्निष्पत्तिरूपासिद्धिः योगं विनाच संन्यासस्य नैष्कर्म्यरूपासिद्धि
रित्येकस्यसिद्धौ सत्यामन्यस्यापि सिद्धिरविनाभाविनीति पर्याया
वेवैताविति २ ॥

मधुभाष्य

यं संन्यासमिति कामसंकल्पाद्यपरित्यागे कथमुपायत्वंस्या
दित्याशयः कियत्कालं कर्म कर्त्तव्यमित्यत इत्याह २

भाषा अनुवाद

यह सुनि अर्जुन ने पूछा कि हे कृष्ण किस कारण से वे मनुष्य योगी औ सन्यासी नहीं है इसपर कर्म योगको सन्यास प्रतिपादन करते हुये कहते हैं कि हे पाण्डव अर्जुन सन्यास मात्रही को जो सब श्रुतियोने श्रेष्ठ कहा है सोई फल सन्यास रूप कर्मको भी जानो जो कहो कि कैसे जाने तो कहते हैं कि श्रुति शास्त्रमे कहे जो है तैसो योगमे भी हैं सोई उक्त श्लोकसे कहते हैं कि कर्म्म निष्ट या। ज्ञान निष्ठजो होय पर फलकी इच्छा त्याग विना योगी नहीं इससे फल कामना मे जिसका चित्त विक्षिप्त नहीं सोई योगी औ सन्यासीहै सोई कहा नह्यसन्यस्त संकल्पो योगी भवति कश्चन २॥

दोहा

जाको जो संन्यास कहैं तिहयोगहूं पांडवजान नहिविनासंकल्पतजें कोउ योगी होत प्रमान २॥

13

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगा-
रूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

शाङ्करभाष्यं

ध्यानयोगस्य फलविशेषेण: कर्मयोगो बहिरङ्गसाधनमिति तं सन्न्यासत्वेन।
स्तुत्वाधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति आरुरुक्षोरिति आरुरु
क्षोरारोढुमिच्छतः अनारूढस्य ध्यानयोगे अवस्थातुमशक्तस्यैवेत्यर्थः कस्य तस्या
रुरुक्षोर्मुनेः कर्मफलसन्न्यासिन इत्यर्थः किमारुरुक्षोर्योगं कर्म कारणं सा
धनमुच्यते योगारूढस्य पुनस्तस्यैव शम उपशमः सर्वकर्मभ्यो निवृत्तिः
कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः यावद्यावत् कर्मभ्य उप।
रमते तावत्तावन्निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते तथा सति स
झटिति योगारूढो भवति तथा चोक्तं व्यासेन नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोप
रमः क्रियाभ्य इति ३ ॥

आनन्दगिरिकृतटीका

परमार्थसन्न्यासस्य कर्मयोगान्तर्भावे कर्मयोगस्यैव सदा कर्तव्यत्व।
मापद्येत तेनेतरस्यापि कृतत्वसिद्धेरित्याशङ्क्यानुवादपूर्वकमुत्तरश्लो
कतात्पर्यमाह ध्यानयोगस्येति भाविन्या वृत्त्या मुनेर्योगमारोढुमिच्छतोऽवि
द्यमानस्य योगारोहणस्य कर्म हेतुरुच्यते इति तेन योगमारूढस्यापि तत्
फलशमो तदेव कारणं भविष्यति तस्य कारणत्वं कुतः इत्याशङ्क्या।
याह योगारूढस्येति अनारूढस्येत्येतस्यैवार्थं स्फुटयति ध्यानेति मुनित्वं
कर्मफलसन्न्यासित्वमौपचारिकमित्याह कर्मफलेति साधनं चित्तशुद्धिद्वा
रा ध्यानयोगप्राप्त्यर्थमिति शेषः तस्येति प्रकृतस्य कर्मिणो ग्रहणं ए
वकारो भिन्नक्रमः शमशब्देन सम्बध्यते कस्मान्न्ययोगव्यवच्छेदेन शमो
हेतुरिति तत्राह योगारूढत्वस्येति सर्वव्यापारोपरमरूपोपशमस्य योगा
रूढत्वे कारणत्वं विवृणोति यावद्यावदिति सर्वकर्मनिवृत्त्या वा यासाभा।
वादवशीकृतस्येन्द्रियग्रामस्य चित्तसमाधाने योगारूढत्वं सिध्यतीत्यर्थः
सर्वकर्मोपरमस्य पुरुषार्थसाधनत्वे पौराणिकीं सम्मतिमाह तथा चेति।
एकता सर्वेषु भूतेषु वर्तनो द्वैताभावोपलक्षितत्वमिति प्रतिपत्तिः श
मता तेष्वेवोपाधिकविशेषेष्वपि सतो निर्विशेषत्वधीः समता तेष्वेवहि

गी॰ टी॰ ६

नवत्वं शीलं स्वभावसम्पत्तिः स्थितिः स्थैर्यं दारनिधानमहिंसनं आर्जवम
वक्रत्वं क्रियाभ्यः सर्वाभ्यः सकाशादुपरतिश्चेत्येतदुक्तं सर्वं यथा यादृश
मेतादृशं नाम ब्राह्मणस्य वित्तं धर्मसाधनमस्ति तस्मादेतदेवास्य निरति
शयं पुरुषार्थसाधनमित्यर्थः ३ ॥

स्वामिकृतटीका

[illegible]
[illegible] करोति
[illegible] संकल्प।
[illegible]

तर्हि यावज्जीवं कर्मयोग एव प्राप्त इत्याशंक्य तस्यावधिमाह आरुरुक्षोरि
ति ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसः तदारोहे कारणं कर्मोच्यते चित्त
शुद्धिकरत्वात् ज्ञानयोगमारूढस्य तु तस्यैव ध्याननिष्ठस्य शमः समाधिश्चि
त्तविक्षेपककर्मोपरमो ज्ञानपरिपाके कारणमुच्यते ३ ॥

पिशाचभाष्यं

ध्यानयोगस्य बहिरंगं कर्मेति यावद्ध्यानयोगारोहणासमर्थस्तावत् गृह
स्थेनाधिकृतेन कर्म कर्तव्यमतस्तां स्तौति भगवान् ननु किमर्थं ध्यानयोगा
रोहणसीमाकरणं यत्तावता हि यमेव विहितं कर्म यावज्जीवं तेन तदारुरुक्षोर्यो
गमारुरुक्षोरारोढुमिच्छोर्मुनेः कर्म कारणं साध्यसाधनमुच्यते योगारू
ढस्य तस्यैव कर्मणः शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगा
रूढस्य साधनमुच्यत इत्यर्थः आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति
विशेषणादारूढस्य च शममेव संबंधकरणात् आरुरुक्षोरारूढस्य च शमः
कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत् [illegible] तदारुरुक्षोरारूढस्य चेति विशे
षणं विभागकरणं चोपपद्यत एवेति चेत्तत्र तस्यैवेति वचनाज्ज्ञानयोगग्रहणा
च्च योगारूढस्येति यश्चासीत्पूर्वमेवारुरुक्षुस्तस्यैवारूढस्य शम एव कर्तव्यं
कारणं योगफलं प्रत्युच्यत इति स्तुतो न यावज्जीवकर्तव्यत्वं प्राप्तिस्तस्यापि
कर्मिणः योगभ्रष्टादिवचनात् गृहस्थस्यैव कर्मयोगो विहितः षष्ठेऽध्याये
स योगभ्रष्टः कर्मगतिं कर्मफलं प्राप्नोतीति तस्यानाशंकानुपपन्ना
स्याद्यत् पुण्यं कृतं कर्म काम्यं नित्यं वा मोक्षस्य निमित्तादनारभ्यत्वेन स्वफलमा
रभते एवं नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात्फलेन भवितव्यमित्यवो

ण

वाम॰ अथवा प्यावेदस्यानर्णीकाप्रसंगादिति नचकर्मणामतिउभयथाप्यव
वनम॰ र्थवकर्मणोविभ्रंशकरं नुपपन्नेः कर्मकृतमीश्वरेसंन्यस्यमनः
कर्तेरिकर्मफलंनारभतइतिचेन्न ईश्वरेसंन्यासस्याधिकारफलहेतुत्वोपप। न
चेतत्व त्नेमोक्षायैवेति॰ कर्मणांकृतानामीश्वरेसंन्यासोमोक्षायैवनफलानरा
ययोगसहितोयोगाद्भ्रष्टइति अतस्तेप्रतिनाशोप्युक्तेवेतिचेन्नपका। पंका
कीयनविनाश्मानिराशीरपरिग्रहः ब्रह्मचारिव्रतेस्थितइतिच गृहस्थवा
नप्रस्थयोःकर्मसंन्यासविधानाच्चध्यानकालेस्त्रीसहायाशंकायैनैका
किनेविधीयते नचगृहस्थस्यनिराशीरपरिग्रहइतिवचनमनुकूलं वि
हायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः सर्वारंभपरित्यागीतितन्न
गवतात्व त्रेववचनानिदर्शितानितेविरुध्येन वर्णाश्रमप्रतिषेधस्तस्मान्मुनेर्योग
ति मारुरुक्षोः प्रोगृहस्थस्यस्याः स्त्रिहोत्रादिफलनिरपेक्षमनुष्ठीयमानेध्या। कर्म
नयोगारोहणसाधनत्वेनसत्वशुद्धिःद्वारेणप्रतिपद्यतेइतिसंन्यासीचयोगी
चेतिश्रूयते ३ ॥

रामानुजभाष्य

यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताइत्युक्तंहिकर्मयोगपर्वाप्रमादेनयो
गेप्रधयतीमाह योगमात्मावलोकनंप्राप्तुमिच्छोर्मुमुक्षोःकर्मयोगए
वकारणमुच्यते तस्यैवयोगारूढस्यप्रतिष्ठितयोगस्यशमःकर्मनिवृत्तिः
कारणमुच्यते यावदात्मावलोकनरूपमोक्षप्राप्तिस्तावत्कर्मकार्यमित्यर्थः ३॥

अभिनवगुप्तकृतटी॰

यद्यपिस्वनमसिंहासनेराज्यमितिवत्केवलस्यनिष्क्रियस्यसंन्यासि
त्वमुपपद्यतइत्युक्तं तथापि मुनेस्तावतःकर्मकरणीयंकारणंप्राप्तके
शमःप्राप्तभूमावनुपरमःकारणमत्रलक्षणम् ३॥

परमार्थप्रपाटीका

अथकर्मज्ञानयोरवधिमाह आरुरुक्षोरिति ॥ यमनियमादिसोपान
मार्गेण आरूढप्रायगतिप्राप्तुमिच्छोःपुरुषस्यकर्मकारणमुच्यते आरोह
णावधिकर्मकर्तव्यंविक्षेपशोधकत्वात् अथारूढस्यतस्यैवचित्तविक्षेपजनकत्वा
त् तथाप्यानसैर्वाहूरूढदर्शाप्राप्तस्यध्याननिष्ठस्यज्ञानपरिपाकार्थंशमःवि
क्षेपोपरमकारणं ३॥

गी
टी
घ

वनमालीटीका

ननु किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेयस्तत्राह आरुरुक्षोरिति योगो भगवति विवेकाख्यमारुरुक्षोरारोढुमिच्छोर्मुनेः शास्त्रविहितमग्निहोत्रादिकर्म भगवदर्पणधिया कृतं कारणमारोहणे साधनमुच्यते अनुष्ठेयमुच्यते वेदमुखेन मया योगारूढस्य विवेकाख्यं प्राप्तस्य तस्यैव शाकुर्मिणोपि। सतः शमः कर्मसंन्यास एव भगवदाप्तेर्मुख्यं कारणं साधनमुच्यते ३ ॥

उत्तमवैजयन्तीटीका

एवं संन्यस्तसंकल्प एव जनः कर्मयोगी भवति स एव संन्यासी चेत्तर्हि केदानीमेवंभूतो यः कर्मयोगः स एव ज्ञानस्यासाधारणं साधनं भवतीत्याह आरुरुक्षोरिति योगमात्मदर्शनरूपं ज्ञानयोगाभिधं महाङ्कं योगं आरुरुक्षोः आरोढुमिच्छोर्मुनेरात्मस्वरूपमननशीलस्य मुमुक्षोः कर्म कर्मयोगः कारणं निदानमुच्यते यः पूर्वमारुरुक्षुस्तस्यैवारूढस्य यतस्तोः नत्वकरणशुद्धिकृता ध्याननिष्ठायां प्रवृत्तस्य वर्तयति अतस्तस्यैव कारणत्वमित्यर्थः यः पूर्वमेवारुरुक्षुस्तस्यैवारूढस्य ध्याननिष्ठापात्रस्य समः कर्मोपरतिः कारणं हेतुरुच्यते तस्माद्यावदात्मदर्शनेन भवेत्तावत्कर्म कुर्वीतेत्यर्थः ३ ॥

मधुसूदनीटीका

तत्र किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेय इति नेत्याह ॥ योगमन्तःकरणशुद्धिरूपवैराग्यमारुरुक्षोरारोढुमिच्छोर्न त्वारूढस्य मुनेर्भविष्यतः कर्मफलत्यागिनः कर्मशास्त्रविहितमग्निहोत्रादिकं नित्यं भगवदर्पणबुद्ध्या कृतं कारणं योगारोहणे साधनमनुष्ठेयमुच्यते वेदमुखेन मया योगारूढस्य योगमन्तःकरणशुद्धिरूपं वैराग्यं प्राप्तवतस्तस्यैव पूर्वं कर्मिणोपि सतः शमः सर्वकर्मसंन्यास एव कारणमनुष्ठेयतया ज्ञानपरिपाकसाधनमुच्यते ३ ॥

सदानन्दीटीका

तत्किं कर्म प्रशस्तत्वादनुष्ठेयमास्तेः नेत्यधीशुद्धिवैराग्यमारुरुक्षोर्हि कर्म तत् १ शुद्धिशमस्य तस्यैव तत्त्यागो ज्ञानसाधनं अधिकारविभागेन कर्मतत्त्यागयोरपि २ कार्याकार्यव्यवस्थात्र प्रोक्ता भगवता मया ३ ३ ॥

नीलकंठीटीका

तत्र कर्मानुष्ठानस्यावधिमाह आरुरुक्षोरिति यावद्धि योगं यमनियमाद्य

ष्ठां योगोपेतमनसो मोक्षं द्वारारोढुमिच्छति तावत्कर्माण्यनुतिष्ठेत् तस्या-
रुरुक्षोर्मुने[illegible]कारणं तीव्रवैराग्योत्पादनद्वारा कर्म भवति तस्यैव यो-
गारूढस्य योगांगानुष्ठाने प्रवृत्तस्य विक्षेपासहस्य योगारोहे कर्मणां शमः
संन्यासः कारणमुच्यते नहि कर्मसु व्यापृतेनासमचित्तेन योगमनुष्ठा-
तुमीष्टे ३ ॥

आनंदटीका

योगं कर्मणो ज्ञानसंन्यासपूर्वक्रियामारुरुक्षोः वर्णाश्रमोक्तं कर्मैव कार-
णं योगारूढस्य चरमनिष्ठां प्राप्तस्य शमः संकल्पविकल्पसंन्यासो भवत्यः
कारणं संकल्पविकल्पसंन्यासे भवति तावत् शारीरिकं कर्मैव स्फूर्तिवोदित-
मपि कर्मानुवर्तते एव ततः परं बहिःसंवेदनाभावे बाह्येन्द्रियव्यापारापरम-
वत् श्रौतस्मार्तानामप्युपरम इत्युपोद्घाते निर्णीतमेव अयं च मुनेर्मनन-
शीलस्य योगमारुरुक्षोः संयमेन सर्वाणि तैलतरंभूमिमाक्रमितुमिच्छोः
कर्मयोगांगाष्टकस्य यमनियमादेस्सेवनं कारणं साधनमुच्यते योगारू-
ढस्यापि च तत्संयमेनैव कुर्वन्नकारयन्नितीयप्रकारशमः कारणमुच्यते ६
[illegible] ॥

रामकंठीटीका

किंतु दृष्टानुर्यथोक्तयोगविघ याहरुहतावस्थारच संभवतीति च तल्लक्षणं तस्य भेदं दर्शयति
पादयितमाह॥ मुनेः कीर्तिप्राप्समावृत्तानतान्मनननिष्ठत्वादनुष्ठातुर्यथोक्तयोगमा-
रुरुक्षोरारोढुकामस्य तत्र निर्विघ्नं वा निष्ठालिप्समानस्य कर्मैव वर्णाश्र-
मक्रमासामाक्रिया कारणं योगारोहहेतुः तस्यैव तथाविधस्यैव कारण-
भूतं कर्मानुष्ठानमेव यत्संस्पृशावनस्पर्शान्निच्छिन्नित्यादिना सर्वोपदिष्टनिर्वि-
वर्धाननित्याभ्यासवशात् योगारूढस्य योगे लब्धप्रतिष्ठवितत्वे सति पर-
मात्मसमापन्नस्य शमः संकल्पविकल्पतो भवत्य कारणं प्रयोजकं नि-
मित्तं किमुक्तं भवति आगममात्रेण प्राप्तोपदेशस्य प्राथमकल्पिकस्य यो-
गिनो योगप्रतिष्ठालाभो नतु कस्यापि तत्त्वाभिकारणं कर्मैवोपयुत्तया
वर्तते तस्मिंश्च प्रज्ञाह्यरोभ्यासस्य सानुष्ठिते ज्ञाते च प्रसादकाष्ठां प्राप्ते तं
कर्मात्यजनतपवशमः परमोपियत्नाकारणां संपद्यते [illegible]
[illegible] ॥

गी॰ यद्यपि द्युतमसिंहासनेरा लासिकी [illegible]लीटीका ज्यमितिवृत्तिश्रियं स्पासंन्यासत्वप्रसिद्धं
टी॰ ५ तथापि मुनेर्मुख्यानेपिमननशीलस्येयागेवरूमारोमुख्ययोगमारूढुमिच्छो:
तत्रावस्थानमसमर्थस्येवारुरुक्षोरित्यर्थ: कर्मेतिश्रुत्याकर्मानुष्ठानेका
रणंयोगारोहणे तदुच्यतेमयातस्यैव मुख्ययोगकाराभूतकर्माजहत
एव योगारूढस्य परमात्मसमापन्नस्य शम: संकल्पविकल्परूपतोभव
य: कारणंनिमित्तमुच्यते वेदादिस्वेनमया ध्यानयोगनिष्ठस्य तस्यैव स
र्वविकल्पोपरति: परमात्मसमापत्ते:प्रयोजकेत्यर्थ: अथवा तस्यैवयोगा
रूढस्ययोगेमुख्ययोगेआरूढस्यलब्धप्रतिष्ठस्यशम: कारणंलक्षणमुच्य
ते [illegible]मुच्यते ३॥

पंचोलीटीका

ध्यानयोगस्यकर्मफलनिरपेक्ष:कर्मयोग:संन्यासासापेक्षायावहिरं
गसाधनमितितेसंन्याससत्वेन स्तुत्वाअधुनाध्यानयोगसाधनत्वंकर्मणा
पदर्शयति आरुरुक्षो:इति योगआरूढमिच्छतोमुने:कर्मफलसं
न्यासिन:कर्मैवकारणंसाधनमुच्यते पुन:तस्यैवयोगारूढस्यश
म: कर्मोपशम: कारणंहेतु: ३

दशावीरसमसिद्धांतयिनी॥

आरुरुक्षोरिति मुने: शास्त्राचार्योपदिष्टार्थमननशीलस्य वि
रुद्धसंकल्पानांत्यागाज्जोषमास्थितस्यचयोगं समत्वलक्षण
मारुरुक्षोरारोढुमिच्छो: कथमहं समतालक्षणंयोगमाप्नुया
मितीच्छत: कर्मकर्मेन्द्रियव्यापार: कारणंस्वाभिलाषसाधन
मुच्यते योगारूढस्यसर्वाणंप्राप्तसमतारूपयोगस्य तस्यैव त
थाविधस्यैव कर्मकुर्वतएवशमोमनोविकल्पत्याग:कारणंफ
लजनकेसाधनंकथ्यते अयमत्राभिप्राय: समतालक्षणयोगवि
शिष्टस्यस्वधर्माचरणेनचतुर्वर्गाभि: फलमितिसिद्धांत: तत्रच

कर्मेंद्रियव्यापारेसत्येवविद्याविनयेत्यादौप्रतिपादितस्व
रूपसमतालक्षणायोगसाफल्यं कथंभीष्ममहंसंख्येइ॰
त्यादिरूपप्रारभ्यमाणप्रत्यावकमानसिकसंकल्पत्यागे॰
नकर्मकौशललक्षणकर्मयोगनिष्पत्तिरिति अतएवमु
नेरितिसाहजतोक्तिः एषवार्थेनैवकिंचित्करोमीत्यत्रस्फु॰
टीकृतोस्माभिः ३॥

मधुभाष्य

आरुरुक्षोर्मुनेरिति योगमारुरुक्षोरूपायमूर्तिमिच्छो॰
योगारूढस्यसमत्वलोपायस्यापरोक्षज्ञानिनइत्यर्थः कार
णपरमसत्त्वकारणं अपरोक्षज्ञानिनोपिसमाध्यादिफल
मुक्तं तत्रसर्वोपशमेनसमाधिरेवकारणंप्राधान्येनेत्यर्थः
तथापियथाभोक्तव्योपरमस्तदैवसम्यगसंप्रज्ञातसमा॰
धिर्जायते अन्यदाभगवच्चरितादौस्थितिः तद्योक्तं येवा
पश्यंतिभगवंतमुपवरमात्विनः परं तेषामेवचसमक्रसमा
धिर्जायतेन्यथा भोक्तव्यकर्मण्यवदीरजपेनकथयापि॰
वा वर्तयंतिमहात्मानस्वकृत्वास्वस्यपरायणइति ३॥

17

भाषा अनुवाद

जो फेरि जावत्जीवन कहे जिन्दगीभर कर्म्मयोग ही करना चहिये जो ऐसी शंका करो तो कर्मयोग की अवधि कहते हैं कि ज्ञानयोग मे आरूढ होने की इच्छा करने वाले पुरुष को उस राहके चढने मे कर्म्म ही कारण रूप कहा है क्यों कि निष्काम कर्म्म चित्तशुद्धि करता हैं और ज्ञानयोग आरूढ कहे ज्ञानी को शमकहे विक्षेपकारी। कर्म्म सकल का त्यागही उचित जिसलिये त्याग ज्ञान परिपाक का कारण रूप कहा है ३

दोहा

योग अभिलाषी जो मुनि ताको हेतक सो कर्म योगारूढ होय
ताहिको समता कारण धर्म ३॥

18

यदाहिनेन्द्रियार्थेषु नकर्मस्वनुषज्जते सर्वसं।
कल्पसंन्यासीयोगारूढस्तदोच्यते ४॥

शंकरभाष्य

अथेदानीं कदायोगारूढो भवतीत्युच्यते यदेति यदा समाधीयमानचित्तो भ
वति योगीहीन्द्रियार्थेष्विन्द्रियाणामर्थाः शब्दादयस्तेष्विन्द्रियार्थेषुकर्म
सु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते अनु
षङ्गं कर्तव्यताबुद्धिं नकरोतीत्यर्थः सर्वसङ्कल्पसंन्यासी सर्वान् संकल्पा
निहामुत्रार्थकामहेतून् संन्यसितुंशीलमस्येति सर्वसंकल्पसंन्यासीयो
गारूढः प्राप्तयोग इत्येतत्तदा तस्मिन् काले योगारूढउच्यते सर्वसंकल्पसंन्या
सीति वचनात् सर्वांश्चकामान् कामांश्चकान् सर्वाणिचकर्माणि संन्यसे
दित्यर्थः संकल्पमूलाहि सर्वेकामाः संकल्पमूलः कामो वै यज्ञाः संकल्प
सम्भवाः कामजानामि ते मूलं संकल्पात्त्वंहि जायसे नत्वां संकल्पयिष्या
मि तेन मे न भविष्यसि इत्यादिस्मृतेः सर्वकामपरित्यागेच सर्वकर्मसं।
न्यासः सिद्धोभवति सयथाकामोभवति तत्क्रतुर्भवति यत्क्रतुर्भव।
ति तत्कर्मकुरुते इत्यादिश्रुतिभ्यो यद्यद्धिकुरुते कर्म्मतत्तत् कामस्यचे
ष्टितमित्यादिस्मृतिभ्यश्च न्यायाच्च नहि सर्वसंकल्पसंन्यासे कश्चित् स्पन्दितु
मपिशक्तस्तस्मात् सर्वसंकल्पसंन्यासीतिवचनात् सर्वान्कामान्सर्वाणि
कर्माणिच त्याजयति भगवान् ४॥

आनन्दगिरिकृतटीका

योगशमौ कारणं कथनानन्तरं तस्याभिकालं दर्शयितुं श्लोकान्तरमवता
रयति अथेति समाधानावस्था यदेत्युच्यते अत एवोक्तं समाधीयमानचि
त्तो योगीति शब्दादिषु कर्मसु वानुषंगस्य योगारोहणप्रतिबन्धकत्वात्तद।
भावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं हीत्युक्तं सर्वेषामपि संकल्पानां
योगारोहणप्रतिबन्धकत्वमभिप्रेत्य सर्वसंकल्पसंन्यासीत्यत्र विवक्षितम
र्थमाह सर्वानिति सर्वसंकल्पसंन्यासेऽपि सर्वेषां कामानां कर्मणां च प्रतिब
न्धकत्वसम्भवे कुतो योगशमसिद्धिरित्याशंक्याह सर्वेति सर्वसंकल्पपरित्यागे
यथोक्तविध्यनुष्ठानमयत्नसिद्धमिति मत्वा तत्राह संकल्पेति मूलोन्मूल

गी· नैवतत्कार्यनिवृत्तिरयत्नसुलभेतिभावः तत्रप्रमाणमाह संकल्पमूलइति
टी· तत्रान्वयव्यतिरेकाविभिप्रेत्योक्तमुपपादयतिकामेति सर्वसंकल्पाभावेका
ष· माभाववत् कर्माभावस्यसिद्धत्वेपि कर्मणांकामकार्यत्वात्तन्निवृत्तिप्रयुक्ता
मपिनिवृत्तिमुपन्यस्यति सर्वकामेति यदुक्तंकर्मणांकामकार्यत्वंतत्रश्रुति
स्मृतीप्रमाणयति सयथेति सपुरुषः स्वरूपमजानन् यत्फलकामोभव
ति तत्प्राप्तिमनुष्ठेयतयाबुद्धौ धारयतीति तत्क्रतुर्भवति यत्क्रतुरनुष्ठेयत
यागृह्णाति तदेवकर्मबहिरपिकरोतीति कामाधीनं कर्मेत्यस्मिन्नर्थे
कामजन्यं कर्मेत्यन्वयव्यतिरेकसिद्धमिति द्योतयितुंस्मृतौहिशब्दः न्या
यमेवदर्शयति नहीति सर्वसंकल्पेति स्वापादावदर्शनादित्यर्थः नित्यनैमित्तिक
कर्मानुष्ठाने हरतिरस्तमिति वक्तमपिशब्दः श्रुतिस्मृतिन्यायसिद्धमर्थमुप
संहरति तस्मादिति ४॥

स्वामिकृतटीका

कीदृशोसौयोगारूढोयस्यशमःकारणमुच्यतेइत्यत्राह यदाहीति इंद्रियभो
गेषुशब्दादिषुतत्साधनेषुचकर्मसुयदानानुषज्जते आसक्तिंनकरोतितत्रहे
तुः आसक्तिमूलभूतान्सर्वान्भोगविषयान्कर्मविषयांश्चसंकल्पान्संन्य
सितुंत्यक्तुंशीलंयस्यसः तदायोगारूढउच्यते ४॥

टा पिशाचभाष्यटीका

अथेदानींकदायोगारूढोभवतीत्युच्यते यदाहीति यदासमाधानवित्तो
योगीहियस्मादिंद्रियार्थेषुइंद्रियाणामर्थाः शब्दादयस्तेष्विंद्रियार्थेषुक
र्मसुनित्यनैमित्तिककाम्यप्रतिषिद्धेषुप्रयोजनाभाववुद्ध्यानानुषज्जतेअनु
षंगंकर्तव्यताबुद्धिंनकरोतीत्यर्थः सकलसंकल्पसंन्यासीसर्वान्संकल्पा
निहामुत्रार्थकामहेतून्संन्यसितुंशीलंयस्यससर्वसंकल्पसंन्यासीयोगारू
ढःप्राप्तयोगइत्येतत् तदातस्मिन्कालेउच्यतेसर्वसंकल्पसंन्यासीतिभ ^योगारूढः
गवद्वचनात्सर्वाणिकर्माणिचसंन्यस्येत्यर्थः संकल्पमूलाहिसर्वेकामास्सं ^दि
कल्पमूलाःकामावैयज्ञाःसंकल्पसंभवाः कामजानामितेमूलंसंकल्पा
त्किलजायसेनत्वांसंकल्पयिष्यामिसमूलोविनशिष्यसीतिस्मृतेः सर्वसंक
ल्पपरित्यागेसर्वकर्मपरित्यागःसिद्धोभवति सयथाकामोभवतितत्क्रतुः ^र
भवतितत्कर्मकुरुतइत्यादिश्रुतिभ्यः यद्यद्धिकुरुतेतत्तत्कामस्यचेष्टितमि

^यत्क्रतुर्भवति ^कर्म

१८

निस्पृहतिष्ठस्य न्यायाच्च सर्वसंकल्पसंन्यासेन हि कश्चित्स्थे दिनमपि शक्तः
तस्मात्सर्वसंकल्पसंन्यासवचनात् सर्वान्कामान्सर्वाणि च कर्माणि त्याजय
ति च भगवान् ४ ॥

रामानुजभाष्यं

कदा प्रतिष्ठितयोगो भवतीत्यत्राह यदाहीति यदायं कर्मयोगी आत्मैका।
नुभवस्वभावतयेन्द्रियार्थेष्वात्मव्यतिरिक्तप्राकृतविषयेषु [illegible]।
तत्संबंधिषु कर्मसु च नानुषज्जते न संगमर्हति तदा हि सर्वसंकल्पसंन्यासी सं०
योगारूढ इत्युच्यते तस्मादारुरुक्षोर्विषयानुभवार्हतया तदनुषंगाभ्यास
रूपः कर्मयोग एव निष्पत्तिकारणं अतो विषयानुषंगाभ्यासरूपकर्मयोग।
मेवारुरुक्षुः कुर्यादित्याह ४ ॥

अभिनवगुप्तकृतटीका

एष पदार्थः प्रकाश्यते इंद्रियार्था विषयास्तदर्थानि च कर्माणि विषया।
र्जनादीनि अनयोर्बुद्धावरणमेवावधेयमित्याह ४ ॥

परमार्थप्रपा टीका

अथ योगारूढस्य स्वरूपमाह यदेति यदा यस्मिन्काले इंद्रियार्थेषु रूपरसा
दिषु तथा तत्कारणीभूतेषु कर्मसु चेष्टासु न सज्जते आसक्तिं न करोति अ
पि न केवलं कर्मेंद्रियनिरोधमात्रमित्याह सर्वेति सर्वे विषयभोगनिमि।
त्तीभूताः संकल्पास्तान् संन्यस्तुं शीलं यस्य स तदा तस्यामवस्थायां योगारू
ढ इत्युच्यते नान्यः अतो विषयत्यागे मोक्ष आसक्त्यैव बंधः स्यात् लोके रागादिस्व
भावे सज्जेतेत्याह ४ ॥

वनमाली टी०

कदा योगारूढः स्यादित्यत्राह यदेति यदा चित्तसमाधानकाले इंद्रियार्थेषु शब्दा
दिषु कर्मसु च नित्यनैमित्तिककाम्यनिषिद्धेषु नानुषज्जते स्वस्य स्वतोकर्तृ
त्वानुसंधानादाविर्भूतस्वरूपानंदानुभवेनैव तत्र प्रयोजनाभावादहमेतेषां
कर्ता मम एते भोग्याः इत्यभिनिवेशरूपमनुषंगं न करोति हि यतस्तस्मात्स
र्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमनेनेदं फलं भोक्तव्य
मित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां कामानां तत्साधनानां च क
र्मणां त्यागशीलस्तदा शब्दादिषु कर्मसु चानुषंगस्य तद्धेतोश्च संकल्पस्य योगा

गी. रोहणप्रतिबंधकस्याभावाद्योगे भगवति तैलधारावदविच्छिन्नमेकाग्रचित्तवृ-
टी. त्तिमान् स योगारूढ इत्युच्यते ४ ॥
भ.

ऊसमवैजयन्तीटीका

ननु योगारूढस्य मुमुक्षोः किंलक्षणं कदा च योगारूढो भवतीत्यपेक्षायामाह। यदा हीति यदा यस्यामवस्थायां हि निश्चयेनेंद्रियार्थेषु प्राकृतेषु शब्दादिविषयेषु कर्मसु च तत्तद्विषयप्राप्त्युपायरूपेषु नानुषज्जते आत्मदर्शनानंदेन तुच्छीकृताशेषप्राकृतविषयानुभवो मुमुक्षुरासक्तिं न करोति कीदृशः सर्वसंकल्पसंन्यासी सर्वान् ब्रह्मरुद्रेन्द्राद्यमरादीशाद्याधिपत्यजनितसुखभोगाभिलाषरूपान्प्राकृतविषयकामसंकल्पान् सम्यक् न्यसितुं परित्यक्तुं शीलं यस्य स तथा ईदृशश्च यदा भवति तदैव योगारूढः स्वस्वरूपध्याननिष्ठ उच्यते कथ्यते ४ ॥

मधुसूदनीटीका

कदा योगारूढो भवतीत्युच्यते यदा यस्मिन् चित्तसमाधानकाले इंद्रियार्थेषु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यलौकिकप्रतिषिद्धेषु नानुषज्जते तेषां मिथ्यात्वदर्शनेनात्मनः कर्तृभोक्तृपरमानंदाद्वयस्वरूपदर्शनेन च स्वप्रयोजनाभावबुद्ध्याहमेतेषां कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषंगं न करोति हि यस्मात् तस्मात्सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमेतत्फलं भोक्तव्यमित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां च कामानां तत्साधनानां च कर्मणां त्यागशीलः तदा शब्दादिषु कर्मसु चानुषंगाभावात्तद्धेतोश्च संकल्पस्य योगारोहणप्रतिबंधकस्याभावात् योगं समाधिमारूढो योगारूढ इत्युच्यते [illegible] ४ ॥

सदानंदीटीका

यस्मिंश्चित्तसमाधानकाले कर्मसु तत्फले तन्मिथ्यात्वधिया स्वात्मा कर्तृभोक्तृधियानतया १ अहं कर्तास्य भोग्यं तत्फलं मे चेति रंजनां न करोति परित्यक्तसर्वकामतया मुनिः २ इहामुत्रार्थकामानां हेतुनाध्यासिकामतः संन्यस्तशीलमस्यासौ प्राप योगस्तदोच्यते ३ [illegible] ४ ॥

नीलकंठीटीका

ननु योगपदेन मुख्यया वृत्त्या निर्बीजः समाधिरुच्यते तन्मात्रूढस्य कर्मणोऽत्या
गः स्वतःसिद्धत्वादविधेयत्वाशंकाप्रकृते योगारूढपदस्यार्थमाह यदाहीति
इंद्रियादिषु शब्दादिषु रमणीयेषु कर्मसु च तत्साधनेषु तद्दर्शनेष्वनुषज्ज
ते वैराग्यदार्ढ्यात्सक्तो न भवति नापि मनसा इदं मे स्यात् एतदर्थमहमिदं कर्म
कुर्यामिति संकल्पयति तादृशश्च सर्वसंकल्पसंन्यासी यदा भवति तदा योगारू
ढ इत्युच्यते यथा नीरुक्षुभुक्त्योपेतो यत्र नीरोगो व्यासंगान्तरं सम्यक् भोजनारूढ
एव भवति तथा तीव्रारुरुक्षावान् सर्वत्र वीतरागस्त्यक्तसर्वकर्मा योगारूढ ए
व भवति तावत्कर्माणि कर्तव्यानि ततः परं साधनानीत्यर्थः ४ ॥

ज्ञानेश्वरीटीका

योगारूढं लक्षयति ॥
अविभूतेन्द्रियजयस्य अहंकारादिपर्वकर्मसंपन्नार्थः ज्ञानकर्मसन्न्यासयार्थस्य
सगम एव [illegible] ४

रामकंठीटीका

अतएवप्रश्नांत सयोगारूढस्य लक्ष

एणमाह यदा हियस्यामेवावस्थायामिंद्रियार्थेषु विरुद्धेषु विषयेषु इंद्रियैः स्पृश्यमा
नेष्वपि कर्मस्वपि तत्साधनेषु यत्नतः प्रवृत्तिषु क्रियमाणेष्वपि नानुष
ज्जते सहजानंदतृप्तितया आसक्तिं भजते केवलमेव तत्स्वपदार्थजातं स्पृश
न्नपि स्वभावस्थ एव प्रतिष्ठ एव भवति तदा सर्वेषां संकल्पानां फलाभिस
धीनां संन्यासित्वात्त्यागित्वाद्योगारूढः योगी कर्मसमाधानारूढो लब्धप्रति
ष्ठ उच्यते [illegible]
[illegible] ४ ॥

लाक्षिकी [illegible]टीका

एषएवार्थः प्रकाश्यते ॥
यदा यस्यामवस्थायां विषयेष्विंद्रियैः स्पृश्यमानेष्वपि तदर्थेषु कर्मसु क्रि
यमाणेष्वपि नानुषज्जते आसक्तिं न भजते केवलमेव तत्स्वभावजातं स्पृ
श्यन्नपि स्वभावस्थ एव प्रतिष्ठ एव भवति अत्र हेतुगर्भितं विशेषणं सर्वेति
सर्वेषां कर्मणां फलानां च संकल्पसंन्यासनशीलं यस्य स तदा योगा
रूढ उच्यते योगे समाधाने आरूढो लब्धप्रतिष्ठः इति [illegible]
[illegible] ४ ॥

पंदोलीटीका

कदासौ योगारूढो भवति कीदृशश्चेति तदुभयमाह यदाहीति हियस्मा

गी॰ नुयदानइंद्रियार्थेषुशब्दादिविषयेषुप्रवृत्तःकर्मसुनित्यनैमित्तिककाम्य
टी॰ निषिद्धेषुनानुषज्जतेकर्तव्यताबुद्धिंकरोतिनतदासर्वसंकल्पसंन्यासीइहा
६ मुत्रार्थकामहेतून्सर्वसंकल्पान्त्यक्तुंशीलंयस्यसःयोगारूढःयोगारूढ
उच्यते ४

रणवीरसमिद्धोथिनी ॥

अथयोगारूढस्वरूपमाह यदाहीति हियाह्येनिश्चयेना इंद्रियार्थे
षितिच्छेदः इंद्रियार्थेषुचक्षुरादिग्राह्येषुशत्रुमित्रबंधादिसंबंधरू
पादिषुविषयेषुयानिकर्माणि अर्थाच्चक्षुरादीनांस्वस्वविषयग्र
हणरूपदर्शनादिव्यापारास्तेषुसत्स्वपिनायोरुफलत्वसाविशि
ष्टःक्षत्रियवीरःनानुषज्जते अर्थात्शत्रुमित्रबंधादिसंबंधिरूपादिषु
विषयेषुरागभयवीभत्सामोहादिभिरशृह्णीतोनतःकरणोयदानभ
वति तदायोगारूढस्तूच्यते अतोनासजतइत्यपेक्षायांहेतुग
र्भविशेषणमाह सर्वेति सर्वान्संकल्पान् अयंममशत्रुःकथंह
तव्य एवंहत्वायोगतिंयास्यामि अयंचबंधुनवधार्हः एतंहत्वा
त्वरणमपिजीवितास्थितेरित्यादिरूपान्मानसिकव्यापारान् सं
न्यसितुंत्यक्तुंशीलंयस्यसः ४॥

मधुभाष्य

योगारूढस्यलक्षणमाह यदेति सम्यगनुषंगकर्त्तैवभवति
उक्तंच स्मृतौ दोषफलयोर्ज्ञाविनरेषांप्रयत्नतइति अथयोगारो
ढः प्रयत्नेनकर्तव्यइत्याह ४॥

भाषा अनुवाद

जो पूंछो कि वह ज्ञानयोग आरूढ़ पुरुष जिसको विक्षेपकारी कर्म्मका त्याग कहा गया कैसा होता है तो कहते हैं कि जब इन्द्रियों के भोग जो विषय तिनमे और भोगके साधन भूत कर्मों मे आशक्त न होय और कर्म्म संकल्प को छोड़िसके तब उसको जोगारूढ़ कहते हैं ४

दोहा

जबनहिं इंद्री विषय मे कर्महि मे बंधहोय सभी कल्पनात्याग
तबयोगरूढ़ कह्यो सोय ४॥

22

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ५ ॥

शांकरभाष्य

यदैवं योगारूढस्तदा तेनात्मनोद्धृतो भवति संसारादनर्थजातादतः उद्धरेदिति उद्धरेत् संसारसागरे निमग्नमात्मनात्मानं ततउत् ऊर्द्ध हरेत् योगारूढतामापादयेदित्यर्थः नात्मानमवसादयेन्नाधोनयेत् नाधोगमयेत् आत्मैव हि यस्मादात्मनो बन्धुर्नह्यन्यः कश्चिद्बन्धुर्यः संसारमुक्तये भवति बन्धुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादिबन्धनायतनत्वात्तस्माद्युक्तमवधारणमात्मैव ह्यात्मनो बन्धुरिति आत्मैव रिपुः शत्रुर्योन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्मप्रयुक्त एवेति युक्तमेवावधारणमात्मैव रिपुरात्मन इति ५ ॥

आनन्दगिरिकृतटीका

योगारूढस्य किं स्यादित्याशंक्याह यदैवमिति योगारोहस्य दृष्टादृष्टोपायैरवश्यकर्तव्यतार्थं मुक्तिहेतुत्वं तद्विपर्ययस्याधःपतनहेतुत्वं च दर्शयति अतइति तत्र हेतुमाह आत्मैव हीति उद्धरणापेक्षामात्मनः सूचयति संसारेति संसारादुद्धरणं कीदृगित्याशंक्याह योगारूढतामिति योगशमावनास्यात्तत्र कर्तव्यमाह नात्मानमिति योगप्राप्त्युपायश्चेन्नानुष्ठीयते तदा योगाभावे संसारपरिहारासम्भवादात्माधोनीतः स्यादित्यर्थः ननु आत्मानं संसारे निमग्नं तदायो बन्धुस्तस्मादुद्धरिष्यति नेत्याह आत्मैव हीति कुतोऽवधारणमन्यस्यापि प्रसिद्धस्य बन्धोः सम्भवात्तत्राह न हीति मुक्तो बन्धुः सन्नपि संसारमुक्तये न भवतीत्येतदुपपादयति बन्धुरपीति स्नेहादीत्यादिशब्दात्तदनुसरणप्रवृत्तिविषयत्वं गृह्यते आत्मातिरिक्तस्यापि शत्रोरपकारिणः सुप्रसिद्धत्वादवधारणमनुचितमित्याशंक्याह योऽन्य इति ५ ॥

स्वामिकृतटीका

अतो विषयासक्तित्यागे मोक्षस्तदासक्तौ च बन्ध इति पर्यालोच्य रागादिस्वभावं त्यजेदित्याह उद्धरेदिति आत्मना विवेकयुक्तेनात्मानं संसारादुद्धरेत् न त्ववसादयेत् अधो न नयेत् हि यस्मादात्मैव मनः संगादुपरतमात्मनः स्वस्य बन्धुरुपकारको रिपुरपकारकश्च ५ ॥

पिशाचभाष्य

^संसारसागरे

^तेना

गी. यदैवं योगारूढस्तदात्मा(न)ोद्धृतो भवति संसारादनर्थप्रदादतो उद्धरेदिति उ
टी. द्धरेन्निमग्नमात्मानमात्मना ततस्तदूर्ध्वं हरेत् योगारूढतामापादयेदित्यर्थः ।
श. नात्मानमवसादयेत् नाधो नयेत् आत्मैव हि यस्मादात्मनो बन्धुः संसारमुक्त
येभवति बन्धुरपि तावन्मोक्षं प्रतिकूल भावस्नेहादिबन्धनायतनत्वान्नात्यन्तं तस्मात् युक्त ^न
मवधारणमात्मैव ह्यात्मनो बन्धुरिति आत्मैव रिपुः शत्रुः योऽन्योऽपकारी बा
ह्यः शत्रुः सोऽप्यात्मप्रयुक्त एवेति युक्तमवधारणमात्मैव रिपुरात्मन इत्युक्तं ५॥

रामानुजभाष्यं

उद्धरेदिति आत्मना मनसा विषयाननुषक्तेनात्मानमुद्धरेत् विपरीतेन म
नसा नात्मानमवसादयेत् आत्मैव मनः ह्यात्मनो बन्धुः तदेव ह्यात्मनो रिपुः ५॥

अभिनवगुप्तकृतटीका अवतारं

^यस्यां च बुद्धावयमेवादर्श्योऽभिन्नादृक् उद्धरेति ५॥ स्पष्टार्थम्

परमार्थप्रपाटीका

^अतो विषयत्यागे मोक्षः आ
सक्तौ च बन्ध इत्यालोच्य रागा
दिस्वभावं त्यजेत्याह ^

उद्धरेदिति विवेकयुक्तेनात्मना मनसा कृत्वा आत्मानं जीवं दृष्टा पश्यन् संसारात्
उद्धरेत् परं तं न अवसादयेत् नाधः पातयेत् हि यस्मात् कारणात् आत्मनो बन्धु
रुपकारकः रिपुरपकारकः आत्मैव स्वयमेव नान्यः मन एव मनुष्याणां ।
कारणं बन्धमोक्षयोरित्युक्तत्वात् ५॥

वनमालीटीका

योऽयदैव योगारूढो भवति तदा तेनात्मनैवात्मा संसारादुद्धृत इत्याह उद्धरेदि
ति आत्मना वेदान्तश्रवणादिनावसितेन मनसात्मानं स्वजीवं संसाराब्धौ नि
मग्नं उद्धरेत् विषयसंगपरित्यागेन योगारूढतां प्रापयेत् न तु विषयासक्त्याव
सादयेत् न तं संसारसमुद्रे मज्जयेत् हि यत आत्मैव मन एवात्मनो जीवस्य बन्धुः
हितकारी संसारात् मुक्तिहेतुः आत्मैव मन एवात्मनः स्वस्य जीवस्य रिपुरहि
^कारणं तकारी मन एव मनुष्याणां [illegible] बन्धमोक्षयोः बन्धाय विषयासक्तिमुक्त्यै
निर्विषयं मन इति स्मृतेः ५॥

ऊत्तमवैजयन्तीटीका

[illegible] एवं सर्वसंकल्पसंन्यासीति यदुक्तं
तत्र तु मन एव कारणमित्याह उद्धरेदिति योगी आत्मनानाकृतविषयासक्ति
रहितेनात्मावलोकनप्रवणेन सदसद्वस्तुविवेकवता मनसा आत्मानं स्वकृ
तानादिविविधशुभाशुभकर्मत्वेन संसारार्णवनिमग्नं गर्भजन्मजरामरणादि

रूपावस्थान्तरं गतानादितेनस्तेनोभ्रममानेकामादिषड्वर्गानिक्रूरग्राहग्रस्तेनि
रतिशायप्रबलातितीर्थ्यानिमिषोरगकवलीभूतेजीवमुद्धरेत् उद्धंहरेत् आ
कृतविषयं माजयित्वापरमात्मानं प्रापयेदित्यर्थः विषयानुरागारंजितेन
धनधामदारादयाशाके: तमनसात्मानं स्वेनावसादयेत् संसारेननिमज्जयेत्
हीतिनिश्चयेनात्मनः स्वस्यात्मैव मन एव बंधुर्हितकारी आत्मन स्वात्मैवरिपुः
शत्रुरिममेवार्थं पाराशरीस्मृतिरपिवदति तथाहि मनएवमनुष्याणांका
रणंबंधमोक्षयोः बंधायविषयासंगिमुक्त्यैनिर्विषयंमनइति ५॥

योयदेवंयोगारूढोभवतितदा मधुसूदनी टीका तेनात्मनैवात्मोद्धृतोभवतिसंसारानर्थ
व्रातादतः आत्मनाविवेकयुक्तेनमनसाआत्मानंस्वंजीवंसंसा[र]समुद्रेनिमग्नंततः
उद्धरेत् तत उद्धंनयेत् विषयासंगपरित्यागेनयोगारूढतामापादयेदित्यर्थः
नतुविषयासंगेनात्मानमवसादयेत् संसारसमुद्रेमज्जयेत् हि यस्मात्
आत्मैवात्मनोबंधुर्हितकारी संसारबंधान्मोचनहेतुः नान्यः कश्चिल्लौकिक
स्यबंधोरपिस्नेहानुबंधेनबंधहेतुत्वात् आत्मैवनान्यःकश्चिद्रिपुःशत्रुरहित
कारीविषयबंधनागारप्रवेशकोशकारवदात्मनः स्वस्यवाह्यस्यापिरिपो
रात्मप्रयुक्तत्वाद्युक्तमवधारणमात्मैवरिपुरात्मनःइति ५॥

सदानंदीटीका

योगारूढोपदाजातस्तदैवात्मात्मनामुना अनर्थव्रातसंसाराद्बंधनाख्यात्स
मुद्धृतः १ संसारपंकनिमग्नमात्मानमतियत्नतः उद्धरेतनऊर्द्ध्वंनवैराग्या
दियुतःपुमान् २ त्यागेनविषयासक्तेःसमाध्यारूढतांनयेत् अनात्मविष
याध्यस्तदेहाद्यात्ममतिंसृजेत् ३ ब्रह्मात्मैक्यावबोधेनधीमान्शांतिसमाश्र
येत् संसारेत्यंतघोरेस्मिन्रागद्वेषादिसंकुले ४ स्वात्मानंयातयेन्नैवविष
यासक्तचेतसा बंधान्मोक्तकरोह्यात्माहितकारीसआत्मनः ५ नान्यःकश्चि
द्बंधुः संसाराद्धारणेतमः प्रत्युतस्नेहपाशेनबंधरूपोनसंशयः ६ आत्मै
वाहितकारित्वादात्मनःशत्रुरुच्यते विषयासक्तिबंधेषुकारागारेप्रवेशना
त् ७ पुनर्जन्मपुनर्मृत्युःपुनर्भोगेषुदीनता स्वात्मास्तानायनोत्स्रणांततऊर्द्ध्वं
नयेत्स्वयं ८ आत्मानंतत्त्वबोधेनवैराग्यादियुतेनच ९॥५॥

नीलकंठीटीका

उद्धरेदिति एवंक्रमेणकर्मद्वाराचित्तशुद्धिंसंपाद्ययोगारूढोभ्यासवैराग्यव

गी
टी॰
ष

लेन आत्मानं उद्धरेत् हि यस्मात् आत्मैव आत्मनो बन्धुर्न पुत्रादयः उद्धर्तारः तस्मात् आत्मैव रिपुरात्मनः न त्वन्ये शत्रवः संसारे मज्जयितृत्वेन तमाश्रमार्थः ५ ॥

अत्र श्रद्धां जनयति ॥ आनन्दगिरिटीका

आत्मना संयमस्थिरीकृतेन मनसात्मानमुद्धरेत् पूर्वं पूर्वां भूमिं जितो त्तरां तरां प्राप्य प्राप्य कृतिरूपधर्मं तेन केवलेन योऽदितिशेषं स्यात् ५ आत्मनैवं परिपूर्णं स्यादिति ॥ ५ ॥

तदेवं विधस्य परमप्रशान्तब्रह्मसमा रामकण्ठीटीका पतिकारणस्य योगारूढत्वस्य नात्मव्यतिरेकेन बाह्यं किञ्चित् साधनं भवितुमर्हतीत्य तः ॥ दुर्वारद्वैतप्रत्ययपवनपरिचालितभीषणाविकल्पकल्लोलमहासंकुलापारगम्भीरभवसागरनिमग्नमात्मानं स्वभावमात्मनैव यथोक्तज्ञानोपदेशप्रवृत्तदिता तत्साहेनोद्धरेत् यथोक्तयोगलक्षणातीरदेशमारोपयेत् न तत्रैव विस्मरणस्खलनयोपेलितं तत्रैवावसादयेत् मज्जयेत् यतोऽस्योद्धरणावसादकृतानि यापकारी प्रतिकूल आत्मैव न्यासः [illegible] [illegible] ५ ॥

अस्यां बुद्धावुपपत्तिमेवावबोधयमित्याह लालसिकी [illegible]टीका दि

आत्मानं स्वस्वभावमात्मनैव यथोक्तोपदेशेन प्रवृत्तोत्साहेनोद्धरेत् संसारात् न त्वेवं विस्मरणस्खलनयोपेत्यावसादयेन्मज्जयेत् पुरुषस्यात्मन आत्मैव स्वस्वभावपदवयतो बन्धुरुपकारकः आत्मैव रिपुः स्वस्यापकारकः नान्यः कश्चित् यदुक्तं आत्मैव यदि नात्मानमहिते भ्यो विवारयेत् कोऽन्यो हितकरस्तस्मात् पतनं वारयिष्यतीति [illegible] [illegible] ५ ॥

पैठोलीटीका

यदैवं योगारूढो भवति तदात्मनात्मानं संसारानर्थसमूहादुद्धृतो भवतीत्याह उद्धरेदिति आत्मना संसारसागरे निमग्नमात्मानं तत् उद्धरेत् योगारूढतां प्रापयेत् आत्मानं नावसादयेत् हि यस्मादात्मैव आत्मनो बन्धुर्हितकारी संसारमुक्तये भवति नान्यः आत्मैवात्मनः शत्रुः रिपुः पापिताशयः शत्रुः स आत्मापराधेनैव शत्रुत्वं भजते ५ ॥

अत एवांतरायभूतं रागादिस्वभावं त्यजेदित्याह उद्धरेदिति आ
त्मनानिश्चयात्मिकयाबुद्ध्या शुद्ध्यावात्मानं मनःपुत्रादिस्नेहस्य
र्णवे निमग्नमुद्धरेत् स्वधर्माचरणानिश्चयरूपतीरभूमिकामा
रोहयेत् न पुनरवसादयेत् मज्जयेत् अथवात्मनायत्नेनात्मा
नं स्वशरीरं समरार्णवे निमग्नमुद्धरेत् परसैन्यजलानियतस्त
तोविक्षिप्यपारंप्रापयेत् परसैन्यजलानियतस्ततोविक्षिप्यपा
रंप्रापयेत् न पुनर्निष्क्रियत्वेनाधोनयेत् परैर्घातयेदितियावत्
हियत आत्मैव उद्धरति यत्नरूप आत्मनःस्वस्यबंधुःसमरार्ण
वोद्धारकरणादुपकारी निश्चयात्मिकतयाबुद्धेर्व्याप्त अतप
वह्तेस्वविरावस्थायित्वात् स्वजात्युचितस्ययत्नस्यनिरर्गलं
प्रवृत्तिसंभवात् आत्मैव बुद्ध्यादिरूपमेवात्मनः स्वस्यशत्रुःप्रति
कूलः नरकादिप्रापनदेतुत्वात् अनंतप्रकारवाधिक्षानाध्यव
सायलक्षणायाः संशयात्मिकायाबुद्धेः सघोभ्रंशात् एतेश्च
निरालंबतयाविरमनवस्थायित्वात् यत्नस्यचमध्यएववि
च्छिन्नत्वात् ५॥

मधुभाष्य

उद्धरेदित्यादिना कस्यबंधुरात्मेत्यत आह ५॥

भाषा अनुवाद

देखो विषयों से इच्छा निवृत्ति होनेसे मोक्ष औ विषयोमे आशक्ति से बन्ध होता है यह विचारि रागद्वेषादि स्वभावसे रहित होना उचित सोई कहते हैं कि विवेक युक्त आपही अपने आत्माको बुद्धिके । द्वारा संसारसे उद्धार करेगा और अधोगति को न ले जायगा जिस हेतु कामना से निवृत्त जो आत्मा कहे मन सोई अपना बन्धु रूप उपकारी है और कामनामे आशक्त जो मन सो शत्रुरूप अपकारी है तो अपना शत्रु मित्र आपही है ५॥

दोहा

आपहि आपकहूं उद्धरैं नहि आपहि पीडत जोय आपहि अपनो
बंधु है आप अपनो रिपु होय ५॥

26

बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः अ
नात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ ॥

शंकरभाष्यं

आत्मैव आत्मनो बन्धुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मा आत्म
नो बन्धुः किंलक्षणो वा आत्मात्मनो रिपुरित्युच्यते बन्धुरिति बन्धुरात्मात्मनस्त
स्य तस्यात्मनः स आत्मा बन्धुर्येनात्मनात्मैव जितः आत्मा कार्यकारणसंघा
तो येन जितो वशीकृतो जितेन्द्रिय इत्यर्थः अनात्मनस्तु अजितात्मनस्तु शत्रु
त्वे शत्रुभावे वर्तेत आत्मैव शत्रुवत् यथानात्मा शत्रुरात्मनोऽपकारी त
थात्मात्मनोऽपकारे वर्तेत इत्यर्थः ६ ॥

आनन्दगिरिकृतटीका

उक्तमनूद्य प्रश्नपूर्वकं श्लोकान्तरमवतारयति आत्मैवेत्यादिना एकस्यैवात्म
नो मिथो विरुद्धं बन्धुत्वं रिपुत्वञ्च लक्षणभेदमन्तरेणायुक्तमिति चोदिते व
शीकृतसंघातस्यात्मानं प्रति बन्धुत्वमितरस्य शत्रुत्वमित्यविरोधं दर्शयति
बन्धुरित्यादिना वशीकृतसंघातस्य विक्षेपाभावादात्मनि समाधानसम्भवा
दुपपन्नमात्मानं प्रति बन्धुत्वमिति साधयति तस्येति अवशीकृतसंघातस्य
पुनर्विक्षेपोपपत्तेरात्मनि समाधानायोगादात्मानं प्रति शत्रुभावे प्रसिद्ध
शत्रुवत् आत्मैव शत्रुत्वेन वर्तेतेत्युत्तरार्द्धं व्याकरोति अनात्मन इति दृष्टान्तं नै
व्याचष्टे यथेति उक्तदृष्टान्तवशादवशीकृतसंघातः स्वस्याहिताचरणा
दात्मानं प्रति शत्रुरेवेति दार्ष्टान्तिकमाह तथेति ६ ॥

स्वामिकृतटीका

कथंभूतस्यात्मैव बंधुः कथंभूतस्य चात्मैव रिपुरित्यपेक्षायामाह बंधुरि
ति येनैवात्मनैवात्मा कार्यकारणसंघातरूपो जितो वशीकृतः तस्यात्म
तस्यात्मनः आत्मैव बंधुः अनात्मनः अजितात्मनस्तु आत्मैवात्मनः शत्रुत्वे श
त्रुवत् अपकारित्वे वर्तेत ६ ॥

पैशाचभाष्यं

तत्र किंवा युक्तलक्षण आत्मनो बंधुः किंवा लक्षणो वा रिपुरात्मन इत्यत्रोच्य
ते बंधुरात्मात्मनस्तस्य आत्मा तस्यात्मनो बंधुः येनात्मैवात्मना जितः आत्मा
कार्यकारणसंघातः कार्यं शरीरं कारणानीन्द्रियाणि येन वशीकृतः जितेन्द्रिय

गी·
टी·
ष·

इत्यर्थः अनात्मनस्तु शत्रुभावे वर्तेतात्मैव शत्रुवत् यथा शत्रुरात्मनोऽपकारी तथात्मनोऽपकारी अयतात्मेत्यर्थः ६ ॥

रामानुजभाष्यं

येन पुरुषेण स्वेनैव स्वमनो विषयेभ्यो जितं तन्मनस्तस्य बंधुः अ नात् त्मनः अजितमनसः स्वकीयमेव मनः स्वस्य शत्रुवत् शत्रुत्वे वर्तेत स्वनिःश्रेयसविपरीते वर्तेतेत्यर्थः यथोक्तं भगवता पराशरेणापि मन एव मनुष्याणां कारणं बंधमोक्षयोः बंधाय विषयासंगि मुक्त्यै निर्विषयं मन इति ६ ॥

अभिनवगुप्तकृतटीका

अत्र च नात्र उपायः अपि त्वात्मैव मन एवेत्यर्थः जितं हि मनो मित्रं घोरतरसंसारोद्धरणं करोति अजितं तु तीव्रनिरययातनाक्लेशं वितनुते ६ ॥

परमार्थप्रपाटीका

अथात्मनो बंधुत्वं रिपुत्वं वा प्रकटयन्नाह बंधुरिति ॥ तस्य पुरुषस्यात्मात्मनः आत्मनो जीवस्य बंधुः सुहृदुक्तः तस्य कस्य येन पुरुषेणात्मनैव स्वेनैवात्मा कार्यकारणसंघातरूपो जीवो जितः वशीकृतः अथानात्मनः अजितात्मनः पुरुषस्य शत्रुत्वे आत्मैव स्वयमेव वर्तते नान्यः ६ ॥

वनमालीटीका

आत्मनः शत्रुत्वमित्रत्वे विवृणोति बंधुरिति येन जीवेनात्मना स्वस्यात्मा मनो
भि० देहेंद्रियादिर्जितस्तस्यात्मनो जीवस्यात्मा मनो बंधुः अनात्मनो निर्जितमनस्कस्य पुरुषस्यात्मैव मन एव शत्रुत्वे शत्रुभावे वर्तेत शत्रुवदस्य शत्रुवत् ६ ॥

कृष्णवैजयन्ती

ननु कस्य मनो बंधुः कस्य वा शत्रुः स्यादित्यपेक्षायां जितमनस्कस्याजितमनस्कस्य मित्रशत्रुश्च मनो भवेदित्याह बंधुरात्मेति तस्य पुरुषस्य स्वस्यात्मन आत्मा मनो बंधुरुपकारी भवति कस्य येन पुरुषेणात्मनैव स्वेनैवात्मा मन एव जितस्स्ववशीकृतः अनात्मनस्तु अजितमनस्कस्य पुरुषस्य तु आत्मैव मन एव शत्रुवत् शत्रुत्वे अपकारकत्वे वर्तेत प्रवर्तेत ६ ॥

मधुसूदनीटीका

आत्मा इदानीं किंलक्षण आत्मनो बंधुः किंलक्षणो वात्मनो रिपुरित्युच्यते । आत्मा कार्यकारणसंघातो येन जितः स्ववशीकृत आत्मनैव विवेकयुक्तेन मनसैव

ननशास्त्रादिना तस्यात्मास्वरूपमात्मनोबंधुरुक्तं खलं हानिभावेन स्वहितक रणात् अनात्मनस्त्वअजितात्मनश्चैतत् शत्रुत्वे शत्रुभावे एव वर्तेतात्मैव शत्रुवत् बाह्यरिपुरिवोक्तं खलप्रहस्यास्व स्यस्वेनानिष्टाचरणात् ६ ॥

सदानंदटीका

बंधुरात्मात्मनः कीदृक कीदृक् शत्रुरितीर्यते कार्यकारणसंघातो येनादौ स्ववशीकृतः १ विवेकतुष्यातस्यात्माविषयासक्ति वारणात् बंधुरस्यात्मनः शास्वप्रहस्यामोतसंस्तुतः २ आत्मैव शत्रुवत्तस्य स्वकृतस्याप्यजितात्मनः वर्तते शत्रुभावेन विषयासक्तिवेपनात् ३ उक्तं खलप्रहस्यावस्वस्यस्वेनैव बंधनम् नविहस्यास्यमोतोपिस्वयंसिद्धउपस्थितः ४।६ ॥

नीलकंठटीका

आत्मामनः आत्मनामनसा अनात्मनः अजितचेतसः आत्मामनएवशत्रुः ६ ॥

धनेटीका

आत्मनोबन्धुरिपुतांदर्शयति ६ ॥ स्पष्टमेतत्

कथमित्याह ॥

रामकंठटीका

तस्यपुरुषस्यैवन्धिनआत्मनः आत्मैवस्वभावएवबंधुः सर्वापत्प्रती कारकत्सजनः यदुक्तं आत्मैव यदिनात्मानमहितेभ्योनिवारयेत् । कोन्योहिततरस्तस्मायएवंवारयिष्यतीति कस्यात्मैवबंधुः येनपुरुषेण स आत्मास्वभावः आत्मनैवतानामृतासाभ्यासबलेनजि तः स्वस्वमर्मगोचरापादनाद्वशीकृतः येनत्वसावात्माप्रमादपरेणान्नतोपेक्षितः सन्नजितोनवशीकृतस्तस्यात्माविषयस्तस्यात्मैवशत्रुत्वेसर्वैः व्यापातकारिबिवर्तते तथाचोक्तम् नततुर्ज्योदश्मिस्त्वीत्मणः सर्पोवाप्यवि घोत्वणः अरिर्वानित्यसंक्रुद्धोयदात्मादुरधिष्टितश्रति ६॥

कस्यात्मैवबंधुः कस्यचात्मैव [illegible] टीका वरिपुरित्यपेक्षायामाह ॥

येनपुरुषेणात्मास्वस्वभावआत्मनैवत्तानाभ्यासबलेनजितः स्वस्व मर्मगोचरापादनाद्वशीकृतः तस्यात्मैवात्मनोबंधुः अनात्मनः प्रमा दपरतयोपेक्षितात्मनः पुरुषस्यात्मैवशत्रुत्वेवर्तते वाह्यशत्रुवत् तथा चोक्तं नततर्ज्योदश्मिस्त्वीक्ष्णः सत्पोवाप्यविघोत्वणः अरिर्वानित्यसं क्रुद्धोयदात्मादुरधिष्टितइति [illegible] ॥

गी॰
टी॰
६

२८

पैंठोलीटीका

ननुकिंलक्षणआत्माआत्मनोबंधुः किंलक्षणश्च आत्मात्मनोरिपुरिति उभयंदर्शयति बंधुरिति तस्यात्मनआत्माबंधुःयेनतुआत्मनाआत्मैव देहेंद्रियसंघातःजितःवशीकृतःतुपुनः अनात्मनः अजितदेहेंद्रिय संघातस्यशत्रुवत् आत्मैवशत्रुत्वेवर्तेत ६

शरणवीरसमिद्धेयिनी॥

एतदेव विवृणोति बंधुरिति तस्यकुंत आत्मायत्नएव आत्मनः स्वस्यबंधुः सर्वापत्प्रतीकारकृत्स्वजनः समराणीवपारकरण साहाय्यकृच्च येनात्मनानिश्चयात्मिकयाबुद्ध्यात्मैवांतःकरण मेवजितःस्ववशेस्थापितः नतुनत्तद्वशेस्वात्माकृतइति अना त्मनोजितांतःकरणस्यतु आत्मैवयत्नएवायोगएवेतियावत् शत्रुत्वेसर्वेच्छाव्याघातकारित्वेवर्तेत स्नेहादिवशात्मध्येयत्न त्यागात्पाराप्राप्तेर्मध्यएवनिमज्जनदेतुभूतत्वात् अयंभावः य दिप्रारंभएवतरणेयत्नंनकुर्यात्तदातीरएवस्थितिःस्यात् नतुन द्यांनिरपिकृतेचयत्नेसमराणीवमध्येतत्त्यागेनपारप्राप्तिर्हेवेआ त्मावारस्थितितोपिभ्रंशित्वामध्यएवचनिमज्जयपरमाद्वैतात्मा प्राप्तिनतुभूतिमहत्पूर्वोयंयःप्रारभ्यकर्माणिनसमापयति अतए वाभिहितंकर्म अनारंभोमनुष्याणांप्रथमंबुद्धिलक्षणं आरब्ध स्यांतगमनं द्वितीयंबुद्धिलक्षणमिति ६॥

मधुभाष्य

बंधुरात्मेति आत्मामनः आत्मनोजीवस्य आत्मनामनसा आत्मा वजीवं आत्मैवमनः आत्मनाबुद्ध्याजीवेनैववा सद्विबुद्ध्याविजय ति उक्तंच मनःपरंकारणमामनंति मनएवमनुष्याणांकारणं बंधमोक्षयोः अद्बहेत्मनसाजीवंनजीवमवसादयेत् जीवस्यबंधुः

धातुश्चमनपवनसंघायः जीवेनबुद्ध्यादिरूपमनोजितंतदा
बन्धुःआत्मरन्यत्रचास्य ततोजयेद्बुद्धिबलेनरक्तदेवेनभक्त्या
मधुकैटभारातित्यादिब्रह्मवैवर्त्ते अनात्मनः अजितात्मनः
पुरुषस्य अजितमनस्कस्यतदपिमनोनउपकारीस्यनात्मा
सत्रापिशत्रुत्वेयस्यनशत्रुत्वपदेवर्त्ततेससशत्रुत्यः तस्यात्मामन
एवमात्मबद्धन्धुरेववर्त्तते ६॥

भाषा अनुवाद

अब आत्मा ही जो किसी मनुष्यका बन्धु औ किसीका रिपु है इस अपेक्षा पर कहते हैं जिसने अपने आत्मासे आत्माको जीता अर्थात् विज्ञानमय आत्मा कर्तृक कार्य कारण मिलित रूप जो आत्मा स्थूलसूक्ष्म शरीरादि वशीभूत होती है सोई विज्ञानमयजीव अपना बन्धु है और आत्मा कहे शरीरादि अवशीकृत जो है सोई आप अपना शत्रु तुल्य है ६ ॥

दोहा ॥

आत्महि बंधु है आत्मको जिह आत्म आत्मसें जीत जीत्यो ना जि
न आत्म तिह आत्मा वर्तै तुल्य अमीत ६॥

जितात्मनः प्रशान्तस्य परमात्मा समाहितः शीतो।
ष्णसुखदुःखेषु तथा मानापमानयोः ७ ॥

शाङ्करभाष्यं

जितात्मन इति जितात्मनः कार्य्यकरणादिसंघात आत्मा जितो येन स जितात्मा तस्य जितात्मनः प्रशान्तस्य परमात्मा समाहितः साक्षादात्मभावेन वर्तत इत्यर्थः किंच शीतोष्णसुखदुःखेषु तथा माने ऽवमाने च मानावमानयोः पूजापरिभवयोः समः स्यात् इत्यध्याहारः ७ ॥

आनन्दगिरिकृतटीका

कथं संयतकार्य्यकरणस्य बन्धुरात्मेति तत्राह जितात्मन इति जितकार्यकरणसंघातस्य प्रकर्षेण परतबाह्याभ्यन्तरकरणस्य परमात्मा विक्षेपेण पुनः पुनरनभिभूयमानो निरन्तरं चित्ते प्रथत इत्यर्थः जितात्मानं तेस्यसम्यक्त्वकमो। अधिकारिणं णं प्रदर्शयोगांगानि दर्शयति शीतेति समः स्यादित्यध्याहारः पूर्वार्द्धं व्याचष्टे जितेन्द्रियादिना न केवलं तस्य परमात्मा साक्षात्तादात्म्यभावेन वर्तते किन्तु शीतोष्णादिभिरपि नासौ चाल्यते तत्त्वज्ञानादिसमर्थं विभजते किंचेति तेषु समः स्यादित्यन्वयः ७ ॥

स्वामिकृतटीका ॥

जितात्मनः स्वस्मिन्बन्धुत्वं स्फुटयति जितात्मन इति जित आत्मा येन तस्य प्रशान्तस्य रागादिरहितस्यैव परं केवलमात्मा शीतोष्णादिषु सत्स्वपि समाहितः स्वात्मनिष्ठो भवति नान्यस्य यद्वा तस्य हृदि परमात्मा समाहितः स्थितो भवति ७ ॥

पैशाचभाष्यं

जितात्मनः प्रशान्तस्य कार्यकारणसंघातो जितो येन स जितात्मा तस्य जितात्मनः प्रशान्तस्य परमात्मा समाहितः साक्षादात्मभावेन वर्तत इत्यर्थः किंच शीतोष्णसुखदुःखेषु तथा मानापमानयोः पूजापरिभवयोः समः स्यात् ७ ॥

रामानुजभाष्यं

योगारम्भयोग्यावस्थोच्यते जितात्मन इति शीतोष्णसुखदुःखेषु मानापमानयोश्च जितमनसः प्रशान्तस्य मनसि परमात्मा समाहितः सम्यगाहितः स्वरूपेणावस्थितः प्रत्यगात्मात्र परमात्मेत्युच्यते तस्यैव प्रकृतत्वात् तस्यापि पूर्वपूर्वावस्थापेक्षया परमात्मत्वात् आत्मा परं समाहित इति वा संबंधः ७ ॥

अभिनवगुप्तकृतटीका

गी॰ तत्र जितमनसः देहेऽपि प्रशांतो निरहंकारः परेष्वात्मनि शीतोष्णादिषु वा भेद
टी॰ धीः न रागद्वेषौ ज्ञानमशांतो वृद्धिः विविधं ज्ञानं यत्र तदिति ज्ञानं प्राग्व्याकृतं दिने
ष कर्म ७ ॥

परमार्थप्रपाटीका

अथ जितात्मनस्तस्मिन्नवेषुत्वं प्रकटयति जितात्मन इति ॥ जित आत्मा मनो
येन तस्य प्रशांतस्य रागादिरहितस्य परे केवलमात्मा शीतोष्णादिषु सत्स्वपि त
था मानापमानयोरुपस्थितयोः सतोरपि समाहितः स्वात्मनिष्ठो भवति नान्यस्य ॥
[illegible]नेति ॥७॥

वनमालीटीका

जितात्मनोऽवेषत्वमाह जितेति शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्व
पि तथा मानापमानयोः पूजानादरयोश्चित्तविक्षेपहेत्वोः सतोरपि तेषु सम
त्वेन जितात्मनः प्रागुक्तजितमनस्कस्य प्रशांतस्य रागद्वेषशून्यस्य परमात्मा
परमेश्वरः समाधिविषयो भवति अतो जितात्मा प्रशांतश्च भवेदिति भावः ७॥

ऊस्त्रमवैजयन्तीटीका

प्रयुक्तेषु सुखदुःखादिषु तथा तेन प्रकारेण मानापमानयोश्च मानमादरोऽपमा
नमनादरस्तयोश्च जितात्मनः जित आत्मा मनो येन स तथा तस्याविकृतमन
सः प्रशांतस्य रागद्वेषादिवर्जितस्य मुमुक्षोः पुरुषस्य परमत्यर्थं यथा स्यात्तथा
आत्मा स्वस्वरूपः समाहितः सम्यगाहितः स्वस्वरूपेणास्थितः समाधिस्थो भवती
त्यर्थः यद्वा परमस्य आत्मा वा आत्मा च परमात्मा उपरमात्मा शब्दो जीववाचको नत्वी
श्वरपरः तस्यैव प्रकरणात्सर्वोपरत्र प्रसक्त्यन्यात्त्वेत्यर्थः ७ ॥

मधुसूदनी

जितात्मनः स्वबंधत्वं विवृणोति । शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्
स्वपि तथा मानापमानयोः पूजापरिभवयोः चित्तविक्षेपहेत्वोः सतोरपि तेषु स
मत्वेनेति वा जितात्मनः प्रागुक्तस्य जितेंद्रियस्य प्रशांतस्य सर्वत्र समबुद्ध्या रागद्वेषशू
न्यस्य परमात्मा स्वप्रकाशज्ञानस्वभाव आत्मा समाहितः समाधिविषयो योगारूढो
भवति परमिति वाच्छेदः जितात्मनः प्रशांतस्यैव परं केवलमात्मा समाहितो भवति
नान्यस्य तस्माज्जितात्मा प्रशांतश्च भवेदित्यर्थः किंच ७ ॥

मराठीटीका

तु यस्यां योगारूढः
...यते सा कावस्थेत्य...
...यां तामाह त्रिभिः
जितात्मन इति शीतोष्ण
सुखदुःखेषु शीतोष्णादि
[illegible]

जितात्मनः सर्वेषुद्वंद्वेषु विक्षेपकेषु शीतोष्णादिषु यस्य तु १ न जहाति समत्वं धीरात्मतत्त्वसमीक्षणात् जितेंद्रियस्य शांतस्य रागद्वेषपरित्यागात् २ समाधिविषयस्यास्य स्वप्रकाशो हरिर्भवेत् नान्यस्येमा प्रायो विक्षेपात्मा ज्ञानो भवेन्मुनिः ३ संसारदुःखदुष्फकारण माधिवीजं ध्याते गेहे विविधकामभयादिमूले चित्ते नियम्य मविरान्मुभवेनिधीरा यमादपमूनिरतः सहरिर्मसेव्यः ४ । ७

नीलकंठीटीका

मनसो जये फलमाह जितात्मन इति शीतोष्णादिषु प्राप्तेषु जितात्मनः निर्विकारचित्तस्य प्रशान्तस्य चित्ते परं उत्कर्षेण समाहितः समाधिप्राप्तो भवति अतः समाधिसिद्ध्यर्थं मनोजेतव्यमेवेत्यर्थः ७ ॥

श्रीधरीटीका

परमात्मस्वरूपपरदेहेस्वदेहे च समानतुल्यामतिर्भवति स्वतेन च श्रूयते परमेश्वरः सर्वभूतानां वेदाः प्राह आत्मनः प्रतिकूलानि परेषां न समाचरेत् ७ ॥

रामकंठीटीका

यथोक्तस्यात्मजयस्य फलमाह जितेति यथोक्तेन प्रकारेण वशीकृत आत्मा येन तस्य जितात्मनः अत एव प्रशांतस्य स्वस्वभाव निर्दोष परमात्मसमापत्तिवशान्निवृत्त विकल्पविभवस्य परेषु व्यतिरिक्तत्वेन प्रतिपन्नेषु सर्वदेहेषु तथात्मन्यहं तया प्रतीयमाने तुल्या सामान्य संविदेक स्वरूपग्राहिणी मतिर्भवति तथा शीतोष्णसुखदुःखादिषु बाह्याभ्यंतरनिमित्तेन

प्रयुज्यमानेमाने द्वंद्वोपप्लवेषु तथा परेषां पूजायां तथा तथावमाने पराभवे तथैवसमानामतिर्भवति न तस्य [illegible] सर्वगतादेकस्मात्स्वभावनिर्विकारात्परमात्मनो हं प्रतीति व्यतिरिक्ते नानाविधेषु विकारकारणेषूपस्थितेष्वपि तस्य सत्यस्वात्मन्यवसंधानं लोकवन्न विक्षिप्यते इत्यर्थः [illegible]

[illegible] ७ ॥

यथोक्तस्यात्मजयस्य फल लासिकी [illegible]टीका त्मसमा

माह — जित उक्तविधया वशीकृत आत्मा येन तस्यात एव प्रशांतस्य परमां प्रत्निवृत्तविकल्पस्य शीतोष्णसुखदुःखेषु सत्स्वपि मानापमानयोः सतोरपि परमात्मा [illegible] समाहितः स्वात्मनिष्ठो भवति सान्तादात्मभावेन वर्तते इत्यर्थः विकारहेतुषु सत्स्वपि स्वात्मन्यनुसंधाने लोकवन्न विक्षिप्यते इति

गी.
टी.
स.

एवंविपस्ययोगारूढस्य लक्षणमुपसंहरति ७॥

पैंगोलीटीका

जितात्मनः स्वस्मिन्नेवेत्युत्तरस्य स्थापयति जितात्मन इति शीतोष्णसुखदुः
खेषु तथा मानापमानयोः प्रज्ञाभिभवयोः समस्य जितात्मनः जित
देहेंद्रियसंघातस्य प्रशांतस्य रागादिदोषरहितस्य परमात्मा समाहि
तः स्वस्वरूपनिष्ठो भवति ७ ॥

रणवीरसमिद्धोयिनी॥

जितात्मन इति जितात्मनः स्वायत्तीकृतांतःकरणस्यात एव प्र
शांतस्य प्रारभ्यमाणकर्मप्रवृत्तिहेतुभूतपापमेवाश्रयेदस्मान्
कथं भीष्ममहं संख्ये इत्यादिसंकल्पप्रशमवतः एवं केवलमात्मां
तःकरणं समाहितः सावधानो भवति न विकृतिमापद्यते निश्च
यान्न प्रस्खलतीति यावत् कदा शीतोष्णादिषु सत्स्वपि तत्र परम
शुक्रहिमांशुदेवतासु संजातहिमकरकादिषूत्पन्नं शीतं यस्मि
न्सति जलादिद्रवद्रव्याणि घनायंते उष्णं च ग्रैष्मकालिकमाध्या
ह्निकरविकिरणसंतापः एव प्रभृत्यान्येषामप्यजनितमोक्ष्यं सु
खं पुत्रलवयादिजनितानंदः दुःखं स्वकीयादिमरणजनितो विषादः
मानः स्वकीयकृतादरः अपमानः परकृततेजोवधादिलक्षणः प
ह्यशीतरूपसुखदुःखादिरूपं दुःखं च मानः तादृशमहाप्रास्त्रप्रहरणा
दिना संजातव्यथ परकृतः साधुमहावीरसाध्य मन्यं त्वाभियोसि
पुनः प्रहरेत्येवं रूपप्रशंसया वा भासमानश्चादरः अपमानस्थानेत
रं विधीयमानो दर्पोपरूपो कुत्समनं तत्र मद्धाणविषयीभूतस्त्वं नभ
विष्यसीत्येवं रूपेणादरः अथवा शीतोष्णादिषु सत्स्वपि प्रशांतस्या
विकृतांतःकरणस्य प्रहृत्यंतरायभूतसर्वोत्कृष्टलक्षणसंकल्पानां
प्रशमनात्स्वजात्युचितधर्मोपरणे वर्तमानस्येति यावत् यतो
जितात्मनः स्वायत्तीकृतांतःकरणात् परमात्मा परमेश्वरः समाहितः

सम्यगात्मसमंताद्धितो भवति तदभिलषितं संसाधयती
ति भावः ८॥

मध्वभाष्य

जितात्मनः फलमाह जितात्मन इति जितात्मादिप्रपंतो
भवति न तस्य मनः प्रायो विषयेषु गच्छति तदा च परमात्मा
सम्यगभ्याहितः सन्निहितो भवति अपरोक्षज्ञानी स भवती
त्यर्थः अपरोक्षज्ञानिनो लक्षणं स्पष्टयति ज्ञानेत्यादि
ना ज्ञानेत्यादि कूटस्थः ज्ञानविज्ञानतृप्तात्मा विजितेंद्रिय
इति कूटस्थ एवेदेवः विज्ञानं विशेषज्ञानं अपरोक्षज्ञानं वा
तथोक्तं सामान्येनैव विज्ञेया विशेषा मनगोचराः देवादी
नां च तज्ज्ञानं विज्ञानमिति कीर्तितं श्रवणान्मननाच्चैव य
ज्ज्ञानमुपजायते तज्ज्ञानं दर्शनं विद्याद्विज्ञानं शंभुरब्रवीत्
विज्ञानं ज्ञानमंगादेर्विशिष्टं दर्शनं तथेत्यादि कूटस्थोऽनि
र्विकारः कूटवत्स्थित इति व्युत्पत्तेः कूटमाकाशः कूटं
खं विदलं व्योम संधिराकाश उच्यत इत्यभिधानात् यो
गी योगं युवन् युक्तः योगसंपूर्ण एवंभूतो योगानुष्ठाता
योगसंपूर्ण उच्यत इत्यर्थः स एव च सर्वस्माद्विशिष्यते
साधुपापादिषु समबुद्धिर्जीवविदः परमात्मनः सर्वस्य
तन्निमित्तत्वस्य च सर्वत्रैकरूप्येण चिद्रूपा एव हि जीवाः
विशेषस्त्वंतःकरणकृतः सर्वेषां च साधुत्वादिकं सर्वमी
श्वरकृतमेव वस्तुतो न किंचिदपि उक्तं चैतत्सर्वं स्वतः सर्वे
पि चिद्रूपाः सर्वदोषविवर्जिताः जीवास्तेषां तु ये दोषास्ते
उपाधिकृता मताः सर्वं चेश्वरतस्तेषां न किंचित्स्वत एव
तु समा एव यतः सर्वे वैषम्यं भ्रांतिसंभवं एवं समानजी

वास्तविशेषोदेवतादिषु स्वाभाविकस्तुनियमादतएवमता
ततः अतएवादेस्तथादोषानित्याःस्वाभाविकाअपि गुणदो
षौमनुष्याणांनित्यौस्वाभाविकौमतौ गुणैकमात्रदुपास्तु
देवाएवमतदामता इतिब्राह्मे नतुसाधुपापादीनांदृष्टादि
साम्यं तत्रदोषस्ततः समानाविषमादृष्टाविषमाणांस
मतया क्रियतेयेनदेवोपिस्वपराहृष्यतेषमानितियाप्र
विनंबंधुवेषःकर्मविपाकेव एवमेतानिमान्यस्या
नानिगतीयोसुतरोतरमिति वामनेगुणानुसरणोपुनां
समदृष्टिंचयोनरः सर्वभूतेषुकुरुतेतस्यविष्णुःप्रसीदति
वैषम्यंतुजनमनस्तद्दत्तानितरसंचयात् पूजायाविषमाद
ष्टिःसमासाम्यविदःस्वतमितिब्रह्मवैवर्ते सुहृदादिषु
प्राप्तोक्तस्नादिकृतिरन्यथाऽनयिकार्यासापिसमाम
नातदृप्पाद यथासुहृन्मकर्तव्यंपितृभ्रातृगतेषुच तथा
करोतिसदैनमनुद्विः सउच्यतइतिगारुडे प्रत्युपकार
निरपेक्षयोपकारकृत् सुहृत्स्नेहमास्थानेनिदूष्ययोरक्तां
करोतिसमित्रं अरिर्वधादिकर्त्ता कर्तव्येउपकारे अपका
रेच उदास्तेसउदासीनः कर्तव्यमुभयमपियःकरोतिस
मध्यस्थः अवासितकृद्वेष्यः आद्यरवेतत् द्वेष्य अवासित
कृत्कार्यमात्रकारीतुमध्यमः प्रियकृत्प्रियोऽतिदूष्यापि
स्नेहकंयःपरिरक्षतिसमित्रमुपकारंतुसनेपेक्ष्योपका
रकृत् यस्ततःससुहृत्प्रोक्तःबंधुश्चापिवधादिकृदि
ति समाधियोगप्रकारमाह ॥७॥

भाषा अनुवाद

जितात्म पुरुष को जो अपने आत्मामे वर्त्तता है सो खुलासा करिके कहते हैं कि जिसने आत्मा जो शरीर आदि तिसको जीता अर्थात् अपने आधीन किया केवल वह प्रीति विरोध आदिसे रहित मनुष्य का मन शीत उष्ण सुख दुःख आदिमे समाहित कहे सावधान रहता है अर्थात् वही आत्मनिष्ठ है अथवा उसीका हृदय परमात्मा मे समाहित अर्थात् विक्षेप रहित निश्चल होना किसीका औरहे नही होसकता है ७

दोहा ॥

आत्मजित को प्रशांत को ईश्वर समता ज्ञान शीतोष्ण सुख दुःख मे तथामान अपमान ७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः युक्त इ
त्युच्यते योगी समलोष्टाश्मकाञ्चनः ८॥

शंकरभाष्यं

ज्ञानेति ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विज्ञानं तु शा
स्त्रतो ज्ञातानां तथैव स्वानुभवकरणं ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालं
प्रत्यय आत्मान्तःकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थोऽप्रकम्प्यो भवतीत्यर्
थः विजितेन्द्रियश्च य ईदृशो युक्तः समाहित इति स उच्यते कथ्यते स योगी सम
लोष्टाश्मकाञ्चनः लोष्टाश्मकाञ्चनानि समानि यस्य सः समलोष्टाश्मकाञ्चनः ८॥

आनन्दगिरिकृतटीका

चित्तसमाधानमेव विशिष्टफलं वेदितं नहि कथंभूतः समाहितो व्यवह्रियते
तत्राह ज्ञानेति परोक्षापरोक्षाभ्यां ज्ञानविज्ञानाभ्यां संजातालंप्रत्ययोऽक्रियो हर्ष
विषादकामक्रोधादिरहितो योगी युक्तः समाहित इति व्यवहारभागी भवतीति
पादत्रयव्याख्यानेन दर्शयति ज्ञानमित्यादिना स च योगी परमहंसपरिव्राज
कः सर्वत्रोपेक्षाबुद्धिरत्यन्तनिशायवैराग्यभागीति कथयति स योगीति ८॥

स्वामिकृतटीका

योगारूढस्य लक्षणं श्रेष्ठत्वं चोपपाद्य उपसंहरति ज्ञानविज्ञानेति ज्ञानमौपदे
शिकं विज्ञानमपरोक्षानुभवस्ताभ्यां तृप्तो निराकांक्ष आत्मा चित्तं यस्य अतः कू
टस्थो निर्विकारः अतो विजितानीन्द्रियाणि येन अत एव समानि लोष्टादीनि य
स्य स्वर्णिं उपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८॥

पिशाचभाष्यं

ज्ञानविज्ञानेति ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विशेषतो ज्ञानं स्वानुभवकर
णं ताभ्यां तृप्तात्मा कूटस्थः अप्रकम्प्यो भवतीत्यर्थः विजितेन्द्रियश्च ईदृशः युक्तः
समाहितः स उच्यते समलोष्टाश्मकाञ्चनः ८ [illegible]
[illegible]

रामानुजभाष्यं

ज्ञानेति ज्ञानविज्ञानतृप्तात्मा आत्मस्वरूपविषयेण ज्ञानेन तस्य च प्रकृतिवि
जातीयाकारविषयेण च विज्ञानेन तृप्तमनाः कूटस्थः देवाद्यवस्थास्वनुवर्तमा
नः सर्वसाधारणज्ञानैकाकारात्मनि स्थितस्तत एव विजितेन्द्रियः समलोष्टा
श्मकाञ्चनः प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतवस्तुविशेषेष्वभोग्यतयाभा

गी॰ वान् लोष्टाश्मकाञ्चनेषु समप्रयोजनो यः कर्मयोगी स युक्त इत्युच्यते आत्माव
टी॰ लोकनरूपयोगाभ्यासार्हः उच्यते ८॥
ध॰ अभिनवगुप्तकृतटीका। [illegible] ८

ज्ञानमभ्रान्ता बुद्धिर्विविधं ज्ञानं यत्र तद्विज्ञा नं प्राग्व्युत्पादितं कर्म ॥८॥

परमार्थप्रपा

अथ योगारूढस्य समुपायोपसंहरति ज्ञानविज्ञानेति ॥ ज्ञानं शास्त्रगुरूपदिष्टं विज्ञानमनुभवस्ताभ्यां तृप्तो निरपेक्ष आत्मा चित्तं यस्य अतः कूटस्थो निर्विकारः अत एव विजितेन्द्रियः अत एव समलोष्टाश्मकाञ्चनः लोष्टं मृत्पिण्डः पाषाणः सुवर्णं एषु समः हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८॥

वनमालीटीका

ज्ञानं शास्त्रीयं विज्ञानं श्रवणमनननिदिध्यासनाज्जातं भगवदपरोक्षं ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसंनिधावपि विकारशून्यः अत एव विजितानि रागद्वेषपूर्वकविषयग्रहणाद्व्यावर्तितानीन्द्रियाणि येन सः अत एव हेयोपादेयधीशून्यत्वेन समानि मृत्पिण्डपाषाणकाञ्चनानि यस्य सः योगी भगवति निरुद्धचित्तः स युक्तः योगारूढ इत्युच्यते ८॥

कृष्णमैवैजयन्तीटीका

किं च ज्ञानविज्ञानतृप्तेति ज्ञानविज्ञानतृप्तात्मा ज्ञानं स्वस्वरूपविषयकं विज्ञानं प्रकृतिविजातीयाकारविषयकं ताभ्यां तृप्तः संतुष्ट आत्मा मनो यस्य स तथा यद्वा ज्ञानेन शास्त्रजनितेन विज्ञानमात्मस्वरूपविषयकं ताभ्यां तृप्तमनाः यद्वा ज्ञानं शास्त्रजनितचेतनाचेतनविषयकं विज्ञानं परमात्मविषयकं ताभ्यां तृप्तमनाः कूटस्थः कूटेषु प्रकृतिकार्येषु स्वरनराद्याकारेषु स्वात्मैकज्ञानस्वरूपस्वभावानुभवत्वेनात्मनि तिष्ठतीति स तथा अत एव जितेन्द्रियः विशेषेण जितानि स्ववशीकृतानि [illegible]नीन्द्रियाणि बाह्याभ्यन्तर[illegible]रूपाणि येन स तथा विजितेन्द्रियत्वादेव समलोष्टाश्मकाञ्चनः लोष्टं मृत्पिण्डः अश्म पाषाणं काञ्चनं सुवर्णं समानि तुल्यानि लोष्टाश्मकाञ्चनानि यस्य स तथा प्रकृतिवियुक्तात्मस्वरूपानुभवानन्देनैव नदितरेषु प्राकृतेषु लोष्टादिषु वस्तुषु पृथक्पृथक्स्वरूपदर्शनविवेकाभावात्तुल्यदृष्टिरित्यर्थः तर्हि किं बालः न यतस्स योगी कर्मयोगी कर्मयोगवान् बालस्तु विवेकपूर्वकं कर्म कर्तुमशक्त इत्यर्थः ईदृशो यः स युक्त आत्मावलोकनाभ्यासयोगयुक्त इत्युच्यते एवं कथ्यते ८॥

कृ

ज्ञानेन शास्त्रोक्तानां पदार्थानामौपदेशिकज्ञानेन विज्ञानेन तदप्रामाण्यशंकानि
राकरणफलेन विचारेण तथैव तेषां स्वानुभवेनापरोक्षीकरणेन ताभ्यां तृप्तः
संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसन्निधावपि विकार
शून्यः अत एव विजितानि रागद्वेषपूर्वकाद्विषयग्रहणाद्व्यावर्तितानीन्द्रिया
णि येन सः अत एव हेयोपादेयबुद्धिशून्यत्वेन समानि मृत्पिण्डपाषाणकांच
नानि यस्य सः योगी परमहंसपरिव्राजकः परमवैराग्ययुक्तो योगारूढ इत्यु
च्यते [illegible] ८ ॥

सदानंदीटीका

शास्त्रोक्तानां पदार्थानां ज्ञानं स्यादौपदेशिकं असंदिग्धाविपर्यासं विज्ञानं स्वा
नुभूतितः १ ज्ञानालंप्रत्ययस्ताभ्यामात्मा चित्तं हि यस्य सः सन्निधानेऽपि भोगा
नां निर्विकारोऽतिधीरधीः २ व्यावर्तितानि भोगेभ्यो येन सर्वेंद्रियाणि सः हेयो
पादेयधीशून्यतया यस्य समानि च ३ मृत्पाषाणसुवर्णानि वीतद्वंद्वो निजात्म
वित् ईदृशो युक्तचित्तात्मा योगारूढ इतीर्यते ४।८॥

नीलकंठीटीका

समाधिसिद्धेरपि किं फलमत आह ज्ञानेति ज्ञानं शास्त्रोपदेशजा बुद्धिः वि
ज्ञानं शास्त्रार्थध्यानजः स्वमात्ररूपेणानुभवस्ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चि
त्तं यस्य स ज्ञानविज्ञानतृप्तात्मा यतस्तृप्तात्मातः कूटस्थः अकंप्यः संसारता
पानास्कंदितो भवतीति समाधिफलं अस्य लोकप्रसिद्धं लक्षणमाह विजि
तेंद्रिय इति समलोष्टाश्मकांचन इति एवंविधो योगी स युक्तः प्राप्तयोग इत्यु
च्यते विद्वद्भिः ८ ॥

ग्यानेशीटीका

योगी दृष्टाभ्यस्तयोगः विजितेंद्रियः श्रवणादिपंचकसंयमवान् कूट
स्थो मनोहंकाररहितो परतत्त्वावलंबनेन शैलशिखरश्वोभयदेव निर्लेप
स्थितः शास्त्रात्परमार्थोपारणं ज्ञानं शास्त्रावधृतस्यात्मानाकारो विज्ञानं
ताभ्यां तृप्तः इतरस्पृहाहीनः आत्मा अंतःकरणं यस्य सः तीर्णो तेन व्याः ज्ञा
तव्यः समलोष्टाश्मकांचनः बहिः सर्वविज्ञिविरहेणाहानोपादानोपेक्षाहा
नेन निर्विकारः युक्तः परब्रह्मणि योजित इत्युच्यते ॥

गी॰ सचैवंविधो योगारूढ उच्यते इत्याह रामकंठी टीका

टी॰ श्री॰ ह॰ ज्ञानं शास्त्रतः स्वरूपावगममात्रं विज्ञानं शास्त्रावगतस्य तत्त्वस्य साक्षा-
त्कारः ताभ्यां तृप्तो निराकांक्ष आत्मा स्वभावो यस्य सं तथा अत एव कूट-
स्थः आत्मपरमार्थे नित्यात्मप्रत्ययत्वात् कूटस्थः शैलादिवन्निष्प्रकंपः
यतो विजितेंद्रियः वशीकृतबाह्यांतःकरणोऽनन्यवशः एवं लोभा-
दिदोषरहितत्वात् समौ लोष्टाश्मानौ मृत्पिंडपाषाणौ कांचनं च हेम
यस्य स तथाविधो युक्तो योगारूढ उच्यते ८॥

एवंविधस्य योगारूढस्य लक्षणमुपसंहरति लासिकी [illegible]टीका

ज्ञानमौपदेशिकम् विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकांक्ष आ-
त्मा स्वस्वभावो यस्य सः अतः कूटस्थो निर्विकारः यतो विजितेंद्रियः वशी-
कृतबाह्यांतःकरणोऽनन्यवशः अत एव समानि हेयोपादेयबुद्धिशून्य-
तया लोष्टादीनि यस्य सः एवंविधो युक्तो योगारूढ इत्युच्यते [illegible] ८॥

पंचोलीटीका

योगारूढस्य लक्षणं श्लोकद्वयेनोपसंहरति ज्ञानेति ज्ञानविज्ञानतृप्ता-
त्मा ज्ञानेनात्मविषयेण शास्त्रजनितेन विज्ञानेनात्मसाक्षात्काररूपेण तृ-
प्तात्मा आत्मा अंतःकरणं यस्य सः कूटस्थः अप्रकंप्यः विजितेंद्रियः स-
मलोष्टाश्मकांचनः युक्तः समाहितः स तु योगी कथ्यते ८

रत्नावीरसमिद्धोधिनी॥

ज्ञानेति ज्ञां निश्चयात्मिकां बुद्धिमानयति प्रापयतीति ज्ञानं बुद्धिजनक-
पर्यायकं विज्ञानं शास्त्रार्थविषयो बोधस्तेन तृप्तः आत्मा बुद्धिर्यस्य
स ज्ञानविज्ञानतृप्तात्मा शास्त्राचार्योपदेशो निश्चयदार्ढ्यं वा नित्यर्थः
अथवा ज्ञानमर्थशास्त्रादितत्त्वार्थावगममात्रं विज्ञानं शास्त्रावग-
तस्य तत्तदर्थजातस्य साक्षात्कारस्ताभ्यां तृप्तो नितरां तदभ्यासवशा-
न्निराकांक्ष आत्मांतःकरणं यस्येत्यर्थः विजितेंद्रियः निगृहीतब-
ह्याहींद्रियः कूटस्थः कूटे शैलशृंगवदनुद्वेगेस्पन्दनादेतिष्ठती

तिकूटस्थः स्पंदनादावारूढप्राप्तसम्यत्वं प्रस्थित इति यावत् अथ
वकूटवत्तिष्ठतीति घोलादिवन्निष्प्रकंप इत्यर्थः एतादृशश्च
कर्मयोगी युक्त इति पुरुषार्थवत्त्वयोग्य उच्यते यतः समलो
ष्टाश्मकांचनः लोष्टलोष्टवदुपेक्ष्य उदासीनः अश्मापाषाणा
यः पिंडादिवद्रतिकठोरतेन पीडाजनको द्वेष्यो विद्रुवर्गः कांच
नं सुवर्णादिवदुपादेयः स्नेहपात्रभूतः पुत्रमित्रादिवर्गः तेष्वयो
पि समभावस्थतायां तु त्वात् आततायित्वमात्रापस्यतः यथोक्तं
आततायिनमायांतं हन्यादेवाविचारयन्निति अथवा पुत्राद्यभा
वे लोष्टाश्मानौ प्रसिद्धौ कांचनं च सुवर्णं यत्नेकृते पापात्मा पापु
यं स्पंदनाद्यवयवोवैत्यत त्रयं समं प्रद्रयस्थाने हत्यमात्रुथं यस्ये
ति निरात्रुये पि वीतेमति पुण्डादनिहंति प्रतिपादिता ८॥

मधुभाष्य

भाषा अनुवाद

योग आरूढ़ पुरुष के लक्षण औ अवस्था कहते हैं कि ज्ञान कहे । शास्त्रसे अथवा गुरुके उपदेश से यो होय और विज्ञान जो अनुभव । सिद्ध अर्थात् हम सोई ब्रह्म हैं यह प्रमत्त ज्ञान इन दोनो से जिसका आत्मा कहे चित्त सन्तुष्ट है और जिस ने इन्द्रियगण को जीता है तथा ढेला पत्थर सोना ये जिसको समान अर्थात् लेने छोड़नेकी बुद्धि जि से नहीं ऐसाजो निरपेक्ष निर्विकार कूटस्थ कहे अचल के तुल्य नि श्चल पुरुष सोइ युक्त योगी कहे योगारूढ़है ८

दोहा

ज्ञान विज्ञान में तृप्तमति कूटस्थ जितेंद्रिजान युक्तकह्यो यो
गी सम जिह हेम मृतक पाषान ८॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९॥

शंकरभाष्यं

किंच सुहृदिति सुहृदित्यादिश्लोकार्द्धमेकपदं सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्त्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनो न कस्यचित् पक्षं भजते मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी द्वेष्यः आत्मनोऽप्रियो बन्धुः सम्बन्धी इत्येतेषु साधुषु शास्त्रानुवर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः विशिष्यते विमुच्यत इति वा पाठान्तरं योगारूढानां सर्वेषामयमुत्तम इत्यर्थः ९॥

आनन्दगिरिकृतटीका

योगारूढस्य प्रशस्तत्वमभिधाय योगस्याऽवान्तरं दर्शयति किंचेति पदच्छेदः पदार्थोक्तिरिति व्याख्यानाङ्गं सम्पादयति सुहृदितीति अरिर्नाम परोक्षमपकारकः प्रत्यक्षमप्रियो द्वेष्य इति विभागः समबुद्धिरिति व्याचष्टे कः किमिति प्र थमो हि प्रश्नो जातिगोत्रादिविषयः द्वितीयो व्यापारविषयः उक्तप्रकारेणोत्पन्न ट्या
बुद्धित्वे सर्वोत्कर्षो वा सर्वबन्धविमोक्षो वा सिध्यतीत्याह विशिष्यत इति पाठद्वयेऽपि सिद्धमर्थं संगृह्य कथयति योगारूढानामिति ९॥

स्वामिकृतटीका

सुहृन्मित्रादिषु समबुद्धिस्तु ततोऽपि श्रेष्ठ इत्याह सुहृदिति सुहृत् स्वभावेनैव हिताशंसी मित्रं स्नेहवशेनोपकारकः अरिर्घातकः उदासीनो विवादमानयोरुभयोरप्युपेक्षकः मध्यस्थो विवादमानयोरुभयोरपि हिताशंसी द्वेष्यो द्वेषविषयः बन्धुः सम्बन्धी साधवः सदाचाराः पापा दुराचाराः एतेषु समो रागद्वेषशून्यो बुद्धिर्यस्य स तु विशिष्यते ९॥

पिशाचभाष्यं

किंच श्लोकार्धमेकं पदं सुहृदिति प्रत्युपकारमनपेक्ष्य उपकर्त्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनो न कस्यचित्पक्षं भजते मध्यस्थो विरुद्धयोरुभयोः हितैषी। द्वेष्यः आत्मनोऽप्रियो बन्धुः सम्बन्धी इत्येतेषु साधुषु शास्त्रार्थानुवर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः विशिष्यते योगारूढाणां सर्वेषामुत्तम इत्यर्थः ९॥

रामानुजभाष्यं

गी॰
टी॰
६॰

तथाच सुहृदिति वयोविशेषानंगीकारेणहितैषिणः सुहृदः सवयसोहितैषिणो मित्राणि अरयोनिमित्ततोऽनर्थेच्छवः उभयहेतुनाभावादुभयरहिताउदासीनाः जन्मतएवोभयरहितामध्यस्थाः जन्मतएवानिष्टेच्छवोद्वेष्याः जन्मतएवहितैषिणोबंधवः साधवोधर्मशीलाः पापापापशीलाः आत्मैकप्रयोजनतयासुहृन्मित्रादिभिः प्रयोजनाभावाद्विरोधाभावाच्चतेषुसमबुद्धिर्योगाभ्यासार्हत्वेविशिष्यते ९॥

39

१८ इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः निर्दोषंहिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिताः १९

अभिनवगुप्तकृतटीका

सुहृद्यस्यान्तःकरणमेवशोभनंहृदयं मित्रंतमन्योन्यं अरिर्वैपरस्परं उदासीनःपक्षद्वयरहितः मध्यस्थःकेनचिद्देशेनमित्रंकेनचिच्छत्रुः द्वेषार्होद्वेष्यमशक्योद्वेष्यः बंधुः पुत्रादिसम्बन्धेनएतेषुसर्वेषुसमधीः एवंसाधुषुपापेषुच सविशिष्यतेक्रमाक्रमंसंसारान्तरतिरेहयोऽश्नवंयचरणे: [illegible] इहैवमनमपिशरीरसंबंधेसर्गोजितस्साम्यावस्थत्वात्संसारसंबंधकत्वजीवन्मुक्तियेषांसाम्येस्थितंप्रतिष्ठिताः साम्येचब्रह्म ९॥

परमार्थप्रपाति

अथसमबुद्धित्वमनेविशिनष्टि सुहृदिति सुहृत्स्वभावेनैवहिताशंसीमित्रः स्नेहवशेनोपकारकः अरिर्घातकः उदासीनोविवदमानयोरुभयोरप्युपेक्षकः मध्यस्थः तयोरुभयोरपिहिताशंसी द्वेष्योऽप्रियो द्वेष्यः बंधुःएवंसाधवः सदाचाराः पापादुराचाराः एतेषुसमारागद्वेष[illegible]रहिताबुद्धिर्यस्यसविशिष्यते विशिष्टोभवति ९॥ वि^

वनमालीटीका

सुहृत्स्वस्योपकारमनपेक्ष्यपूर्वस्नेहसंबंधंचविनेवोपकर्ता मित्रंस्नेहेनोपकारकः अरिः स्वकृतापकारमनपेक्ष्यस्वभावक्रौर्येणापकर्ता उदासीनोविवदमानयोरुभयोरप्युपेक्षकः मध्यस्थोविवदमानयोरुभयोरपिहितैषी द्वेष्यःस्वकृतापकारमपेक्ष्यापकर्ता बंधुःसंबंधेनोपकर्ता एतेषुसाधुषुशास्त्रोक्तकारिषु पापेषुशास्त्रनिषिद्धकारिषुचकारादन्येषुच सर्वेष्वन्तर्यामिणोद्रष्टाजीवात्मनोममस्वरूपावगमः रागद्वेषशून्यः सविशिष्यतेसर्वतःउत्कृष्टोभवति एतादृशसमत्वबुद्धिर्मोदितेऽध्रेष्टसाधनमितिसाम्यसंपादनीयेतिभावः ९॥

कृष्णमवेजयन्तीटी॰

किंचसुहृदितिममलोष्टाश्मकांचनादर्शियोगिनःसकाशाद्यतःसुहृदादिषु समबुद्धिःसविशिष्यतेश्रेष्ठोभवतितत्रापिवयोविशेषानपेक्ष्यस्वभावेनैवहि।

तेष्वेव स्नेहस्सुहृदः यानि केनापि स्नेहेन हितैषिणी सर्वथा मित्राणि मित्राणि येन निमि
त्तेनोन येष्वेव वलः रयः ये विवदमानयोर्द्वयोरनपेक्षकास्ते उदासीना ये विवदमा
नयोस्तयोर्विवादापहारार्थिनस्ते मध्यस्थाः ये जन्मतएवानिष्टेष्वेवलेद्वेष्याः ये ज
न्मतएव हितैषिणस्ते बान्धवः ये धर्मशीलास्ते साधवः ये पापशीलास्ते पापाः स्वा
त्मैकदर्शनप्रयोजनया सुहृदादिभिः प्रयोजनाभावाद्विरोधाभावाच्च तेषु समबु
द्धिरित्यर्थः ९ ।।

सुहृन्मित्रादिषु समबुद्धिस्तु

मधुसूदनीटीका

सर्वयोगश्रेष्ठ इत्याह ।।

सुहृत्प्रत्युपकारमनपेक्ष्य पूर्वस्नेहसंबंधं विनैवोपकर्ता मित्रं स्नेहेनोपकर्ता
अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता उदासीनः विवदमानयो
रुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हितैषी द्वेष्यः स्वकृ
तापकारपेक्षयापकर्ता बंधुः संबंधेनोपकर्ता एतेषु साधुषु शास्त्रविहितकारि
षु पापेषु शास्त्रप्रतिषिद्धकारिष्वपि च काराद्रन्येषु च सर्वेषु समबुद्धिः कः कीद
क्कर्मेत्यव्यापृतबुद्धिः सर्वत्र रागद्वेषशून्यः विशिष्यते सर्वत उत्कृष्टो भवति मुच्य
त इति वा पाठः ९ ।।

सदानंदी टीका

विना प्रत्युपकारेण यागुपकर्ता सुहृत्स्मृतः स्नेहवान्मित्रमित्युक्तमरिः स्यादप
कारकः १ उदासीनो द्वयोः प्रेमद्वेषाहि विवदमानयोः पक्षपातविहीनत्वादुभ
योरप्युपेक्षकः २ मध्यस्थो यो हितान्वेषी द्वयोर्विवदमानयोः स्वस्याप्रियो भ
वेद्द्वेष्यः संबंधी बंधुरुच्यते ३ ये तेषु शास्त्रविहितकर्मकारिषु साधुषु पापेषु शा
स्त्रमर्यादासमुल्लंघनप्रवर्तिषु ४ वाद्रन्येष्वपि सर्वेषु समबुद्धिर्विमुच्यते कः किं
कर्मेति धीशून्य उत्कृष्टः समतो मम ५ ९ ।।

नीलकंठीटीका

समत्वमेव स्तौति सुहृदिति सुहृत्प्रत्युपकारमनपेक्ष्य उपकर्ता मित्रं स्नेहवा
न् अरिः शत्रुः उदासीनः उभयत्र पक्षपातशून्यः मध्यस्थः उभयहितैषी द्वेष्य आ
त्मनोऽप्रियः बंधुः संबंधी तेषु साधुषु पुण्यकृत्सु पापेषु पापाचारेषु कस्य किं का
र्ममिति अनालोचयन् तेषु सर्वेषु यः समबुद्धिः स विशिष्यते ९ ।।

आनंदीटीका

[illegible] सुहृत्स्वभावतस्सुहृदयः मित्रं कारणवशाद्य
स्य प्रीतिः अरिः कारणवशाद्द्वेष्टा उदासीनः नारिः न मित्रं मध्यस्थः कारण
वशान्मित्रत्वे शत्रुत्वे च संभाव्यः द्वेष्यो जातिवैरी बंधवः मातृपितृव्यादयो ज्ञा

गी॰
टी॰ ५

तयः साधवः सदाचाराः पापा दुराचाराः एतेषु समबुद्धिर्योगारूढवशात्
साम्यस्य प्राप्तमोहादिनानशून्यः विशिष्यते ब्रह्मप्राप्तिविशिष्टो भवती
त्यर्थः ॥ तदेवं सुमनोज्ञसंस्कारारूढध्यानयोगस्य समाधिभूमिं निरोधा-
ख्याप्यायास्मद्यायमयोगावस्थायां स्थिरपदप्राप्तये सदुपायं यमनियमा
सनादिप्रकारकं बहिरंगमाह ९ ॥

रामकंठीटीका

यस्य सुहृदरिप्रभृतिषु प्रीतिद्वेषहेतुषु नानाविधेष्वन्योन्यभिन्नरूपेषु जंत
षु समा ब्रह्मलक्षणा निर्विशेषैकतत्त्वदर्शनादेकरूपा बुद्धिः स विशिष्यते नै
ष्कर्म्ययोगिनः सकाशादुत्कर्षं लभते स हि यद्यप्युक्तसमाधिप्रतिपन्नत्वात्परि
हरति यच्च तदानुगुण्यात्स्वीकुरुते ताभ्यां न स द्वेषप्रियाभ्यां रागद्वेषौ प्रका
शयते यत्तु सर्वसाम्यप्रमाणः सत्क्रियास्ववर्तमानोपि समबुद्धिता ब्रह्मभूतए
वेति विशिष्यत इत्यर्थः सुहृदादीनां भेदो व्याख्यायते सुहृदयः स्वभावतः शो
भनहृदयः मित्रं मैत्रीकरणान्निहृतस्नेहोऽहृदं प्रति शत्रुः कारणवशाद्द्वेषाद्द्वेष्य
स्तु विनापि कारणमप्रियः उदासीनो न मित्रं न शत्रुः मध्यस्थोयः केनापि प्र
कारेण मित्रत्वममित्रत्वं वा प्रियत्वमर्हति बंधवो ज्ञातयः साधवः शास्त्रोदित
सदाचारनिरताः पापास्तद्विपरीताः उक्ताचारसंकल्पास्तेषु सर्वेषु समबुद्धि
त्वमस्य कर्मयोगिनएव बोद्धव्यं यद्यनुभावं प्रतिपन्नेषु शास्त्रचोदितत्वा
त्साधवद्यादिकर्म प्रवृत्तावपि निर्विकारैकात्म्यनिष्ठत्वम् न तु शास्त्रीशास्त्रा
विहितत्वादन्यायामित्र प्रतिपत्तिः यद्येवमभविष्यत्तद्यत्र साक्षान्नसर्वे
नस्योपदिश्यत स्यात्कथं स्वेनोपसंहारेणाप्युपास्यत तस्मात्कर्मयोगिनः
स्तु तत्तद्वर्णाश्रमक्रमागतानां शास्त्रचोदितानां क्रियाणामनतिक्रमतएव सर्वसा
म्यभावनात्र विवक्षिता [illegible] ९ ॥

लासिकी [illegible]टीका

सुहृत् स्वभावेन हिताशंसी मित्रं स्नेहवशेनोपकारकं अरिः घातकः उ
दासीनः विवदमानयोरुभयोरपि हिताशंसी द्वेष्यः द्वेषविषयः बंधुः संबं
धी साधवः सदाचाराः पापाः दुराचाराः एतेषु समा निर्विशेषैकदर्शित्वा
देकरूपा रागद्वेषशून्या वा बुद्धिर्यस्य स तु विशिष्टः यस्तु तदानुगुण्यान्न स्वी
कुरुते न स द्वेषप्रियाभ्यां रागद्वेषावेके मिथ्याचारत्वमेव [illegible]
[illegible]

विवदमानयोरुभयोरप्यु
पेक्षकः मध्यस्थः

[illegible]

[illegible] ९ ॥

पंचोलीटीका

सुहृन्मित्रादिषु समबुद्धित्वेनापि श्रेष्ठमाह सुहृन्मित्रेति सुहृन्मि
त्रार्युदासीनमध्यस्थद्वेष्यबंधुषु सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्त्ता
शत्रुः मित्रं स्नेहवत् अरिः उदासीनो न कस्यापि पक्षं भजते मध्यस्थो यो विरु
द्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियः बंधुः संबंधी एतेषु साधुषु
च शास्त्रार्थानुवर्तिषु अपि च पापेषु प्रतिनिषिद्धकारिषु सर्वेष्वेतेषु स
मबुद्धिस्तेषां जातिवर्णाश्रमादिकं स्वरूपं अविचारयन् सममेव ब्रह्मैवप
श्यन्विशिष्यते श्रेष्ठो भवति ९ ॥

रणवीरसमिद्धोपिनी ॥

उक्तमेवार्थं स्फुटयति सुहृदिति सुहृत्स्वभावत एव शोभनहृद
यो हिताशंसी च मित्रं मैत्रीकरणनिष्ठं सौहृदमत एव स्नेहवशे
नोपकारकं अरिः कारणवशाद्द्वेष्टा उदासीनो विवदमानयोरु
भयोरप्युपेक्षको तत एव न मित्रं न शत्रुः मध्यस्थो विवदमानयोर
पि हिताशंसी अत एव केनापि प्रकारेण यो मित्रत्वं वा अरित्वमर्ह
ति द्वेष्यो विनापि कारणमप्रियः बंधवो ज्ञातयः साधवः शास्त्रोदि
तसदाचारनिरताः पापास्तद्विपरीता दुराचारसंकल्पाः तेषु सर्वे
ष्वाततायिषु समस्तसमाप्तोक्तत्वान्याय्यवधादिकर्मप्रवृत्ताव
पि निर्विकारबुद्धिर्यस्य सः न तु नः शत्रोर्मित्रत्वं प्रतिपद्यमानः शा
स्त्रविहितत्वेन तादृशप्रतिपत्तेरन्याय्यत्वादिति भावः सच वि
शिष्यते सर्वस्माज्जंतुवर्गादिति शेषः ९ ॥

मधुभाष्य

९ ॥ ॥

भाषा अनुवाद

और शत्रु मित्र आदि मे जो समदर्शी मनुष्य सो योगी से भी अधिक है यह कहते हैं किसुहृद कहे स्वभाव ही से हित कारी औ मित्र जो स्नेह वशते उपकारी औ अरि कहे घातक जो शत्रु औ उदासीन अर्थात् उपकार अपकार दोनो से अलग निरपेक्ष जो औ मध्यस्थ कहे पक्षपात विना दोनो और हित कारी औ द्वेष्य अर्थात् निःप्रयोजन शत्रु जो अकारण क्रोधी औ बन्धु जिनसे कुछ सम्बन्धहै औ साधु कहे सुशील सुन्दर आचरण जिनका है तथा पाप जो दुराचारी इन सब के विषे जिसकी बुद्धि समान कहे प्रीति विरोध रहित है सो विशिष्ट कहे योगीसे अधिकहै ९ ॥

दोहा ॥

सुहृद मित्र उदासी अरि मध्यम बंधु लेखव साधु असाधु के वि।
षें सम मति कसो विशेष ९॥

42

25

योगी युञ्जीत सततमात्मानं रहसि स्थितः एकाकी यतचित्तात्मा निराशीरपरिग्रहः १०॥

शंकरभाष्यं

अत एवमुत्तमफलप्राप्तये योगीति योगी ध्यायी युञ्जीत समादध्यात् सततं सर्वदात्मानमन्तःकरणं रहस्येकान्ते योगी गिरिगुहादौ स्थितः सन्नेकाकी असहायो रहसि स्थित एकाकी चेति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा चित्तमन्तःकरणमात्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशीर्वीततृष्णोऽपरिग्रहश्च परिग्रहरहित इत्यर्थः संन्यासित्वेऽपि सति त्यक्तसर्वपरिग्रहः सन् युञ्जीतेत्यर्थः १० ॥

आनन्दगिरिकृतटीका

यथोक्तविशेषणवतो योगारूढस्य फलमते योगानुष्ठाने प्रयतितव्यमित्यभिधानानन्तरं ध्यानमभिदधाति अत एवमिति आदरनैरन्तर्यदीर्घकालत्वविशेषणत्रयं योगस्य सूचयति सततमिति तस्यैव पश्चाद्योगाङ्गमुपन्यस्यति रहसीत्यादिना सर्वदेत्यादरदीर्घकालयोरुपलक्षणं प्रत्यगात्मानं व्यावर्तयति अन्तःकरणमिति गिरिगुहादावित्यादिशब्देन योगप्रतिबन्धकदुर्जनादिविधुरो देशो गृह्यते विशेषणद्वयस्य तात्पर्यमाह रहसीति योगं युञ्जानस्य संन्यासित्वे विशेषणान्तराणि दर्शयति यतेति सति संन्यासित्वे किमिति परिग्रहग्रहणप्रसक्तेरित्याशङ्क्य कौपीनाच्छादनादिष्वपि शक्तिनिवृत्त्यर्थमिदमाह संन्यासित्वेऽपीति १० ॥

स्वामिकृतटीका

एवं योगारूढस्य लक्षणमुक्त्वेदानीं तस्य साङ्गं योगं विधत्ते योगीत्यादिना स योगी परमो मत इत्यन्तेन ग्रन्थेन योगी योगारूढ आत्मानं मनो युञ्जीत समाहितं कुर्यात् सततं निरन्तरं रहसि एकान्ते स्थितः सन् एकाकी सङ्गशून्यः यतं संयतं चित्तमात्मा देहश्च यस्य निराशीर्निराकाङ्क्षः परिग्रहशून्यश्च १० ॥ अपरिग्रहः

पिशाचभाष्यं

अत एवोत्तमफलप्राप्तये योगी ध्यायी युञ्जीत समादध्यात् सततमात्मानमन्तःकरणं रहसि स्थितः एकान्ते गिरिगुहादौ स्थितः सन् एकाकी असहायः एकाकीति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा निराशीर्वीततृष्णः अपरिग्रहश्च परिग्रहरहितः संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहः सन् युञ्जीतेत्यर्थः १० यतं चित्तमन्तःकरणमात्मा देहश्च संयतौ यस्य स यतचित्तात्मा

रामानुजभाष्यं

गी.
टी.
प.

४३

योगी उक्तप्रकारः कर्मनिष्ठः सततमहरहर्योगकाले आत्मानं युञ्जीत युक्तं कुर्वीत स्वदर्शननिष्ठं कुर्वीतेत्यर्थः रहसि जनवर्जिते निःशब्दे देशे स्थितः एकाकी तत्रापि न सद्वितीयः तत्रापि यतचित्तात्मा यतचित्तमनस्को निराशीः आत्मव्यतिरिक्ते कृत्स्नवस्तुनि निरपेक्षः अपरिग्रहः तद्व्यतिरिक्ते कस्मिंश्चिदपि ममतारहितः १०॥

अभिनवगुप्तकृतटीका [illegible] १०

ननु जितात्मन इत्युक्तं तत्कथं तज्जयं इत्याशंक्य रूपदेशः कश्चिदुपायः का परमार्थप्रण यस्य सम्यग्द्वारतः चित्तसंयमश्च यदि श्रूयते आत्मानं च चित्तं च युञ्जीत साम्ये कुर्वीत सततमिति न परिमितं कालं यत्र कृत्ते दिक्षु सत्स्वेतद्युज्यते नान्यथा॥१०॥

एवं योगारूढलक्षणं निरूप्येदानीं योगी युञ्जीतेत्यादिना तस्याभ्यासयोगी परमो मत इत्यन्तेन सप्तविंशतिभिः श्लोकैः साङ्गमभ्यासयोगं निरूपयति योगीति योगशास्त्रेनाव योगत्रयमुपदिष्टं तत्र प्राणापानयोगो मनःपवनयोगो जीवब्रह्मणो योगश्च एतत्क्रमेण योगत्रये प्राप्ते मिळुरात्मानं मनः सततं युञ्जीत समाहितं कुर्यात् अथ चित्तक्षोभकाभावस्य मनःक्षोभस्य नु वदति रहसि एकान्ते एकाकी सङ्गशून्यः यतनियमितं आत्मा शरीरं येन निराशीः निराकाङ्क्षः अपरिग्रहः परिग्रहशून्यः [illegible] १०॥

वनमालीटीका

योगारूढस्य लक्षणं फलं चोक्त्वा तस्य साङ्गयोगं विधत्ते योगी त्यादिना योगी परमो मत इत्यन्तेन योगी योगारूढः आत्मानं चित्तं सततं निरन्तरम् युञ्जीत त्रिप्रमूढ विक्षिप्तमिति त्रयपरित्यागेनैकाग्रनिरोधभूमिभ्यां परमात्मनि देवे भगवति समाहितं कुर्यात् क्षिप्तमूढविक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः पञ्च योगभाष्ये अस्यार्थः क्षिप्तं रजसा विषयेषु व्युत्थितमतः मूढं तमसा निद्रादिवृत्तिमत् । क्षिप्ताद्विशिष्टं विक्षिप्तं सत्वाधिक्येन समस्तं यद्यपि चित्तं रजोमात्रया तत्र व्युत्थितमतः एकस्मिन्नेव विषये ध्येयेऽविचलितस्य चित्तदीपस्यैकाग्रं संप्रज्ञातसमाधि योगेन निरुद्धं निरुद्धसकलवृत्तिकं संस्कारमात्रशेषमसंप्रज्ञातसमाधियोग
मित्यर्थः रहसि गिरिगुहादौ योगप्रतिबन्धकदुर्जनादिवर्जिते देशे स्थितः एकाकी त्यक्तसर्वगृहपरिजनः चित्तं मनः करणमात्मा देहस्त्ववश्यतो योगविरोधिव्यापारशून्यो यस्य सः निराशीर्वैराग्यदार्ढ्येन विगततृष्णः अत एवापरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगविरोधिपरिग्रहेणशून्यः १०॥

कुसुमवैजयन्तीटीका

अथैवंभूतस्य योगिनः साङ्गयोगसाधनप्रकारमाह योगीत्यारभ्यात्मौपम्येनेत्यन्तेन ग्रन्थेन योगी युञ्जीतेति योगी उक्तकर्मयोगनिष्ठः सततमहरहर्योगानुष्ठानसमये आत्मानं मनः युञ्जीत समाधियुक्तं कुर्यात् किं कुर्वन् रहसि ज।

नवर्जिते शब्दशून्ये च देशे स्थितः सन् तत्रापि एकाकी द्वितीयरहितः तत्रा
पि यतचित्तात्मा नो चित्तदेहौ येन स तथा आसनप्राणायामादिना चित्तस्य यम
नियमासनप्रत्याहारादिना देहस्य च संकोचयत्नवानित्यर्थः यतो निरा
शीः विषयवैराग्यातिशयत्वेन तत्रानिःस्पृहः यद्वा आत्मावलोकनेक
कामतयैतदन्याकृतविषयाशारहित इत्यर्थः अतएव अपरिग्रहः आत्म
व्यतिरिक्तस्य वस्तुनः संग्रहशून्यः १० ॥

मधुसूदनी टीका

एवं योगारूढस्य लक्षणं फलं चोक्त्वा तस्य सांगं योगं विधत्ते योगीत्यादिभिः
स योगी परमो मत इत्यंतैरेकत्रिंशता श्लोकैः तत्रैवं उत्तमफलप्राप्तये॥
योगी योगारूढः आत्मानं चित्तं सततं निरंतरं युंजीत विक्षिप्तमूढक्षिप्तभू
मिपरित्यागेनैकाग्रनिरोधभूमिभ्यां समाहितं कुर्यात् रहसि गिरिगुहादौ
योगप्रतिबंधकदुर्जनादिवर्जिते देशे स्थितः एकाकी त्यक्तसर्वपरिग्र
हपरिवर्जनः संन्यासी चित्तमंतःकरणमात्मा देहश्च संयतौ योगप्रतिबं
धकव्यापारशून्यौ यस्य स यतचित्तात्मा यतो निराशीः वैराग्यदार्ढ्येन विग
ततृष्णः अतएव अपरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगप्रतिबंधकेन प
रिग्रहेण शून्यः १० ॥

सदानंदी टी०

अतउत्कृष्टतासिद्धये युंजीत सततमितीर्यते श्रुत्वा वेदांतवाक्येभ्यो मत्वा सदु
पपत्तिभिः १ आत्मतत्वं ततस्तस्मिन् निदिध्यासनतत्परः चित्तं समाहितं कु
र्यान्नित्यमेकांतदेशगः २ त्यक्त्वा विक्षेपकारित्वात्समस्तं ममतास्पदं सं
यतो चित्तदेहौ च येन सोत्यंतनिश्चलः ३ परवैराग्यदार्ढ्येन निराशी वी
ततृष्णकः चित्तविक्षेपकत्यागी योगी त्यक्तपरिग्रहः ४ १० ॥

नीलकंठी टी० ॥

योगीति योगी योगाभ्यासपरः रहसि एकांते स्थितः सन् आत्मानं बुद्धिं यु
ञ्जीत समादध्यात् सततमिति नैरंतर्यमुक्तं निराशीर्योगसिद्धेरन्यत्प्रार्थ
यानः तदेकनिष्ठ इति यावत्तेन सत्कारउक्तः एकाकी असहायः संन्या
सीत्यर्थः यतो स्थिरीकृतौ चित्तं मनः आत्मा सेंद्रियं शरीरं येन स यतचि
त्तात्मा तथा अपरिग्रहः एकाकित्वेपि कंथाउस्तकादिबहुपरिग्रहशू
न्यः १० ॥

आनंदी टीका ॥

तदेवं मनोबुद्ध्यहंकाराणां ध्यानधारणसमाधिभिर्हृत्ति निरोधात्प्राप्यायां
सम्यक् परमयोगावस्थायां स्थिरपदप्राप्तये सउपायं यमनियमासनादिप्र०

कारकंबहिरंगमाह यतेनिरुद्धवृत्तिचित्तंयस्येदृगात्मायस्यसआत्मनि
समाहितचित्तइत्यर्थः निराशीः शब्दादिविषयस्पृहाशून्यअतएवापरिग्र
हः ममेदमित्यभिमानरहितः १० ॥

रामकंठी टी॰

अथयथोक्तसाम्यानतिक्रमसमाहितस्यचित्तवृत्तिनिरोधलक्षणम
पियोगमितरक्रियावदहोरात्रमध्येव्यवस्थितापितोभ्यासकालेविशि
ष्टेतिकर्तव्यतान्वितमपिकर्मयोगिनःश्लोकषट्केनाभ्यनुजानन्नाह
क्रमेणैतद्व्याख्यायते योगीप्रबंधप्रतिपादितप्रतिपादयिष्यमाणस्व
रूपेणप्रशस्तव्याख्यातयोगांतरविलक्षणपरिकर्मणासर्वकालदेशा
विरोधिनासमाधिविशेषनिरपेक्षेणसमस्तान्तर्बहिष्करणप्राणवृत्ति
ष्वपिनिरुद्धप्रसरेणकर्मयोगेनयोगवान् शास्त्रविहितत्वात् आत्मान
मंतःकरणंजीवात्मानंवासततंप्रत्यहंव्यवस्थापितंनियतकालान
तिक्रमेणरहस्येकान्तेव्यवधायकरहितेदेशेस्थितयत्रएकाकीकेवलः ।
तथायतचित्तात्मा यतेनिगृहीतेचित्तंमनोयेनतादृशआत्मादे
होयस्यसतथाविधः सत्परमात्मनिसमादधीतचित्तवृत्तिनिरोधल
क्षणमपियोगमनुतिष्ठेदित्यर्थः किंतुनिराशीराशिषःफलाशंस
नानिष्क्रांतःमोक्षलक्षणेपिफलेप्रार्थनादैन्यरहितस्तथापरिग्रहः
सर्वत्रसमत्वाभिमानरहितः तथामच्चित्तत्वादिवक्ष्यमाणधर्मयुक्तोयुं
जीतेत्यनेनकर्मयोगसमाधानाप्रमत्तेनायंयोगोभ्यसनीयइत्युक्तम् १०

लासिकी टी॰

अथकर्मयोगिनश्चित्तवृत्तिनिरोधलक्षणध्यानयोगमारुरुक्षोरितर
क्रियावदहोरात्रमध्येव्यवस्थिताभ्यासकालविशिष्टेतिकर्तव्यानितम
पियोगीत्यादिना सयोगीपरमोमतइत्यतेनग्रंथेनोपदिशति योगीउ
क्तविधयानित्यसमाहितः आत्मानंसततंप्रत्यहंव्यवस्थापितनिय
तकालानतिक्रमेणयुंजीतसमाहितंकुर्यात् प्रत्यवस्थेशतकीदृशः
रहसिएकान्तेव्यवधायकरहितेएकान्तदेशस्थितःएकाकीअसहायः
तथायतचित्तात्मायतेनिगृहीतेचित्तंमनआत्माशरीरंचयेनसः नि
राशीर्निराकांक्षोपरिग्रहोममताशून्यःमच्चित्तत्वादिवक्ष्यमाणधर्मयु
क्तोयुंजीतेत्यनेनकर्मयोगसमाधानाप्रमत्तेनायंयोगोभ्यसनीयइत्यु
क्तम् एकाकीत्वादिश्रुतस्त्वेतद्युज्यतेनान्यथा १० ॥

पंचोली टी॰

एवं योगारूढस्य लक्षणं श्रेष्ठत्वं चोक्तानस्य सर्वोत्तमफलप्राप्तये सांख्य योगं विधत्ते योगी युंजीत इत्यारभ्य स योगी परमो मत इत्यंतेन ग्रंथेनाह योगीति एकाकी असहायः संयतो अंतःकरणबुद्धी यस्य संयतचित्तात्मा निराशीः विगततृष्णो योगी ध्यानवान् अपरिग्रहः रहसि गिरिगुहादौ स्थितः आत्मानं अंतःकरणं युंजीत समाधियुक्तं कुर्यात् १० ॥

रणवीरसमिद्बोधिनी ॥

योगीति योगी कर्मयोगी रहसि रहस्ये गुरूपदिष्टेध्यात्मविद्यामार्गे स्थितः कृतस्थितः एकाकी महावीरत्वेन सहायानपेक्षो यतचित्तात्मा निरुद्धीतमनोधीन्द्रियः निराशीः पुत्रादिविषयजीविताशंसारहितः सिद्ध्यसिद्ध्योः समश्च अपरिग्रहः अः केपावेतिषेथेवेन्येकात्तरकोशादकारणेवैविस्तरितिश्रुतेश्च अः विष्णुः परमेश्वरः स एव परिग्रहो यस्य सः परमेश्वरमेवशरणीकृत्य प्रवृत्त इति यावत् स्त्रीपुत्रादिपरिवारं परित्यज्य पुण्यभूमिमागत इति वा अत एव वीरत्वोऽड्डेकाकी केवल एवानेकवीरप्रतिभटत्वे स्थितः सततं सर्वकाले एवमेव नित्यप्रतिपादितास्वनेकविधास्ववस्थासु आत्मानं बुद्धिं युंजीत समाहितं कुर्वीत अथवा आत्मानं वपुः तदुपलक्षितानिंद्रियादिकर्मेन्द्रियाणि युंजीत बुद्ध्यादिना संयोजयेदिति १० ॥

मधुभाष्य

योगी युंजेत्यादिना युंजीत समाधियोगयुक्तं कुर्यात् आत्मानं मनः योगं समाधियोगं युंज्यात् निर्वाणपरमां शारीरत्यागोत्तरकालीनां अनशनादिनिषेधोऽप्रामकस्य उक्तं हि निष्फानमयष्वासमेव एनंदयादिवर्जनं कृत्वा निमीलिताद्गुणकोध्याय

न्त्रसिष्यतीति नारदीये युक्ताहारविहारस्य सोपायाहारादेर्यावता
श्रमाद्यभावो भवति तावदाहारादेरित्यर्थः आत्मनि भगवति आ
त्मनः भगवद्विषयंयोगं आत्मना मनसा आत्मनि देहे आत्मानं
भगवन्तं प्रपश्यन्तुष्यतो भगवद्रूपात् दुःखसंयोगो येन वियुज्यते
स दुःखसंयोगवियोगः न केवलमुत्पन्नं दुःखं नाशयति उत्पत्ति
मेव निवारयतीति दर्शयति स योगमाग्रहेन निश्चयेन योक्तव्यः
योक्तव्य एव त्वभ्युपगेत्यर्थः सर्वान्सर्वविषयान् अशेषतः एक
विषयोपि कामः स्वल्पः कादाचित्कोपि न कर्त्तव्य इत्यर्थः मन
सैव विनियन्तुं शक्यते नान्येत्येवमाह शनैः शनैः कारणं मनो निग्रहे
आत्मस्मरणे च यतो यतो यत्र यत्र यतो यतो धावतीत्यादिना ध्या
योगात् आत्मन्येव वशं नयेत् आत्मविषय एव वशीकुर्यादि
त्यर्थः एवोक्तश्लोकोक्तं प्रपंचयति १०॥

स्थास्यतीति नारदीये युक्तादानविद्वारस्य सोपायाद्यादेर्यावता
श्रमाद्यभावो भवति तावदाहारादेरित्यर्थः आत्मनि भगवति आ
त्मनः भगवद्विषयं योगं आत्मना मनसा आत्मनि देहे आत्मानं
भगवंतं पश्यंस्तुष्यतो भगवद्रूपात् दुःखसंयोगो येन वियुज्यते
स दुःखसंयोगवियोगः न केवलमुत्पन्नं दुःखं नाशयति उत्पत्ति
मेव निवारयतीति दर्शयति संयोगमाहेन निश्चयेन योक्तव्यः
योक्तव्य एव बहुभूषणोत्यर्थः सर्वान्सर्वविषयान् अशेषतः एक
विषयोपि कामः स्वल्पः कादाचित्कोपि न कर्तव्य इत्यर्थः मन
सैव विनियंतुं शक्यतेनानेत्येव याह बुद्धेः कारणत्वं मनो निग्रहे
आत्मरमणे च यतो यतो यत्र यत्र यतो यतो यावतीत्यादिना प्र
योगात् आत्मन्येव वशमानयेत् आत्मविषय एव वशीकुर्यादि
त्यर्थः एवोक्तं श्लोकोक्तं प्रपंचयति १०॥

भाषाअनुवाद

योगी के लक्षण कहिकर अब उसका अङ्ग रूप जो योग सो इस।
श्लोक से लेकर इसी अध्याय के स योगी पंमोमतः इस ३२ श्लोक २
तक कहते हैं कि योग आरूढ पुरुष सङ्ग रहित होय जिस के अ
न्तःकरण औ शरीर वशीभूत हैं सो निराकांत सर्व परिग्रह रहित
एकान्त मे अकेला सावधान बैठि कर अपने आत्माकहे मनको नि
रन्तर भगवत के भजन मे युक्त करै १०

दोहा

योगीयुक्त है आत्मको सदा एकांत स्थितहोय   एकाकी जित
इंद्रिजो अटल अकुटुंबी सोय १०।।

शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः नात्युच्छ्रि
तंनातिनीचंचैलाजिनकुशोत्तरं ११॥

शांकरभाष्यं

अथेदानींयोगंवक्ष्यन् आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः
प्राप्तयोगस्य लक्षणं तत्फलादि चेत्यत आरभ्यते तत्रासनमेव तावत् प्रथमम्।
उच्यते शुचाविति शुचौशुद्धे विविक्तेस्वभावतः संस्कारतोवा देशेस्थानेप्रतिष्ठाप्य स्थि
रमचलमात्मनः आसनं नात्युच्छ्रितं नातीवोच्छ्रितंनाप्यतिनीचं तच्च चैलाजिन
कुशोत्तरंचैलमजिनं कुशाश्चउत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं
पाठक्रमात् विपरीतोऽत्र क्रमश्चैलादीनां ११॥

आनन्दगिरिकृतटीका

योगंयोगाङ्गानि चोपदिश्योत्तरसन्दर्भस्य तात्पर्यमाह अथेति योगस्वरूपकनिप
यतनरूपप्रदर्शनानन्तर्यमथशब्दार्थः विहारादीनामित्यादिशब्देन यथोक्तासना
दिगतावान्तरभेदग्रहणं तत्फलादि चेत्यादिशब्देन योगफले सम्यग्ज्ञाने चोक्तफ
ले कैवल्ये ततो भ्रष्टस्यासन्निकाविनष्टत्वमित्यादि गृह्यते एवं समुदायतात्पर्ये दर्शिते
किमासीनः शयानस्तिष्ठन् गच्छन् कुर्वन् वा युञ्जीतेत्यपेक्षायामनन्तरश्लोकतात्प
र्यमाह तत्रेति निर्द्धारणे सप्तमी प्रथमं योगानुष्ठानस्य प्रधानमासीनः सम्भवा
दिति साधनादिति यावत् विविक्तत्वं द्वेधा विभजते स्वभावत इति आसनस्य स्थैर्ये त
त्रोपविश्य योगमनुतिष्ठतः समाधानायोगात् योगासिद्धिरित्यभिसन्धाय वि
शिनष्टि अचलमिति आस्यतेऽस्मिन्निति व्युत्पत्तिमनुसृत्याह आसनमिति आत्म
न इति परकीयासनव्युदासार्थं पतनभयपरिहारार्थं नात्युच्छ्रितं नाप्यतिनीच
मिति भूतलपाषाणादिसंस्पर्शे वा ततो भाविशीतोष्णादिसम्भावितदोषनिरासार्थं चै
लं वस्त्रमजिनं चर्म्मपञ्चनखं तद्धि मृगस्य कुशा दर्भास्ते चोत्तरे यस्मिन्नुपरिष्टादास्ता
स्तथा चोक्ते प्रथमं चैलं ततोऽजिनं ततश्च कुशा इति प्रतिपन्नक्रमस्य पाठिकं क्र
ममतिक्रम्यादौ कुशास्ततोऽजिनं ततश्चैलमिति क्रमो विवक्षित इत्याह विपरीतोऽत्रे
ति ११॥

स्वामिकृतटीका

आसननियमं दर्शयन्नाह द्वाभ्यां शुद्धे स्थाने आत्मनः स्वस्यासनं स्थापयित्वा कीदृशं स्थि
रमचलं नातीवोच्चं न चातिनीचं चैलं वस्त्रमजिनं व्याघ्रादिचर्म चैलाजिने कुशाश्च उ
त्तरे यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमास्तीर्येत्यर्थः ११

गी·
टी·
ध·

47

पैशाचभाष्यं

अथेदानीं योगं युञ्जानस्याहारादीनां योगसाधनत्वेन नियमो वक्तव्यः आसनयोगस्य ल
क्षणं फलं चेत्यादि वक्तव्यमिति तदारम्भेनेत्या सनमेव तावत् प्रथममुच्यते शुचाविति
शुचौ विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मनः आत्मस
मानं नात्युच्छ्रितं नातिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनकुशाभ्योत्तरं यस्मि
न्नासने तदासनं चैलाजिनकुशोत्तरं विपरीतक्रमः ॥११॥

रामानुजभाष्यं

शुचौ देशे अशुचिभिः पुरुषैरपरिगृहीते अशुचिवस्तुभिरस्पृष्टे च पवित्रभूते देशे दा
र्वादिनिर्मितं नात्युच्छ्रितं नातिनीचं कुशाजिनचैलोत्तरमासनं प्रतिष्ठाप्य तस्मिन्मनःप्र
सादकरे समाश्रय उपविश्य अनाकुलमेकाग्रमनः कृत्वा ॥

अभिनवगुप्तकृतटीका उपक्रमे ११ आसनस्थैर्यात्कालस्थैर्यं चित्त

परमार्थप्रपा टी·

अथासननियमं दर्शयति+

+शुचौ देश इति द्वाभ्यां । शुचौ पवित्रे तीर्थादिसन्निहिते देशे शीतलतरुच्छायां उपवाह
मनोरमे प्रदेशे आत्मनः स्वस्य स्थिरमचलं मृत्तिकोरकाद्युपद्रवशून्यं यथा भवति
तथा आसनं प्रतिष्ठाप्य किंभूतं नात्युच्छ्रितं नात्युच्चं कदापि पतनसंभवात् तथा
नातिनीचं भूसंघट्टनेन गात्रोपद्रवात् अतो मध्यस्थमित्यर्थः अथासनस्वरूपमा
ह चैलेति चैलं वस्त्रं अजिनं व्याघ्रादिचर्म चैलाजिनकुशाभ्य उत्तरउपरि स्थितं य
स्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमित्यर्थः ॥११॥

वनमालीटीका

तत्रासननियममाह शुचाविति द्वाभ्यां शुचौ स्वभावतः संस्कारतो वा गङ्गात
टगुहादिदेशे समे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रितं नात्युच्चं नाप्यतिनीचं चै
लाजिनकुशोत्तरं चैलं मृदुवस्त्रं अजिनं मृदु व्याघ्रादिचर्म तेन कुशेभ्य उत्तरे उपरित
नं यस्मिन् तत् आसने स्थितिर्यासने कुशोपर्यजिनं तदुपरि चैलमित्यर्थः आत्म
न इति परासनव्यावृत्त्यर्थं ॥११॥

कृष्णवैजयन्तीटी·

किंच आसनविधिमाह द्वाभ्याम् शुचौ देश इति शुचौ स्वतः शुद्धे गंगायमुनादि
तटे गोवर्द्धनादिगिरिगह्वरादौ वा देशे मधुवनपुष्करप्रयागायोध्यादौ आत्मनः स्व
स्य स्वेन स्वाभिमते देशे स्वाभिमतमासनं कुर्यादित्येकपात योगस्य प्रतिकूलत्वं
स्यादिति सूचितम् आसनस्य पवेशने प्रतिष्ठाप्य संस्थाप्य कीदृशे स्थिरं निरुपद्रव

त्वात्तस्थानादनुस्थाने दंशवृश्चिकसर्पादिविघ्नभयाद्याकुलमित्यर्थः पुनः की
दृशं नात्युच्छ्रितमत्यन्तनादिमयाद्भ्रान्ताख्यं नातिनीचम् भूमेः शीतोष्णादिशरणेवार
भयाद्यातिविस्तृतम् चैलाजिनकुशोत्तरं चैलं पौतमृदुवस्त्रम् अजिनं मृदु मृगव्या
घ्रादिचर्म कुशो दर्भः कुशाश्च अजिनं च चैलं च ते उत्तरोत्तरमिति सूत्रेण चैलस्य पू
र्वनिपातो ऽभ्यर्हितत्वेप्यनेन कुशादजिनस्य पूर्वनिपात इति चैलाजिनकुशाउ
त्तरे यस्मिंस्तत् यद्वा अजिनमुत्तरं यस्मात्सोजिनोत्तरः सचासौ कुशश्चेति मध्यम
पदलोपी समासः अजिनकुशाउत्तरम् अजिनकुशोत्तरं चैलम् अजिनकुशोत्तरं य
स्मिंस्तत् यद्वा कुशश्च अजिनं च अजिनकुशौ अभ्यर्हितत्वादजिनस्य पूर्वनितः अ पा
जिनकुशाभ्यामुत्तरम् अजिनकुशोत्तरं चैलम् अजिनकुशोत्तरं यस्मिंस्तत् यद्वा अ
जिनं च चैलं च चैलाजिने सात्त्वरत्वाच्चैलस्य पूर्वनिपातः कुशाउत्तरे कुशोत्तरे चै
लाजिने कुशोत्तरे यस्मिंस्तत् कुशोपरि अजिनं तदुपरि चैलमित्यर्थः ११ ॥

मधुसूदनी टी॰

तत्रासननियमं दर्शयन्नाह द्वाभ्यां ॥ शुचौ स्वभावतः संस्कारतो वा शुद्धे जनसमुदा
यरहिते निर्भये गंगातटगुहादौ देशे समे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रि
तं नात्युच्चं नाप्यतिनीचं चैलाजिनकुशोत्तरं चैलं मृदुवस्त्रं अजिनं मृगव्याघ्रादिच
र्म ते कुशेभ्य उत्तरे उपरितने यस्मिन् तदास्यतेस्मिन्नित्यासनं कुशमयबृहत्पुपरि
मृदुचर्म तदुपरि मृदुवस्त्ररूपमित्यर्थः तथा चाह भगवान् पतञ्जलिः स्थिरसु
स स्वमासनमिति आत्मन इति परासनव्यावृत्त्यर्थं परस्यापि परेच्छानियमाभावेन योग
विक्षेपकरत्वात् ११ ॥

सदानंदीटीका

आसनाहारनियमानाह द्वाभ्यां जगद्गुरुः स्वभावतः संस्कारतो वा शुद्धदेशे स्थिरेव
पः १ प्रतिष्ठाप्यासनं स्वस्य नात्युच्चं नातिनीचकं कौशाहसीसमास्तीर्य मृदुचर्म
कुशोपरि २ चर्मोपरि मृदुवस्त्रं वस्त्रमास्तीर्य योगिराट् १ ११

नीलकंठीटीका

योगं युंजीतेत्युक्तं तत्कथमित्याकांक्षायां तदंगान्यासनादीन्याह शुचौ देश इत्यादि
ना शुचौ स्वभावतः संस्कारतो वा पूते देशे स्थाने प्रतिष्ठाप्य संस्थितं कृत्वा स्थिरं नि
श्चलं आस्तेस्मिन्नित्यासनं स्थंडिलं निश्चलमित्यनेन सन्नयुप्रमेव स्थंडिलं न तु काष्ठम
यं पीठं आसनमिति परासनव्यावृत्त्यर्थं नात्युच्छ्रितं नात्युच्चं नातिनीचं चैलाजिनकु
शाः उत्तरे उपर्युपरि यस्य तत् चैलाजिनकुशोत्तरं अजिनादुपरि चैलं कुशेभ्य उपरि अ

गी॰
टी॰
ष

जिनेस्येडिलस्योपरिकुशाश्त्यर्थः ११॥

आनन्दी टीका [illegible] ११ सम्प्रायम्

रामकंठी टीका

अस्येदानीपरिकर्माभिधीयते किंकृत्वायुञ्ज्यात् आत्मनःशुचौ देशेयत्नाद्युपेततयाशुद्धमवित्परिसरगिरिगुहादौगृहस्योपततया सूपलिप्तविविक्तसदनादौविशुद्धेस्थाने आसनंसमाधिविष्टरंप्र तिष्ठाप्यस्थितिंशापयन्कीदृशंस्थिरंनिश्चलं तथात्युच्छ्रितत्वार्थमु च्छ्रायनिम्नत्वातिशयरहितं तथाचैलंवस्त्रमजिनंमृगादिचर्म कुशादर्भाः तदुत्तरंतथानेनैवगृहस्यस्यचैलाजिनोत्तरम् ११॥

लासिकी टीका

अस्येदानींपरिकर्माभिधीय [illegible] ते किंकृत्वायुञ्ज्यादित्याह ॥
स्वभावतःसंस्कारतोवाशुद्धेस्थाने आत्मनआसनमास्यतेस्मिन्नित्यासनंप्र तिष्ठाप्यस्थापयित्वा कीदृशंसर्वार्थं नात्युच्छ्रितं नचातिनीचम् स्थिरंनिश्च लं तथाचैलाजिनकुशोभ्यः उत्तरेयास्तत् कुशामयहस्तुपरि मृदुचर्म तदु परिमृदुवस्त्रमास्तीर्येत्यर्थः स्थिरमितिनोकादिव्यावृत्त्यर्थं तदुक्तं स्थिरंसुख मासनमिति ११॥

पंचोलीटीका

अथेदानींयोगंयुञ्जानस्यासनाहारविहारादीनांयोगसाधनत्वेननियमे वक्तव्ये आसननियमंतावत्प्रथममाह शुचौदेशेतिद्वाभ्यां आत्मनःआस नेनात्युच्छ्रितंनअतिनीचंचैलाजिनकुशोत्तरंपूर्वंकुशास्तेषामुपरिकृष्णा जिनंतस्योपरिवस्त्रंएवंविधंस्थिरमात्मासनंप्रतिष्ठाप्य ११॥

रणवीरसमिद्बोधिनी ॥

शुचौदेशे इति शुचावतिमेध्येदेशेकुकदेवादिके विषये आत्मनःस्व

स्यआसनं आस्तेस्मिन्निति व्युत्पत्त्या रथ्यादिकं प्रतिष्ठाप्य प्रतिष्ठितं
कृत्वा तत्रैवासने उपविश्य मनस्यैकाग्र्यं आरभ्यमाणकार्यैकवि
षयं कृत्वा यतचित्तेंद्रियक्रियः यता नियमिताश्चित्तस्येंद्रियाणां
च क्रियाः संशयस्तेदादयो दर्शनादयश्च व्यापारा येन तादृशो यो
गी योगं युज्यते संधीयते यत्रेषीति योगः प्राणादिस्तं युंज्याद्नुवि
संदधीत किमर्थं आत्मविशुद्धये आत्मनःस्वस्य विशुद्धिः परकृत
वैरनिर्यातनं तदर्थं अथवा विशुद्धिरनेकजन्मार्जितपापप्रोंछ
नं तदर्थं शुद्धे नैव तत्क्रिया निर्धूतकल्मषमोक्षाय कल्पते इति हि
प्रसिद्धं अथवा आरभ्यति वृत्तेः संजायमानापयशोनरकादिल
क्षणमलापसारणार्थमिति कथंभूतमासनं स्थिरं चलादि व
र्जितमचलं गौरवदार्ढ्यादि गुणयुक्तमिति यावत् तथा
नात्युच्छ्रितं नातिनीचं अत्युच्छ्रयस्य उपरोधत्वात् अतिनीचस्य स
र्वैःक्षोदनीयत्वात् उच्छ्राय यावन्नत्याति पादयरहितं किंभूयोवि
तो ˜ प्रमाणं तथा चैलाजिनकुशोत्तरं चैलं क्षौमादिवस्त्रं अजि
नं द्वीप्यादीनां चर्म कुशा दर्भाः चैलाजिनेकुशेभ्य उत्तरं यस्मिन्
कुशोपरि चर्मणा तदुपरि वस्त्रेण वास्तीर्णमित्यर्थः पविर
तयाकुशादीनामास्तरणे प्रयोग इति बोध्यं यद्वा चैलं कंबा
लाद्येवस्त्रं अजिनं द्वीप्यादिचर्म कुशा लोदप्राला काशा उत्तरं त
तयाहृतमिति यावत् कांबलद्वैप्यादयो दिव्याः प्रसिद्धाः कुशा
हतंवच परेऽवगोदनाउभैय तात्व्यंजकमिति ११ ॥

मधुभाष्य

भाषा अनुवाद

उसी योगका आसन औ नियम आदि दिखावते हुये दो श्लोकसे कहते हैं कि पवित्र स्थानमे अपने आसन पर बैठनेके अनन्तर योग अभ्यास करै आसन कैसा चहिये कि जो अचल और बहुत ऊंचा न अति नीचा होय और चैल कहे वस्त्र अजिन व्याघ्रचर्म अर्थात् नीचे कुशा तब चर्म ऊपर वस्त्र ऐसा आसनकरै ॥ ११ ॥

दोहा

स्वच्छ स्थानमे आसन अपनो स्थिर कर लेहिं नाऊंचें ना नीच अ-
ति चैल अजिन कुशा जेहिं ॥ ११

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः उपविश्या
सने युञ्ज्याद्योगमात्मविशुद्धये १२ ॥

शांकरभाष्यं

प्रतिष्ठाप्य किं तत्रेति तत्र तस्मिन्नासने उपविश्य योगं युञ्ज्यात् कथं सर्वविषये
भ्य उपसंहृत्यैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः चित्तं च इन्द्रियाणि च चित्तेन्द्रि
याणि तेषां क्रियाः संयता यस्य स यतचित्तेन्द्रियक्रियः स किमर्थं योगं युञ्ज्यादित्या
हात्मविशुद्धये अन्तःकरणस्य शुद्ध्यर्थमित्येतत् १२ ॥

आनन्दगिरिकृतटीका

यथोक्तमासने समास्थाय किं कर्तव्यमिति प्रश्नपूर्वकं कर्तव्यं तन्निर्दिशति प्रतिष्ठा
प्येति योगं युञ्जानस्येति कर्तव्यताकलापं पृच्छति कथमिति सर्वेभ्यो विषयेभ्यः
सकाशात् प्रत्याहृत्य मनसो यदेकस्मिन्नेव ध्येये विषये समाधानं यच्चित्तस्येन्द्रि
याणां च बाह्यक्रियाणां संयमनं तदुभयं कृत्वा योगमनुतिष्ठेदित्याह तत्रेति आ
सने यथोक्ते स्थित्वा यथोक्तया रीत्या योगानुष्ठानस्य प्रश्नपूर्वकं फलमाह स कि
मर्थमित्यादिना १२ ॥

स्वामिकृतटीका

तत्रेति तत्र तस्मिन्नासने उपविश्यैकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यादभ्य
सेत् यता उपरताश्चित्तस्येन्द्रियाणां च क्रिया यस्य आत्मनो मनसो विशुद्धये उपशान्तये १२ ॥

पिशाचभाष्यं

प्रतिष्ठाप्य किं तत्रैकाग्रमिति चैलाजिनकुशोत्तरे तत्र तस्मिन्नासने उपविश्य यो
गं युञ्ज्यात् कथं सर्वविषयेभ्य उपसंहृत्य एकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः
स किमर्थं योगं युञ्ज्यादित्यत आह आत्मविशुद्धये अन्तःकरणस्य विशुद्ध्यर्थमित्ये
तत् १२ ॥

रामानुजभाष्यं

सर्वात्मनोपसंहृतचित्तेन्द्रियक्रियः आत्मशुद्धये बन्धविमुक्तये योगं नियुञ्ज्यात्
आत्मावलोकनं कुर्वीत १२ ॥

अभिनवगुप्तकृतटी॰ उपक्रमे १२ चित्तक्रियाः संकल्पात्मानः अन्याश्चेन्द्रियक्रियाः
यताः नियमं नीताः १२

परमार्थप्रपाटी॰

तत्र तस्मिन्नासने उप विश्यैकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यात् ।
किंभूतः यताश्चित्तेन्द्रियक्रिया येन स तथा आत्मनो मनःशुद्धये उपशान्तये १२ ॥

गी॰
टी॰
६॰

51

वनमालाटीका

ततः किं तत्राह तत्रेति तस्मिन्नासने तदुपविश्यैव न तु शयानस्तिष्ठन्वा आसीनः
संभवादिति सूत्रात् यताः संयताश्चित्तेन्द्रियाणां च क्रिया यस्य तथाभूतः सन् तथा योगं
भगवति समाधिं युञ्जीताभ्यसेत् आत्मनश्चित्तस्य लयविक्षेपशून्यत्वेनातिसूक्ष्मत-
या स्थिरत्वेन चैव परमात्माकारयोग्यत्वाय दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि-
भिरिति श्रुतेः किं कृत्वाभ्यसेत्तत्राह एकाग्रं राजसतामसमिश्रभूमित्रयपरित्या-
गेनैकविषयकधारावाहिकानेकवृत्तिशक्तिमुद्रिक्तसत्वं मनः कृत्वा भगवदा-
कारमनोवृत्तिप्रवाहं निदिध्यासनाख्यं योगमभ्यसेदित्यर्थः १२॥

कृत्तमवैजयन्तीटीका उपविश्य

किंच तत्रेति तस्मिन्मनःप्रसादकरे आसने समाश्रये उपविश्य सनेनोत्तिष्ठ-
यानेति सूचितं सूत्रकारोप्येवमेवाह आसीनः संभवादिति एकाग्रं मनः कृत्वाऽऽत्म-
त हं विषयेभ्यः स्वरूपस्य मनः कृत्वा आत्मविशुद्धये आत्मनः स्वस्वरूपस्य प्रकृतिसं-
सर्गदोषेणामलिनत्वात् तस्य विशुद्धिरिहाभिव्यक्ततानतस्यै यद्वा आत्मनोऽन्तःकरण-
स्य विशुद्धये विषयवासनानिवृत्तये अन्तःकरणस्य [illegible] निशयनिर्मलत्वे-
नातिसूक्ष्मत्वेन वाऽहमवलोकनार्हत्वं स्यादित्यर्थः दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्म-
या सूक्ष्मदर्शिभिरिति श्रवणात् यतचित्तेन्द्रियक्रियः यता नियमिताश्चित्तेन्द्रि-
र याणामाभ्यन्तरबाह्यकरणानां क्रिया व्यापारा येन स तथा नियमिताखिलेन्द्रियव्या-
पारो योगी योगमात्मदर्शनरूपं समाधिं युञ्ज्यात्कुर्यात् १२॥ त्

मधुसूदनीटीका

एवमासने प्रतिष्ठाप्य किं कुर्यादिति तत्राह ॥ तत्र तस्मिन्नासने उपविश्यैव न तु श-
यानस्तिष्ठन्वा आसीनः संभवादिति न्यायात् यताः संयता उपरताश्चि-
त्तेन्द्रियाणां च क्रिया वृत्तयो येन स यतचित्तेन्द्रियक्रियः सन् योगं समाधिं युञ्जी-
ताभ्यसेत् किमर्थमात्मविशुद्धये आत्मनोऽन्तःकरणस्य सर्वविक्षेपशून्यत्वेना-
तिसूक्ष्मतया ब्रह्मसाक्षात्कारयोग्यत्वाय दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि- ना
भिरिति श्रुतेः किं कृत्वा योगमभ्यसेदिति तत्राह एकाग्रं राजसतामसव्युत्थाना-
क्षिप्तमूढभूमिकात्रयपरित्यागेनैकविषयकधारावाहिकानेकवृत्तिशक्त्वात्
द्रिक्तसत्त्वयुक्तं मनः कृत्वा निरुद्धभूमिकेन प्रयत्नेन संपाद्य एकाग्रताविवृद्धये योग-
संप्रज्ञातसमाधिमभ्यसेत् स च ब्रह्माकारमनोवृत्तिप्रवाह एव निदिध्यासनाख्यः
नन्वक्तं ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना संप्रज्ञातसमाधिः स्याद्ध्याना‍भ्या- द्ध्या
सप्रकर्षतः इति एतदेवाभिप्रेत्य ध्यानाभ्यासप्रकर्षं दर्शयति भगवान् योगी युञ्जीत स-

वि

ततं युंज्याद्योगमात्मविशुद्धये पुरुत्वासीनमनस्यरश्म्यादिवद्रूह्रुत्वः १२ ॥

सदानंदटीका

उपविश्यासनेतस्मिन्मनः संयम्य सर्वतः कृत्वैकाग्रं सचित्तानामिंद्रियाणां।
चवृत्तयः १ सम्यग्गुपरतायस्य समाधिमभ्यसेत् निर्विलेपतयाब्रह्मसा।
त्कारैकसिद्धये २ नशयानोनवातिष्ठन्नुपविश्यनिशाहृतः ३ १२ ॥

नीलकंठटीका

प्रतिष्ठाप्यकिंकुर्यादितितत्राह तत्रेति तत्रासनेपद्मस्वस्तिकाद्यन्यतमेनास
नेनोपविश्ययताः निगृहीताः चित्तस्यक्रियाः विषयाणांस्मरणानिइंद्रिय
क्रियाश्चविषयग्रहणंयेनासौयतचित्तेंद्रियक्रियः अतएवमनःबाह्याभ्यंतर।
विषयानुपरक्ततयाएकंध्येयमेवमन्यकंअध्येयस्यस्फुरतिनात्मतत्तदेकाग्रं
कृत्वंतरानेनरीनवकैकारवृत्तिप्रवाहिकृत्वाआत्मविशुद्धयेचित्तशुद्धयेयोगंवृ
त्तिप्रवाहस्यापिनिरोधंयुंज्यात् अनुतिष्ठेत् चित्तस्थैर्यतिपादनेन १२ ॥

आनंदटीका

तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः आसनजयाद्वंद्वानांशीतोष्णादी
नामनभिघातइतितत्रासनेउपविश्यस्वस्तिकपद्मादिकंशारीरमासनंव
द्धायतानिरुद्धाचित्तस्यक्रियासंकल्पविकल्पौ इंद्रियाणांक्रियाश्रवणादि
कंवचनादानादिकंयेनेदृशः आत्मनोदेहेंद्रियादिसंघातांतर्गतस्यजीव
स्यविशुद्धयेसमरसतापादनाययोगमष्टांगंयुंजीतसमादधीत[22] [illegible]
[illegible] १२ ॥

रामकंठटीका

यस्मादेःकुशोत्तरमेवंतत्रस्थिरसुखे आसनउपविश्यैकाग्रंध्येयत्वेनप
रिगृहीतैकवस्तुनिष्ठंमनश्चित्तंकृत्वातएवयतचित्तेंद्रियक्रियः यताःनि
षिद्धवहिःप्रसराःचित्तेंद्रियाणांमनसोज्ञानांचक्रियाः संकल्पविकल्प
शब्दादिग्रहणरूपाणिकर्माणियेनतथाविधःसन् योगंचित्तवृत्तिनि
रोधात्मकंयुंज्यात्समादधीत किमर्थमात्मविशुद्धये आत्मनोंतःकरण
स्यबाह्योपरागलक्षणमलक्षालनाय क्षेत्रज्ञस्यवादेहाद्यहंप्रत्ययरूपक
लंकपरिमार्जनाय॥ लासिकी [illegible]टीका १२ ॥

एवंसति — तत्रतस्मिन्नासनेउपविश्यनतुशयानः तिष्ठन्वाआसीनःसंभवादितिन्याया

गी त् यतचित्तेंद्रियक्रियः उक्तश्चः यताउपरतानिगृहीताश्चित्तक्रियाः संकल्प
टी ५ त्मान इंद्रियक्रियाश्च येन स मनो मननात्मकं अंतःकरणमेकाग्रं ध्येयवस्तु
निष्ठं कृत्वा योगं समाधिरूपं युंजीत अभ्यसेत् किमर्थं आत्मविशुद्धये कै
वल्याय देहादिभावतिमज्जनायेत्यर्थः [illegible]
[illegible] १२॥

पंचोलीटीका

तत्रासने उपविश्य यतचित्तेंद्रियक्रियः यतानि चित्तेंद्रियाणां क्रियाव्यापा
रो येन सः एकाग्रं सर्वविषयेभ्यः उपसंहृत्य मनः आत्मपरं कृत्वा अंतः
करणशुद्ध्यर्थं योगं कुर्यात् अभ्यसेत् १२ ॥

रणवीरसमिद्धोधिनी ॥

स्पष्टार्थः १२॥

मधुभाष्य

१२॥

भाषा अनुवाद

श्रोर जिसका चित्त श्रो इन्द्रिय निष्क्रिय कहे व्यापार रहित हैं सो म
न की शान्ति कहे शुद्धिके अर्थ उक्त आसन परबैठने के बाद मन
को एकाग्र विक्षेप रहित करके योग अभ्यास करै १२

दोहा

तामे मनएकाग्रसें जित चित इंद्रि जोय बैठे आसनयोगकों
साधे मन शुद्धि कोय १२॥

53

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः संप्रेक्ष्य ना
सिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

शाङ्करभाष्यं

बाह्यमासनमुक्तं अधुना शरीरस्य धारणं कथमित्युच्यते सममिति समं
कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारयन् अचलं च
समं धारयतश्चलनं संभवत्यतो विशिनष्टि अचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः स्वना
सिकाग्रं संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेवेतीवशब्दो लुप्तो द्रष्टव्यो नहि स्वनासिका
ग्रसंप्रेक्षणमिह विधित्सितं किं तर्हि चक्षुषोर्दृष्टिसंनिपातः स चान्तःकरणसमाधा
नापेक्षो विवक्षितः स्वनासिकाग्रसंप्रेक्षणमेव चेद्विवक्षितं मनस्तत्रैव समाधीयेत ना
त्मनि आत्मनि हि मनसः समाधानं वक्ष्यत्यात्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपे
नाक्ष्णोर्दृष्टिसंनिपात एव संप्रेक्ष्येत्युच्यते दिशश्चानवलोकयन् दिशाञ्चावलोकनम
कुर्वन्नित्येवमन्तरा कुर्वन्नित्येतत् ॥ १३ ॥

आनन्दगिरिकृतटीका

उक्तमनूद्यानन्तरश्लोकस्य पातनिकामर्थमाह बाह्येति समत्वमृजुत्वं कायः शरीरम्म
ध्यं अचलमिति विशेषणमवतार्य्य तस्य तात्पर्य्यमाह सममिति कार्यकरणयो
र्विषयपारवश्यशून्यत्वमचलत्वं स्थैर्यं किमितीवशब्दलोपोऽत्र कल्प्यते स्वनासिका
ग्रसंप्रेक्षणमेव योगाङ्गत्वेनात्र विधित्सितं किं न स्यादित्याशंक्याह नहीति तर्हि कि
मत्र विवक्षितमिति प्रश्नपूर्वकमाह किं तर्हीति दृष्टिसंनिपातो दृष्टेश्चक्षुषो रूपादि
विषयग्रहणनिराहित्यं कथं सा चक्षुषा यासेन सिध्यति नेत्याह नचेति समाधानस्य आ
धानेनात्र विवक्षितत्वात् दृष्टेर्हि विषयत्वेन तदङ्गत्वप्रसंगात् तस्या विषयेभ्यो व्यावृत्त्यान्त
रेव संनिपातो विवक्षितो भवतीत्यर्थः तथापि कथं स्वनासिकाग्रसंप्रेक्षणमत्र प्र
तमविवक्षितमित्याशंक्याह स्वनासिकेति तत्रैव मनःसमाधाने का हानिरित्याशं
क्य वाक्यशेषविरोधात् नैवमित्याह आत्मनि हीति किं तर्हि संप्रेक्ष्येत्यादौ विवक्षित
मित्याशंक्याह तस्मादिति दृष्टिश्चक्षुषो वाह्याद्विषयादेवमुख्ये
नान्तरेव संनिपतनमत्र स्वकीयं नासिकाग्रं नासिकान्तं संप्रेक्ष्येति विवक्षितमि
त्यर्थः तत्रैवोत्तरमपि विशेषणमनुकूलमित्याह दिशश्चेति अनवलोकयन्ना
सीतेत्युत्तरत्र सम्बन्धः अन्तरा दिशामवलोकनमपि योगप्रतिबन्धकमिति त
स्य निषेधः ॥ १३ ॥

स्वामिकृतटीका

गी. विवेकाख्योपयोगिनीं देहादिधारणां दर्शयन्नाह द्वाभ्यां सममिति कायश्चेति देहमध्य
टी. भागो विवक्षितः कायस्य शिरसो ग्रीवायाश्च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्य
ध. न्तं सममवक्रमचलं निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वा स्वीयं नासाग्रं संप्रेक्ष्यान्य
र्धनिमीलितनेत्रश्चेत्यर्थः १३ ॥

पैशाचभाष्यं

वायुमासनमुक्त्वेदानीं शरीरधारणमुच्यते समं कायशिरोग्रीवमिति कायस्य शिर
सो ग्रीवायाश्च कायशिरोग्रीवं कायशिरोग्रीवेन तत्समं धारयन् अचलं समं धारयतोऽपि च
न लनं भवतीत्यतो विशिनष्ट्यचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः संप्रेक्ष्य सम्यक् प्रेक्षणं सं
दर्शनं कृत्वेव निरवशेषालम्बो दृष्टव्यः स्वनासिकाग्रं संप्रेक्षणमिह न विधीयते किं
तर्हि चक्षुषो दृष्टिसन्निपातः स चान्तःकरणसमाधानापेक्षो विवक्षितः संप्रेक्षणमेव
चेद्विवक्षितं तर्हि मनस्तत्रैव समाधीयेत नात्मनि इति मनसः समाधाने किं तव स्यात् आत्म स
न्यस्तमनः कुर्वीतेत्यतस्तत्र दिवश हलोपलेनात्मोहेक्षिपातपव संप्रेक्ष्यमुते स्वयं दिश
श्चानवलोकयन् स्वयं दिशां नावलोकनं कुर्वन्निमेनतत् १३ ॥

रामानुजभाष्यं

सममिति कायशिरोग्रीवं सममचलं समाश्रयतया स्थिरं धारयन् दिशश्चानव
लोकयन् स्वनासिकाग्रं प्रेक्ष्य १३ ॥

अभिनवगुप्तकृतटीका उपक्रमे १३ ॥ धारयन्प्रयत्नेन नासिकाग्रस्या
वलोकनेन दिशामनवलोकनम् १३

परमार्थप्रपाटीका

अथ विवेकाख्योपयोगिनीं देहधारणामाह सममिति द्वाभ्यां कायं देहमध्यः शि
रश्च ग्रीवा चेति समाहारः कायशिरोग्रीवं समं वक्रत्वं यथा भवति तथा धारयन् धा
रणं कुर्वन् आसीनेत्युत्तरेणान्वयः अयमर्थः योगशास्त्रप्रकारेण मनोऽप्रवेशेऽन्त
लिंगान्तरे स्थिताधारचक्रान्मूलबंधादिं पञ्चधा सिद्धे आधिव्याधिमनोवेगोपश
मे सति कायग्रीवाशिरसां समत्वं स्थाणुत्वं वज्रत्वं अचलत्वं च भवति एवं देहधारण म
प्रकारं दृष्टिधारणमाह दिशश्चेति दिशः समन्ततः अनवलोकयन् पश्यन् तर्हि देहद्
ष्टिरवशिष्टानामपि निषेधयति स्वनासिकाग्रं संप्रेक्ष्य अनेन विवेकाख्योपलक्षणम्
इति [illegible] १३ ॥ ना

वनमालीटीका

वायुमासनमुक्त्वाधुनात्रैकं शरीरधारणमित्युच्यते कायः शरीरमध्यमस्य शिर
श्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यन्तं सममवक्रम् अचलमकं म
पं धारयन् स्थिरः दृढप्रयत्नो भूत्वा स्वकीयं नासिकाग्रं संप्रेक्ष्यावलोक्य वितेषा हि।

स्यानुविषयाप्रवृत्तिरनिमीलितनेत्रश्चेत्यर्थः दिशश्चानवलोकयन् अन्तरां
तरादिशां चावलोकनमकुर्वन् योगविरोधित्वात्तस्य एवंभूतः सन्नासीनश्चुत्त
रेणान्वयः १३ ॥

कृष्णमवैजयन्तीटीका

नन्वासने केन प्रकारेणोपविश्येदित्यपेक्षायामुपविष्टस्य शरीरधारणप्रकारमा
ह सममिति कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा चैषां समाहारः कायशिरोग्री
वं प्राणं गत्वा समाहारेण द्वेधावहः समं वक्ररहितम् अचलं कम्परहितं का
यशिरोग्रीवं धारयन् धारणं कुर्वन् सन् स्थिरः सन् विघ्नादिनाऽव्याकुलः सन् स्वं
स्वकीयं नासिकाग्रं संप्रेक्ष्य संदृश्य मनसो लयविक्षेपशान्त्यै नासाग्र एव दृ
ष्टिं कृत्वेत्यर्थः अपनः दिशः पूर्वादीः अनवलोकयन्नित्यन्तयोः समीपस्थत्वा
सीदित्युत्तरेणान्वयः १३ ॥

मधुसूदनीटीका

तदर्थं बाह्यमासनमुक्त्वा धुनान्तरंगं शरीरधारणमित्युच्यते ॥ कायः शरीरम
ध्यं स च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यन्तं समम् अवक्रं
अचलम् अकंपं धारयन् एकतत्त्वाभ्यासेन विक्षेपसहभाविनः गात्रेजयत्वाभावं संपा
दयन् स्थिरः दृढप्रयत्नो भूत्वा किंच स्वं स्वीयं नासिकाग्रं संप्रेक्ष्यैव लयविक्षेप
राहित्याय विषयप्रवृत्तिरहितोऽर्धनिमीलितनेत्र इत्यर्थः दिशश्चानवलोकयन्
अन्तरान्तरा दिशां चावलोकनमकुर्वन् योगप्रतिबंधकत्वात्तस्य एवंभूतः सन्नासी
तेत्युत्तरेणसंबंधः १३ ॥

सदानंदीटीका

स्वकासनं योगसिद्धेर्देहधारणमुच्यते समं कृत्वा शिरोग्रीवां कायं मध्यं स्तुति
म्ले मूलाधारात्समारभ्य मूर्द्धान्तं धारयन् स्थिरं सदृढप्रयत्नो भूत्वा निष्कंपोऽयो
गतमपरः २ लयविक्षेपशान्त्यै नासिकाग्रमेव पश्चन् कृत्वेवदर्शनेन सम्यगिव
२४ शाह्यस्य लोपनात् नासाग्रं संप्रेक्ष्य नात्र विवक्षितमितीशितः दिग्वीक्षणमकुर्वं
श्च योगस्य प्रतिबंधकम् ४ एवंभूतः सन्नासीतेत्युत्तरेणान्वयो मतः ५ १३ ॥

नीलकंठीटीका

आसन उपविश्य यत्कर्तव्यं तदाह सममिति कायः शरीरमध्यं शिरः ग्री
वा च कायशिरोग्रीवं समं मूलाधारमारभ्य मूर्धान्तं अवक्रं अचलं निष्कंपं धारयन् स्थि

गी. रःभूत्वा संप्रेक्ष्य नासिकाग्रं स्वमिति तिनासिकाग्रावेक्षणं न विधीयते किं तु निमी

टी. लनेलभ्यं उन्मीलने विक्षेपभयमतो दिशो पिस्यादि विक्षेपकविषयदर्शनभया

ष. दनवलोकयन्न यौन्मीलितनेत्र आसीनेति उमेशेणान्वयः १३॥

आनंदीटीका

बह्वासनस्य चित्तैकाग्र्यसाधनाय

देहस्थानमाह — कायः कंठादधः शरीरं च शिरश्च ग्रीवा च समम् ऋजु धारयन् एवमासनबन्ध

मुक्तो [illegible] १३॥

रामकंठीटीका

एवं चित्तसमाधानमभिधाय तत्साधनभूतकायसंस्थानमाह कायः कंठादधः शरीरं शिरो मूर्धा ग्रीवा कंदरा कायशिरोग्रीवं तत्सममवक्रमृजु धारयन्बिभ्रत् तथा हृपो प्यचलो निष्प्रकंपो गमेजयत्वादि चित्तविक्षेपकारणरहितः स्थितस्तथा स्वं नासिकाग्रं घ्राणप्रांतं संपश्यन् अनपव च दिशः काष्ठा अनवलोकयन् अप्रेक्ष्यमाणः दिक्षु दृग्विक्षेपपरिहारार्थं नासिकाग्रसंदर्शनमुक्रम् न तु तल्लक्ष्यीकर्तव्यमित्यभिप्रायः १३ ॥

आसनस्थैर्यात्कायस्थैर्यं चित्तस्थै लासिकी वल्लभीटीका र्यमित्यत आसनस्थैर्याय चित्तैकाग्र्यो

पयोगिदेहसंस्थानमाह — इतस्ततो दिशोऽप्रेक्षमाणः स्वं नासिकाग्रं संप्रेक्ष्य अर्धनिमीलितनेत्रः इत्यर्थः दिक्षु दृग्विक्षेपपरिहारार्थं नासिकाग्रावलोकने न तु तदेव लक्ष्यमित्यर्थः तथा कायो देहमध्यभागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धांतपर्यंतं समं निष्प्रयत्नतया नात्युन्नतं नातिनम्रं यथा भवति तथा धारयन् आसने उपविष्टः तदुक्तं प्रयत्नशैथिल्यानंत्यसमापत्तिभ्यामिति कीदृशमचलं चित्तविक्षेपकारणांगमेजयत्वादिरहितं एवं स्थिरो भूत्वा एवंविधं संस्थाने तु रूपं मपि नातिक्रमन् योगयुंज्यादिति पूर्वेणान्वयः [illegible] १४ ॥

पंचोलीटीका

विजेकाग्रोणाय योगिनो देहादिधारणं दर्शयति सममितिद्वाभ्यां। कायशिरोग्रीवं कायः शिरो ग्रीवा च येन ग्रथ्यं सममवक्रमचलं। क्रियारहितं धारयन् स्थिरो भूत्वा दिशश्चानवलोकयन् नासिकाग्रमेव संप्रेक्ष्य १३ ॥

रसवीरसमिद्धोधिनी ॥

कथंभूतः सन् संदधीतेत्याह सममिति कायो देहमध्यभागः स च शिरश्च ग्रीवा च कायशिरोग्रीवं समं वक्रतारहितं सरलमिति यावत् अचलं पर्वतवन्निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वा स्वं नासिकाग्रं संप्रेक्ष्येत्यनेनार्धनिमीलितनेत्रता व्यज्यते हरस्य लक्ष्यपाते हि प्राणाश्चञ्चुत्यर्थं नेत्रार्धनिमीलनं विधायेत्यर्थः अथवा नसंतकोटिल्येन नासामान्येन कोथव घाद्मव दद्वं न्यस्यामिति नासाग्रहभूमिः यद्वा श्वासनमासाग्रवोऽस्त्र हलश्च त्यप्रत्ययः न विद्यते श्वासाश्वसनं विभ्रमो यत्रेति नासाग्रहभूमिरेव नसमासः नासेव नासिका स्वार्थे संज्ञायां वा कः यद्वा श्वासनमासिकापर्यायार्थं तुम् न विद्यते श्वासिका यत्रेति नासिकाग्रहभूमिरेव तस्या अग्रं मूर्धानं स्वं स्वात्मानं च स्वकीयं मारब्ध्यादिकं च संप्रेक्ष्य सम्यक् प्रमादराहित्येन प्रेक्ष्य दिशश्चानवलोकयन् योगं प्राणादिकं युञ्जीत संदधीतेति प्राक्तनेनान्वयः दिशामनवलोकनं च सावधानचित्ततायोजकं यद्वा नासिकाग्रमिति च्छेदः नासौ रूपलक्षणाविशिष्टः कर्मयोगी स्वमसिकाग्रं प्रतिसमाहीत रत्नवार्थः पापादिकमपि लक्षयति तथा च सामान्य स्वस्याग्रहलक्ष्यीभूतं प्रतिपदं संप्रेक्ष्येत्यर्थः १३ ॥

मधुमाधव

१५॥

भाषा अनुवाद

अब चित्तकी एकाग्रता के उपयोगी जो देह धारणादि सो है श्लोक मे कहते हैं कि काय कहे शरीर का मध्यभाग औ शिर ग्रीवा अर्थात् मूल आधार से ले मस्तक पर्यन्त शरीर अति यत्न से सीधी राखि। के औ निश्चल करके धारणा के बाद अपनी नासिका के अग्रभाग मे अ ई उन्मीलन पूर्वक दोनो दृष्टी लगाय समाहित सावधान होय और दिशों मे दृष्टि न देय १३ ॥

दोहा

सूधे देह शिर ग्रीवको धार अचल स्थिर होय देखत नासा अग्र
निज दिशादिं न देखैं सोय १३॥

51

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः
संयम्य मच्चित्तो युक्त आसीत मत्परः १४ ॥

शांकरभाष्यं

किंच प्रशान्तेति प्रशान्तात्मा प्रकर्षेण शान्त आत्मान्तःकरणं यस्य सोयं प्रशान्तात्मा विगतभीर्विगतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मचारिव्रतं ब्रह्मचर्यं गुरुशुश्रूषभिक्षान्नभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच मनः संयम्य मनसो वृत्तीरुपसंहृत्येत्येतत् मच्चित्तो मयि परमेश्वरे चित्तं यस्य सोयं मच्चित्तो युक्तः समाहितः सन्नासीतोपविशेत् मत्परोऽहं परो यस्य सोयं मत्परो भवति कश्चित् रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च १४ ॥

आनंदगिरिकृतटीका

योगं युंजानस्य विशेषणान्तराणि दर्शयति किंचेति अन्तःकरणस्य प्रशान्तिः रागद्वेषादिदोषराहित्यं तस्याश्च प्रकर्षो रागादिहेतोरपि निवृत्तिः विगतभयत्वं सर्वकर्मपरित्यागे शास्त्रीयनियमवशान्निःसन्दिग्धबुद्धित्वं भिक्षाभुक्त्यादीत्यादिशब्देन त्रिषवणस्नानशौचाचमनादि गृह्यते विशेषणान्तरमाह किंचेति उपसंहृत्य योगनिष्ठो भवेदिति शेषः मनोवृत्त्युपसंहारे ध्यानमपि न सिध्येत्तस्य तद्वृत्तिरूपत्वादित्याशंक्याह मच्चित्त इति विषयान्तरविषयमनोवृत्त्युपसंहारेण मय्येव तन्नियमनान्न ध्यानानुपपत्तिरित्यर्थः मच्चित्तत्वेनैव मत्परत्वसिद्धत्वात् मत्पर इति पृथक् विशेषणमनर्थकमित्याशंक्याह भवतीति अन्तःकरणशुद्धिर्योगस्यावान्तरफलं १४ ॥

स्वामिकृतटीका

एतत्त्वनोदिशश्चानवलोकयन्नित्यासीनेत्यनेनान्वयः प्रशान्तेति प्रशान्त आत्मा चित्तं यस्य विगता भीर्भयं यस्य ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः सन् मनः संयम्य प्रत्याहृत्य मय्येव चित्तं यस्य अहमेव परः पुरुषार्थो यस्य स मत्परः एवं युक्तो भूत्वा आसीत तिष्ठेत १४

पिशाचभाष्यं

प्रशान्तात्मा विगतभीः विगतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रते ब्रह्मचर्ये गुरुशुश्रूषणभिक्षाभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच मन

गी॰ टी॰ ६

58

संयम्य मनसो वृत्तिरुपसंहृत्य मच्चित्तो मयि परमेश्वरे चित्तं यस्य सो यं मच्चित्तः यु-
क्तः समाहितः सन् आसीत उपविशेत् मत्परः कश्चिद्रागी स्त्रीचित्तो पि न स्त्रियमेव
परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च १४ ॥

रामानुजभाष्यं

प्रशान्तात्मा ग्रेन निहितमनः विगतभीः ब्रह्मचर्ययुक्तो मनः संयम्य मच्चित्तो यु-
क्तः अवहितात्मा मत्पर आसीत मामेव चिन्तयन्नासीत १४ ॥

[illegible] अभिनवगुप्तकृतटीका उपक्रमं १४ मत्परमतया युक्त आसीत एतत्
१४

अथ मनोधारणमाह+

परमार्थप्रपाटीका

+प्रशान्तात्मेति प्रशान्तो निःसंकल्प आत्मा चित्तं यस्य विगतभीर्निरस्तभयः नि-
र्जने एकाकिना कथं स्थातव्यमिति भयशून्यः यद्वा विगतभीरित्युपलक्षणं स्त्री-
धीर्भीरित्येतत् सर्वमनर्थ एवेति श्रुते मनोधर्मै रहितः अथावसरमाह ब्रह्मचा-
रिणो यद्व्रतं तत्र स्थितः समासग्रहणात्सर्वमेवसर्थः अथैवंविधे महाकार्ये प्र-
हृतस्याश्रयव्यतिरेकेणाविक्षेपशमः कथं स्यादित्याह मच्चित्त इति मयि चित्तं
यस्य निरन्तरं मत्स्मरणवान् नहि तावदेवमस्य प्रयोजनमित्याह मत्पर इति अह-
मेव परं प्राप्यं परं यस्य स मत्परः तथा तदुक्तं मकुलागमे सुखासने समासीन-
स्तत्त्वाभ्यासं समाचरेत् सदाभ्यासेन तत्कुर्यात् परतत्त्वप्रकाशने । आसनं प्रा-
णसंरोधः प्रत्याहारोथ धारणा ध्यानं समाधिरेतानि योगाङ्गानि वरानने । ए-
कान्ते विजने रम्ये गुहायां भूगपक्ष्मिके रहिते मशकैर्देशे देवायतनके पि वा २
सिद्धक्षेत्रे महातीर्थे ध्यानसिद्धिः प्रजायते तत्र सिद्धासनं बध्वा ऋजुकायं तु का-
रयेत् ॥ ऊर्ध्वं मेढ्राद्यो नाभेः कन्दो योनिरिव स्थितः तत्र नाड्यः समुत्पन्नाः सहस्रा-
णि द्विसप्ततिः ५ श्रुतिरपि शानयष्टी हितानाम नाड्यो द्वासप्ततिसहस्राणि
हृदयात्पुरीततमभिप्रतिष्ठन्त इति अथ पुरीततमिति हृदयाकाशे नाडी-
भिर्निर्मितं स्थानं शेषं स्पष्टं । तथा प्रधाना [illegible] प्राणवाहि-
न्योन्त्यस्तत्र दश स्मृताः इडा च पिंगला चैव तथा चैव यशस्विनी ६ अलंबुषा कु-
हूश्चैव शङ्खिनी दशमी तथा एतन्नाडीमये चक्रे नित्यं तत्र प्रवाहिकाः ७ इडा च पिं-
गला चैव सुषुम्णा प्राणवाहिकाः इडा वामे स्थिता भागे पिंगला दक्षिणे स्थिता ८
सुषुम्णा मध्यदेशे तु प्राणमार्गास्त्रयो मताः पूरयेद्वा मनोद्वारे रेचयेद्दक्षिणा-
ततः ९ तथैव पूरयेद्भूयः पूरयेत्कुम्भयेत्ततः एवमभ्यासयोगेन नाडीशुद्धिः प्रजा-

यते १० षडंगे प्राणमभ्यस्य योगी ध्यानमभ्यसेत् ह्रीं श्रीं मध्ये योगमध्ये वितते (तां)
परमेश्वरं ११ अथ मौनगते देवं चिद्रूपं भावयेत्सदा प्रणवेनाऽरकं ब्रह्मनि
र्मध्यायंति योगिनः १२ नश्यातेनन्तप्राणाञ्जिह्रिजीयते नात्र संशयः प्रणवा
भ्यासतो योगी मयानस्नावशानते १३ योगमार्तंडे योनिस्थानकमंघ्रिमूल
घटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव नियतं कृत्वा समं विग्रहं स्था
णुः संयमितेंद्रियोऽचलदृशा पश्येद्भ्रुवोरंतरं चैतन्मोक्षकपाटभेदजन
कं सिद्धासनं प्रोच्यते १ वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा द
क्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढौ अंगुष्ठौ हृदये निधाय चिबु
कं नासाग्रमालोकयेदेतद्व्याधिविकारनाशि यमिनां पद्मासनं प्रोच्यते २ आधा
रं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकं योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ३
अपानप्राणयोरैक्यं तयोर्मूत्रपुरीषयोः युवा भवति वृद्धोऽपि सततं मूलबंधना
त् ४ पार्ष्णिभागेन संपीड्य योनिमाकुंचयेद्गुदं अपानमूर्ध्वमाकृष्य मूलबंधो
निगद्यते ५ उदरे पश्चिमे भागे नाभेरूर्ध्वं निगद्यते उड्डियाणोऽयं बंधः कं
ठेऽस्यैव नाशनः बध्नाति हि शिरोजालमधोयाति न भोजलं ततो जालंधरो
बंधः कंठसंकोचलक्षणः ७ जालंधरकृते बंधे कंठसंकोचलक्षणे न पीयूषं
पतत्यग्नौ न च वायुः प्रकुप्यति ८ कपालकुहरे जिह्वा प्रविष्टा विपरीतगा
भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति खेचरी ९ भुक्तासनं समाकृष्य समकायशि
रोधरः नासाग्रदृष्टिरेकांते जपेदोंकारमव्ययं १० भूर्भुवः स्वरिमे लोकाः
सोमसूर्याग्निदेवताः यस्य मात्रासु तिष्ठंति तत्परं ज्योतिरोमिति ११ आस
नेन रुजं हंति प्राणायामेन पातकं विकारं मानसं योगी प्रत्याहारेण सर्व
ति १२ धारणाभ्यां मनोधैर्यं ध्यानेनैश्वर्यमद्भुतं समाधेर्मोक्षमाप्नोति त्यक्त्वा
कर्म शुभाशुभं १३ प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः प्रत्याहार
द्विषट्केन धारणा जायते शुभा १४ धारणा द्वादश ध्यानं प्रोक्तं ध्यानविशा
रदैः ध्यानद्वादशकेनैव समाधिरभिधीयते [illegible]॥

वनमालीटीका

प्रकर्षेण शांता रागादिदोषरहित आत्मा मनो यस्य स प्रशांतात्मा शास्त्रीयनिश्चयदा
र्ढ्यात् विगतभीः सर्वकर्मत्यागपूर्वकत्वात् पुत्रकलत्रशोकाद्यभावः ब्रह्मचारिव्र
ते स्थितः ब्रह्मचर्यं गुरुशुश्रूषा मिताभोजनादौ स्थितः सन् मनः संयम्य

गी॰
टी॰
म॰

59

विषयाकारवृत्तिशून्यं कृत्वा मयि परमेश्वरेन गणालये सकलवेदान्तप्रतिपाद्ये
तर्यामिणि सर्वेश्वरे शरणागतवत्सले विषयान्तरं विहाय चित्तं यस्य सः युक्तो
प्रियेऽन्तरे चिंतनीये विषयमाने तथैव कथंचित तद्वृत्तिः स्यात्तत्राह मत्परः अहमे
व परमानंदस्वरूपत्वात्परः पुरुषार्थो यस्य सः तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयो
यस्मात्सर्वस्मादंतरतरं यदयमात्मेति श्रुतेः कश्चिद्धि कामी विरोन स्त्रियमाराध्य
त्वेन गृह्णाति किं तु राजदेवादिकं कश्चिद्राजादिकमाराध्यत्वेन तु न बहु मन्यते तद्
कश्चित्तु प्रियत्वाराध्यत्वेन मां गृह्णन् तद्विशेषेणैव भागवत प्रकारेण मदेकचि
त्तस्येति भावः १४

ऊस्तमवैजयन्ती

किंच प्रशान्तात्मेति प्रशान्तात्मा प्रकर्षेण शान्तो विषयैरस्पृष्ट आत्मा मनो
यस्य स तथा स्ववशीकृतमनाः विगतभीः विगता भीर्भयं यस्मात्स तथा निवृ
त्तजन्ममरणादिभयवत्त्वात्पर्यः ब्रह्मचारिव्रते ब्रह्मपरब्रह्मस्वरूपे वा मायायां वा
वेदे वा चरितुं शीलं येषां तेन यातेषां व्रतं मदनादिसाधने तस्मिन् स्थितः
तावतान्तयावस्थितः सन्स्थितः हि भुजचतुर्भुजादिरूपं मयि चित्तं यस्य स तथा
मत्परः मय्येवैकस्मिन्परः आत्मात्मीयभरत्मा सोऽयं यस्य स तथा मनः संयम्य बाह्य
विषयात्कृष्य युक्तः स्वस्वरूपे युक्तस्तन् योगी आसीत एवं भूतस्त्वं तिष्ठेदि
त्यर्थः १४ ॥

मधुसूदनी

^किंच^
निदानवित्तिरूपेण प्रकर्षेण शान्तः रागादिदोषरहितस्त्वात्मान्तःकर
णं यस्य सः प्रशान्तात्मा शास्त्रीयनिश्चयदार्ढ्याद्विगतभीः सर्वकर्मपरित्यागे
युक्तत्वायुक्तत्वशंका यस्य स विगतभीः ब्रह्मचारिव्रते ब्रह्मचर्यगुरुशुश्रूषाभि
क्षाभोजनादौ स्थितः सन् मनः संयम्य विषयाकारवृत्तिशून्यं कृत्वा मयि परमे
श्वरे प्रत्यक्चिति सगुणे निर्गुणे वा चित्तं यस्य स मच्चित्तो मद्विषयकधारावाहि
कचित्तवृत्तिमान् युक्तो प्रिये चिन्तनीये स तु कथमेवं स्यात्तत्राह मत्परः अ
हमेव परमानन्दत्वात्परः पुरुषार्थः प्रियो यस्य स तथा तदेतत्प्रेयः पुत्रात्प्रेयो
वित्तात्प्रेयो यस्मात्सर्वस्मादन्तरतरं यदयमात्मेति श्रुतेः एवं विषयाकारसर्ववृ
त्तिनिरोधेन भगवदेकाकारचित्तवृत्तियुक्तः संप्रज्ञातसमाधिमानासीतो
पविशेद्यथाशक्ति न तु स्वेच्छया व्युत्तिष्ठेदित्यर्थः भवति कश्चिद्रागी स्त्रीचि

ऽनन्तस्थितिमेवपरत्वेनाराध्यत्वेनगृह्णातिकिंतर्हिराजानंवादेवंवाश्रयेत।
मच्चित्तोमत्परस्सर्वाराध्यत्वेनमामेवमन्यतइतिभाष्यकृतोव्याख्या
ख्यानत्वेपिमेनात्रभाष्यकारेणतत्स्पष्टं शेज्ञायाः किंतुहैन्वैकतत्लारहे।
पितत्स्पष्टं [illegible]॥

सदानंदीटीका

रागादिदोषशून्यत्वाच्छांतात्माध्यासवर्जितः शुभाशुभफलसंदेहःकर्ममा
गेभयंत्यजेत् १ नकुर्मोनिर्भयोभक्तायदासर्वभयोज्झितः ब्रह्मचर्येविनावि
नेहपितेस्त्रीतृणादिभिः २ निश्चलेनप्रतीविस्पाद्ब्रह्मचर्यमनश्वरेत् नारा।
यणपरोभक्तिंविनाब्रह्मदृढयेमतः ३ तत्समंनिश्चलंस्यात्तेभक्तिःकार्यान
तोदृढे पतहृदितिधायाहब्रह्मचारीतिमाधवः ४ गुरुशुश्रूषणेनमि
ताब्रह्मचर्यमथापरं यपद्वैतेभवेद्ब्रह्मचारिणस्तत्रवस्थितः ५ मनोनि
विषयेकृत्वावासुदेवेमयीश्वरे प्रममत्केनमसंरूपेचिंतयस्वसमन्वताः।
अहमेवपरानंदरूपत्वेनपरःप्रियः सर्वस्माज्जीवपर्यंतःपुरुषार्थःसमत्परः
एवंचित्तनिरोधेनब्रह्माकाराकृतायदा चित्तवृत्तिःसमासीनतत्वतिष्ठेत्स्वये
नतः ८।१४

नीलकंठीटीका

एवमासनेउपविष्टेनयत्कर्तव्यंतदाह प्रशांतात्मेति योगयुक्तोयोगी
ब्रह्मचारिव्रतेभैक्षचर्यादौस्थितः संन्यासीमर्थः मच्चित्तोमत्परमैश्चितय स्थरे
स्सन्एवंभूतोमय्येवमनःसंयम्यमत्परआसीतसप्रशांतात्माविगत
भीर्भवतीतियोजना भवतिहिकश्चिदात्मनोन्यमीश्वरंमत्वातच्चित्तस्तमेवारा
ध्यत्वेनाभिगतःतद्वेवचमनसःसंयमंकरोतितत्तुसततपरस्तमेवपरमपुरु
षार्थतयाप्राप्यत्वेनमन्यतेकिंतर्हिमामप्यदेवफलकामयते अयंतुमच्चित्तो
मय्येवमनःसंयम्यमत्परोमामेवमत्तोनरेभ्यमगाहयंकामयतइति यतोम
त्परोऽतःएवप्रशांतात्मामत्कर्षेणबाह्याभ्यंतरविषयत्यागेनसमाधिमास्था
स्थास्यागेनचशांतउपरतःआत्माचित्तंयस्यसोऽस्मितामात्रावशेषोविगत
भीर्भवति इयमेवावस्थासत्वपुरुषान्यताख्यातिरितिब्रह्मसाक्षात्कारइति
चविकल्पते सर्वध्यानस्यासिद्धायांपुरुषःपरमपुरुषार्थभाग्भवति १४

आनंदीटीका

यमनियमादिसेवामाह ॥

गी॰
टी॰ ब॰

युक्तो योगमभ्यसितं मद्भक्तः प्रशान्तो हिंसादिभ्यो निवृत्त आत्मान्त
करणं यस्य सोऽत्र हिंसासत्यास्तेयानां यमानां ग्रहणं तथा प्रशान्तो निर्म
ल आत्मा यस्येति शौचसंतोषयोर्ग्रहणं विगतभीर्द्वंद्वसहनात्तपसो ग्रह
णं ब्रह्मचारिव्रते स्थित इत्यनेन यमस्य ब्रह्मचर्यस्य स्वाध्यायाख्यस्य च
नियमस्य ग्रहणं मनः संयम्य विषयग्रहणान्निवर्त्येत्यपरिग्रहस्य यमस्यो
क्तिः मच्चित्तो मयि परमेश्वरे प्रणिहितचेताः अहमेव परः प्राप्यो यस्येष्ट
ष्यः आसीतेतीश्वरप्रणिधानम् तथा च योगसूत्रं अहिंसासत्यास्तेयब्र सा॰
ह्मचर्यापरिग्रहा यमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि निय
मा इति १४ ॥

रामकंठी टीका

इत्थं विहितसमस्तसमाधिपरिकरस्य परमात्मसमापत्ति
लक्षणमोक्षप्राप्तिहेतुं विशेषणं प्रतिपादयितुमाह प्रशान्तात्मा प्रशान्तः
संदेहादिविकल्पक्षोभरहित आत्मान्तःकरणं यस्य स तथा सर्वमात्मेत्यनाव
गम्य सर्वतस्त्रासवराङ्मुखो विगतभीः निहतसाध्वसः तथा ब्रह्मचारिव्रते स्थि
तः ब्रह्मचारिणः कामसंकल्पवर्जनव्रते तस्मिन् स्थित इति सर्वार्थविषयप्रार्थ
नारहितत्वमनेन विशेषणेनोक्तम् इत्थं मनः संयम्य सर्वतश्चित्तं निगृह्य मच्चित्त
परमात्मन्येकस्मिंस्तत्त्वे चित्तसंवेदनं यस्य स तथाविधो युक्तः समाहितः संलग्नयुक्तध्या
विधायोगादनन्यविषयमनाश्रासीत तिष्ठेत् १४ ॥

लाक्षिकी [illegible] टीका

एवं बद्धपरिकरस्य समाध्युप योगिनो विशेषणान्याह ॥
प्रशान्तो रागादिकलंकशून्य आत्मान्तःकरणं यस्य सः अत एव विग
तभीर्निर्भयः ब्रह्मचारिव्रते ब्रह्मचर्यादौ स्थितः ब्रह्मचारिव्रतग्रहणेन
यमादयो गृह्यन्ते तदुक्तं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति
शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति मच्चित्तो म
यि प्रत्यगात्मनि अनुस्यूतं चित्तं यस्य स कर्मयोगी मत्परो मां परमेश्वरं भ
जमानः समाश्रितः मनो मननात्मकमन्तःकरणं संयम्य सम्यग्वृत्तिशून्य
तया निरुध्य युक्तः समवहितः सन् आसीत तिष्ठेत् एवं ध्यानयोगाभ्यासफ
लमाह १४ ॥

पंचोलीटीका

प्रशांतात्मेति प्रशांतात्माशांतचित्तः ब्रह्मचारिव्रतेब्रह्मचर्यगुरुशुश्रूषाभिक्षाभोजनादिके स्थितः तदानुष्ठानाभवेत् किंच मनसंयम्या पारेतिपतंमत् परायणः युक्तः समाधियुक्तः सन् उपविशेत् १४

रणवीरसमिद्धोधिनी ॥

प्रशांतात्मेति प्रशांतोऽरूपसंकल्पेभ्यः प्रतिनिवृत्त आत्माचित्तंयस्य अतएव विगतभीः परेभ्यः सकाशात् असंजातसाध्वसः ब्रह्मचारिव्रते ब्रह्मणा यजुर्वेदेन चरंतिव्यवहरंति जीवंतिवा तच्छीलाब्रह्मचारिणः तत्प्रियप्रवरास्तेषांव्रते गुर्वादिकाचारे स्थितः अथच गुरुकाले विस्मृतनत्यादिविषयत्वेन मध्यमाश्रमस्थः मनोंतःकरणंसंयम्य स्ववशीविधाय मयिपरमेश्वरे चित्तंचेतोयस्य परमेश्वरो मे साध्यसिद्धिं करोत्विति परमेश्वरसमर्पितस्वःकार्यभरसिद्धिरिति यावत् युक्तः कर्मसुप्रवृत्तः कर्मयोगी आसीत रणादौ स्थितिं कुर्यात् कथंभूतो मत्परः अहमेवपरः इपालनहरणयोरिति धातनुसारात् पालयिता हरयिता वलायायकस्य यस्येति १४ ॥

मधुभाष्य

१४ ॥

61

भाषा अनुवाद

जिस का चित्त प्रशान्त और जो निर्भय औ ब्रह्मचर्य्य व्रतमे स्थित होके अपने मन को सब तरफसे खैंच मेरे मे लगायाहै और जिसको मेंही परमपुरुषार्थ रूप कहे रह हैं ऐसा मत्परायण पुरुष उक्तमत योगमे समाहित रहता है १४

दोहा

शांति चित निर्भय सदा ब्रम्हचर्य व्रतस्थित मनहिं रोकें युक्त
होय मो मन परमो चित १४॥

62

44

युञ्जन्नेवं सदात्मानं योगी नियतमानसः शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ ॥

शाङ्करभाष्यं

अथेदानीं योगफलमुच्यते युञ्जन्निति युञ्जन् समाधानं कुर्वन्नेवं यथोक्तेन विधानेन सदा योगी नियतमानसः नियतं संयतं मनो यस्य सोऽयं नियतमानसः सशान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षस्तत्परमा निष्ठा यस्याः शान्तेः सा निर्वाणपरमा तां निर्वाणपरमां मत्संस्थां मदधीनतामधिगच्छति प्राप्नोति १५॥

आनन्दगिरिकृतटीका

संप्रति परमफलकथनपरत्वेनानन्तरश्लोकमादत्ते अथेति योगस्वरूपं तदङ्गमासनमपि तत्कर्तृविशेषणमित्यस्यार्थस्य प्रकथनानन्तरमित्यथशब्दार्थः आत्मानं युञ्जन्निति सम्बन्धः आत्मशब्दो मनोविषयः यथोक्तो विधिरासनादिः उक्तविशेषणत्रयद्योतनार्थं सदेत्युक्तं योगी ध्यायी तत्रामीन्वर्थः मनःसंयमस्य योगं प्रत्यसाधारणत्वं दर्शयति नियतेति शान्तिशब्दितोपरतेः सर्वसंसारनिवृत्तिपर्यवसायित्वं मत्वा विशिनष्टि निर्वाणेति यथोक्ताया शान्तेर्ब्रह्मस्वरूपावस्थानादनर्थान्तरत्वमाह मत्संस्थामिति मदधीनां मदात्मिकामित्यर्थः १५ ॥

स्वामिकृतटीका

ततो योगाभ्यासफलमाह युञ्जन्निति एवमुक्तेन प्रकारेण सदात्मानं मनो युञ्जन् समाहितं कुर्वन् नियतं निरुद्धं मानसं चित्तं यस्य स शान्तिं संसारोपरमं प्राप्नोति कथंभूतां निर्वाणपरमं प्राप्यं यस्यां तां मत्संस्थां मद्रूपेणावस्थितिं १५ ॥

पिशाचभाष्ये

अथेदानीं योगफलमुच्यते युञ्जन्नेवमिति युञ्जन्समाधानं कुर्वन्नेवं यथोक्तेन प्रकारेण योगी नियतमानसः नियतं संयतं मानसं यस्य सः शान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षः परमा निष्ठा यस्याः शान्तेस्तां निर्वाणपरमां मत्संस्थां मदधीनामधिगच्छति प्राप्नोति १५

रामानुजभाष्यं

गी॰ टी॰ ष॰

एवं मयि परस्मिन्ब्रह्मणि पुरुषोत्तमे मनसः सुभाश्रयीभूते सदात्मानं मनो युञ्जन्नियतमानसो निश्चलमानसः मत्संस्थां निर्वाणपरमां शान्तिमधिगच्छति निश्चलमानसः मत्संस्थां निर्वाणपरमां शान्तिमधिगच्छति निर्वाणकाष्ठारूपां मत्संस्थां मयि स्थितां शान्तिमधिगच्छति १५

एतः शान्ति जायते यस्यां संस्थायां पर्यन्त काष्ठा सत्प्राप्तिः योगी इति

अभिनवशङ्करटीका स्पष्टार्थं १५ एवमात्मानं युञ्जतस्तमाह

परमार्थप्रपाटीका २५

+अथ योगाभ्यासफलमाह

63

+युञ्जन्निति एवमनेनाप्रकारेण योगी अभ्यासरत आत्मानं मनः युञ्जन्समाहितं कुर्वन् नियतं स्वाधीनं मानसं यस्य तथाविधः सन् शान्तिं संसारोपरमम् अधिगच्छति किंभूतां निर्वाणपरमां शमसन्धानेन यस्यां मयि संस्थां स्थितिर्यथा सा मदाकारेण संस्थानमित्यर्थः श्रुतिरपि तेतिरी। एके युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियं इति आद्यं प्रथममारम्भे मनो युञ्जानः स्वाधीनं कुर्वाणः अनेन तेन त्यागात्मशमयेधियः बुद्धीर्युञ्जानः पुरुषः सविता सर्वस्य प्रसविता स्वयमात्मैव भवति १५

वनमालीटीका

ततः किं स्यादत आह युञ्जन्निति एवमुक्तप्रकारेणात्मानं मनो युञ्जन्नभ्यासवैराग्याभ्यां समाहितं कुर्वन् योगी सदा योगाभ्यासातिशयेन नियतनिरुद्धं मानसं मनो येन सः निर्वाणलिङ्गदेहनाशान्परमां ऋतरकालिकीं शान्तिं विदेहमुक्तिमधिगच्छति न केवलां जीवन्मुक्तिमेव मत्संस्थां मत्स्वरूपामित्यर्थः १५।

कृष्णमैवेजयन्तीटीका

एवंभूतस्य योगिनः फलमाह युञ्जन्नेवमिति एवमुक्तप्रकारेण मयि सर्वेश्वरे परमपुरुषे सदा प्रतिदिनं आत्मानं मनो युञ्जन्नुनयन् सन् नियतमानसः विनियतं यद्वा चलं मानसं चित्तं यस्य सन् तथा मदङ्घ्रिस्पर्शेन तया शाकृतविषयान्तरत्वाभिनिविष्टस्वर्थः योगी योगवान् निर्वाणपरमां निर्वाणस्य मोक्षस्य परमां काष्ठारूपां मत्संस्थां मस्थीनतांपदां मत्संस्थां मयि संस्था स्थितिर्यस्यास्तां मत्संस्थां मत्स्वरूपसाम्यस्थितिमित्यर्थः शान्तिं सरवमधिगच्छति लभते तेन मेव विदित्वाति मृत्युमेतीति श्रुतेः १५॥ गच्छति

मधुसूदनीटीका

एवं संप्रज्ञातसमाधिनाभ्यासस्य किं स्यादित्यत आह एवं सदावस्थानादिह

वौक्तनियमेनात्मानं मनो युंजन् वैराग्याभ्यासाभ्यां समाहितं कुर्वन्यो
गी सदाभ्यासपरोऽभ्यासातिशयेन नियतेन्निरुद्धमानसे मनो येन नियं
तानिरुद्धमानस्याहन्तिरूपाविकाराशयेनेत्तिवा नियतमानसः सनुष्या
तिं सर्वेहमपरंतिरूपो प्रशांतवाहितानिर्वाणपरमो नत्वसात्त्वाकारोऽस्मि
हारेणासकार्यः विद्यानिहमिद्रूपमुक्तिपर्यवसायिनी मनसो मत्स्वरूपपर
मात्त्वद्रूपो निष्ठामधिगच्छति ततसांसारिकाणि सर्वाणि ग्रंथानामविषय
समाधिफलामधिगच्छति तेषामपवर्गोपयोगिसमाध्युपसर्गत्वात् न
ध्यावतन्नतसमाधिफलान्स्न क्वाह भगवान्पतंजलिः ते समाधावुपस
र्गा व्युत्थाने सिद्धय इति स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्र
संगात् इति तु सूत्रात्निर्दिष्टाः तथा वोद्दालको दैवैरामंत्रितोपि तत्र संगमा
दं स्मयं गर्वं चाकृत्वा देवानवत्ताय पुनरनिष्टप्रसंगनिवारणाय निर्वि।
कल्पकमेव समाधिमकरोदिति वसिष्ठेनोपाख्यायते भगवताभिहितः स
माधिसूत्रितः पतंजलिना वितर्कविचारानंदास्मितानुगमात्संप्रज्ञातः
सम्यक्संशयविपर्ययानध्यवसायरहितत्वेन प्रज्ञायते प्रकर्षेण विशेष
रूपेण ज्ञायते भाव्यस्य रूपेण ज्ञायते भाव्यस्वरूपं येन स संप्रज्ञातः समाधि।
र्भावनाविशेषः भावना हि भाव्यस्य विषयांतरपरिहारेण चेतसि पुनः पु
ˇह नर्निवेशनं भाव्यं च द्विविधं ग्राह्यग्रहणगृहीतृभेदात् ग्राह्यमपि हि विधंस्थू
लसूक्ष्मभेदात् तदुक्तं क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु
तत्स्थतदंजनता समापत्तिः क्षीणा राजसतामसवृत्तयो यस्य तस्य चि
ˇह त्तस्य गृहीतृग्रहणग्राह्येषु आत्मेंद्रियविषयेषु तत्स्थता तत्रैवैकाग्रता त
दंजनता तन्मयता न्यग्भूते चित्ते भाव्यमानस्योत्कर्ष इति यावत् तथा
विधा समापत्तिस्तद्रूपः परिणामो भवति यथाभिजातस्य निर्मलस्य स्फटि
कमणेस्तत्तद्रूपाश्रयवशात्तत्तद्रूपापत्तिरेवं निर्मलस्य चित्तस्य तत्तद्भावना।
यवस्तूपरागात्तत्तद्रूपापत्तिः समापत्तिः समाधिरिति च पर्यायः यद्यपि।
गृहीतृग्रहणग्राह्येष्वित्युक्तं तथापि भूमिकाक्रमवशाद्ग्राह्यग्रहणगृ
हीतृष्विति बोद्धव्यं यतः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रह
ˇग्रही णनिष्ठः ततोऽन्ते निष्ठा इति गृहीत्रादिक्रमोऽप्यग्रे व्याख्यास्यते तत्र यदा स्थू
लं महाभूतेंद्रियात्मकं षोडशविकाररूपं विषयमादाय पूर्वापरानुसंधा
नेन शब्दार्थोल्लेखेन च भावना क्रियते तदा सवितर्कः अस्मिन्नेवालंबने ˇसमाधिः

पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्तते तदा निर्वित [नि]
र्कः। एतावुभावपि वितर्कशब्देनोक्तौ। तन्मात्रान्तःकरणलक्षणं सूक्ष्मं विष
यमालंब्य तस्य देशकालधर्मावच्छेदेन यदा भावना प्रवर्तते तदा सविचारः।
अस्मिन्नेवालंबने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन यदा भाव
ना प्रवर्तते तदा निर्विचारः। एतावुभावपि विचारशब्देनोक्तौ। तथा च भाष्ये वि
तर्कश्चित्तस्य स्थूले आलंबने आभोगः सूक्ष्मो विचार इति। इयं ग्राह्यसमापत्तिरि
ति व्यपदिश्यते। यदा रजस्तमोलेशानुविद्धमन्तःकरणसत्त्वं भाव्यते तदा गुण
भावाच्चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानंदः
समाधिर्भवति। अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वान्तरं प्रधानपुरुषरूपं न
पश्यंति ते विगतदेहाहंकारत्वात् विदेहशब्देनोच्यंते। इयं ग्रहणसमापत्तिः। त
तः परं रजस्तमोलेशानभिभूतं शुद्धं सत्त्वमालंबनीकृत्य या भावना प्रवर्तते
तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन स
माधिः सास्मित इत्युच्यते। न चाहंकारास्मितयोरभेदः शंकनीयः। यतो यत्रांतः
करणमहमित्युल्लेखेन विषयान्वेदयते सोऽहंकारः। यत्रांतर्मुखतया प्रतिलो
मपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता। अस्मिन्नेव समाधौ [स्मिन]
ये कृतपरितोषास्ते परं पुरुषमपश्यंतश्चेतसः प्रकृतौ लीनत्वात् प्रकृतिल
या इत्युच्यंते। सेयं ग्रहीतृसमापत्तिरस्मितामात्ररूपग्रहीतृनिष्ठत्वात्। ये तु प
रं पुरुषं विविच्य भावनायां प्रवर्तन्ते तेषामपि केवलपुरुषविषयविवेकख्याति
ग्रहीतृसमापत्तिरपि न सास्मिता समाधिर्विवेकेनास्मितायाः परित्यागात्। तत्र ग्र
हीतृभानपूर्वकमेव ग्रहणभानेन तत्पूर्वकं स्थूलग्राह्यभानेन तत्पूर्वकं च सूक्ष्म
ग्राह्यभानमिति स्थूलविषयो हि द्विधापि वितर्कश्चतुष्टयानुगतः। द्वितीयो वितर्क
विकलस्त्रितयानुगतः। तृतीयो वितर्कविचाराभ्यां विकलो द्वितीयानुगतः। चतुर्थो
वितर्कविचारानंदैर्विकलोऽस्मितामात्र इति चतुरवस्थोऽयं संप्रज्ञात इति। एवं सवि
तर्कः सविचारः सानंदः सास्मितश्च समाधिरंतर्धानादिसिद्धिहेतुतया मुक्ति।
हेतुसमाधिविरोधित्वाद्धेयपक्षमुपगतः। गृहीतृग्रहणयोरपि चित्तवृत्तिवि।
षयतादशायां ग्राह्यकोटौ निवेशात् हेयोपादेयविभागकथनाय ग्राह्यसमापत्ति
रेव विहिता तत्प्रकारेण च स्थूलविधा हि ग्राह्यसमापत्तिः स्थूलग्राह्यगोचरा हि वि
धा सवितर्का निर्वितर्का च सूक्ष्मग्राह्यगोचरापि द्विविधा सविचारा निर्विचारा च
तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का शब्दार्थज्ञानविकल्पसंभिन्नास्य।

लार्थावभासरूपा सवितर्का समापत्तिः स्थूलगोचरा सविकल्पकवृत्ति-
रित्यर्थः स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का तस्मिन्ने-
व स्थूलालंबने शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभा-
सतया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः स्थूलगो-
चरा निर्विकल्पकवृत्तिरित्यर्थः एतयैव सविचारा निर्विचारा च सूक्ष्मविष-
या व्याख्याता सूक्ष्मस्तन्मात्रादिर्विषयो यस्याः सा सूक्ष्मविषया समापत्तिर्द्वि-
विधा सविचारा निर्विचारा च सविकल्पकनिर्विकल्पकभेदेन एतयैव स-
वितर्कया निर्वितर्कया च स्थूलविषयया समापत्त्या व्याख्याता शब्दार्थ-
ज्ञानविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोर्थः प्रतिभाति।
यस्यां सा सविचारा शब्दार्थज्ञानविकल्परहितत्वेन देशकालधर्माद्यन-
वच्छिन्नत्वेन धर्मिमात्रतया सूक्ष्मोर्थः प्रतिभाति यस्यां सा निर्विचारा
सविचारनिर्विचारयोः सूक्ष्मविषयत्वविशेषणात् सवितर्कनिर्वितर्क-
योः स्थूलविषयत्वमर्थाद्व्याख्यातं सूक्ष्मविषयत्वं चालिंगपर्यवसानं स।
विचारायाः निर्विचारायाश्च समापत्तेर्यत्सूक्ष्मविषयत्वमुक्तं तदलिंगप-
र्यंतं द्रष्टव्यं तेन सानंदसास्मितयोर्ग्रहीतृग्रहणसमापत्त्योरपि ग्रहणं स।
मापत्त्योरेवांतर्भाव इत्यर्थः तथाहि पार्थिवस्याणोर्गंधतन्मात्रं सूक्ष्मो वि-
षयः आप्यस्य रसतन्मात्रं तैजसस्य रूपतन्मात्रं वायवीयस्य स्पर्शत-
न्मात्रं नभसः शब्दतन्मात्रं तेषामहंकारः तस्य लिंगमात्रं महत्तत्वं तस्या-
प्यलिंगं प्रधानं सूक्ष्मो विषयः सप्तानामपि प्रकृतीनां प्रधान एव सूक्ष्म-
ताविश्रांतेस्तत्पर्यंतमेव सूक्ष्मविषयत्वमुक्तं यद्यपि प्रधानादपि पुरुषः
सूक्ष्मोस्ति तथाप्यन्वयिकारणत्वाभावात्तस्य सर्वान्वयिकारणे प्रधान ए-
दं व निरतिशयं सौक्ष्म्यं व्याख्यातं पुरुषस्तु निमित्तकारणं सदपि नान्वयिका-
रणत्वेन सूक्ष्मतामर्हति अन्वयिकारणत्वाविवक्षायां तु पुरुषोपि सू-
क्ष्मो भवत्येवेति द्रष्टव्यं ता एव सबीजः समाधिः ताश्चतस्रः समापत्तयो
ग्राह्येण बीजेन सह वर्तंत इति सबीजः समाधिर्वितर्कविचारानंदास्मि-
तानुगमात्संप्रज्ञात इति प्रागुक्ताः स्थूलेर्थे सवितर्को निर्वितर्कः सूक्ष्मेर्थे
सविचारो निर्विचार इति तदंतिमस्य फलमुत्पन्ने निर्विचारवैशारद्येध्या-
त्मप्रसादः स्थूलविषयत्वे तुल्येपि सवितर्के शब्दार्थज्ञानविकल्पसंकीर्णसम

गी. टी. ष.

येत्यनेन हितस्य निर्विकल्पकरूपस्य निर्वितर्कस्य प्राधान्ये ततः सूक्ष्मवि
षयस्य सविकल्पकप्रतिभासरूपस्य सविचारस्य ततोपि सूक्ष्मविषयस्य
निर्विकल्पकप्रतिभासरूपस्य निर्विचारस्य प्राधान्यं तत्पूर्वेषां योग्यतेति।
विचारेणानिर्विचारफलेनैव फलवत्त्वं निर्विचारस्य तु प्रकृष्टाभ्यासव
लाद्वैशारद्ये रजस्तमोनभिभूतस्सत्त्वोद्रेकोऽध्यात्मप्रसादः क्लेशवासना
रहितस्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः प्रादुर्भवति
तथा च भाष्यं प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् भूमिष्ठानिव।
शैलस्थः सर्वान्प्राज्ञोऽनुपश्यतीति ऋतंभरा तत्र प्रज्ञा तस्मिन्प्रज्ञाप्र
सादे सति समाहितचित्तस्य योगिनो या प्रज्ञा जायते सा ऋतंभरा ऋतं सत्य
मेव बिभर्ति न तत्र विपर्यासगन्धोप्यस्तीति यौगिकी चेयं समाख्या सा चोत्त
मो योगः तथा च भाष्यं आगमेनानुमानेन ध्यानाभ्यासरसेन च त्रिधा प्रक
ल्पयन्प्रज्ञां लभते योगमुत्तममिति श्रुतानुमानप्रज्ञाभ्यामन्यविष
या विशेषार्थत्वात् श्रुतमागमविज्ञानं तत्सामान्यविषयमेव न हि वि
शेषेण सह कस्यचित् शब्दस्य संगतिर्ग्रहीतुं शक्यते तस्मात्श्रुतानुमा।
न विषयो न विशेषः कश्चिदस्ति न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो
कि लोकप्रत्यक्षेण ग्रहणमस्ति किं तु समाधिप्रज्ञानिर्ग्राह्य एव स विशेषो भव
ति भूतसूक्ष्मगतो वा पुरुषगतो वा तस्मान्निर्विचारवैशारद्यसमुद्भवा
यां श्रुतानुमानविलक्षणायां सूक्ष्मव्यवहितविप्रकृष्टसर्वविशेषविषा।
यायां [illegible] ऋतंभरायामेव प्रज्ञायां योगिना प्रयत्न आ[illegible]स्थे
य इत्यर्थः ननु तिसन्तू फ[illegible]वितिमात्र व्युत्थानसंस्काराणामेकाग्रता
यामपि सवितर्कनिर्वितर्कसविचारज्ञानसंस्काराणां च सद्भावात्तेषामा
मानस्य चित्तस्य कथं निर्विचारवैशारद्यपूर्वकाध्यात्मप्रसादलभ्या ऋतं।
भरा प्रज्ञा प्रतिष्ठितास्यादित्यत आह तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी तया
ऋतंभरया प्रज्ञया जनितो यः संस्कारः स तत्त्वविषयया प्रज्ञया जनितत्वे
न बलवत्त्वाद्व्युत्थानजान्समाधिजांश्च संस्कारान् अतत्त्वविषयप्र
ज्ञाजनितत्वेन दुर्बलान्प्रतिनिबध्नाति स्वकार्यादसमान् करोति नाशयती
ति वा तेषां संस्काराणामभिभवात्तत्प्रभवाः प्रत्यया न भवन्ति [illegible]।
[illegible]निरुद्धे ततः समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञा

कृताः संस्कारा इति नवो नवः संस्कारातिशयो वर्धते ततस्तत्प्रज्ञा ततस्तत्सं
स्कारा इति ननु भवतन्वप्रज्ञासंस्काराणामनन्तविषयप्रज्ञाजनितानां
तन्मात्रविषयसंप्रज्ञातसमाधिप्रज्ञाप्रभवैः संस्कारैः प्रतिबंधः तेषां तत्सं
स्काराणां प्रतिबंधकाभावादेकाग्रभूमावेव सबीजः समाधिः स्यात् न
नु निर्बीजो निरोधभूमाविति तत्राह तस्यापि निरोधे सर्वनिरोधान्निर्बी
जः समाधिः तस्य संप्रज्ञातस्य समाधेरेकाग्रभूमिजस्य प्रज्ञापि शाह्वात् त्रि
समृद्धविविदिसानामपि निरोधे योगिप्रयत्नविशेषेण विलये सति सर्वनि
रोधात्समाधेः समाधिजस्य संस्कारस्यापि निरोधान्निर्बीजो निरालंबनोऽ।
न संप्रज्ञातसमाधिर्भवति सर्वसोपायाः प्राक्संप्रज्ञातो विरामप्रत्ययाभ्यास
माउ पूर्वः संस्कारशेषोऽन्य इति विरम्यतेऽनेनेति विरामो वितर्कविचारानंदास्मि
तादिरूपचिंतात्यागः तस्य प्रत्ययः कारणं परं वैराग्यमिति यावत् विरामप्र
त्ययः चित्तवृत्तिविशेष इति यावत् तस्याभ्यासः पौनःपुन्येन चेतसि नि।
वेशनं तदेव पूर्वं कारणं यस्य सत्तथा संस्कारमात्रविशेषः सर्वथान्निवृत्ति
कोऽन्यः पूर्वोक्तात्सबीजाद्विलक्षणो निर्बीजोऽसंप्रज्ञातसमाधिरित्यर्थः
संप्रज्ञातस्य हि समाधेर्द्वावुपायावुक्तावभ्यासो वैराग्यं च तत्र सालंबनत्वा
दभ्यासस्य तन्निरालंबनसमाधिहेतुत्वं घटत इति निरालंबनं परं वैराग्य।
मेव हेतुत्वेनोच्यते अभ्यासस्तु संप्रज्ञातसमाधिद्वारा प्रणालिकयोपयुज्यते
तदुक्तं त्रयमंतरंगं पूर्वेभ्यः धारणाध्यानसमाधिरूपं साधनत्रयं यमनि।
यमासनप्राणायामप्रत्याहाररूपसाधनपंचकापेक्षया सबीजस्य समाधे
रंतरंगं साधनं साधनकोटौ च समाधिशब्देनाभ्यास एवोच्यते मुख्यस्य
समाधेः साध्यत्वात् तदपि बहिरंगं निर्बीजस्य निर्बीजस्य तु समाधेस्तदपि
त्रयं बहिरंगं परंपरयोपकारि तस्य तु परं वैराग्यमेवांतरंगमित्यर्थः अय
मपि द्विविधो भवप्रत्यय उपायप्रत्ययश्च भवप्रत्ययो विदेहप्रकृतिलयानां
विदेहानां सानंदानां प्रकृतिलयानां च सास्मितानां देवानां आगम्यागता देवा।
नां जन्मविशेषादौषधिविशेषात् मंत्रविशेषात्तपोविशेषाद्वा यः समाधिः
स भवप्रत्ययः भवः संसारः आत्मानात्मविवेकाभावरूपः प्रत्ययः कारणं
यस्य स तथा जन्ममात्रहेतुको वा पक्षिणामाकाशगमनवत् पुनः सं।
र सारहेतुत्वात् मुमुक्षुभिर्हेय इत्यर्थः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक

गी॰ भूतेरेषां जन्मौषधिमंत्रतपःसिद्ध्यतिरिक्तानामात्मानात्मविवेकदर्शि
टी॰ नां तत्र यः समाधिः सम्प्रज्ञातादिपूर्वकः श्रद्धादयः पूर्वं उपाया यस्य स तथा उपा
ष॰ यप्रत्ययश्चार्थः तेषु श्रद्धा योगविषये चेतसः प्रसादः सा हि जननीव योगि
नं पाति ततः श्रद्दधानस्य विवेकार्थिनो वीर्यमुत्साह उपजायते समुपजा
तवीर्यस्य पाश्चात्त्यासु भूमिषु स्मृतिरुत्पद्यते तत्स्मरणाच्च चित्तमनाकु
लं सत् समाधीयते समाधिरैकाग्र्यं तत्समाहितचित्तस्य प्रज्ञा भाव्यगोच
रा विवेकेन जायते तदभ्यासात्परस्माच्च वैराग्याद्भवत्यसंप्रज्ञातः समाधिर्मुमु
क्षूणामित्यर्थः प्रतिलक्षणपरिणामिनो हि भावा ऋते चितिशक्तेरिति न्याय
ततस्तामपि सर्ववृत्तिनिरोधावस्थायां चित्तपरिणामप्रवाहः तज्जन्यसंस्का
रप्रवाहश्च भवत्येव स संस्कारशेष इत्युक्तं तस्यैव संस्कारस्य प्रयोजनमुक्तं
ततः प्रशान्तवाहिता संस्कारादिति प्रशान्तवाहिता नाम वृत्तिकस्य चित्तस्य
निरिंधनाग्निवत्प्रतिलोमपरिणामेनोपशमः यथा समिदाज्याद्याहुतिप्र
क्षेपे वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये तु प्रथमक्षणे किंचिद्विका
म्यति उत्तरोत्तरक्षणेषु त्वधिकमधिकं शाम्यतीति क्रमेण शान्तिर्वर्धते तथा
निरुद्धचित्तस्योत्तरोत्तराधिकः प्रशमः प्रवहति तत्र पूर्वप्रशमजनितः
संस्कार उत्तरोत्तरप्रशमस्य कारणं ततश्च निरिंधनाग्निवच्चित्तं क्रमेणो
पशाम्यद्व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयते यदा च
समाधिपरिपाकप्रभवेन विवेकख्यातिरूपेण सम्यग्दर्शनेनाविद्यायां निवृत्ता
६१ यां तद्धेतुकद्रष्टृदृश्यसंयोगाभावाद्वृत्तौ पंचविधायामपि निवृत्तायां स्वरूपप्रति
ष्ठः पुरुषः शुद्धः केवलो मुक्त इत्युच्यते तदा द्रष्टुः स्वरूपेऽवस्थानमिति त
त्सर्ववृत्तिनिरोधे वृत्तिदशायां तु नित्यापरिणामिचैतन्यस्वरूपत्वेन तस्य सर्व
दा शुद्धत्वेऽप्यनादिना दृश्यसंयोगेनाविवेकेनान्तःकरणतादात्म्याध्यासाद
न्तःकरणवृत्तिसारूप्यमापन्नः भोक्तापि भोक्तेव दुःखी भवति तदुक्तं वृ
त्तिसारूप्यमितरत्र इतरत्र वृत्तिप्रादुर्भावे एतदेव विवृतं द्रष्टृदृश्योः परस्परके वि
वेके सर्वार्थं चित्तमेव द्रष्टृदृश्योपरक्तं विषयि विषयनिर्भासं चेतनाचेतनस्वरूपाप चैतन्ना
न्नं विषयात्मकमप्यविषयात्मकमिवाचेतनमपि चेतनमिव स्फटिकमणिक
ल्पं सर्वार्थमित्युच्यते तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः
तदसंख्येयवासनाभिः चित्रमपि परार्थं संहत्यकारित्वात् यस्य भोगापवर्गौ

र्थेन तस्यैव परः चेतनोऽसंहतः पुरुषो न तत्त्वदादिवत् संहत्यकारि चि
त्ते चेतनमित्यर्थः॥ विशेषदर्शिन आत्मभावभावनानिवृत्तिः॥ एवं यो
ऽन्तःकरणपुरुषयोर्विशेषदर्शी तस्य यांतःकरणे भागविवेकवशाद् आ
त्मभावभावनासीत्सा निवर्तते भेददर्शने सम्यग्भ्रमानुपपत्तेः सत्त्वपुरु
षयोर्विशेषदर्शने च भगवदर्पितनिष्कामकर्मसाध्ये तल्लिंगं योगभा
ष्ये दर्शितं यथा प्रावृषि तृणांकुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्ष
मार्गश्रवणेन यस्य रोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति
विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्तितमित्यनुमीयते यस्य
तु न तादृशं कर्मबीजं नास्ति तस्य मोक्षमार्गश्रवणे पूर्वपक्षफक्किषु रुचिर्भव
त्यरुचिश्च सिद्धान्तफक्किषु तस्य कोऽहमासं कथमहमासमित्यादिरात्मभा
वभावनास्वाभाविकी प्रवर्तते सा तु विशेषदर्शिनो निवर्तत इति एवं सति
किं स्यादित्यत आह॥ तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्॥ निम्नं जलप्रव
हणयोग्यो नीचो देशः प्राग्भारस्तद्योग्य उच्चप्रदेशः चित्तं सर्वदा प्रवर्त
मानं तत्प्रवाहेण प्रवहज्जलमिव तत्रागात्मानात्मविवेकरूपविमार्गवा
हि विषयभोगपर्यन्तमस्यासीत् इदानीं त्वात्मानात्मविवेकमार्गवाहि कैवल्य
पर्यन्तं संपद्यत इति ग्रन्थितश्च विवेकवाहिनि चित्ते येऽन्तरायाः ते सहेतुकानि
वर्तनीया इत्याह॥ तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः॥ हानमेषां
क्लेशवदुक्तम्॥ तस्मिन् विवेकवाहिनि चित्ते छिद्रेषु अन्तरालेषु प्रत्ययान्तराणि
व्युत्थानरूपाण्यहं ममेत्येवंरूपाणि व्युत्थानानुभवजेभ्यः क्षीयमाणेभ्योऽपि
प्रादुर्भवन्ति एषां च संस्काराणां क्लेशानामिव हानमुक्तं यथा क्लेशा अविद्या
दयो ज्ञानाग्निदग्धबीजभावा न पुनः चित्तभूमौ प्ररोहं प्राप्नुवन्ति तथा ज्ञाना
ग्निना दग्धबीजभावाः संस्काराः प्रत्ययान्तराणि न प्ररोढुमर्हन्ति ज्ञानाग्नि
संस्कारास्तु यावच्चित्तमनुशेरत इति एवं च प्रत्ययान्तरानुदयेन विवेकवा
हिनि चित्ते स्थिरीभूते सति॥ प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्याते
र्धर्ममेघः समाधिः॥ प्रसंख्यानं सत्त्वपुरुषान्यताख्यातिः [illegible]
मिति यावत् तद्वृद्धेः सञ्चिके परिणामे कृते संयमस्य सर्वेषां गुणपरि
णामानां स्वामिवदाक्रमणं सर्वाधिष्ठातृत्वं तेषामेव च शान्तोदिताव्यपदे
श्यधर्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं च विशोका नाम सि
द्धिः फलं तद्वैराग्याद्वा कैवल्यमुक्तं सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्व

गी॰
टी॰
ष॰

67

भावाधिष्ठातृत्वं सर्वज्ञातृत्वं च तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति।
सत्त्वाभ्यां तदेतदुक्तं तस्मिन्नपि समुत्थाने सत्यप्यकुसीदस्य फलमलिप्सोः प्रस
ख्यानराणामनुदये सर्वप्रकारविवेकख्यातेः परिपोषाद्धर्ममेघः समाधिर्भ
वति इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो धर्मो यद्यो
गेनात्मदर्शनमिति स्मृतेः धर्मं परमकृष्टसाक्षात्कारं मेहति सिञ्च
तीति धर्ममेघः तत्साक्षात्कारहेतुरित्यर्थः ततः क्लेशकर्मनिवृत्तिः
ततो धर्ममेघात्समाधेर्धर्माद्वा क्लेशानां पञ्चविधानामविद्यास्मितारागद्वे
षाभिनिवेशानां कर्मणां च शुक्लकृष्णाशुक्लकृष्णभेदेन त्रिविधानामवि
द्यामूलानामविद्यातत्कार्यबीजदाहात् तन्निवृत्तिः कैवल्यं भवति का
रणनिवृत्त्या कार्यनिवृत्तेरावश्यकत्वादित्यर्थः एवं युञ्जन्नेवं स
दात्मानमित्यनेन संप्रज्ञातः समाधिरेकाग्रभूम्यादुक्तः नियतमानस इ
त्यनेन तत्फलभूतोऽसंप्रज्ञातसमाधिर्निरोधभूम्यादुक्तः शान्तिमिति
निरोधसमाधिजसंस्कारफलभूतां प्रशान्तवाहितां निर्वाणपरमामिति
धर्ममेघसमाधेः फलं तत्त्वज्ञानद्वारा कैवल्यहेतुत्वं मत्संस्थामित्यनेनोप
निषदभिमतं कैवल्यं दर्शितं यस्मादेवं महाफलो योगस्तस्मात् महता
प्रयत्नेन स संपादनीय इत्यभिप्रायः [illegible]
[illegible] ॥

सदानंदीटीका

एवं पूर्वोक्तरीत्या हि योगाभ्यासपरो मुनिः वैराग्याभ्यासयोगेन मनः।
कुर्वन्समाहितं २ अभ्यासातिशयेनैव निरुद्धं येन मानसं वृत्तिरूपविका
राद्वा निरुद्धं येन मानसः २ स वृत्तपरतिं शान्तिं निर्वाणपरमां तथा तत्त्वबो
धस्य स्वनिहारेणात्मानमानंद २ तत्कार्यमपवाप्नोत्युक्तिपर्यवसायि
नीं मत्स्वरूपपरानंदरूपां तिष्ठामसम श्लो ॥ १५

नीलकंठीटीका

अस्य फलमाह युञ्जन्निति एवमनेन प्रकारेण सदा निरन्तरं दीर्घकालं च
आत्मानं मनो युञ्जन् समादधानो योगी नियतं ख्यातिफलादपि निरुद्धं
मानसं येन स नियतमानसः शान्तिं परमवैराग्यबलात् ख्यातिमपि निरु
ध्य निर्विकल्पपदं निर्वाणमात्मस्तदेव परमा निष्ठा यस्याः शान्तेस्तां मत्संस्थाम
य्येव संस्थापकीभावेनावस्थानं समाधिर्वा यस्यास्तामधिगच्छति प्राप्नोति

ख्यातिफलं वस्तुत्रकृत्नादर्शितं प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेक
ख्यातेर्धर्ममेघः समाधिरिति तत्र परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति स
त्त्वपुरुषान्यताख्यातिर्मज्ञात्सर्वज्ञातृत्वं सर्वभावाधिष्ठातृत्वं चेति तत्र
येण प्रसंख्यानेप्याने अकुसीदस्य वाणिजरवफलानिच्छोः सर्वथावि
वेकख्यातिरेव भवति तस्याश्च फलं धर्ममेघः समाधिः स च प्रागेव व्या
ख्यातः तत्र वैराग्यं परं परमेशं पुरुषख्यातेः फलं तस्य लक्षणं गुणेषु
दिव्यादिव्यविषयेषु वैतृष्ण्यं एतस्येव द्वितीयं तनीयकं फलं केवलस्मि
न्योगाव्देति तृतीयस्मैकं फलं सार्वज्ञादिकं तत्र अभिधीयते
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति सर्वस्य वशी सर्वस्ये
शानः सर्वस्याधिपतिरित्यादिकं ॥ १५ ॥

ज्ञानेश्वरीटीका

एवमष्टांगयोगमेवं तेन मदाश्रयत्वं ततु मध्येमध्ये विक्षिप्य आत्मा
नं योजन समाधिस्य ऊर्ध्वं [illegible] ॥

रामकंठटीका

[illegible] अर्जुनस्योपदेशात् [illegible] समाधिपरि
[illegible] दशा [illegible] कलीपात्
[illegible] प्रशान्तात्मा [illegible] नैतादि [illegible]
[illegible]
[illegible] स्थितः [illegible]
[illegible] युंजीत [illegible] नवमे
[illegible] योगी नियतमानसः [illegible] स्पष्टः एवं च पूर्वमात न४
[illegible]
[illegible] एवमतद्विशेषणा
विशिष्टः सदा मत्परः मामात्मानमंतः करणं युंजन् समादधानः सन्मद्भक्तः
मामेवात्मत्वेन समाश्रितो न पुनरन्यमनसो नास्मिंविषयांतरे न यस्य
मानसं मामेव मत्त्कोमत्समापत्तिमेव च समाधिफलत्वेन प्रतिपन्नः मत्
मत्संस्थां मयि वर्तमानं शांतिं स्वाभाविकसर्वविकाररहितत्वलक्षणां प्र
शममधिगच्छति स्वीकुरुते कीदृशीं शांतिं निर्वाणपरमां निर्वाणशरीरा

गी
टी ६

68

रावनात्मन्यात्मप्रत्ययादिलोभुविशतिरूपानिर्वृतिः परमंप्रकृष्टफल
तयास्थितेयस्यो सा तथोक्ताता म् [illegible]
[illegible]
[illegible] माह १४ ॥

एवंध्यानयोगाभ्यासफलमाह ॥ लाक्षिकी [illegible] टीका

योगी उक्तोपपन्यानित्यसमाहितः कर्मयोगीनियतमानसः निय
तेनप्रत्याहृत्यात्मनिनिरुद्धेप्रत्ययात्मानंयुंजन्नभ्यस्यवम्नशान् शांतिं सर्व
विकल्पोपशमंप्राप्नोति नतुसगुणमनोराज्यावपिविकल्पोपरतिरस्ती
त्यतआह मत्संस्थांमद्रूपेणात्रस्तयासम्यक्स्थितां एवंविधायाःशां
तेःफलमाह निर्वाणपरमां निर्वाणंमोक्षःपरमंप्राप्यापर्यंतकाष्ठा
यस्यास्तां [illegible] १४ ॥ ॥

पंचोलीटीका

अथेदानींयोगफलमुच्यते युंजन्नेवमिति योगीध्यानवान्नियत
मानसः संयतमनाःसदात्मानंएवएवंउक्तप्रकारेणयुंजन्समाधिं
कुर्वन्निर्वाणपरमांमोक्षफलांशांतिंनिर्वृतिंमत्संस्थांमदधीनाम
धिगच्छतिप्राप्नोति १५

रमावीरसमिद्धायिनी ॥

युंजन्नेवमिति योगीकर्मयोगी एवंपूर्वोक्तप्रकारेणसदास
र्वास्ववस्थासु आत्मानंचित्तंयुंजन् समाहितंकुर्वन् नियतमा
नसोनिगृहीतचित्तः मत्संस्था ममसर्वेश्वरस्यसंस्थांमर्यादांम
याप्रवर्तितां ममस्वचर्यामधिगच्छति सर्वप्रकारैर्जानाति प्र
वर्तयतिच कथंभूतांमत्संस्थांशांतिं ऐहिकामुष्मिकसर्वफल
साधनभूतत्वात्स्वपरिणामां तथानिर्वाणपरमां च च योर्वैका
निर्वाणंनिरातुर्याश्वतेपराः प्राज्ञवृत्तान्नीनातिदिनस्तीतिनि
र्वाणपरमांतांनिरातुर्यरिश्वयातसंपादिकामित्यर्थः १५ ॥

ਸਪੁਮਾਝ

੧੫॥

69

भाषा अनुवाद

अब योगाभ्यास करने का फल कहते हैं कि पूर्वोक्त प्रकार से स
दा आत्मा मे मन को युक्त करते नियत कहे निरुद्ध है मानस।
अर्थात् चित्त जिस का सोई शान्ति कहे संसार निवृत्ति को प्राप्त हो
ताहै वह शान्ति किसरूप है सो कहते है कि जिस से परम नि
र्वाण प्राप्त होय है सोई शान्ति और मत्संस्था कहे मेरे रूपमे।
अवस्थिति सो भी उसको मिले है १५

दोहा

जोडत यह विध चित्तको योगी सदा मनरोक निर्वाणशांतिकों
परमको सो पदलहै बिनशोक १५॥

70

६२

नात्यश्नतस्तुयोगोऽस्ति नचैकान्तमनश्नतः
नचातिस्वप्नशीलस्य जाग्रतोनैवचार्जुन १६

शाङ्करभाष्यं

इदानीं योगिन आहारादिनियम उच्यते नात्यश्नतइति न अत्यश्नत आत्मसंमितमन्नपरिमाणमतीत्याश्नतः अत्यश्नतो न योगोऽस्ति न च एकान्तमनश्नतो योगोऽस्ति यदुहवा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवतीतिश्रुतेः तस्मात् योगी नात्मसंमितादन्नादधिकं न्यूनं वाश्नीयादथवा योगिनो योगशास्त्रपरिपठितादन्नपरिमाणादतिमात्रमश्नतो योगोनास्ति उक्तंहि अर्द्धमशनस्य तृतीयमुदकस्य तु वायोः सञ्चरणार्थन्तु चतुर्थमवशेषयेदित्यादिपरिमाणं तथा। नचातिस्वप्नशीलस्य योगो भवति नैव चातिमात्रं जाग्रतो योगो भवति चार्जुन १६॥

सव्यंजनस्य

आनन्दगिरिकृतटीका

आहारादीत्यादिशब्देन विहारजागरितादि चोच्यते आत्मसंमितमन्नपरिमाणमश्नत्यस्मादि आहारनियमे शतपथश्रुतिं प्रमाणयति यदिति तदन्नं भुज्यमानं यदुहवेति प्रसिद्धा आत्मसंमितमवत्यनुष्ठानयोग्यतामापाद्यानुष्ठानद्वारेण भोक्तारं रक्षति न तु तदन्नमस्यानर्थाय भवतीत्यर्थः यत्तु नरात्मसंमितात् भूयोऽधिकतरं शास्त्रमतिक्रम्य भुज्यते तदात्मानं हिनस्ति भोक्तुरनर्थाय भवति यच्चान्नं कनीयोऽल्पतरं शास्त्रतिक्रम्याभावाद्यते तदन्नमनुष्ठानयोग्यतापादनद्वारा न रक्षति तमतः तस्मादत्यधिकमत्यल्पं वान्नं योगमारुरुक्षुणा नाश्यमित्यर्थः श्रुतिसिद्धमर्थं निगमयति तस्मादिति नेमादेर्व्याख्यानान्तरमाह अथवेति किं तदन्नपरिमाणं योगशास्त्रोक्तं यदधिकं न्यूनं वाभिव्यवहरतो योगानुपपत्तिरित्याशंक्याह उक्तं हीति सव्यंजनेनाशनेनार्द्धं तृतीयमुदकेन तु वायोः सञ्चरणार्थाय चतुर्थमवशेषयेदिति वाक्यमादिशब्दार्थः यथा नात्यन्तमश्नतोऽनश्नतश्च योगो न सम्भवति तथा अत्यन्तस्वपतो जाग्रतश्च न योगः सम्भवतीत्याह नचेति १६॥

स्वामिकृतटीका

गी. टी. ष.

योगाभ्यासनिष्ठस्याहारादिनियममाह नात्यश्नत इति अत्यन्तमधिकं भुञ्जानस्य एकान्तमत्यन्तमभुञ्जानस्यापि योगः समाधिर्न भवति तथातिनिद्राशील स्यातिजाग्रतश्च योगो नैवास्ति १६॥ परिमाणमतीत्याश्नतः अत्यश्नतो न योगोऽस्ति न चैकान्तमनश्नतो योगोऽस्ति यदुक्तं वा आत्मसंमितमन्नं तदवति न हिनस्ति यद्भूयो हिनस्ति तन्न यत्कनीयो

पैशाचभाष्यम्

योगिन आहारादिनियम उच्यते नात्यश्नत आत्मसंमितमन्नं तदवति न हिनस्ति यद्भूयो हिनस्ति तन्न यत्कनीयो न तदवतीति श्रुतेस्तस्माद्योगी नात्मसंमितादधिकं न्यूनं वाश्नीयात् अथवा योगिनो योगशास्त्रपरिमितादन्नपरिमाणादतिमात्रमश्नतो योगो नास्ति । उक्तं हि अर्धमन्नस्य सव्यञ्जनस्य तृतीयमुदकस्य तु वायोः संचारणार्थं तु चतुर्थमवशेषयेदिति परिमाणं तथा न चातिस्वप्नशीलस्य योगो भवति नैव चातिमात्रं जाग्रतो योगो भवति अर्जुन १६॥

रामानुजभाष्यम्

एवमात्मयोगमारभमाणस्य मनोनैर्मल्यहेतुभूतो मनसो भगवति । अपाश्रयः स्थितिर्मनोऽभिध्यायाम इदमपि योगोपकरणमाह नात्यश्नत इति अत्यशनानशने योगविरोधिनी अतिविहारावहारौ च तथा स्वापजागरौ तथायासौ १६॥

अभिनवगुप्तकृतटीका स्पष्टार्थम्

आत्मनैव चित्तं वशीकुर्यात् सन्ततं चिन्तयेदित्यर्थः कालेऽपि न कालो स्वातन्त्र्येण स्थिते अतिनिद्रादौ च तस्य परिमितेन कालेन सर्वात्मिक्रियासु तत्कालात्मनः अपि चैकैकक्रियायामेव स्थितो न तथा प्रवृत्तस्य परिमितौ वा न साम्यम् नातिका च यस्य च लोकवैषम्यात् न च लोकेनासौ समरसं तथा स्थाने एवमात्मानं दृढीकुर्यात् पञ्चभिः शान्तिर्जायते यथासंख्यमपर्यन्तेन कालेन न तातिज्ञात्वा योगी भवति १६॥

परमार्थप्रपाटीका

अथाभ्यासनिष्ठस्याहारादिनियममाह । नात्यश्नत इति अथवा अतिमात्रमश्नतस्तथा मन्त्रमतिन्यूनं वा एकान्तमत्यन्तमनश्नत उपोषितस्य तथा अमेते स्वप्नशीलस्यातिनिद्रालस्य अथवा मे नेजाग्रतो योगो दुःखहा दुःखोपशमायन भवति १६॥

वनमालीटीका

एवमभ्यासनिष्ठस्याहारादिनियममाह नात्यश्नत इति नातीतिद्वाभ्यां युक्तं सन्नी

र्यति शरीरस्य च कार्यक्षमतां संपादयति तदात्मसंमितमन्नं तदतिक्रम्य लो
भेनाधिकमश्नतो न योगोस्ति अजीर्णदोषेण व्याधिपीडनात् नचैकान्तम
नश्नतस्त्यक्ताहारस्य योगोस्ति निराहारादल्पाहाराद्वा देहपोषणाभावेन
देहस्य कार्याक्षमत्वात् यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति य
द्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति श्रुतेः अतो योगी नात्मसंमितादन्
नादधिकं न्यूनं वाश्नीयादित्यर्थः यद्वा पूरयेदशनेनार्धं तृतीयमुदकेन तु
वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादियोगशास्त्रोक्तपरिमाणाद
धिकं न्यूनं वाश्नतो योगो न संपद्यत इत्यर्थः तथा नातिनिद्राशीलस्याति जा
ग्रतश्चैव योगो नैवास्ति चशब्दादाहारातिक्रमसमुच्चयार्थः यथोक्तं
मार्कण्डेये नाध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतनः युंजीत योगं रा
जेन्द्र योगी सिद्ध्यर्थमात्मनः नातिशीते न चैवोष्णे न द्वन्द्वे नानिलान्वि
ते कालेष्वेतेषु युंजीत न योगं ध्यानतत्परः इति १६ ॥

कृष्णमवैजयन्तीटीका

एवं योगाभ्यासं कुर्वतो योगिनो भोजनादिनियमप्रकारमाह द्वाभ्या
म् नात्यश्नतस्त्विति तु निश्चयेन एवकारस्य नास्तीति क्रियापदेन सर्वत्रसंब
न्धः हेत्वेन अत्यश्नतः अतिशयभोजनं कुर्वतो योगिनो योगस्तु न: एका
न्तं केवलमनश्नतो भोजनमकुर्वतस्तस्य भोजनयोगस्तु न: अतिस्वप्नशी
लस्यातिशयशयनस्वभावस्य पुरुषस्य योगस्तु न: जाग्रतोतिशयजाग
रणशीलस्य जनस्य योगो नास्त्येव १६ ॥

मधुसूदनीटीका

एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां ॥

यद्भुक्तमन्नं जीर्यति शरीरस्य च कार्यक्षमतां संपादयति तदात्म संमित
मन्नं तदतिक्रम्य लोभेनाधिकमश्नतो न योगोस्ति अजीर्णदोषेण व्याधिपी
डितत्वात् नचैकान्तमनश्नतो योगोस्ति अनाहारादल्पाहाराद्वा रसपोष
णाभावेन शरीरस्य कार्याक्षमत्वात् यदु ह वा आत्मसंमितमन्नं तदवति त आ
न्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति शतपथश्रुतेः
तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वाश्नीयादित्यर्थः अथवा पूर
येदशनेनार्धं तृतीयमुदकेन तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदि
त्यादियोगशास्त्रोक्तपरिमाणादधिकं न्यूनं वाश्नतो योगो न संपद्यत इत्यर्थः

गी॰ तथातिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति हे अर्जुन सावधानेन भवितव्यमि
टी॰ त्याशयः एकः चकार उक्ताहारातिक्रमसमुच्चयार्थः अपरोशब्दः उक्तदोषसमुच्च
ष॰ यार्थः यथा मार्कंडेयपुराणे नाध्मातः क्षुधितः श्रांतो न च व्याकुलचेतनः युंजी
त योगं राजेंद्र योगी सिद्ध्यर्थमात्मनः नातिशीते न चैवोष्णे न द्वंद्वे नानिलान्
२७ विते कालेषु एतेषु युंजीत न योगं ध्यानतत्परः इत्यादि [white-out text] ॥

72

सदानंदटीका

योगाभ्यासैकनिष्ठस्य आहाराहारादिनियमं भुक्तस्य जीर्णतिस्वस्य पदत्रे दे
हधारणे १ तदान्नसंमितं तेषु न तु तिक्रमल्लो भतः अधिकवाश्नतो ना
स्ति योगो जीर्णादिदोषतः २ अल्पाहारतो नास्ति नास्त्यनाहारतः सव अ
थवा योगशास्त्रोक्तमाहारं नैव लंघयेत् ३ स्वयं दशने नार्धं हरनीयमुदके
न तु वायोः संचरणार्थं न तु चतुर्थमवशेषयेत् ४ निद्रयाक्रांतचित्तस्य योगा
भ्यासो न संभवेत् ततो नास्त्यतिनिद्रालो योगो नास्त्यतिजाग्रतः ५ १९ ॥

नीलकंठीटीका

एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां नात्यश्नत इति एको
ते अतिशयेन अतिजाग्रतः स्वप्नशीलस्य योगः १९ ॥

आनंदटीका [highlighted] १९ सप्तार्थम्

+इत्यम् अस्य योगस्य कर्मसमाधिलक्षणः रामकंठीटीका महायोगांतरवर्तिनो यथोक्तादेतान्यज्ञान

निष्ठतयाज्ञुष्ठेयतया +एवं यथोक्तो योग एवंविधस्यानुष्ठातुर्नैवास्ति नैव संभवति कीदृशस्यात
अनुज्ञातस्यान्यदपि प र्थमश्नतः सोऽहित्यपर्यंतं भुंजानस्य तथैकांतमत्यर्थमनश्नतोऽपि नास्ति त
रिकर्मेति प्रतिपादयितुमा
ह ॥+ थातिस्वप्नशीलस्य नित्यं निद्रारतस्य तथा सदैव जाग्रत उन्निद्रस्यापि नास्ति
अत्यशनाद्धि कायरोगरवमूलाभिष्यंदादयो दोषाः चित्तमकर्मण्यं संपाद
यंति अत्यंतानशनाच्च धातुक्षयादयः शक्तिह्रासमावहंति अतिस्वप्नादा
लस्यादय उयोगभंगमत्यंत निद्राप्रहारादजीर्णादयो दोषं मनस्यादिकमापा
दयंति १९ ॥

लक्ष्मीधरकृतटीका

अथ ध्यानयोगनिष्ठस्याहारादिनियम
माह — अत्यश्नतः सोऽहित्यपर्याप्तात्मसंमितादन्नादप्यधिकं भुंजानस्य तथैकांत
मत्यर्थमभुंजानस्यापि यथोक्तयोगः समाधिर्नास्ति तथातिस्वप्नशीलस्य

नित्यंनिद्राशीलस्य तथैवजाग्रत उन्निद्रस्यापिनभवति [illegible]
[illegible] १६॥

पंचोलीटीका

इदांनीयोगिनःआहारादिनियममनुच्यते नात्यश्नतस्तु पुनःअमश्न
तःआत्मीयादाहारादधिकंभुंजानस्ययोगोनास्तितथाअतिअनश्नशील
स्ययोनास्तितथा अतिस्वप्नशीलस्ययोगोनास्तिजाग्रतस्यैवअनेनयो
गोसमाप्तिर्नास्तिकथंभुंजानस्ययोगोभवतीत्युच्यते १६

रगवीरसतमिहोंयिनी॥

कर्मकौशललक्षणयोगाभ्यासरतस्याहारादिनियममाह नात्य
८ श्नतस्त्विति द्वाभ्यां अत्यश्नतस्तृप्तिपर्यंतंभुंजानस्ययोगःकर्मसु
प्रवृत्तिलक्षणःकर्मयोगोमनःसावधानतालक्षणश्चनास्ति न
संभवति अत्यशनादिकार्यगौरवसत्वाभिष्यंदादयो दोषाश्चित
मकर्मण्यंसंपादयंति तथैकांतमनश्नतोपिनास्ति अत्यंता
नशनादिधातुक्षयादयःशक्तिहानिमावहंति तथातिस्वप्नशी
लस्यनित्यंनिद्राशीलस्यापिनास्ति अतिस्वप्नाद्यालस्यादयउयोग
भंगंसंपादयंति तथासदैवजाग्रतउन्निद्रस्यापिनभवति अत्यं
तनिद्रापहाराद्यजीर्णादयोदौर्मनस्यादिकमापादयंति १६॥

मधुभाष्य

१६॥

भाषा अनुवाद

योगाभ्यासी को आहार शयन आदिका नियम कहते हैं कि हे अर्जुन अत्यन्त अधिक आहारी और अत्यन्त निराहारी इन दोनो को भी योग जो समाधि सो नहीं होसकती है और अतिनिद्रा करने वाला तथा निद्रात्यागी इन को भी समाधि नहीं होती है १९

दोहा

योग नहि अतिभक्षसें अति अभक्षसें नाहि नहि अतिनिद्रा यु
क्तसें जाग्रत अर्जुन पाहि १८॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्त
स्वप्नावबोधस्य योगो भवति दुःखहा १७॥

शाङ्करभाष्य

कथं पुनर्योगो भवतीत्युच्यते युक्तेति युक्ताहारविहारस्य युक्तचेष्ट
स्य आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ निय
तपरिमाणौ यस्य स युक्ताहारविहारस्तस्य युक्तचेष्टस्य तथाऽन्या च युक्ता
नियता चेष्टा यस्य कर्मसु तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्चाव
बोधश्च तौ नियतकालौ यस्य तस्य युक्ताहारविहारस्य कर्मसु युक्त
स्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि ह
न्तीति दुःखहा सर्वसंसारदुःखक्षयकृद् योगो भवतीत्यर्थः १७॥

आनन्दगिरिकृतटीका

आहारविहारादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो ।
योगान्वयं व्याचष्टे कथं पुनरित्यादिना अन्नस्य नियतत्वमर्द्धमशनस्ये
त्यादि विहारस्य नियतत्वं योजनान्न परं गच्छेदित्यादि कर्मसु चेष्टाया
नियतत्वं वाङ्नियमादि रात्रौ प्रथमतो दशघटिकापरिमिते का
ले जागरणं मध्यतः स्वपनं पुनरपि दशघटिकापरिमिते जागरण
मिति स्वप्नावबोधयोर्नियतकालत्वमेवं प्रयतमानस्य योगिनो भवति
योगस्य फलमाह दुःखहेति सर्वाणि आध्यात्मिकादिभेदभिन्नानीत्य
र्थः [illegible] यथोक्तयोगमन्तरेणापि स्वभावो दुःखनिवृत्तिरस्तीति
विशिनष्टि सर्वेति विशुद्धविज्ञानहारेति शेषः १७॥

स्वामिकृतटीका

तर्हि कथंभूतस्य योगो भवतीत्याह युक्ताहारेति युक्तौ नियतावाहारविहा
रौ गतिर्यस्य कर्मसु कार्येषु युक्ता नियतैव चेष्टा यस्य युक्तौ नियतौ स्व
प्नावबोधौ निद्राजागरौ यस्य तस्य दुःखनिवर्तको योगः सिध्यति १७

पिशाचभाष्यं

कथं पुनर्योगो भवतीत्युच्यते युक्ताहारविहारस्य आह्रियत इत्याहा
रोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणौ आहारविहारौ

तथा

गी· यस्य तथा नियता चेष्टा यस्य कर्मसु युक्तः स्वप्नावबोधः तस्य योगिनः योगो भ

टी· वति दुःखहा सर्वसंसारदुःखक्षयकृद्योगो भवतीत्यर्थः १७॥

भ· रामानुजभाष्य

मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य सकलदुःखहा बं

धनाशनो योगः संपन्नो भवति १७॥

अभिनवगुप्ताचार्यकृतटीका १७

आहारेषु आह्रियमाणेषु विषयेषु विहारः उप परमार्थप्रपा टीका
योगाय प्रवृत्तिः तस्या अयुक्तत्वं नात्यन्ताभक्तिर्नात्य
न्तपरिवर्जनं एवं सर्वत्र स्वप्नेऽपि जागरते इत्यादिषु
नैः प्रमाणत्वाद्धेदवत् एवमत्रापि॥ किं तद्युक्तेति युक्तो नियमित आहारो भोजनं यस्य विहारश्चेष्टा येन तथा

कर्मसु कार्येषु तथा युक्तनिद्रास्वबोधस्य पुरुषस्य योगो दुःखहा दुःखनि

वृत्तिसिद्धिदो भवति १७॥

वनमालीटीका

युक्तो नियतपरिमाणो आहारविहारो यस्य भ्रमणादिजयो पनिषदाव

र्तनादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य युक्तो नियतकालो स्वप्ना नि

द्रावबोधो जागरस्तौ यस्य तस्य योगो भवति साधनपाटवात् समाधिर्भ

वति नान्यस्य योगफलमाह दुःखहेति संसारदुःखोच्छेदकरमर्थः १७

श्रमवैजयन्तीटीका

किंच युक्ताहारेति युक्ताहारविहारस्य आहारश्च विहारश्चाहारविहारौ

युक्तौ मितौ आहारविहारौ यस्य तस्य स्वल्पभोजनं वगमनादिकस्येत्य

र्थः युक्तचेष्टस्य कर्मसु क्रियमाणेषु नित्यनैमित्तिकादिव्यापारेषु युक्तामि

ता चेष्टा वागादीन्द्रियव्यापारो यस्य तथा तस्य नियमरूपकर्मेषु तस्य

कर्मेन्द्रियव्यापारस्येत्यर्थः युक्तस्वप्नावबोधस्य युक्तौ स्वप्नावबोधौ शय

न जागरौ यस्य तथा तस्य स्वापशयं जागरस्येत्यर्थः ईदृशस्य योगिनो

योगो दुःखहा दुःखानि आध्यात्मिकादीनि जन्ममरणादीनि वा हन्तीति

तथा सः प्रकृतिसंसर्गजनिताखिल[illegible]दुःखनाशको योगो भवतीत्य

र्थः १७॥

एवमाहारादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमवतो योगान्व मधुसूदनीटीका

यमाह आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमः तौ युक्तौ नियतपरिमा

णौ यस्य तथा अन्येष्वपि स्नानजपोपनिषदावर्तनादिषु कर्मसु युक्ता नि

यतकाला चेष्टा यस्य तथा स्वप्नो निद्रा अवबोधो जागरणं तौ युक्तौ नियत

अर्धमशनस्य सव्यंजनस्य
तृतीयमुदकस्य तु

कालो यस्य तस्य योगो भवति साधनपाटवात् समाधिः सिध्यति नान्य
था एवं प्रयत्नविशेषेण संपादितो योगः किंफल इत्यत आह दुःखहेति
सर्वसंसारदुःखकारणाविद्यानुमूलनहेतुब्रह्मविद्योत्पादकत्वात् समूल
सर्वदुःखनिवृत्तिहेतुरित्यर्थः वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादिशा
स्त्रोक्ते विहारस्य नियतत्वे योजनात्परं गच्छेदित्यादि कर्मस्ववेशयानिय
तत्वे वागादिचापलपरित्यागः रात्रेर्विभागत्रयं कृत्वा प्रथमान्त्ययोर्जाग
रणं मध्ये स्वपनमिति स्वप्नावबोधयोर्नियतकालत्वं एवमन्योपि योगशा
स्त्रोक्तानियमा द्रष्टव्याः [illegible] १७ ॥

सदानंदीटीका

अन्नेविहरणे यस्य नियते परिमाणतः तथा परिमिता चेष्टा निद्रा जा
गरणे मिते १ सर्वदुःखलयहेतुस्तस्य योगोस्ति सन्मतेः अभियुक्तैस्त
थैवोक्तो योगिनो योगसिद्धये २ आहारार्थं कर्म कुर्यादनिंद्यं कुर्यादाहा
रं प्राणसंधारणार्थं प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन
भूयो न दुःखं ३ रजन्यामध्यमौ यामौ कुर्यान्निद्रां न वा सदा विना प्रयोजनं
चेष्टां न कुर्याद्धस्तपादयोः ४ वृथा चेष्टा वृथा कर्म भवेत्संदधियो रणा
हिते संध्यमितं यस्य भोजनं प्राणधारकं ५ गुरुसेवा गुरवे यस्य कर्मण्ये
वोक्तिसंक्रमः मिता निद्रा मिता वाणी यस्य भागवतस्य च ६ योगस्तस्य
सकार्यस्यास्तानस्यस्याद्दिनाकृतः ॥ १७ ॥

नीलकंठीटीका

युक्ताः परिमिताः आहारादयो यस्य स तथा १७ ॥

आनंदीटीका [illegible] १७ स्पष्टार्थम्

रामकंठीटीका

अतो युक्ताहारविहारस्य युक्तो हितमात्रकालावच्छिन्नत्वादुपपन्न आहारो भो
जनं विहारः संक्रमणादिर्यस्य तादृशस्य तथा कर्मसु दृष्टादृष्टविषयेषु व्या
पारेषु युक्ताचितशरीरानवसादित्वपर्यवसायिनी चेष्टा मनःकायव्यापारो य
स्य तस्य तादृशस्य तथा युक्तो यथाकालभावित्वात्स्वप्नो वा बोधो निद्रा जा
गरो यस्य तस्य तादृशस्य योगिनः एष योगो दुःखहा भवति अभ्यस्यमानः

गी·
टी·म·

क्लेशो हंति सुखेन संपद्यते इत्यर्थः विकारशालि नियमोऽत्र छांदसः संस्कृतं
त^ मन्यास्तु मर्दरागिणो योजयंति [illegible]
[illegible] १७ ॥

नर्हि कथंभूतस्य योगो भ
वतीत्याह –

लासिकी [illegible] टीका

युक्तो हितमात्रः कालावछिन्नत्वाद् उपपन्नः आहारो भोजनं विहारः संक्रम
णादिर्यस्य तथा कार्येषु कर्मसु युक्ता वितशारीरा नवसादिनी चेष्टा यस्य
युक्तौ तथा यथाकालभावित्वात्स्वप्नो निद्रा जागरो यस्य ईदृशस्य योगिनः
स योगो दुःखहा भवति अभ्यस्यमानः क्लेशो हंति सुखेन संपद्यते इत्यर्थः
आहारादि समाधिसिद्धिर्यथा स्यात्तथा योगिना स्वयं परीक्षितव्यं नात्र
हठयोगवद्विशेषेण नियमो निर्यंत्रितस्य तः समाधेनोक्तं सर्वत्र युक्तम्
तथा च श्रुतिः यदुहात्मसमस्मिन मन्नेतदवति तत्र हितनास्ति यद्भूयो हि
नास्ति तद्यत्कनीयो न तदवतीति १७ ॥ [illegible]

पंचोली टीका

युक्तेति युक्ताहारविहारस्य आह्निकि यतः स्माहारोऽन्नं नियतं अर्धमन्न
स्य तृतीयो भागः पानीयस्य चतुर्थो वायुसंचरणस्य एवं चतुर्भागैः उदर
पूरयेत् योगिनो नियताहारपादचंक्रमणेन रूपि नियतं कर्मसु कार्येषु
नियता चेष्टा स्य सकलसंसारदुःखतापहन्ता योगो भवति १७ ॥

रणवीरसमिद्धोयिनी ॥

अतो युक्ताहारविहारस्य युक्तो नियत आहारे भोजने विहारे
वृत्तिर्यस्य युक्तत्वं च नात्यंतासक्तिर्नात्यंतपरिवर्जनं च तथा
कर्मसु कार्येषु युक्ता नियतैव चेष्टा यस्य तथा युक्तो यथाका
लभावित्वान्नियतो स्वप्नावबोधौ यस्य रात्रौ स्वप्नो दिवा जागर
णं चेति नियमः तादृशस्य च कर्मयोगिनो योगो दुःखहा भव
ति दुःखं क्लेशं हंतीति क्लेशनिवर्तकः संपद्यते १७ ॥

मधुभाष्य

१७ ॥

भाषा अनुवाद

तो फेरि कैसे पुरुष को समाधि हो सकती है इस अपेक्षा पर कहते हैं कि नियत रूप आहार औ विहार है जिसका तथा कर्मों मे परिमित चेष्टा कहे व्यापार हैं जिसका और यथा उचित हैं सोवना जागना जिसका उसी को योग कहे समाधि होती हैं और दुख दूर करती हैं १७

दोहा

युक्ताहार व्यवहारसें युक्तकर्म करें जोय युक्तशयन जागरण
करें योग दुखहा होय १७॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते निःस्पृ-
हः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८ ॥

शाङ्करभाष्यं

अथाधुना कदा युक्तो भवतीत्युच्यते यदेति यदा विनियतं चित्तं वि-
शेषेण नियतं संयतमेकाग्रतामापन्नं चित्तं हित्वा बाह्यचिन्तामात्मन्येव ना
केवलेऽवतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निःस्पृहः सर्वकामेभ्यो
निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहि-
त इत्युच्यते तदा तस्मिन् काले १८ ॥

आनन्दगिरिकृतटीका

सफलस्य साङ्गस्य योगस्योक्तानन्तरं यदाहीत्यादावुक्तकालानुवादेन
युक्ते लक्षणं तद्वदनन्तरश्लोकप्रवृत्तिं दर्शयति अथाधुनेति विशेषेण सं-
यतत्वमेव स्फोटयति एकाग्रतामिति आत्मन्येवेत्येवकारार्थं कथयति।
हित्वेति केवलत्वमद्वितीयत्वं तस्यात्मस्थितिं विवृणोति स्वात्मनीति
चित्तस्य हि कल्पितस्यात्मैव तत्त्वं तस्मात्तस्य सर्वतो निवारितमधिष्ठा-
ने निमग्नं तिष्ठतीति भावः तस्यामवस्थायां सर्वेभ्यो विषयेभ्यो व्यावृत्त-
तृष्णो युक्तो व्यवह्रियत इत्याह निःस्पृह इति १८ ॥

स्वामिकृतटीका

कदा निष्पन्नयोगः पुरुषो भवतीत्यपेक्षायामाह यदेति नियतं संयतं चि-
त्तं यस्यात्मन्येव यदा निश्चलं तिष्ठति तदा प्राप्तयोग इत्युच्यते १८ ॥

पैशाचभाष्यं

अथाधुना कदा युक्तो भवतीत्युच्यते यदेति यदा विनियतं चित्तं विशे-
षेण नियतं संयतमेकाग्रतामापन्नं चित्तं हित्वा बाह्यमात्मन्येव केवलेऽ-
वतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निःस्पृहः सर्वकामेभ्यो निर्गता स्पृहा दृ-
ष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहित इत्युच्यते
तदा १८ ॥

रामानुजभाष्यं

यदेति यदा स्वप्रयोजनविषयं चित्तमात्मन्येव विनियतं विशेषेण नि-
यतं निरतिशयप्रयोजनतयात्रैव निश्चितं निश्चलमवतिष्ठति ततः स-
र्वकामेभ्यो निःस्पृहः सन् युक्त इत्युच्यते योगार्ह इत्युच्यते १८ ॥

अभिनवगुप्तकृतटीका नास्ति । अस्पष्टयोगिनश्चित्तम् आत्मन्येव नियतम नान्यत्किंचिदपि स्पृहयति ॥ १८ ॥

परमार्थप्रपाटीका

अथ निष्पन्नयोगस्य परीक्षामाह यदेति विनियतं निरुद्धं चित्तमात्मन्ये
वनिश्चलं तिष्ठति यदा च सर्वकामेभ्यो निःस्पृहो भवति तदा युक्तो निष्पन्न
योग इत्युच्यते १८ ॥

वनमालीटीका

योगसंपूर्तिकालमाह यदेति यदा यस्मिन् काले वैराग्याभ्यासाभ्यां निय
तं निरुद्धं विगतरजस्तमस्कं चित्तं विषयान्तरादयत्नादेव व्याहृतमात्मन्ये
व परमानंदघने सर्वेश्वरे मय्येवावतिष्ठते तदा तस्मिन् काले स युक्तः समा
हित इत्युच्यते कीदृशः सर्वकामेभ्यो निस्पृहः निर्गत दोषदर्शनेन सर्वेभ्यो
दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य सः १८

कृष्णसेवकनयनीटीका

ननु सिद्धयोगो योगीकदा भवेदित्यपेक्षायामाह यदा विनियतमिति य
दा यस्यामवस्थायां योगाभ्यासं कुर्वतो योगिनो विनियतं निश्चलं सच्चितं
मनो निरस्तसर्वात्मैकप्रयोजनतया आत्मन्येव स्वस्वरूपे एवावतिष्ठते स्थि
रं भवति तदा तस्यामवस्थायां सर्वकामेभ्यः सकलशास्त्रक्तभोगकामेभ्यो
निःस्पृहः सन् निर्गता स्पृहा वाञ्छा यस्मात् एवंभूतः सन् योगी युक्तः सिद्धयो
ग इत्युच्यते इत्येवं कथ्यते १८

एवमेकाग्रभूमौ संप्रज्ञातसमाधि मधुसूदनीटीका मभिधाय निरोधभूमावसंप्रज्ञातं समाधिं वक्तु
मुपक्रमते — यदा यस्मिन्काले परवैराग्यवशाद्विनियतं विशेषेण नियतं सर्ववृत्तिशून्य
तामापादितं चित्तं विगतरजस्तमस्कमंतःकरणसत्त्वं स्वच्छत्वात् सर्वविष
याकारग्रहणसमर्थमपि सर्वतो निरुद्धवृत्तिकत्वादात्मन्येव प्रत्यक्चिति निश्च
ला मात्रपरमकेवलानिरालंबे(?) एव सत्तः सिद्धस्यात्माकारस्यवारयितुमशक्य
°रेव त्वाच्चित्तेनाधामात्मन्यगमनेन मदवतिष्ठते निश्चलं भवति तदा तस्मिन् सर्वा
वृत्तिनिरोधकाले युक्तः सम्यक्समाहित इत्युच्यते कः यः सर्वकामेभ्यो निस्पृहः नि °भ्ये
र्गतादोषदर्शनेन सर्वेभ्यो दृष्टादृष्टविषयेभ्यः कामेभ्यः स्पृहा तृष्णा यस्य
(?) ति परवैराग्यमसंप्रज्ञातसमाधेरंतरंगसाधनमुक्तं तथा च व्याख्यातं प्रा
कं [illegible]

सदानंदटीका

यस्मिन्काले विशेषेण स्वकृत्वा निश्चलं मनः प्रतीच्येव निरुद्धत्वान्नि
यमेनावतिष्ठते १ दृष्टादृष्टास्तेभ्यस्सकामेभ्यो दोषदर्शनात् तस्मा
द्विनिर्गतायस्यपरवैराग्ययोगतः २ तदा समाहितो योगी सिद्धश्च
युक्तउच्यते ३१८ ॥

नीलकंठीटीका

निर्वाणपरमां शांतिं प्राप्तस्य लक्षणमाह यदेमादिभिः षड्भिः विनि
यतं विशेषेण एकाग्रतां भूमिं रूपितं निरुद्धं आत्मनि प्रत्यगात्मन्येवावति
ष्ठते तत्रस्थितादि रूपेण उद्दिश्यते तदा योगी सर्वेभ्यः जाग्रत्स्वप्नबीजस
माधिष्वपस्थितेभ्यः लब्धोपपंचमी सार्वात्म्यप्राप्त्येव तान् प्राप्य तेभ्यो
निस्पृहो भवति तदा युक्तो निर्विकल्परूप उच्यते १८ ॥

आनन्दीटीका

योगस्य परिपाककालमाह तदा तस्मिं काले युक्तो योगसिद्धिं प्राप्त
इत्युच्यते [illegible] १८

एवमाहारविहारनियमयुक्तासिद्धि रामकंठीटीका लक्षणं योगस्याह ॥

यदास्य योगिनः समाध्यभ्यासकाष्ठां प्राप्तस्य चित्तं विनियतं निगृहीतं
सत्सम्प्रज्ञातसमाधिभूमिकाः वितर्कविचारानंदास्मितानुगताः अति
क्रान्तं सत्स्थूलसूक्ष्मभोग्ययेभ्यो लब्धं संयमत्वात्तानि त्यक्त्वा एकस्मिन्ध्ये
ये आत्मन्येव स्वभावएवावतिष्ठते अवस्थितिं प्रतिष्ठां संयमं लभते तदा
तस्यां दशायां मात्मैकारामत्वात्सर्वेभ्यो व्यतिरिक्तेभ्यो भोगेभ्यः स्पृहारा
हितो निरभिकांक्षः सन् असौ युक्तः सम्पन्ननिर्बीजसमाधिरित्युच्यते त
स्यात्मध्याननिष्ठस्य योगिचित्तस्यैवार्थेग शद्वावास्यसोपमाह १८ ॥ नमा

लासिकी [illegible] टीका

अथ सिद्धयोगस्य लक्षण
माह — यदास्य योगिनश्चित्तं विनियतं विशेषेण निरुद्धं सदात्मन्येव प्रतीच्येवा
वतिष्ठते प्रतिष्ठां लभते तदासौ युक्तः आत्मसमाधिरित्युच्यते कीदृशो
युक्तो निःस्पृहः सर्वकामेभ्य इति [illegible]
[illegible] १८ ॥

79

पंचोलीटीका

अथ युक्तः कदा भवतीत्युच्यते यदेति यदा विनियतं विशेषेण संयतं चित्तं बाह्यचिंतां हित्वा आत्मन्येव केवले अवतिष्ठते स्थिरं भवति। किंच सर्वकामेभ्यः ऐहिकामुष्मिकभोगेभ्यो निःस्पृहः विगतस्पृहो भवति तदा युक्तः समाहितचित्त इत्युच्यते १८

रामवीरमनिद्बोधिनी॥

यदेति यदा यस्मिन्काले सर्वकामेभ्यः सर्वेभ्यो दृष्टसंकल्पेभ्यः कामएष क्रोधएष इत्यादिना पूर्वं प्रतिपादितेभ्यो विनियतं प्राप्त्या वर्तितं चित्तमात्मन्येव यत्नएवावतिष्ठते निश्चलं भवति तदा निःस्पृहः पुत्रमित्रादिस्पृहारहितः केवलं स्वधर्माचरणे एवावहितो युक्त इत्युच्यते योगारूढ इति कथ्यते साम्यममता रूपयोग इति यावत् १८॥

मधुभाष्य

१८॥

भाषा अनुवाद

कौन समयमे योग सम्पन्न अर्थात् समाधि सिद्ध होगा सो कहते हैं कि जब पुरुषका चित्त एकाग्र करिके अच्छीतरह सब ओर से सककर अर्थात् वास करिके बाहर के सकल विषयों को छोड़ि कर केवल आत्मामे निश्चल रूप से लगे अर्थात् अपने आत्मा मे स्थिति करै और सब मनोरथ की इच्छा न रहे अर्थात् देखी सुनी जो संसारिक विषय तिन की कामना मे स्पृहा करि तृष्णा न उठे तब वह योगसिद्ध करिके युक्त समाहित कहा जाता है सोई कहा कि यदा विनियतं चित्तमात्मन्येवावतिष्ठते इति १८॥

दोहा

जबहि निवर्तें चित्त जो आत्म मे स्थित होय निरकांक्षत सब
कामसें युक्त कहावें सोय १८॥

यथादीपोनिवातस्थोनेङ्गतेसोपमास्मृता यो
गिनोयतचित्तस्ययुञ्जतोयोगमात्मनः १९ ॥

शांकरभाष्यं

योगिनः समाहितं यच्चित्तं तस्योपमोच्यते यथेति यथा दीपः प्रदीपो
निवातस्थो निवाते वातवर्जिते स्थाने नेङ्गते नेङ्गति नचलति साउपमा
उपमीयते ऽनयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता चिन्तिता योगि
नो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगमनुतिष्ठत आत्मनःस
माधिमनुतिष्ठत इत्यर्थः १९

आनन्दगिरिकृतटीका

उपमा योगिनश्चित्तस्थैर्यस्योदाहरणमित्यर्थः उपमाशब्दस्य प्रदीप
विषयत्वमिष्टार्थकरणव्युत्पत्त्या दर्शयति उपमीयत इति योगिनो य
थोक्तविशेषणवतश्चित्तस्थैर्यस्येति शेषः १९

स्वामिकृतटीका

आत्मैकाकारतयावस्थितचित्तस्योपमानमाह यथेति वातशून्ये देशे स्थि
तो दीपो यथा नेङ्गते न विचलति सा उपमा दृष्टान्तः कस्यात्मविषयं योगम
भ्यस्यतो योगिनो यतं नियतं चित्तं यस्य तस्य निष्कंपतया प्रकाशकतया चान्व
तच्चित्तेन तिष्ठत इत्यर्थः १९ ॥

पैशाचभाष्यं

योगिनस्समाहितस्योपमोच्यते यथादीपो निवातस्थो निवाते वातवर्जि
ते देशे स्थितः नेङ्गते न चलति सोपमा उपमीयते ऽनयेत्युपमा स्मृता ।
योगज्ञैश्चित्तप्रकारदर्शिभिः चिंतिता योगिनो यतचित्तस्य संयतान्तः
करणस्य युञ्जतो योगं समाधिमनुतिष्ठत इत्यर्थः १९

रामानुजभाष्यटी

यथेति निवातस्थो दीपो यथा नेङ्गते न चलति अचलः सप्रभस्तिष्ठति
यतचित्तस्य निवृत्तसकलेतरमनोवृत्तेर्योगिनः आत्मनि योगं युञ्जत आ
त्मस्वरूपस्य सोपमा निवातस्थतया निश्चलप्रभदीपवन्निवृत्तसकलेतर
मनोवृत्तितया निश्चलज्ञानप्रभः आत्मावभासत इत्यर्थः १९

अभिनवगुप्तकृतटीका

आहारेष्वनियमाण्डेऽपि विषयेषु विहारउपयोगाय यथाकृतिः तस्यावश्य
यथादीपोनचलतिएवं योगीचलनमस्यविषयादीनामर्जनादयः प्रयासाः १९

गी॰ कालेनात्मनात्मानमाक्लिष्टोऽसंततपरिवर्जिते एवं सर्वत्र स्पृहारहितः सात्त्विकसाधु।
टी॰ युक्तेः प्रमाणत्वाद्दृश्यते एवमन्यत्रापि असंप्रज्ञातयोगिनाद्वि एवमात्मन्येव स्थि।
ध॰ यतस्तामात्मकिंचिदपि स्मरणते १९॥

परमार्थप्रपाटीका

अथात्माकारतया स्थितस्य चित्तस्योपमानमाह यथेति वातशून्ये स्था
ने निवाते तत्र स्थितो दीपो यथा नेङ्गते न चलति तत्रैव पदार्थमात्रं स्पष्टतया
प्रकाशयति प्रकृते सा उपमा दृष्टान्तः स्मृतः कस्य आत्मनो योगं युञ्जतो।
भ्यसतो योगिनो विक्षेपशून्यचित्तस्य १९

वनमालीटीका

भगवत्येकाग्रस्य तत्स्वरूपस्य चित्तस्योपमानमाह यथेति दीपचल
नहेतुना वातेन रहिते देशे स्थितो दीपो यथा नेङ्गते न चलति सोपमा स्मृ।
ता दृष्टान्तश्चिन्तितो योगज्ञैः कस्योपमा योगिनः भगवति संप्रज्ञा
तसमाधिमतः यतचित्तस्य तत्रैवासंप्रज्ञातसमाधिमतः संप्रज्ञातस
माधौ भगवद्रूपादिविषयकचित्तवृत्तयो जायन्ते असंप्रज्ञातसमाधौ वा
न्तःकरणवृत्तिमात्रस्योपरामो भगवत् प्रसादात् स्वरूपाकारैकाविद्या
याः शैथिल्येनाविर्भूतस्वरूपभूतज्ञानेन भगवन्तं स्वस्वरूपानन्दमनुभव
ति स्वरूपज्ञानस्याविर्भूतस्य तद्विषयकत्वस्याभावात् असंप्रज्ञातसमा
धौ वा सान्तरज्ञानसाधनस्याभावेन ज्ञप्तज्ञानासंभवात् अन्तःकरणवृ।
संप्रज्ञ√ त्त्यनङ्गीकारे संप्रज्ञातासंप्रज्ञातयोर्भेदस्योक्तिमात्रत्वापत्तेः असंप्रज्ञातसमा ना√
धावाविर्भूतज्ञानानङ्गीकारे तस्य पुनरन्यत्वापत्तिदर्शप्र
यत्नानापत्तेः कीदृशस्येतादृशसमाधिलाभाय आह आत्मनः परमानन्दमूर्तेः
परमात्मनो योगं युञ्जतः विषयान्तरतो वैराग्येण चित्तवृत्तीर्बाह्यस्य भ
गवदेकाकाराः कुर्वतः १९

ऊरुमवैजयन्तीटी॰

निष्पन्नयोगस्य योगिनस्सदृष्टान्तस्थितिप्रकारमाह यथा दीप इति
यथाशाहो यत्र सादृश्ये यथा वा निवातस्थः निर्गतो वातो वायुर्यस्मात्स नि
वातो देशविशेषस्तस्मिन् तिष्ठतीति स तथा दीपः प्रदीपः नेङ्गते न चल।
ति आत्मनः स्वस्वरूपस्य योगं ध्यानं युञ्जतोऽनुतिष्ठतो यतचित्तस्य निवृत्त
निखिलचित्तवृत्तेर्योगिनो निष्पन्नयोगस्य सदृशोपमा उपमानं स्मृता चिं।
तिता योगाय मतिर्जितेरिति शेषः सोऽयमत्रसो विलोपे वैमादपूरणमिति

सज्ञात्मंधिः यथावायुशून्यगृहान्तर्वर्तीसप्रभःप्रदीपोविक्षेपाद्दिपु।
मतयानचलतितथाचित्तवृत्तिनिरोधेनशाकृतशब्दादिविषयविक्ष
पहेतमुक्तेनिहमन्वादात्मदर्शनेकप्रयोजनत्वाच्चयोगीनचलतीमर्थः १९

समाधौनिर्ह्रुतिकस्यचित्तस्योप

मधुसूदनीटीका

ानमाह दीपचलनहेतुनावातेनरहितेदेशेस्थितोदीपयथाचलनहेतुभावा
न्नेंगतेनचलति सोपमास्मृता सदृशोतःचित्तेनोयोगत्तेः तस्ययोगि।
नएकाग्रभूमौसंप्रज्ञातसमाधिमतोभ्यासपाटवाद्यतचित्तस्यनिरुद्ध
सर्ववित्तवृत्तेरसंप्रज्ञातसमाधिरूपंयोगनिरोधभूमौयुंजतोःनुति
ष्ठतोयआत्मांतःकरणंतस्यनिश्चलतयासत्वोद्रेकेणप्रकाशकतयाच।
निश्चलोदीपोदृष्टांतःइत्यर्थः आत्मनोयोगंयुंजत इतिव्याख्यानेदार्ष्टांति
कालाभः सर्वावस्थस्यापिचित्तस्यसर्वदात्माकारतयाःत्मपदवैयर्थ्य
नहियोगेनात्माकारताचित्तस्यसंपाद्यते किंतुस्वतएवात्माकारस्य
सतोःनात्माकारतानिवर्त्यतइति तस्माद्दार्ष्टांतिकइतिपाठेनार्थ
मेवात्मपदं यतचित्तस्यइतिवाभावप्रधानोनिर्देशःकर्मधारयोवाय
तस्यचित्तस्येत्यर्थः [illegible]
[illegible] १९

सदानंदीटीका

समाहितधियःप्रसंगात्तेनिश्चलस्यवयोगिनोभगवानाहोप।
मानेनोधतायत्तुः वातेनरहितेदेशेस्थितोदीपोयथाचलः समःहित
धियःसोपदृष्टांतस्थितितोबुधैः २ निरोधभूमौसततंसमाधिमनु।
तिष्ठतः सत्वोद्रेकेणयच्चित्तप्रकाशकतयाचले ३ निश्चलोदीपव
तस्यदृष्टांतोहरिणोदितः ४ १९

नीलकंठीटीका

एकाग्रतावस्थायांयोगिचित्तस्योपमामाह यथेति नेंगतेनचल
तितद्वत् यतेचेतसश्चित्तेनयतचित्तेनतस्य एकाग्रतावस्थेचित्तनिवा
तप्रदीपवन्नचलतीत्यर्थः आत्मनोयोगंसमाधियुंजतोःनुतिष्ठतः १९

आनंदीटीका

इत्थंभूतस्यस्वरूपमुपमयाह ॥
आत्मनिसंयमजयात्सुहृतेःस्थिरभावनार्थयोगंयुंजतःयोगिनस्तो

गी
टी॰ ६

पमास्मृतायेनेपमाप्रकारेणानिवातस्थोदीपोनेंगते १९ ॥

रामकंठीटीका

आत्मनि निरुद्धे ध्येये योगं समाधिं युंजानस्य योगिनः सर्वतः प्रत्याहृतत्वात् यतेति निगृहीतं चित्तं येन तादृशस्य सोपमा तदुपमानं तत्वज्ञैः स्मृतम् यथा दीपः प्रदीप्तको निरुद्धवातदेशे स्थितः सन्नेंगते न प्रकम्पते तथैवात्मलंबने समाधौ स्थितं योगिचित्तं न प्रकंपत इत्युपमेयवाक्यमध्याहार्यं अनेन दीपोपमानेन प्रत्यासन्नप्रबलविपक्षतायत्नसंरक्षणीयत्वं योगिचित्तस्य प्रतिपादितं ॥

लासिकी वल्लभटीका

अथ निरुद्धसर्वचित्तवृत्तिकस्यात्मनि समाहितस्य योगिन उपमानमाह — अथ वातशून्ये देशे स्थितो दीपो नेंगते न कंपते आत्मनो योगसमाधिमभ्यस्यतो यतचित्तस्योपरतचित्तस्य योगिनः सोपमा दृष्टांत उक्तस्तत्वज्ञैः तद्वद्योगी निश्चलः स्वप्रकाशस्तिष्ठतीत्यर्थः १९ ॥

पंचोलीटीका

योगिनः आत्मैकाग्रतयावस्थितस्य उपमानमाह यथा दीप इति यथा दीपो निवातस्थः नेंगते न चलति आत्मनः मनसो योगं समाधानं कुर्वाणस्य यतचित्तस्य संयतमनसः योगिनो ध्यानवतः सा उपमा योगज्ञैः कथिता १९ ॥

श्रीधरस्वामिसुबोधिनी ॥

यथेति निवाते वातशून्ये प्रदेशे तिष्ठतीति निवातस्थो दीपः प्रदीपो यथा नेंगते न कंपते सा योगिन उपमा स्मृता कस्येत्यपि दीपवन्न प्रकंपत इत्यर्थः कथंभूतस्य योगिनो यतचित्तस्य संकल्पान्तरेभ्यो निवर्तितचेतसः तथात्मनः स्वरूपे पंचमीयं आत्मानं बुद्धिसंस्थाप्य योगं ध्यानादीनां युंजतः प्रयुंजानस्य अयमभिप्रायः यथा निवातस्थस्य दीपस्यैकाकारतया स्थितस्य निष्प्रकंपतया प्रभासमभावेन स्वकार्यस्य प्रका

ध्यानस्यावश्यंसिद्धिः एवंयतचित्तत्वेन बुद्धिपूर्वं प्राणादिकं
यत्नुषसंदधानस्यकर्मयोगिनः संकल्पांतरैरचाल्यतया
लब्धएवसमाहितस्यावश्यंजयोभवतीति १९ ॥

मधुभाष्य

१९॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

भाषा अनुवाद

आत्माकाराकारितरूप अवस्थित चित्त कहे आत्मरूपता को प्राप्त
जो चित्त तिसका दृष्टान्तकहते हैं कि जैसे निर्वात स्थान मे दीपशि
खा हलचल नहीं होती सोई उपमा कहे दृष्टान्त जानो यह कि।
सका दृष्टान्त है जो पूछो तो कहते हैं कि आत्मविषयक योगाभ्या
सी योगी पुरुष जिसका चित्त वशीभूत है उसीका चित्त निर्वात स्था
न स्थित दीपशिखा के समान आत्मामे स्थिर है यहां चित्त शब्द का
अर्थ अन्तः करण है सो अन्तःकरण वृत्ति भेद से चारि प्रकार
का है संकल्पात्मक कहे संकल्प रूपअन्तः करणकी वृत्ति कहे।
स्वभावको मन कहते हैं और निश्चयात्मक अन्तःकरण की वृत्ति
को बुद्धि कहते और अनुसन्धान कहे किसी वस्तुके जानने केलि
ये तद्रूप रूप हो रहना अनुसन्धानात्मक अन्तःकरण वृत्ति को
चित्त कहते हैं और अभिमान युक्त अन्तःकरण अहंकार कहा जा।
ताहै ॥१९॥

दोहा

ज्यौंदीपक निर्वातस्थित कंप न उपमा सोय योगी की जित
चित्तकी योगहि बुद्धि धरें जोय ॥१९॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया। यत्र चैवा-त्मनात्मानं पश्यन्नात्मनि तुष्यति २० ॥

शाङ्करभाष्यं

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् यत्रेति यत्र यस्मिन्काले उपरमते चित्तं उपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगानुष्ठानेन यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेनान्तःकरणेन आत्मानं परं चैतन्यं सर्वतो ज्योतिःस्वरूपं पश्यन्नुपलभमानः स्व एवात्मनि तुष्यति तुष्टिं भजते २० ॥

आनन्दगिरिकृतटीका

द्विविधः समाधिः संप्रज्ञातोऽसंप्रज्ञातश्च ध्येयैकाकारमनोवृत्तिभेदेन कश्चित् ज्ञायमानः संप्रज्ञातः समाधिः तथापि पृथग्ज्ञायमाना सैव सर्ववृत्तिरसंप्रज्ञातः समाधिस्तत्र सामान्येन समाधिलक्षणमभिधायासंप्रज्ञातस्य समाधेरधुना लक्षणं विवक्षन्नाह एवमिति काले समाध्युपलक्षिते एवकारस्तुष्यतीत्यनेन सम्बध्यते चकारस्य सम्बन्धमाह यस्मिंश्चेति कालस्य पूर्ववत् कर्मकारकत्वेन निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याचष्टे परमिति आत्मनीत्यस्य त्वंपदार्थविषयत्वमाह स्व एवेति परमात्मानं प्रतीच्येव तत्त्वेनापरोक्षीकुर्वन्नतुष्टिहेतुभावात्तुष्यत्येवेत्यर्थः तस्मिन् काले योगसिद्धिर्भवतीति शेषः २० ॥

स्वामिकृतटीका

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव इत्यादौ कर्मैव योगशब्देनोक्तं। नात्यश्नतस्तु योगोऽस्तीत्यादौ समाधिर्योगशब्देनोक्तः तत्र मुख्यो योगः। क इत्यपेक्षायां समाधिमेव स्वरूपतः फलतश्च लक्षयन् स एव मुख्यो योग इत्याह यत्रोपरमते इति सार्द्धैस्त्रिभिः यत्र यस्मिन्नवस्थाविशेषे योगाभ्यासेन निरुद्धं चित्तं उपरतं भवतीति योगस्य स्वरूपलक्षणमुक्तं तथा च पातंजलसूत्रे योगश्चित्तवृत्तिनिरोध इति इष्टप्राप्तिलक्षणेन फलेन तमेव लक्षयति यत्र यस्मिन्नवस्थाविशेषे आत्मना विशुद्धेन मनसा आत्मानमेव पश्यति न तु देहादि पश्यन्नात्मन्येव तुष्यति न तु विषयेषु यत्रेत्यादीनां यच्छब्दानां तं योगसंज्ञितं विद्यादिति चतुर्थेनान्वयः २० ॥

पिशाचभाष्यटी

गी॰ एवंयोगाभ्यासबलादेकाग्रीभूतंनिवातप्रदीपसन्निभंयस्मिन्कालेउपरतंचित्त

टी॰ मुपरतिंगच्छतिनिरुद्धंसर्वतोनिवारितप्रचारंयोगसेवयायोगानुष्ठाने

स॰ न यत्रचैवयस्मिंश्चकाले आत्मनात्मानंपरंचैतन्यंज्योतिःस्वरूपंपश्यन्नुप
लभमानःस्वेएवात्मनितुष्यतितुष्टिंभजते २०॥

रामानुजभाष्यं

योगसेवयाहेतुनात्रनिरुद्धंचित्तंयत्रयोगेउपरमते अतिशयितंसुखमि
दमेवेतिरमते यत्रचयोगेआत्मनामनसात्मानंपश्यन्ननन्यनिरपेक्षमात्म
न्येवतुष्यति २०॥

अभिनवगुप्तकृतटीका

यत्रोपरमतीत्यनेनबलादित्येवंयोगिनस्तत्रमस्थितिविषयादीनामर्जुनायप्रया
सः शरीरिणीनस्यस्वभावस्यब्रह्मणोवकुनशविशेषणाहारेणस्वरूपंनि
रूप्यते तीर्थान्तरकल्पितेभ्योरूपेभ्योव्यतिरेकः २०॥ यत्रमनोनिरुद्धमुपरमतेस्वयमेवेति

परमार्थप्रपाटीका

अथनिष्पन्नयोगस्वरूपमाह यत्रेत्यादिचतुर्भिः यत्रयस्यामवस्थायां।
योगसेवयानिरन्तराभ्यासेननिरुद्धंविक्षेपरहितंसदुपरमतेउपरमंविष
येभ्योव्यावृत्तिंप्राप्नोति यत्रचआत्मनैवशुद्धान्तःकरणेनआत्मानंपश्यन्
सानन्दस्वानुभवन् आत्मन्येवस्वस्वरूपेतुष्यतिस्वस्वरूपतयातिष्ठति।
[illegible] तंवि।
द्यादितिचतुर्थेनान्वयः २०॥

वनमालीटीका

एवंसामान्येनयोगमुक्त्वाविस्तरेणनिरोधसमाधिंविवरीतुमारभते
यत्रेति यत्रयोगसेवयायोगाभ्यासपाटवेनयोगपरिपाकेजातेसति।
चित्तंनिरुद्धं एकविषयकवृत्तिप्रवाहरूपमेकाग्रतांप्राप्यकाष्ठानिरिंधनाग्नि
तितयावित्तं यो र्यथाशाम्यतितद्वन्निकंसदुपरमतेयत्रचचित्तोपरमावस्थायां आत्मना
भगवत्प्रसादादाविर्भूतस्वरूपज्ञानेनात्मानंस्वभूतंस्वेनचपश्यन्आत्मन्या
विर्भूतस्वरूपानंदेस्वस्मिन्भगवतिवातुष्यति तंसर्वचित्तवृत्तिनिरोधरू
पंयोगंविद्यादितिपरेणान्वयः यत्रयोगसेवयाचित्तंनिरुद्धंसर्ववृत्तिनि
रोधरूपेणपरिणतंभवति यत्रचयस्मिंश्चपरिणामेसति आत्मनांतःक
रणेनात्मानंप्रत्यक्चैतन्यंपरमात्माभिन्नंसच्चिदानंदमनंतमद्वितीयंच।

पपन्ने वेदांतप्रमाणजन्यया वृत्त्यासाक्षात्कुर्वन् नात्मन्येवतिष्ठतीति
तदसत् प्रमाणेनविनावृत्तेरसंभवात् वृत्तिरूपंविनापरिणाम
चित्तावस्थानेमानाभावात् किंचिद्विषयक वृत्तिरूपएवहिचित्तस्यप
रिणामः असंप्रज्ञातसमाधौवृत्त्यात्मकत्वेज्ञानरूपक्रियाभावेनांतः
करणेमानाभावाच्च जीवपरेशयोरभेदस्यस्वरूपभिन्नस्यसमाधौभाने
संप्रज्ञातत्वहानिरभेदस्यस्वरूपात्मकत्वेस्वरूपस्यानन्तमते ज्ञानाद्यपि
ध्याननयास्वत्वादिसाक्षितयासदाभानात्साधनवैयर्थ्यात् एकस्मिन्नि
विशेषसच्चिदानंदमद्वितीयमित्यादिपदानांवैयर्थ्यात् सत्यादीनां
ब्रह्माभिन्नानांभानेत्वद्वैतहानेः वेदांतजन्यवृत्तेरसंप्रज्ञातसमाधावभा
वेनवेदांतेस्वकेलकत्वाच्च अहमितिज्ञानेचेतनमात्रस्यभानात्तदपि
कस्यवेदांतजन्यवृत्त्यावष्टंभानादेवांतस्यवर्णादेरपिवैयर्थ्याच्च नच।
विशिष्टमेवचेतनमसंप्रज्ञातभासेनेनशुद्धमितिवाच्यं विशिष्टभानेविशे।
षभानस्यावश्यकत्वात्नहिदंडितिभानेपुरुषोनभासतेयोगश्चित्तवृ
त्तिनिरोधः सचद्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति संप्रज्ञातेध्येयाका
रावृत्तिरस्त्यसंप्रज्ञातेतुतदभावः सचचित्तस्यावस्थाविशेषएव अ
भावस्याधिकरणात्मकत्वात् ननुयत्किंचिद्वृत्तिनिरोधः सर्वदास्तिवृ
त्तिसामान्याभावाश्चसंप्रज्ञातसमाधौनास्तीतियोगश्चित्तवृत्तिनिरोधः
इतिलक्षणमसंभवीतिचेन्न यदाद्रष्टुः स्वरूपेवस्थानमितिसूत्रमसा
हित्येनैतत्सूत्रस्यलक्षणबोधकत्वात् द्रष्टृस्वरूपावस्थितिहेतुश्चित्तवृ
त्तिनिरोधोहिलक्षणं अस्थानकालिकोनिरोधस्तुनतद्धेतुः संप्रज्ञात
निरोधश्चासंप्रज्ञातदशायामेवस्वरूपावस्थानेहेतुः तदुक्तं संनिरोधेन
संप्रज्ञातः समाधिः तस्यलक्षणविधित्सयेदंसूत्रं योगश्चित्तवृत्तिनिरो
धः सर्वशब्दाग्रहणात्संप्रज्ञातोऽपियोगइत्याख्यायते इतियोगिनस्ते
षामस्मदुक्तपक्षवार्षेनाप्यर्थेतत्त्वमेवद्विपुरुषार्थं नतदुःखाभावत्वस्या
त्मनाशेपिसंभवेनवेदांताभिमतात्मनाशोपिमोक्षःस्यात् इमौवैरमे
द्विलक्षणोभवति आनंदंब्रह्मणोविद्वानविभेतिकुतश्चनसोऽश्नुतेस
र्वान्कामान्सहब्रह्मणाविपश्चितेत्यादिश्रुतेः सब्रह्मयोगयुक्तात्मासु
खमक्षयमश्नुते सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियमित्यादिभग

गी॰
टी॰
६॰

वदुःखावरत्वेस्येवदुष्कृतार्थत्वसिद्धेः नन्वदुःखादिविषयकसाक्षित्व
पत्तानस्य नित्यत्वेन नाशासंभवेनानुभवनाशं विना संस्काराद्युत्पत्त्या
कालांतरे तीतदुःखादिस्मरणानुपपत्तिरिति चेन्न ज्ञानस्य यथोः संबंधना
शस्यैव संस्कारजनकत्वात् संबंधनाशश्चान्यतरसंबंधिनाशात् कचित् २५
संबंधिनोः सतोरपि संबंधविघटकसंनिधानात् दुःखादीनां साक्षिवि
षयाणां नाशात् संस्कारोत्पत्तिः स्मरणोत्पत्तिश्च यत्र संस्कारस्य सोऽहमस्मीति
स्वरूपस्यात्मना संबंधेन ज्ञानस्येव संबंधस्य नाशः स्वज्ञानस्येव सं
बंधनाशस्तदापरोक्षज्ञानेनैव नदाश्रयांतःकरणे तदेव संस्कारस्य
तोरधिकरणे सुषुप्तौ स्वरूपानुभवमेव गृह्यतेनेनानुपपत्तिनिसंज्ञानस
पि स्वरूपभूतं नित्यं तथापि विषयताख्यसंबंधप्रयोजकस्य नाडीविशे
षस्य भगवन्मूर्तिविशेषसंबंधस्य जाग्रदादावभावात्तं भवति विषयता
ख्यसंबंधनाशः तत्र संस्कारः नेचांतःकरणाविच्छिन्नसाक्षिणा कथं त
त्र संस्कारोत्पत्तिरनुभवसंस्कारयोः समानाधिकरणत्वनियमादिति वा
च्यं अणुपरिमाणस्य साक्षिणोंऽतःकरणविशिष्टत्वसंभवात् साक्षिणो
ऽतःकरणे स्वामित्वादिकमेव वा विलक्षणः फलबलकल्प्यः संबंधः न
चाहंकारेणैवाहंकारी तन्मनस्त्वादिकल्पनात् सुषुप्तावंतःकरणलयप्रयुक्तः
२४ संकल्पविकल्पादिरूपांतःकरणवृत्तीनां लयोऽस्तु न च सुषुप्तावंतःकरण
सत्त्वे जन्यज्ञानापत्तिः जन्यज्ञानमात्रप्रयोजकत्वगात्मसंबंधाभावात् त
द्वे विशेषाणामात्मनो नाडीस्थभगवन्मूर्तौ प्रवेशात् शरीरेनात्मनासंपरि
ष्वक्तो न बाह्यं वेद नांतरमिति श्रुतेः बाह्यं रूपादि वक्तव्यादिनांतरं दुःखा
दिकं मनसा च न वेदेत्यर्थः सर्वकाश्यपादीनां दृश्यविषयतानियामकसंबं
धाभावान्न तत्प्रकाशः स्वस्मिंस्तु तत्संस्कारसहकृतेन मनसा केषांचि
त्पदार्थानां केषांचित्साक्षिणा प्रकाशः जागरे च साक्षिणा केषांचित्
केषांचिद्धि प्रमाणांतरैः प्रकाशः समाधौ संप्रज्ञाते मानसमेव ज्ञानं अयं
प्रज्ञाते च स्वरूपावरकाविद्यानाशे शेषस्तोका समाधि भ्रमे न स्वरूपभूत
ज्ञानेन तत्स्वरूपाने दर्शयत्परमेश्वरस्य च विषयीकरणं नन्वज्ञानस्य वस्तुग
मात्मस्वरूपेश्वरस्वरूपविषयकत्वात् सुषुप्तावपि भगवन्मूर्तिविशे
षसंबंधो विषयतानियामकः सुषुप्तौ वेदान्तजन्यभगवदपरोक्षज्ञानस्यापा

भावधेमोविषयतानियामकः २० ॥

कृत्तमवैजयन्ती

ननुनात्मस्वनरूपादेयोयोगाभवनाशोकस्तस्यकिंस्वरूपंकिंवाफ
लेस्यादित्यपेक्षायामाह सार्द्धत्रयेणयत्रोपरमतइति योगसेवया
योगाभ्यासरूपेणाहेतुनानिरुद्धंनिहृतवहिर्गमनंचित्तमनोयत्रयस्मिन्यो
गे उपरमतेप्राकृतविषयेभ्योनिवर्ततिशायस्तवेशाण्ययत्रैवमज्ञानेरमथः
यत्रैवचयत्र: यत्रैवयस्मिन्येवात्मनाविषयवाशनाशून्येनमनसा आत्मा
नंस्वस्वरूपंपश्यन्स्वनवलोकयन्स्वात्मनमेवानुदृष्टव्य: दृश्यतेन अ।
यातुष्यास्यादियुनेः आत्मैवस्वस्वरूपपवर्तनष्यति असादन्यत्रशरीरादे
परमेतु:खमेवभवति अस्मिन्नीलनिरवधिकानंदजलधौममस्तमेवस्या
दित्येवंमेतनष्टोभवतीत्यर्थः २० ॥

एवंसामान्येनसमाधिमुक्त्वा मधुसूदनीटीका निरोधसमाधिंविस्तरेणविवरीतुमा
रभते – यत्रयस्मिन्परिणामविशेषेयोगसेवयायोगाभ्यासपाटवेनजातेसति
चित्तेनिरुद्धंएकविषयकवृत्तिप्रवाहरूपामेकाग्रतामपिक्रान्तिनिरिंधना।
ग्निवदुपशाम्यन्निर्वृत्तिकतयासर्ववृत्तिनिरोधरूपेणपरिणतंभवति य
त्रचयस्मिंश्चपरिणामेसति आत्मनारजस्तमोनभिभूतशुद्धसत्वमात्रे
णान्त:करणेनात्मानंप्रत्यक्चैतन्यंपरमात्माभिन्नंसच्चिदानंदघनमने
नमद्वितीयंपश्यन्वेदान्तप्रमाणजयावृत्त्यासाक्षात्कुर्वन् आत्मन्येव
परमानंदघनेतुष्यति नदेहेंद्रियसंघातेनवानङ्गोग्ये यत्रपरमात्मद
र्शनेसत्यात्मनिष्टिवतभावान्तुष्यतीतियावत्अन्त:करणपरिणामसर्वे
वितवृत्तिनिरोधरूपयोगविघातितिपरेणान्वय: यत्रकालइतित्वा
ख्यानमसाधनक्कहानत्वयात् [illegible] २० ॥

मदानंदीटीका

एवंसामान्यतोयोगंप्रोच्येदानींविशेषत: समाधिंविस्तरेणाहभगवा
न्योगिनोगति: १ परिणामविशेषेहियस्मिन्नभ्यासपाटवात्जातेचित्ते
निरुद्धंसच्चांतिनिस्नेहदीपवत् २ यस्मिंश्चपरिणामेसत्यात्मानंदंचिद्
द्वयं वेदान्तमानसंजातवृत्त्यापश्यंस्थिरात्मनि ३ तुष्यत्यात्मस्वतोन्यतो
पदेहेनोपभावन: आनंद:परपात्माभेदसंसर्गवर्जित: ४ सएवस्व
स्वरूपेणाव्यज्यतेपुण्यकर्मभि: यावयावनमोपेतिबुद्धोपर्मसमाहते

गी. तावत्तावद्द्रियः स्वास्थ्यं तावत्तावत्स्वोन्नतिः ६ २०॥

टी. नीलकंठीटी.

घ. यत्रेति एवं चित्तमेकाग्रीभूतं सत् योगसेवया निरुद्धं यत्र यस्यामवस्थायां
उपरमते विलीनं भवति यत्र चात्मना चित्तेन आत्मानं निर्विकल्पं पश्य
न्नात्मनि तुष्यति न बाह्यार्थेन तुष्टिं भजते २०॥

ज्ञानेदटीका

योगसेवनान्निरुद्धं चेतो यत्रोपरमते श्रामप्राप्यं विश्रांतं सत् ततः परे
जेतव्याभावात्प्रयत्नमुत्सृजति यत्र च परस्य कारणस्याभावादात्मनै
व करणेन परस्य क्रियया भिन्नतमस्य कर्मणोऽप्यभावादात्मानं पश्यन्द
र्शनक्रियया आप्यं कुर्वन् एवं परस्या भूमिकाया अभावादात्मन्येव।
विश्रामभूमौ तुष्यति विश्राम्यति तं योगसंज्ञितं विद्यादिति परेणान्वयः
एतेन कर्तृकरणकर्माधिकरणानामैकात्म्यं दर्शितम् २०॥

अथास्य परस्य योगस्य लक्षणमा रामकंठीटीका

ह — तं योगसंज्ञितं समाध्याख्यमर्थं विद्याज्जानीयात् कं तं यत्र यस्मिन्निरुद्धमिति
रुद्धबहिष्प्रचारतया नियमितं चित्तं योगसेवना योगस्य समाधेः आभ्यस्या
नस्य सेवनादाश्रयणादुपलक्षितं परमोपेयत्वान्नैव विश्रांतं सद्योगांतर
विषयं प्रयत्नमुत्सृजति तस्यैव योगस्य निरुत्तरत्वात् अतएव तस्यामव
स्थायां योगी यत्रात्मनैवात्मानं पश्यन् स्वसंवेदनेन स्वरूपमनुभवन् आ
त्मनि स्वभाव एवाधिकरणभूते तुष्यति परां प्रीतिं प्रतिपद्यते तं योगं विद्या
दिति संबंधः तदानीं हि निवृत्तसकलबाह्योपरागं चिन्मात्रसमापन्नं स
म्यक् स्वसंवेदनलक्षणानंदमेतेनावतिष्ठते २०॥

अथ समाधिरूपस्य मुख्य योगस्य लक्षणमाह

लासिकी [redacted]टीका

यत्र यस्मिन्नवस्थाविशेषे योगस्य प्रत्यवमर्शस्य समाधानस्य सेवया अभ्या
सेन निरुद्धं निरुद्धबहिष्प्रचारतया सर्वतो नियमितं सच्चित्तं तप्तशिला
गलितजलबिन्दुवत् स्वयमेवोपरमते निवृत्तव्यापारं भवति विकल्पा
त्मकं स्वस्वरूपं जहातीत्यर्थः तदानीं हि चित्तं विकल्परूपतां विहायात्
मरूपं संपद्यते अतएव यत्र चात्मनैव स्वसंवेदनेनैव स्वस्वभावं पश्यन्
साक्षात्कुर्वन्नात्मन्येव स्वस्वरूप एव तुष्यति प्रीतिं भजते तं योगसंज्ञि
तं विद्यादिति चतुर्थेनान्वयः आत्मन्येवतोषमाप्नोति २०॥

पंचोलीटीका

एवं योगाभ्यासबलादेकाग्रीभूतनिवातप्रदीपकल्पचित्तादिरूपं नि
रूपयन् आत्मनोवस्थाविशेषसंयोगस्वरूपं निरूपयति यत्रोपरम
ते सार्द्धैस्त्रिभिः यत्र यदा चित्तं योगसेवया योगानुष्ठानेन निरुद्धं सर्वतो
निवारितं यापारं उपरमते उपरतिं गच्छति च पुनः यत्र आत्मना समाधि
परिशुद्धेनांतःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् स्वे
आत्मनि तुष्टिं भजते २०॥

रसवीरसमिद्धोधिनी

अथ योगलक्षणमाह सार्द्धैस्त्रिभिः तं प्राणादिसंयतानावस्था
विशेषं योगं संज्ञितं विद्याज्जानीयादिति वृत्तार्थेन सहान्वयः
तं कमित्यपेक्षायामाह यत्र यस्मिन्प्राणादिसंयतानावस्थाविशे
षे योगसेवया योगस्य विधाविनयेत्यादौ प्रतिपादितस्वरू
पस्य समाधेः सम्यक्सेवया निरंतराभ्यासेन निरुद्धं संक
ल्पांतरेभ्यः प्रत्यावर्त्यमानमध्यमानो चित्तं कर्मण्येव स्थापितं
उपरमते अनुचितकर्मांतरप्रयत्नं सन्त्यजति यत्र च आत्म
नैव निश्चयात्मिकया बुद्ध्या आत्मनि यत्ने विषये आत्मानं धृ
तिमेव साधनं पश्यन्नविचारयन् अयं कर्मयोगी तुष्यति
संतोषमेति २०॥

मधुभाष्य

२०॥

पंबोलीटीका

एवं योगाभ्यासबलादेकाग्रीभूतनिवातप्रदीपकल्पचित्तादिरूपं नि
रूपयन् आत्मनोऽवस्थाविशेषं सर्वयोगस्वरूपं निरूपयति यत्रोपरम
ते सार्द्धैस्त्रिभिः यत्र यदा चित्तं योगसेवया योगानुष्ठानेन निरुद्धं सर्वतो
निवारितव्यापारं उपरमते उपरतिं गच्छति च पुनः यत्र आत्मना समाधि
परिशुद्धेनांतःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् तस्मिन्
आत्मनि तुष्टिं भजते २०॥

गूढार्थदीपिका

अथ योगलक्षणमाह सार्द्धैस्त्रिभिः तं प्राणादिसंयोगावस्था
विशेषं योगसंज्ञितं विद्यात् जानीयादिति चतुर्थेन सम्बन्धः
तं कमित्यपेक्षायामाह यत्र यस्मिन्प्राणादिसंयोगावस्थाविशे
षे योगसेवया योगस्य विघ्नविनयेत्यादौ प्रतिपादितस्वरू
पस्य समताभ्यासस्य सेवया नितान्तमभ्यासेन निरुद्धं सक
लान्तरेभ्यः प्रत्याहृतमाभ्यन्तराणां चित्तं कर्मण्येव स्थापितं
उपरमते अनुचितकर्मान्तरप्रयत्नमुत्सृजति यत्र च आत्म
नेव निश्चयात्मिकया बुद्ध्यात्मनि यत्नेऽविषये आत्मानं पु
ष्टिमेव साधनं पश्यन्विचारयन् अयं कर्मयोगी तुष्यति
संतोषमेति २०॥

मधुभाष्य

२०॥

भाषा अनुवाद

यंसन्न्यासमिति प्राहुर्योगं तद्विद्धि पाण्डव इसी अध्यायके इस दूसरे श्लोक से योगही को कर्म कहा है और नात्यश्नतस्तुयोगोस्ति इस सोलहे श्लोकसे योग शब्दसे समाधि कहा तो इनमे मुख्य योग किसको कहै इस अपेक्षामे फल औ स्वरूप तथा लक्षण क्रम से समाधि ही मुख्य है यह साढे तीनि श्लोक से कहते है कि। जिस अवस्था मे योगाभ्यास से निरुद्ध कहे एकाग्रचित्त होता है और जिस अवस्था मे आप अपने स्वरूप को देखते हुये सन्तुष्ट होता है ऐसी जो समाधि कहे चित्तवृत्ति की एकाग्रता सोई योग है सोई पातञ्जलसूत्र मे कहा कि योगश्चित्तवृत्तिनिरोधः २०॥

दोहा

जब दिढ बाटें चित्त जो योगाभ्यास तिंह रोक जहां आत्मसें आत्म
लखें आत्मतुष्ट कहें लोक॥ २०॥

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति
यत्र न चैवायं स्थितश्चलति तत्त्वतः २१॥

शांकरभाष्यं

किंच सुखमिति सुखमात्यंतिकमत्यंतमेव भवतीत्यात्यंतिकं अनं तमित्यर्थः यत्तद्बुद्धिग्राह्यं बुद्ध्यैवेंद्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यं
मिंद्रिय अतींद्रियगोचरातीतमविषयजनितमित्यर्थः वेत्ति तदीदृशं सुखमनुभवति यत्र यस्मिन्काले न चैवायं विद्वानात्मस्वरूपे स्थितस्तस्मान्नैव चलति तत्त्वतः तत्स्वरूपान्न प्रच्यवत इत्यर्थः २१॥

आनंदगिरिकृतटीका

योगसिद्धिकाले प्रकारांतरेण प्रकटयति किंचेति बुद्धिग्राह्यः स्वानुभवविषयः इंद्रियनिरपेक्षस्वानुभवगम्यत्वादेवातींद्रियमिति पुनरुक्तिमाशंक्याह अविषयेति पदच्छेदः न चैवायमित्यादि अपेक्षितपूरणं आत्मस्वरूप इति तस्मात्तत्त्वत इति संबंधः नैवेत्येवकारस्य चान्वयोक्तिः चकारः समस्या संबंधनीयः यत्रेति पूर्ववत् संबंधः २१॥

स्वामिकृतटीका

आत्मन्येव तोषहेतुमाह सुखमिति यत्र यस्मिन्नवस्थाविशेषे यत्तत्किम
नित्यं पि निरतिशयमात्यंतिकं सुखं वेत्ति ननु तदा विषयेंद्रियसंबंधाभावात्कुतः सुखस्यात्तत्राह अतींद्रियं विषयेंद्रियसंबंधातीतं केवलं बुद्ध्यैवात्माकारतया ग्राह्यमत एव यत्र स्थितः सन् तत्त्वतः आत्मतत्त्वान्नैव चलति २१

पैशाचभाष्यं

किंच सुखमात्यंतिकमत्यंतमेव भवतीत्यात्यंतिकं अनंतमित्यर्थः यत्तु बुद्ध्यैवेंद्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यमतींद्रियमिंद्रियगोचरातीतं तदविषयजनितमित्यर्थः वेत्ति तादृशं सुखमनुभवति यस्मिन्काले नैवायं विद्वानात्मस्वरूपे स्थितस्तस्माच्चलति न तत्त्वतः तत्स्वरूपात्प्रच्यवत इ न्न
त्यर्थः २१॥

रामानुजभाष्यं

सुखमिति यत्तदतींद्रियमात्मबुद्ध्येकग्राह्यमात्यंतिकं सुखं यत्र योगे वेत्ति अनुभवति यत्र योगे स्थितः सुखातिरेकेण तत्त्वतस्तद्भावान्न चलति २१

गी॰ अभिनवगुप्तकृतटी॰ आत्यन्तिकं विषयकृतकालुष्याभावात्सुखं
टी॰ यत्तदेति २१
अपरो लाभो यत लाभ आहीनो वस्तत्रियोगलब्धयोगः अमत सुखयो
ष॰ निवर्तते चेति वस्तस्वभावो यमित्यर्थः २२ ॥

परमार्थप्रपाटीका

अथात्मसुखस्य विषयसुखातिरिक्तत्वमुत्कृष्टत्वं च दर्शयति सुखमि-
ति यद्योगी यदा सर्वोत्कृष्टसुखं वेत्ति अनुभवति ननु इन्द्रियाद्य
केवलबुद्ध्यैवात्माकारतया ग्राह्यमनुभवनीयं न तु विषयेन्द्रियजसुखवदि-
त्याह अतीन्द्रियमिति विषयेन्द्रियसंबन्धातीतं यतस्तत्र भो तथा चातीन्द्रि-
यपदेन विषयसुखाद्वैलक्षण्यं दर्शितं आत्यन्तिकमितिपदेनोत्कृष्टत्वं दर्शि-
तमित्यर्थः अथ पुनरुत्कर्षमेव व्यनक्ति यत्रेति यत्र यस्मिन् सुखे तत्त्वतो
निश्चयेन स्थितः स्थिरीभूतः सन्नैव चलति स्वरूपानन्दापत्ते परमानं-
देत्वद्वानंदानामंतर्भूतत्वात् तदुक्तमध्यात्ममीमांसायां ज्ञायमानं तदा-
त्मा विषयसुखकृते नैकयत्नाद्विधायन् आप्यन्ते वैद्धियोत्थः पिपासन्म-
पि सुखे विस्मरन्यातिनिद्रा विश्रामायात्मरूपेणेति न स्खलभेतेन चातीं-
द्रियं हि सौख्यं सर्वोन्नमेस्यान्तरिणामिति विरमात् इद्रियोः स्यात्सुखाद्वेति २१

वनमालीटीका

आत्मनेव तोषे हेतुमाह सुखमिति यत्र यस्मिन्नवस्थाविशेषे आत्यंतिकं
परिपूर्णं सुखं यत् ततु बुद्धिग्राह्यं भगवत्साक्षात्काराविर्भूतस्वरूपत्वात्तेनैव
ग्राह्यं सुखं योगी वेत्ति अतीन्द्रियमिंद्रियजन्यत्वाभावाद्विषयं आत्मस्वरूपस्य
मनसा सदाग्रहेपि पूर्णानंदत्वस्याविर्भूतस्वरूपत्वात्तेनैव ग्राह्यत्वात् अयं
तादृशसुखानुभवितायत्रावस्थायां स्थितस्तत्त्वत आत्मस्वरूपात् पूर्णानं-
दरूपान्न चलति नैयोगसंततिं न विघातिति परेणान्वयः यद्यपि तत् सुखं
स्वभावपि भासते तथापि सुषुप्तावावरणस्य नाशो विशेषस्य भगवन्-
मूर्तिसाक्षित्वेन किंचिद्विशेषस्य मायेण किंचिदेव सुखं स्फुरति न तु स्वरू-
पभूतत्वानस्याविर्भावेन नाशेषसुखं भासत २१ ॥

कृष्णमवेजयन्ती

किंच सुखमिति यत्रेति प्रसिद्धे यत्र यस्मिन् समाधियोगे आत्यंतिकं नि-
त्यं बुद्धिग्राह्यं च आत्माकारया ग्राह्यं ग्रहणयोग्यमतीन्द्रियं चेन्द्रियवि-
षयरहितं सुखं मं योगी वेत्यनुभवति यत्रैव वयं तत्र स्थितः सन् तत्त्वतः

स्वस्वरूपान्नैवचलतिबाह्यविषयंनैवगच्छति २१॥

आत्मन्यववस्थितस्यहेतुमाह॥ मधुसूदनीटीका

यत्रयस्मिन्नवस्थाविशेषेआत्यंतिकमनंतंनिरतिशयंब्रह्मस्वरूपंअ
तीन्द्रियंविषयेन्द्रियसंयोगानभिव्यंग्यंबुद्धिग्राह्यंबुद्ध्यैवरजस्तमोमल
रहितयासत्वमात्रवाहिन्याग्राह्यंसुखंवेत्तिअनुभवति यत्रचस्थि
तोयंविद्वान्तत्वतआत्मस्वरूपान्नैवचलतितंयोगसंज्ञितंविद्यादितिप
रेणान्वयःसमानः आत्यंतिकमितिब्रह्मसुखस्वरूपकथनं अती
न्द्रियमितिविषयसुखव्यावृत्तिः तस्यविषयेन्द्रियसंयोगसापेक्षत्वा
त् बुद्धिग्राह्यमितिसुषुप्तसुखव्यावृत्तिः सुषुप्तौबुद्धेर्लीनत्वात् समाधौ
निर्वृत्तिकायास्तस्याःसत्वात् तदुक्तंगौडपादैःलीयतेतुसुषुप्तौतन्नि
गृहीतंनलीयतइति तथाचश्रूयते समाधिनिर्धौतमलस्यचेतसोनिवे
शितस्यात्मनियत्सुखंभवेत् नशक्यतेवर्णयितुंगिरातदास्वयंतदंतः
करणेनगृह्यतइति अंतःकरणेननिरुद्धसर्ववृत्तिकेनेत्यर्थः द्वयानं
सुखास्वादनेगौडपादाचार्यैः तत्रप्रतिषिद्धंनास्वादयेत्सुखंतत्रनिःसंगः
प्रज्ञयाभवेदितिसहदिदंसमाधौसुखमनुभवामीतिसविकल्पकवृ
त्तिरूपासत्तासुखास्वादः तेनध्यानरूपत्वेनसमाधिविरोधित्वाद्योगी
नकुर्यात् अतएवनारायणपत्तयासहसंगंपरित्यजेन्मोनिरुध्यादित्य
र्थः निर्वृत्तिकेनतुचित्तेनसुखरूपसुखानुभवस्तैःप्रतिपादितःस्वस्थं
शांतंसनिर्वाणमकथ्यंसुखमुत्तममितिस्पष्टंचैतदुपरिष्टात्करिष्य
ने [illegible] २१

सदानंदीटीका

यत्रावस्थाविशेषेचिह्ननानेनाहंपंसुखं विषयेंद्रियसंयोगानभि
व्यंग्यंधियाग्राह्या १ सत्वमात्रप्रवाहिन्याग्राह्यंवानुभवत्ययं यत्रायंच
स्थितोविद्वानात्मतत्वस्वरूपतः २ नैवप्रच्यवतेनैवविद्यादिमन्वयोग्य
ता ३ २१ ॥

नीलकंठीटीका

किंच सुखमिति आत्यंतिकेअनंतंयत्सुखंतत्केवलंबुद्धिग्राह्यंसोऽ
मसत्ववयतोःतीन्द्रियंइन्द्रियागोचरंयत्रसुखेस्थितोयंनवेत्तिवेद्याभा
वान्नकिंचिदनुभवतिनापितत्वतश्चलति बुद्धिनाशान्याध्यासकालेच

गी॰ लनीवेत्तिभान्तिपरंततत्त्वतोनचलति तथावस्थितिर्ध्यायतीवलेला।
टी॰ यतीवेतीवशाद्भ्रमइंजानाध्यानादेरनात्विकत्वंदर्शयति श्रुतेर्ध्यायतमा
५ ध्यायतीवेतिलेलायमानेलायतीवेतिश्रुत्यर्थः यद्वातत्स्वरूपयत्रायंत
त्वेवबेत्तिकिमपितैवयत्रनभवति यत्रेत्यादिभिर्न्वाक्ये २१॥

91

आनंदीटीका

यत्रायंयोगीआत्यंतिकंसुखंदुःखासम्भिन्नम् अतींद्रियमिंद्रियसंबं
धरहितंबुद्धिग्राह्यंवेत्तिअयं योगीयत्रयोगे स्थितः नैवचलवति
नाथः पततितंयोगसंज्ञितंविद्यात् २१॥

रामकंठीटीका

तथायत्रात्यंतिकमनंतंनिरुपमस्वरूपानुभवचमत्कारमयंसुखंसह
जआनंदोभिव्यज्यते कीदृशंसुखमतींद्रियंश्रोत्रादीनिबाह्यानींद्रिया
एयतीतमतिक्रांतम् अतएवबुद्धिग्राह्यंचआतत्कालिकयाबुद्धिलक्षणा
यात्मनःस्वशक्त्यैवग्राह्यंसंवेद्यम् अयंयोगीवेत्तिजानातितंयोगंविद्या
त् तथायत्रस्थितोयस्मिंल्लब्धविश्रांतिरयंयोगीतत्त्वतःपरमात्मरूपात्
परमार्थात्नच्यवतेनविभुज्यते २१॥

आत्मन्येवतोषमाह॥ लासिकी टीका

यत्रावस्थाविशेषेयंयोगीअतींद्रियमिंद्रियैरग्राह्यंबुद्धिग्राह्यं तात्कालि
कया वायत्स्वयात्मशक्त्यासंवेद्यमा(त्य)तिकमनंतंयत्किमप्यनिर्वाच्यं त्य
सुखमानंदंवेत्ति आत्मतयोपलभते तथावक्ष्यति समाधिनिर्धूतमल
स्यचेतसोनिवेशितस्यात्मनियत्सुखंभवेत् नशक्यतेवर्णयितुंगिरात
दास्वयंतदंतःकरणेनगृह्यते तदुक्तं विनुमात्रंतश्चयातस्यानीर्णमनसोः
सचेतसः योभवेत्परमानंदःकेनासावुपमीयतेइति तथायत्रस्थितःक
दाचिल्लब्धविश्रांतिःसन्नयंयोगीतत्त्वतः परमार्थतत्त्वान्नैवचलतिनच्य
वते व्युत्थानेपिविपरीतभावनांनभजतेइत्यर्थः अतींद्रियमितिविष
यसुखव्यावृत्तिः तत्संनिद्रियसंयोगजन्यत्वात् २१ ॥ ॥

पंचोलेटीका

आत्मस्येवतोषहेतुत्वमाह सुखमिति यत्तदात्यंतिकंनिरवधि अतीं
द्रियमिंद्रियव्यापाराणांनेतुद्धिग्राह्यंकेवलयाइंद्रियनिरपेक्षयाबु
द्ध्यैवग्राह्यंनदीदृशंसुखंयस्मिन्कालेवेत्तितदात्मस्वरूपेस्थितः अयं।
तत्वतःपरमार्थस्वरूपान्नचलति २१॥

रामचीरसमसिद्धांयिनी॥

संतोषहेतुमाह सुखमिति यत्रध्यानसंस्थानावस्थ्यविष
येयदात्यंतिकंसुखंनिरतिशयंप्रमोदः नतुद्दियासंतुद्धै
वतत्कालआद्दिग्रणामत्येवग्रदीनसैवेतयितिशयाकरं अतींद्रि
यमप्रत्यक्षमिंद्रियैरनुभवितुमशक्यमितियावत् अयंक
र्मयोगीवेत्तिजानाति यत्रचास्थितःकृतदृढाभ्यासोयंयो
गीअवतः स्वनिस्थ्रयान्नचलतिनप्रच्यवते अथवा तत्व
तोनिजस्वरूपान्नचलति प्रच्युतमायकोनभवतीति
२१॥

मधुभाष्य

२१॥

92

भाषा अनुवाद

आत्मसन्तोष का हेतु कहते हैं कि जिस अवस्था विशेष मे यो
गी जन कोई निरतिशय कहे अनन्त निज सुख रूप का अनुभव
करते हैं जो कहो कि उस अवस्था मे तो विषय सम्बन्धका अभाव
है तो सुख का सम्भव कैसे होय तिसपर कहते हैं कि विषय इ
न्द्रिय सम्बन्ध से रहित जो केवल आत्माकाररूपबुद्धि से ग्रहण के
योग्य है इसी से उसमे स्थित होय योगी आत्मस्वरूप से विचलि
त नहीं होते हैं २१॥

दोहा

अतिसुखजामे बुद्धिसें ग्राह्य सो इंद्री नाहि जानत योगीतत्वसें
चलें स्थित ना माहि २१॥

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मि
न्स्थितो न दुःखेन गुरुणापि विचाल्यते २२ ॥

शाङ्करभाष्यं

किञ्च यं लब्ध्वेति यं लब्ध्वा यमात्मलाभं लब्ध्वा प्राप्य च अपरमन्यल्ला
भान्तरं ततोऽधिकमस्तीति न मन्यते न चिन्तयति किञ्च यस्मिन्नात्म
तत्त्वे स्थितो दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न वि
चाल्यते २२ ॥

आनन्दगिरिकृतटीका

प्रकारान्तरेण प्रकृतं योगं विशिनष्टि किञ्चेति आत्मलाभादपरं
विद्यते इति स्मरणाभावेऽपि यमात्मलाभमिति लाभान्तरं पुरुषार्थभू
तं ततस्तस्मादात्मलाभादिति यावत् तं विद्यादित्यत्र सम्बन्धः य
स्मिन् इत्याद्यवतारयति किञ्चेति अपरिपक्वयोगो यथा दर्शितेन ।
दुःखेन प्रच्याव्यते नत्वेवं विचाल्यते यस्मिं स्थितो योगी तं योगं विद्या
दिति पूर्ववत् २२ ॥

स्वामिकृतटीका[यतो]

अचलत्वमेवोपपादयति यमिति यमात्मसुखरूपं लाभं लब्ध्वा ततो
ऽधिकमपरं लाभं न मन्यते तस्यैव निरतिशयसुखत्वात् यस्मिन् स्थितो
[फि] महतापि शीतोष्णादिदुःखेन न विचाल्यते नाभिभूयते यतो नातिष्ठतिर्हि
ति फलेन अपि योगस्य लक्षणमुक्तं द्रष्टव्यमिति भावः २२ ॥

पैशाचभाष्यं

किंच यमिति यमात्मानं लब्ध्वा प्राप्यापरं लाभं न मन्यते लाभान्तरं न म
न्यते न चिंतयति किंच यस्मिन्नात्मैकत्वे स्थितो दुःखेन शस्त्रपातादिलक्षणे
न गुरुणापि गरीयसापि [illegible] न विचाल्यते २२ ॥

रामानुजभाष्यं

यमिति यं योगं लब्ध्वा तं तत्त्वमेव काङ्क्षमाणो नापरं लाभं मन्यते य
स्मिंश्च योगे स्थितो विरतोऽपि गुणवत्पुत्रवियोगादिना गुरुणापि दुःखेन
न विचाल्यते २२ ॥

अभिनवगुप्तकृतटी॰

अपरो लाभो धनदारपुत्रादीनां च सन्नियोग लब्धस्य योगः अस्य च स्वस्व
धीनिर्वर्तने चेतिवत्तत्स्वभावो यमिन्नर्थः २२ ॥ विचाल्यते विशेषेणन चाल्यते
अपितु संस्कारमात्रेणैवास्य प्रथम दशामात्रमेव चलनम् २२

गी· अथैतदेव प्रकटयति यदिति यं तमस्वत्वं लब्ध्वा ततः स्वकाशादपरं लाभ
टी· मधिकं न मन्यते तस्यैव निरतिशयत्वात् यथा सार्वभौमस्य ग्रामः क
ष· श्चिद्भोजनायर्थं प्रबोधितोऽपि कुप्यति तादृशस्य प्रबोधनेऽपि प्रत्यवायश्र
वणात् श्रुतिरपि तस्मादायतं न बोधयेत् दुर्भिषज्यं हास्य भवतीति ।
भाष्ये यस्मात्सुषुप्तौ निरतिशयं सुखं भवति तस्मात् कारणादायतं
विलसद्धस्तपादेति हितं सुषुप्तं न बोधयेत् जागरेण प्रापयेत् इयतः
अस्य जागरे प्रापितस्य दुर्भिषज्यमप्रतीकारं दुःखं भवति किंच यस्मि
न्नवस्थितः स्थिरीभूतः सन् गुरुणा महतापि रोगशोकादिदुःखेन
न विचाल्यते स्वावस्थानं प्राप्यते २२॥

वनमालीटी·

उक्तमेवोपपादयति यमिति यं चित्तस्य निवृत्तिकतया ल[illegible]याख्या।
वस्थाविशेषरूपानंदविषयकजीवस्वरूपत्तानाविर्भावकस्येश्वरप्र ष
सादस्य जीवे संबंधसंपादकं लब्ध्वा प्राप्य निरंतराभ्यासेन संपाद्यापरं
लाभं ततोऽधिकं न मन्यते कृतकृत्यत्वं प्राप्य प्रापणीयमात्मलाभात्परं वि
षयं न इति स्मरतेः एवं विषयभोगवासनया समाधेर्विचालनं नास्तीत्यु
क्ताशीतवातमशकाद्युपद्रवनिवारणार्थमपि तत्रास्तीत्याह यस्मि
न्हरिप्रसादाविर्भूतस्वरूपानंदमये चित्तावस्थाविशेषे स्थितो योगी गु
रुणा महता शस्त्रपातादिनिमित्तेन महता दुःखेन न विचाल्यते २२॥

दुस्तमवैजयन्तीटी·

किंच यस्मिन्निति यं योगं लब्ध्वा प्राप्य ततोऽधिकमतिशयमपरमन्यं लाभं
प्राप्यविषयं न मन्यते न जानाति यस्मिन्योगे स्थितस्तत्र योगी गुरुणा
पि महता पुत्रदारादिमरणरूपेणादिदुःखेन कष्टेन न विचाल्यते शो
कमोहादिना विक्षिप्यते सन् योगी योगं न त्यजतीत्यर्थः २२॥

यत्र नैवायं स्थितश्चलति तत्त्वत मधुसूदनीटी· इत्युक्तमुपपादयति ॥

यं च निरतिशयात्मसुखव्यंजकं निर्वृत्तिकचित्तावस्थाविशेषं ल
ब्ध्वा संततनाभ्यासपरिपाकेन संपाद्यापरं लाभं ततोऽधिकं न मन्यते ।
कृतकृत्यं प्राप्तं प्रापणीयमात्मलाभात्परं वियत इति स्मरते: एवं वि
षयभोगवासनया समाधेर्विचलनं नास्तीत्युक्ताशीतवातमशका
द्युपद्रवनिवारणार्थमपि तत्रास्तीत्याह यस्मिन्परमात्मसुखमये नि

दैहिकचिन्तावस्थाविशेषे स्थितो योगी गुरुणा महता शस्त्रनिपातादि
निमित्तेन महता दुःखेन न विचाल्यते किमुत लघुनेत्यर्थः २२ ॥

सदानन्दीटी°

यमभ्यासातिशयाल्लब्ध्वा लाभं चिरहृदयं ततो नैवापरं लाभमधि
कं मन्यते भूयः कृतकृत्यतयाऽप्राप्तप्रणीयतया परमात्मसु
खे यस्मिन् स्थितो दुःखेन नो मुनिः २ महता शस्त्रपातादि हेतुकेना
पि चाल्यते ३ २२ ॥

नीलकंठीटीका

दुःखेन शस्त्रपातादिलक्षणेन गुरुणा महता २२

ज्ञानेरीटीका

गुरुणापि प्रबलेनापि आध्यात्मिकादिदुःखेन न विचाल्यते तदुक्तं कल्पा
न्तवायवो वान्तु यान्तु वैकत्वमर्णवाः तपंतु द्वादशादित्या नास्ति निर्मनसः
क्षतिः २२

रामकंठीटीका

तथा यं योगमासाद्य ततोऽपि कं तस्मादुत्कृष्टमपरमन्यं लाभमिष्टप्रा
प्तिं योगी न मन्यते न बुध्यते अत एव प्रागुक्तं यत्र स्थितस्तत्वतो न च्यवत
इति अत एव यस्मिं स्थितः संहृदो निवृत्तेतरव्यापृतिः स न योगी गुरुणापि
प्रबलेनापि केन चिन्मानसेन शारीरेण वा दुःखेन न विचाल्यते २२ ॥

लासिकी [illegible]टीका

किंच- यं योगं लब्ध्वासाद्य ततोऽधिकमुत्कृष्टमन्यं लाभमिष्टप्राप्तिं न मन्यते अ
त्यत्र सुखे योऽर्तिवर्तते इति वस्तुस्वभावोऽयं यस्मिंश्च योगो स्थितोऽपि श्रांतो
महतापि शीतोष्णादि दुःखेनायं योगी न विचाल्यते न क्षुभ्यते किमुत
लघुना २२ ॥ [illegible] २२ ॥

पंचोलीटीका

अचलनमेवोपपादयति यमिति यत्र नः यं आत्मलाभं लब्ध्वापरं
लाभांतरं ततोऽधिकमस्तीति न मन्यते यस्मिन् आत्मतत्वे स्थितः गु
रुणा महतापि दुःखेन शस्त्रपातादिलक्षणेन न विचाल्यते २२

रणवीरसमिद्बोधिनी॥

यमिति यं लब्ध्वा गुर्वादेः सकाशात्प्राप्य ततोधिकमपरं लाभं न मन्यते अयं कर्मयोगीति शेषः यस्मिंश्च स्थितः गुरुणापि दुःखेन न विचाल्यते २२॥

मधुभाष्य

२२॥

भाषाअनुवाद

इसीका प्रबलत्व प्रतिपादन करते हैं कि आत्म आनन्द सुख जो आत्मस्वरूप लाभ लक्षित करे पायकरि और लाभ फेरि उस से अधिक नहीं गनते और जिस मे स्थित होय बडेबडे पीन उस आदि दुख से भी दुखी नहीं होते अर्थात् बडेदुख भी उसका कुछ नहीं कर सकते हैं २२

दोहा

पाय जाहिको लाभको अधिक और नहिमान जामेस्थित
होय दुखमें गुरुमें चलै न ज्ञान २२॥

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं सनि
श्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसः २३ ॥

शांकरभाष्यं

यत्रोपरमते इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशे
षो योग उक्तः तमिति तं विद्यात् विजानीयात् दुःखसंयोगवियोगं दुः
खैः संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगस्तं दुःख
संयोगवियोगं योगइत्येव संज्ञितं विपरीतलक्षणेन विद्यात् विजानी
यादित्यर्थः योगफलमुपसंहृत्य पुनरन्वयारम्भेण योगस्य कर्तव्य
तोच्यते निश्चयानिर्वेदयोर्योगस्य साधनत्वविधानार्थं स यथोक्तफलो
योगो निश्चयेनाध्यवसायेन योक्तव्योऽनिर्विण्णचेतसा न निर्विण्णम
निर्विण्णं तच्चेतस्तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः २३ ॥

आनन्दगिरिकृतटीका

तं विद्यादित्याद्यपेक्षितं पूरयन्नवतारयति यत्रेति तमित्यात्मावस्था
विशेषं परामृशति दुःखसंयोगस्य वियोगो वियोगसंज्ञितो युज्य
ते स कथं योगसंज्ञितः स्यादित्याशंक्याह विपरीतेति इयं हि यो
गावस्था समस्तोत निखिलदुःखभेदेति दुःखसंयोगाभावो यो
गसंज्ञामर्हतीत्यर्थः उपसंहृतयोगफले किमिति पुनर्योगस्य क
र्तव्यत्वमुच्यते तत्राह योगफलमिति प्रकारान्तरेण योगस्य कर्तव्यतो
पदेशारम्भोऽन्वारम्भः योगे प्रज्ञानन्तलक्षणदुःखी संसिद्धिमलभ
मानः संशयानो विवर्तेतेति तन्निवृत्त्यर्थं पुनः कर्तव्योपदेशोऽर्थवानि
ति मत्वाह निश्चयेति तयोः साधनत्वविधानमेवानन्तरयोजनया साधय
ति स यथेति इह जन्मनि जन्मान्तरे वा सेत्स्यतीत्यध्यवसायेन ।
योक्तव्यः कर्तव्यः २३ ॥

स्वामिकृतटीका

यएवंभूतोऽवस्थाविशेषस्तमाह तमित्यर्धेन दुःखशब्देन दुःखमिश्रं वा
वैषयिकं सुखमपि गृह्यते दुःखसंयोगेन संस्पर्शमात्रेणापि वियोगो य
स्मिन् तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् परमा
त्मनो क्षेत्रज्ञस्य योजनं योगः यद्वा दुःखसंयोगेन वियोगापवर्गस्वरूपान्तर

गी· शास्त्रवद्भिरुक्तलक्षणो यो योगस्तस्मिन् कर्मणि न योगशब्दः तदुपायत्वादौपचा
टी· रिक एवेति भावः यस्मादेवं महाफलो योगः तस्मात्स एव यत्नतोऽभ्यसनीय
स· इत्याह स निश्चयेनेति सार्धेन स यो योगो निश्चयेन शास्त्राचार्योपदेशजनिते
न योक्तव्योऽभ्यसनीयः यद्यपि शीघ्रं न सिध्यति तथापि अनिर्विण्णचेतसेति नि
र्वेदरहितेन चेतसा योक्तव्यः दुःखबुद्ध्या प्रयत्नशैथिल्यं निर्वेदः २३ ॥

97

पैशाचभाष्यं

यत्रोपरमते इत्यारभ्य यावद्भिर्विशेषणैः विशिष्ट आत्मा [illegible] अवस्थाविशेषो योगयुक्तः तं विद्याद् दुःखसंयोगवियोगं दुःखेन संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगस्तमेवं संज्ञितं विपरीतं विद्यादित्यर्थः योगफलमुपसंहृत्य पुनरन्वारम्भेण कर्तव्यतोच्यते निश्चयानिर्वेदयोः साधनत्वविधानार्थं स यथोक्तफलो योगः निश्चयेनाध्यवसायेन योक्तव्यः अनिर्विण्णचेतसा न निर्विण्णं [illegible] तदेतत्तेन निर्वेदरहितेन चित्तेनेत्यर्थः २३ ॥

या रयोगस्य

मनैर्विण्णं

रामानुजभाष्यं

तमिति तं दुःखसंयोगवियोगं प्रत्यनीकाकारं योगशब्दाभिधेयं जानीत विद्यात् स एवंभूतो योगः आरम्भदशायां निश्चयेनानिर्विण्णचेतसा सहर्षेण चेतसा योक्तव्यः २३ ॥

अभिनवगुप्तकृतटी·

वियोगमने विशेषेण नकालान्तेऽपि तत्संस्कारमात्रेणोवास[illegible] मात्रमेव चलनं करुणादिवशात्तन्मयं तया २३ ॥ विनष्टो वर्तनात् किं मया प्रतिपत्तव्यमित्या

दि दुःखसंयोगस्य वियोगे यतः स च निश्चयेनास्तिकताजनितया अद्वयास्तर्यथायोक्तव्योऽभ्यसनीयः २३

परमार्थप्रपाटी·

एवंभूतो योगः कस्याविशेषः स एव योगशब्दव्यपदेश्य इत्याह तं विद्यादिति तं योगसंज्ञितं विद्यात् योगोऽत्र परमात्मतत्त्वयोजनं यथा सुषुप्तो परमात्मात्मनात्मनाभिधाने श्रुतिरपि एवमेवायं शारीर आत्मा प्राज्ञेनात्मनात्मसंपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति भाष्य एवमेव स सुषुप्तिवत् शारीरः शरीरावच्छिन्नः परमात्मात्मनेन जीवेन परिष्वक्तो आलिंगितः एकी[illegible]भावे सति बाह्यमान्तरं वा किंचित्तद्वेदनं जानाति अथ किंभूतं योगं दुःखसंयोगवियोगं दुःखेन सह संयोगो येषां ते दुःखसंयोगा विषयास्तेषां वियोगो यस्मिन् अनेन विषयसुखमपि दुःखमेव

तमेतं मितिसिद्धं चित्तं अथ योगविनिर्वाहार्थमाह सेति यदेवंस्यो।
गः निश्चयेन नियमेन योक्तव्यः अभ्यसनीयः अथ पूर्वाभ्यासेन शी-
घ्रं सिद्धिर्भवति तथापि दुःखेन मत्वा नेत्याह अनिर्विण्णचेतसेति न
निर्वेदप्राप्तं चेतो यस्य तेन अनुद्विग्नान्तःकरणेनेत्यर्थः २३ ॥

वनमालीटीका

यत्रोपरमते इत्यारभ्य बहुभिर्विशेषणैरविद्यावरणनिवर्तकप्रकरणं।
तेह जीवस्वरूपाविर्भावहेतुभगवत्प्रसादसंपादकचित्तावस्थाविशेष
उक्तस्तं चित्तवृत्तिनिरोधं दुःखसंयोगस्य जीवे दुःखसंबन्धस्य वियोगं।
सर्वदुःखविरोधित्वेन दुःखवियोगमेव योगसंज्ञं योगसंज्ञितं वियो-
गशब्दार्हमपि विरोधित्वलक्षणया योगशब्दवाच्यं विद्याज्जानीयात्
एतादृशे योगे निश्चयानिर्वेदयोः साधनत्वं विनीयाह स इति स योक्त-
फलो योगो निश्चयेन शास्त्राचार्यवचनतात्पर्यविषयार्थः सम्यगेव
मध्यवसायेन योक्तव्योऽभ्यसनीयः अनिर्विण्णचेतसा एतावतापि का-
लेन योगो न सिद्धः किमतः परं कष्टमतस्त्यजामीति निर्वेदस्तद्रहितेन चे-
तसा इह जन्मनि जन्मान्तरे वा सेत्स्यति किं त्वरयेति धैर्ययुक्तेन मन-
सेत्यर्थः २३ ॥

हनुमवैजयन्ती

किंच तं विद्यादिति दुःखसंयोगवियोगं दुःखशब्देन वैषयिकं सुख-
मपि गृह्यते तस्य दुःखपरिणामत्वात् दुःखसंयोगस्य वियोगः प्रध्वंसा- प्रारंभदशायां
भावो यस्मिंस्तं योगसंज्ञितं योगशब्दवाच्यं तं योगं विद्यात् जानी-
यात् एवंभूतो योगः प्रारम्भदशायां निर्विण्णचेतसा निर्विण्णात्कृतवि-
षयेभ्यो गात्मके वैराग्ययुक्ते चेतो यस्य स तथा तेन यद्वा अनिर्विण्णचे-
तसा योगाभ्यासदशायां श्रमादिबाहुल्यादपि निर्विण्णं विरागयुक्तं चे-
तो यस्य तेन योगिना निश्चयेनायं योगो मम अनुष्ठानेन सेत्स्यत्येवेति व्यव-
सायेन योक्तव्योऽनुष्ठेयः २३ ॥

मधुसूदनीटीका

यत्रोपरमते इत्यारभ्य बहुभिर्विशेषणैर्यो निरूपितः परमानन्दाभि-
व्यञ्जकः चित्तावस्थाविशेषः तं चित्तवृत्तिनिरोधं चित्तवृत्तिमयस-
र्वदुःखविरोधित्वेन दुःखवियोगमेव सन्तं योगसंज्ञितं वियोगशब्दार्हं

गी. मपि विशेषितलक्षणा योगशब्दवाच्यं विद्यात् जानीयात् न तु योगशा
टी. ब्दानुरोधात् चित्तवृत्तिप्रतिपत्तव्यमित्यर्थः तथा च भगवान्पतंजलिरस्त्र
ष. यत् योगश्चित्तवृत्तिनिरोध इति योगो भवति दुःखहेति यत् प्रागुक्तं
तदेतदुपसंहृतं एवंभूते योगे निश्चयानिर्वेदयोः साधनत्वविधानाथ
९४ मस्यथोक्तफलो योगो निश्चयेन शास्त्राचार्यवचनतात्पर्यविषयोर्थः
सत्य एवेत्यध्यवसायेन योक्तव्यो भ्यसनीयः अनिर्विण्णचेतसा एताव
तापि कालेन योगो न सिद्धः किमतः परं कष्टमित्यनुतापो निर्वेदः तद्रहि
तेन चेतसा इह जन्मनि जन्मान्तरे वा सेत्स्यति किं त्वरयेत्येवं धैर्ययुक्तेन
मनसेत्यर्थः तदेतद्गौडपादा उदाजह्रुः उत्सेक उदधेर्यद्वत् कुशाग्रेणै
कविंदुना मनसो निग्रहस्तद्वद्भवेदपरिखेदत इति उत्सेक उत्सेचनं
शोषणाध्यवसायेन जलोद्धरणमिति यावत् अत्र संप्रदायविद आ
ख्यायिकामाचक्षते कस्यचित् किल पक्षिणोण्डानि तीरस्थानि तरंगवे
३ गेन समुद्रोपजहार स च समुद्रं शोषयिष्याम्येवेति प्रवृत्तः स्वमुखाग्रेणै
कैकं जलबिंदुमुपरि प्रक्षिप्तवान् तदा च बहुभिः पक्षिभिर्बन्धुवर्गैर्वार्यमा
णोपि नैवोपरराम यदृच्छया च तत्रागतेन नारदेन निवारितोप्यस्मिन् ज
न्मनि जन्मान्तरे वा येन केनाप्युपायेन समुद्रं शोषयिष्याम्येवेति प्रति
जज्ञे ततश्च दैवानुकूल्यात् कृपालुर्नारदो गरुडं तत्साहाय्याय प्रेष
यामास समुद्रस्त्वज्जातिद्रोहेणत्वामवमन्यत इति वचनेन ततो गरु
डपक्षवातेन शुष्यन् समुद्रो भीतः तान्यण्डानि तस्मै पक्षिणे प्रददाविति
एवमखेदेन मनोनिरोधे परमधर्मे प्रवर्तमानं योगिनमीश्वरोनुगृह्णा
ति ततश्च पक्षिण इव तस्याभिमतं सिध्यतीति भावः [illegible]
[illegible]: २३ ॥

सदानंदीटीका

यत्रोपरमते चित्तमित्यारभ्य विशेषणैः विनावस्थाविशेषो य उक्त
स्ते चित्तसंयमे १ सर्वदुःखविरोधित्वात् दुःखयोगसमानकं जानीयात्
दुःखसंयोगवियोगं सेतमप्यग्रे २ विपरीतनयेनैव योगशब्दाभिधेयं य
कं शास्त्राचार्यगिरां भावविषयार्थः सनिश्चयः धियेति पुनरादरेणायोगं
कार्यतयोदितः सत्यमेवेति निश्चित्य भवेस्मिन्वा भवान्तरे सफलानिर्वेदम
येन धैर्ययुक्तेन चेतसा ४ योगोभ्यसनीयोयं यथोक्तं सांप्रदायिकैः ३

त्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना । मनसो निग्रहस्तद्वद्भवेदपरि
खेदतः ।२३ ॥

नीलकंठीटीका

तमिति यत्रोपरमतेचित्तमित्यादिनोक्तलक्षणंतंदुःखसंयोगस्या
न्तःकरणसंबंधस्यवियोगमेवसंतंविरुद्धलक्षणयायोगसंज्ञितं
विद्यात् योगफलमुपसंहृत्यपुनर्निश्चयानिर्वेदयोःसाधनत्वविधा
नपूर्वकंतमेवशास्त्रतोज्ञातोपिपश्चाद्वेदितव्यमितिमायेनविधत्ते सइत्या
दिना सयोगःनिश्चयेनअध्यवसायेनअनिर्विण्णंनिर्वेदरहितंचेतो
यस्यतेनयोक्तव्यःअभ्यसनीयः यदाशान्तोदान्तउपरतस्तितिक्षुःसमा
हितोभूत्वात्मन्येवात्मानंपश्येदितिश्रुतिविहितंश्रुत्यंतरदृष्टश्रद्धावि
त्तपदेपिशमादिषट्कमत्रक्रमतोविधीयते तत्रनिश्चयेनेतिगुरु
वेदवाक्यादौफलावश्यंभावनिश्चयलक्षणाश्रद्धानिश्चयपदेनगृह्य
ते तथानिर्विण्णचेतसेतिवैराग्येणदेहसहिष्णुत्वलक्षणातितिक्षावि
धीयतेइतिशेषः २३ ॥

आनंदीटीका

दुःखैर्दुःखहेतुभूतसंसारेयोगःसंबंधःस्यमहाभूतादिप्रकृत्यंतैःप्रकृति
विकारैस्तैःसंबंधः तस्यवियोगंविश्लेषणंतंसर्वश्लोकद्वयोक्तविशेषणा
विशिष्टंयोगसंज्ञितमष्टांगयोगसंज्ञंजानीयात् अनिर्विण्णचेतसात्वि
ग्रमनस्काभ्यासपरेणासौयंयोगःपरमनिःश्रेयसप्राप्तिहेतुरवश्यंनि
श्चयेन योक्तव्यः अत्रायंवाक्यार्थः परिणामतापसंस्कारदुःखैर्गुण
वृत्तिविरोधाच्चदुःखमेवसर्वंविवेकिनः सर्वस्यापरागानुविद्धःचेतना
चेतनसाधनाधीनःसुखानुभवइत्यस्तिरागजःकर्माश
यःद्वेष्टिदुःखसाधनानिमुह्यतिचेतिद्वेषमोहकृतोपिकर्माशयः नानु
पहत्यभूतान्युपभोगःसंभवतीतिहिंसाकृतोप्यस्तिशारीरःकर्माशयः
विषयसुखंचाविद्येत्युक्तम् याभोगेष्विंद्रियाणांतृप्तेरुपशांतिस्तत्सु
खम् यालौल्यादनुपशांतिस्तद्दुःखम् नचेंद्रियाणांभोगाभ्यासेनवैतृ
ष्ण्यंकर्तुंशक्यायतोभोगाभ्यासमनुविवर्धंतेरागाःकौशलानिचेंद्रिया धं
णामित्यनुपायःसुखस्यभोगाभ्यासइत्येवंपरिणामदुःखता सुखाव

ख्यायामपि योगिनं क्लिश्नाति सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधी
गी· नस्तापानुभव इति द्वेषजः कर्माशयः सुखसाधनानि प्रार्थयमानः काये
टी·षं· न वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहन्ति चेति परानुग्रहा
पीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभान्मोहाच्चेति ता
११ पदुःखता सुखानुभवात्सुखसंस्काराशयः दुःखानुभवादपि दुःखसं
स्काराशय इत्येवं कर्मभ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माश ३१
यप्रचय इति संस्कारदुःखता तथा प्रकाशप्रवृत्तिस्थितिरूपा बुद्धिगुणाः
परस्परानुग्रहतन्त्राः भूत्वा शांतं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभन्ते
रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि त्वतिश
यैः सह प्रवर्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोह
प्रत्ययाः इति सर्वे सर्वरूपा भवन्तीति गुणवृत्तिविरोधदुःखता इत्यतो दुः
खमेव सर्वं विवेकिन इति तदस्य महतो दुःखसमुदायस्य प्रभवबीज
मविद्या तस्याश्च सम्यग्दर्शनमभावहेतुरिति तत्र दुःखबहुलः संसारो
हेयः प्रधानपुरुषयोः संयोगो हेयहेतुः संसारस्यात्यन्तिकी निवृत्तिर्हा
नम् हानोपायः सम्यग्दर्शनम् इत्यादियोगानुशासनोपदेशात्पुरुषस्य प्र
धानादिभिः संयोगः संसारहेतुः तस्य वियोगं संयमेन तत्तद्भूमिजयक्र
मात् विशेषणं सर्वेभ्यः प्रकृतिविकारेभ्यः प्रधानपर्यन्तेभ्यः पृथग्भावं
योगसंज्ञितामाह सिद्धान्तितं चात्र बुद्धिपुरुषसंयोगाभावे स्वात्यन्तिको
दुःखोपरम इति २३ ॥

रामकंठीटीका

ततो युक्त्यात्मनेतं योगसंज्ञितमर्थं विद्यात् कीदृशं दुःखसंयोगवि
योगं दुःखं विषयेन्द्रियप्रवृत्तिजनितो रजसः क्लेशस्तेन संयोगः सं
सारदशायां संबंधस्तस्माद्वियोगो विरहस्तं हेयवस्तुप्रार्थनाजन्मना दुः
खेन संबंधाभाव एव वियोग इत्यर्थः स एवं लक्षणो योगः परः समाधि
र्निरुद्धानन्दलाभलक्षणमहाफलहेतुः निश्चयेन निःसंदेहत्वेनानि
र्विण्णचेतसानुद्विग्नमनसा योक्तव्यः समाधातव्यः अलब्धभूमिकस्य
हि योगिनः प्रथमं संदेहः आरुरुक्षतश्चाभ्यासदशायां क्लेशाः संभाव्य
न्ते इति निश्चयेनानिर्विण्णचेतसा योक्तव्य इत्युक्तम्

[illegible] २२ ॥

यएवंभूतो व्याख्याविशेष लालिकी [illegible] टीका लब्धा हार्थेन ॥

तमुक्तविशेषणमर्थं योगसंज्ञितं योगशब्दवाच्यं विद्याज्जानीयात् कीदृशं दुःखेन त्रिविधेन राजसेन क्लेशेन संयोगः संसारदशायां संबंधस्तस्य वियोगो विरहो यस्मात्तम् वियोग एव योग इति विशेषच्छाया परमात्मना क्षेत्रज्ञस्य योजने योग इति योगशब्दस्याभिधाव्यापारः यत एवं वियोगमहाफलोऽयं योगः ततः स योगः परः समाधिर्निश्चयेन शास्त्राचार्योपदेशजनितेन योर्थोऽभ्यसनीयः केनानिर्विण्णचेतसा शुक्रषेण यद्यपि शीघ्रं न सिद्ध्यति तथाप्यनिर्विण्णमनुद्विग्नमुपायमोहं दत्तनं अथवा दुःखबहुलं संसारं प्रति निर्विण्णं विरक्तं चेतो यस्य तेन [illegible] २३ ॥

पंचोलीटीका

एवं योगस्वरूपमुक्तानस्य महाफलदर्शनेनावश्यकु[illegible]यत्नमभ्यसनीयत्वमाह तंविद्यादिति तं योगसंज्ञितं दुःखसंयोगवियोगं सकलदुःखाभावरूपं विद्यात् स यथोक्तफलयोगः निश्चयेन निश्चयपूर्वमनिर्विण्णचेतसाग्लानिरहितेन चेतसा सोद्यमेन योक्तव्यः दुःखशब्देन दुःखमिश्रितत्वाद्वैषयिकं सुखमपि गृह्यते दुःखस्य संयोगेन स्पर्शमात्रेणापि वियोगो यस्मिंस्तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् परमात्मना क्षेत्रज्ञस्य योजने संयोगः यद्वा दुःखसंयोगेन वियोग एवं भूतो कान्तशब्दवाहितत्वेन तण्योग उच्यते कर्मणि तु योगशब्दस्तदुपायत्वादौपचारिकः चेति भावः २३

रत्नावीरसमिद्धोधिनी ॥

तं योगसंज्ञितं विद्यादित्यन्वयः कीदृशं तं दुःखसंयोगो विरहो येन तं सर्वदुःखेभ्यो विमोचकमित्यर्थः प्राणादिसंयमनादिना दृढेपुरुषेण जनितदुःखस्य तदा निरवशेषं भाविनीति भावार्थः अतस्य समपोकलत्वतो योगो निश्चयेन योक्तव्य उपेयः स्वा वित्तकर्म॰

प्रवृत्तेनत्वद्विषयप्रवेशेरमतेतिशेषः कथंभूतेननिर्विलंबेनतत्का नि
र्विलंबं संकल्पांतरेणेत्यर्थः २३॥

मधुभाष्य

२३॥

भाषा अनुवाद

ऐसी दुखसंयोग के अभाव अवस्था विशेष को योग संज्ञा जानो दुखशब्द से विषय सुख जो हैं उनको ग्रहण करनेहैं अर्थात् जिस अवस्था मे दुख का लेशमात्र भीनहीं है सोई अवस्था योग है इसमे थिरचित्त होय कर निश्चय से योग अभ्यास करना अवश्य ही कर्तव्य है निर्वेद शब्दका अर्थतो यत्न करने मे शैथिल्य है सो ई कहा कि अनिर्विन्नचित्त होय अर्थात् शैथिल्य कोडि यत्नपूर्वक अभ्यास करे २१

दोहा

तिह दुखनाशक जानिए योगनाम जिह कोए निश्चयजुत
में होत सो योग अकाम चित सोए २३॥

101

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः २४ ॥

शाङ्करभाष्यं

किंच संकल्पेति संकल्पप्रभवान् संकल्पः प्रभवो येषां कामानां । ते संकल्पप्रभवाः कामास्तान् कामांस्त्यक्त्वा परित्यज्य सर्वानशेषतो निर्लेपेन किंच मनसैव विवेकयुक्तेनेन्द्रियग्राममिन्द्रियसमुदायं । विनियम्य नियमनं कृत्वा समन्ततः समन्तात् २४ ॥

आनन्दगिरिकृतटी·

इतश्च योगस्य कर्तव्यत्वमितिप्रतिजानीते किंचेति केन क्रमेण । कर्तव्यत्वमित्यपेक्षायामाह संकल्पेति संकल्पः शोभनाध्यासः सर्वा। न्त्यक्त्वा पुनरशेषत इति पुनरुक्तिमाशंक्याह निर्लेपेनेति यथा शेषो न भवति तथा सर्वेषां कामानां शोभनाध्यासाधीनानां त्याग स्य योगानुष्ठानशेषत्ववद्विवेकयुक्तेन मनसा करणसमुदायस्य स र्वतो नियमनमपि तत्र शेषत्वेन कर्तव्यमित्याह किंचेति २४

स्वामिकृतटीका

किंच संकल्पेति संकल्पात्प्रभवो येषां तान्योगप्रतिकूलान् सर्वान्कामानशेषतः सवासनांस्त्यक्त्वा मनसा विषयदोषदर्शिना सर्वतः प्रसृतमिन्द्रियसमूहं विशेषेण नियम्य योगो योगाभ्यासः कर्तव्यः इति पूर्वेणान्वयः २४ ॥

पिशाचभाष्यं

किंच संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तांस्त्यक्त्वा परित्यज्य सर्वानशेषतो निःशेषेण निर्लेपं किंच मनसैव विवेकयुक्तेनेन्द्रियग्राममिन्द्रियसमुदायं विनियम्य नियमनं कृत्वा समन्ततस्समन्तात् २४

रामानुजभाष्यं

स्पर्शजाः संकल्पजाश्चेति द्विविधाः कामाः स्पर्शजाः शीतोष्णादयः । संकल्पजाः पुत्रक्षेत्रादयः तत्र संकल्पप्रभवान्स्वरूपेणैव त्यक्तुं शक्यांस्त्यक्त्वा सर्वान्मनसैव तदनन्वयानुसंधानेन स्पर्शजेष्ववर्जनीयेषु तन्निमित्तहर्षद्वेषौ त्यक्त्वा समन्ततः २४ ॥

प्रनिर्विण्णस्तु पेयप्राप्तेरूर्ध्वतरं संसारं दुःखबहुलं प्रतिनिर्विण्णचेतो यस्य कामानामुपायत्याग उपायः संकल्पत्यागइत्याह +

गी॰ टी॰ ष

अभिनवगुप्तकृतटीका

+ मनसैव न व्यापारोपरमेण धृतिं गृहीत्वा क्रमात्क्रममभिलाषखंडः/ वं प्रतनूकृत्य किंचिदपि न चिंतयेदिति विषयाणां त्यागग्रह णादिकं यथा त्वन्ये व्याख्यातं न किंचिदपि चिंतयेदिति तत्रा संभवं न हि चिंतं शून्यवादप्रसंगात् २४ ॥ २५ ॥

परमार्थप्रपाटीका

एवमभ्यासयोगमुक्त्वाधुना राजयोगं वक्तुमारभते संकल्पेत्यादि संकल्पात्प्रभवउत्पत्तिर्येषां तेन तथाभूता ये कामास्तान्सर्वानशेषतः त्यक्त्वा मनसाभिः सह सक्ता तत्रापि कारणमाह मनसेति समंततः प्र सरंते तानकर्मेंद्रियग्रामेंद्रसमूहं मनसैव नियम्य तदु धारणादिप्र यासैः नतु केनचापि हिवेन त्वमिति तत्त्वतो पि देहेंद्रियाद्येनेकरूपकर्मा ने यत्रकुत्राप्युपविशति तं संविचारयसम्यगिति दानमेत रिति २४ ॥

वनमालीटीका

किमभ्यसनीयं तत्राह संकल्पेति संकल्पोऽदृष्टेष्वपि विषयेषु शोभनत्वा दर्शनेन शोभनबुद्धिस्तस्माच्च संकल्पादित्यादिदृष्टादिति कामाभ वति तान् शोभनत्वबुद्धितजनितान् विचारजन्माशोभनत्वनिश्चयेन शोभनत्वबुद्धिनिवृत्त्या दृष्टेष्वत्र कुर्वदनवनितादिषु दृष्टेषु पारिजाता स्नेहः प्रभृतिषु वांतपायसवत्तस्त्वनपवदत्यपर्यं तानशेषतः सवास नांस्त्यक्त्वा तत एव कामपूर्वकत्वादिंद्रियप्रवृत्तेस्तत्राशोभनत्वविवेक युक्तेन मनसैवेंद्रियग्रामं चक्षुरादिसमूहं समंततः सर्वेभ्यो विषये भ्यो विनियम्य शनैः शनैरुपरमेदित्यन्वयः २४ ॥

कृष्णभट्टकृतटीका

नन्वीदृशं योगमारभमाणो योगी प्रथमं किं कार्यं करोतीत्यपेक्षा यामाह संकल्पप्रभवानिति यद्यपि कामाः द्विविधाः संकल्पप्रभ वाः स्पर्शप्रभवाश्च तथापि स्पर्शप्रभवानां कामानां मनोधीनोऽद्भवत्वा त्तेपि संकल्पप्रभवा एवस्युः संकल्पप्रभवान्संकल्पात् मनोवृत्तिवि शेषात्प्रभवः उद्भवो येषां तेन तथाभूतान्संकल्पजातान्दे च दारापुत्रपौत्रा दीनस्पर्शांश्च यशीनोष्णादीन्सर्वान्नैहिकामुष्मिकभोगविषयानशेषतो वासनासहितान्कामान्विषयाभिलाषरूपानत्यक्त्वापरित्यज्य मन

मेव विषयदोषदर्शिनैवेंद्रियग्रामं करणसमूहं समंततः सर्वस्मा
द्विषयात् विनियम्य संकोच्य कृत्वा शनैः शनैरुपरमेदित्यनेनान्
वयः २४

किंकृत्वायोगोभ्यसनीयः॥

मधुसूदनीटीका

संकल्पो दृष्टेष्वपि विषयेषु शोभनत्वादर्शनेन शोभनाध्यासः त
°दिदंमेस्या स्माच्च संकल्पादिदं मे स्यादित्येवंरूपः कामः प्रभवति तान् शोभनाध्या
सप्रभवान् विषयाभिलाषान् विचारजन्याशोभनत्वनिश्चयेन शोभ
नाध्यासबाधात् दृष्टेष्वस्रक्चंदनवनितादिषु दृष्टेषु वैदलोकपारि
जाताप्सरःप्रभृतिषु श्ववान्तपायसवत् स्वतएव सर्वान् ब्रह्मलो
कपर्यंतान् अशेषतः निरवशेषान् सवासनान् त्यक्त्वा अतएव कामपू
र्वकत्वादिंद्रियप्रवृत्तेस्तदपाये सति विवेकयुक्तेन मनसैवेंद्रियग्रा
मं चक्षुरादिकरणसमूहं विनियम्य समंततः सर्वेभ्यः विषयेभ्यः प्र
त्याहृत्य शनैः शनैरुपरमेदित्यन्वयः २४ ॥

सदानंदीटीका

दृष्ट्वा संसारमागारमापदां प्रीतिजन्मनां विरक्त्याल्पसुखेभ्यश्च भो
गेभ्यो मतिमान्नरः १ कृत्वा पादरतो भूत्वा सद्गुरुं प्राप्य शांतिदं लब्ध्वा
ततः परब्रह्मोपदेशं योगमभ्यसेत् २ यावद्ब्रह्मात्मध्याने दृढमतिष्ठा
निश्चलापरा ध्येयेन विंदते तावद्योगो योक्तव्य आदरात् ३ प्रतिष्ठा
योगसिद्ध्यर्थाः कृतकृत्यो भवेन्मुनिः एतद्धि निश्चयायाह भगवान्भूत
भावनः ४ इदं मे स्यादिदं मे स्यादिति संकल्पजातिमान् शोभनाध्यास
जान्कामान्दृष्टेष्वविषयेष्वपि ५ त्यक्त्वा भोगाभिलाषाख्यान्दोषदृष्ट्या
प्यशेषतः सर्वानृद्धिगतान्लोकानात्मना सहितान्मुनिः मनसाहृत्वें
द्रियग्रामं विषयेभ्यः समंततः कामापाये विवेकेन प्रकाशीयीनतया
तथा ॥२४ ॥

नीलकंठीटीका

अथ शमदमोपरमसमाधानिक्रमेण श्लोकद्वयेन विधत्ते संकल्पेति
संकल्प इदं मे भूयादिति चेतोवृत्तिः ततउद्भवो येषां तान् कामान् का
म्यमानान् विषयान् अशेषतो वासनोच्छेदपूर्वकं संकल्पनिरोधेन

२ सक्ता एतेनोत्तरेंद्रियनिग्रहलक्षणः शमउक्तः बाह्येंद्रियनिग्र
हलक्षणमाह मनसैवेति विषयदोषदर्शिना मनसैव सर्वतः
सर्वप्रकारेण श्रोत्रादिकमिंद्रियग्रामं समंततः सर्वेभ्यो विषयेभ्यो वि
नियम्य उपरमेदित्युत्तरेणान्वयः २४ ॥

१०३

आनन्दीटीका

एवं लक्षणस्य ध्यानयोगसिद्ध्युपायमाह ॥ २४ स्पष्टार्थम्

रामकण्ठीटीका

श्लोकयोरेतद्व्याख्यायते २४ ॥ अग्रिमश्लोके उक्तार्थम् ॥ एवं बाह्यविषयपरिहारक्रमेणाविजहृतिनिरोधलक्षणं समाधिसिद्धिमभिधाय पुनरपि प्रकृतकर्मयोगक्रममेव समाश्रयति सिद्धिं प्रदर्शयितुम

लासिकी [illegible]टीका

+एवं शुद्धयोगलक्षणमुक्ता सर्वशास्त्रसारभूतमुपदेशं सर्वस्य शुद्धयोगप्राप्त्युपायं संक्षिप्य श्लोकद्वयेनाह ॥+

+बाह्या विषया इंद्रियनिरोधे त्यक्ता एव संकल्पश्चित्तवृत्तिः प्रभवो यो
निर्येषां तान्सर्वान्कामान्विषयानशेषतः संस्कारस्याप्यभावेन सवा
सनांस्त्यक्त्वा तथेंद्रियग्रामं करणवर्गं समंततः सर्वेभ्यो विषयेभ्यो म
नसैवात्ममननात्मकेन विनियम्य निगृह्य आत्ममननमेवेंद्रियाणां
निग्रहस्यैतदर्थमवधारणं अन्यथेंद्रियनिग्रहः शनैःशनैः प्रयत्नैरपि दुः
शकः २४ ॥

पंचोलीटीका

किंच संकल्पेति संकल्पप्रभवान्वेत्यस्मिन्कामनाध्याने संकल्पः
प्रभवो येषां तान्सर्वानशेषतः सवासनान्कामान् अभिलाषान् त्य
क्त्वा विवेकयुक्तमनसैवेंद्रियग्राममिंद्रियसमुदायं समंतात् विनि
यम्य उपरमेत् २४

रणवीरसमिद्धोधिनी ॥

एतदेव विवृणोति संकल्पप्रभवानिति सर्वान्कामान् का
म्यन्ते इति कामाः पुत्रमित्रादयो विषयास्तान् अशेषतः साक
ल्येन त्यक्त्वा मनसः सकाशाद्दूरीकृत्य चेतो विषयान्संपाद्य कु
त्यंभूतान् संकल्पप्रभवान् संकल्पाः पापाशंकाया प्रभव
ति येभ्यस्तान् स्वकार्यप्रच्यावक कथं भीष्ममहमित्यादि रूप

दुष्टसंकल्पोत्पत्तिनिमित्तभूतानित्यर्थः तथामनसासर्वेंद्रिय
ग्रामंसमंततोविषयजाताद्विनियम्यप्रत्यावर्त्यस्ववशेसंस्था
प्येत्यर्थः धृतिगृहीतयाधैर्यैर्लोकविषयीकृतयाबुद्ध्यानिश्च
येन शनैःशनैरुपरमेत् शास्त्रसमीपाद्विरमेत् लक्ष्यंप्रापत।
यितेतिशेषः मनश्चित्तमात्मसंस्थंप्रयत्नविषयंकृत्वाकिंचि
दपिगुरुतपश्चादिकंनचिंतयेत् २४ २५॥

मधुभाष्य

२४॥

भाषा अनुवाद

संकल्प से प्रभव कहे प्रगट जो योग के प्रतिकूल कहे विरोधी। बाधकरूप सकल कामना उन को वासना समेत त्याग करिके विषयों के दोष देखना हुआ पुरुष मन के द्वारा सर्वत्र धावमान इन्द्रियों को सब ओर से दमन करिके योगाभ्यास करै अथवा सर्वत्र धावती हुई इन्द्रियों को मन हीं से रोक कर योग करै २४

दोहा

सभी कामनात्याग तिह संकल्प हि सें जो होय मनसहइं
द्रियग्रामको रोके सभसें सोय २४॥

105

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया । आत्म-
संस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् २५ ॥

शाङ्करभाष्यं

शनैरिति शनैः शनैर्न सहसा उपरमेत् उपरतिं कुर्य्यात् कया बु
द्ध्या किंविशिष्टया धृतिगृहीतया धृत्या धैर्य्येण गृहीतया धैर्य्येण यु
क्तयेत्यर्थः आत्मनि संस्थितं आत्मैव सर्वं न ततोऽन्यत् किञ्चिदस्ती
त्येवमात्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् एष योगस्य पर
मो विधिः तदैवमात्मसंस्थं मनः कर्त्तुं प्रवृत्तो योगी २५ ॥

आनन्दगिरिकृतटीका

कामसङ्गद्वारेणेन्द्रियाणि प्रत्याहृत्य किं कुर्य्यादित्याकाङ्क्षायां प्र
माह शनैःशनैरिति सहसा विषयेभ्यः सकाशादुपरमे मनसो न स्वा
स्थ्यं सम्भवतीत्यभिप्रेत्याह न सहसेति तत्र साधनं धैर्य्ययुक्ता बुद्धिरि
त्याह कया इत्यादिना भूम्यादीरव्याकृतपर्यन्ताः प्रकृतीरष्टौ पूर्वत्र
पूर्वत्र धारणां कृत्वोत्तरोत्तरक्रमेण प्रविलापयेदिति भावः यथाक्रमा
त्मनि प्रविलाप्य आत्ममात्रनिष्ठं मनो विधाय चिन्तयितव्याभावादति
स्वस्थो भवेदित्याह आत्मेति तत्संस्थितिमेव मनसो विवृणोति आ
त्मैवेति योगविधिमुपक्रम्य किमिदमुक्तमित्याशङ्क्याह एष इति य
न्मनसो नैश्चल्यमिति शेषः ननु मनसः शब्दादिनिमित्तानुरागेण ।
रागद्वेषवशादुत्पन्नचञ्चलस्यास्थिरस्य तत्र तत्र स्वभावेन प्रवृत्तस्य
कुतो नैश्चल्यं नैश्चल्याभावेति तत्रेति योगप्रारम्भः समभ्यर्थः एवश
ब्देन मनसैवेत्यादि उक्तप्रकारो गृह्यते २५ ॥

स्वामिकृतटीका

यदि प्राक्तनकर्मसंस्कारेण मनो विचलेत् तर्हि धारणया स्थिरीकु
र्य्यादित्याह शनैरिति धृतिर्धारणा तया वशीकृतया बुद्ध्या आत्मसंस्थमा गृहीतया
त्मन्येव सम्यक् स्थितं निश्चलं मनः कृत्वा उपरमेत् तच्च शनैः शनैरभ्या
सक्रमेण न तु सहसा उपरमस्वरूपमाह न किंचिदपि चिन्तयेत् नि
श्चले मनसि स्वयमेव प्रकाशमानपरमानन्दस्वरूपो भूत्वा आत्मध्याना
दपि निवर्त्तेतेत्यर्थः २५ ॥

गी॰
टी॰
ग्र॰

पैशाचभाष्यं

शनैः शनैः न सहसा उपरमेत् उपरतिं कुर्यात् कया बुद्ध्या धृतिगृहीतया
धैर्ययुक्तयेत्यर्थः आत्मसंस्थमात्मनि स्थितमात्मैव सर्वं न ततोऽन्य
त्किंचिदस्तीत्येवमात्मसंस्थं मनः कृत्वा न किंचिच्चिंतयेत् एष योगस्य
परमोऽवधिः तत्रैवात्मसंस्थं मनः कृत्वा प्रवृत्तो योगी २५ ॥

रामानुजभाष्यं

सर्वस्माद्विषयात्सर्वमिंद्रियग्रामं विनियम्य शनैः शनैर्धृतिगृहीतया
विवेकविषयया बुद्ध्या सर्वस्मादात्मव्यतिरिक्तादुपरम्यात्मसंस्थं मनः
कृत्वा न किंचिदपि चिंतयेत् २५ ॥

अभिनवगुप्तकृतटी॰ पूर्वश्लोके उक्तोऽर्थः

मनसैव नवद्वारोपरमेण २५ ॥

परमार्थप्रपाटी॰

अथाप्यातिवीहमाह शनैः शनैरिति धृतिर्धीरता तया गृहीत
या नियमितया निश्चयात्मिकया बुद्ध्या कृत्वा संकल्पात्मकं मनः बलादात्म
संस्थं कृत्वा आत्मातिरिक्तं न किंचिदपि चिंतयेत् एवं शनैः शनैरभ्यास
क्रमेण न सहसा उपरमेत् वासनाभ्यो वा उपरमं प्राप्नुयात् तदुक्तं योग
तारावल्यां अभ्यसमर्थोऽयदाभ्यासे राजयोगेन तदाचरेत् येन स्यात् या स्तु
वद्यामास पक्वैवोन्मनी भवेत् १ अभ्यस्तसंकल्पपरंपराणां संकेतनेस
ततत्सावधानः आलंबनाशादपचीयमाने शनैः शनैः शांतिमुपैति चि
तः २ प्रकाशमाने परमात्मभानौ नश्यत्यविद्यातिमिरे समस्ते अहो
बुधा निर्मलदृष्टयोऽपि किंचिन्न पश्यंति जगत्स्वरूपमिति २५ ॥

वनमालीटीका

धृतिर्धैर्यमविच्छिन्नतालया बुद्ध्या करणेन वा तानिश्चयरूपया शनैः शनैर्गु
रूपदिष्टमार्गेण उपरमेन्मनो निरुंध्यात् मन आत्मनि परमात्मनि स
म्यक्स्थितं निश्चलं कृत्वा तद्व्यतिरिक्तं किंचिदपि न चिंतयेदिति संप्र
ज्ञातान समाधिरसंप्रज्ञातान समाधौ तत्वहृत्विकविन्यस्फलयपदस्वरूपता
नेन सत्वरूपान्मात्रभवरति विवेकः शनैः शनैरित्यनेन यथाकंट
कलनानुषक्तं वस्त्रं शनैः शनैर्निःसारयंति कृपालास्तथा निर्वेदादि

कंविहायांतरिकाले विषयाकारवित्तप्रपरमेनयेदितं कंभवति य
त्नुपयाचटउत्पद्यमानो विपन्नर्थप्रवोत्पद्यते जलादिप्रत्यात्तर्थतेनि:
त्मार्थनेववित्प्रवृत्ति: सारथितेनशक्यते तथाविलसुत्पद्यमानेविल
येमेवोत्पद्यतेउत्पत्तिवन्नयानिषिद्धदुर्नतामवनुवटउ: स्वादिरूपलं
भोगहेतुधर्माधर्मसहकृतसामग्रीवशाद्भवति तत्रवटउ: स्वायता
त्माकारेविरागप्रयत्नाभ्यासेन निवारितेपि निर्मितःसदाकारोवा
रयितेनशक्यतेततोनिर्हेत्तिकेन चित्तेनसंस्कारमात्रशेषतयातिस्व
त्मतेननिरूपाधिकचिदात्ममात्राभिमुखेनाहं तिविनैवात्मानुभ
यतेइतितत्र संस्काररूपेणचित्तावस्थानस्य सत्वमावपिसत्वेना
संप्रज्ञातसमाधाविवतदानीमनुभवापत्ते: सुषुप्तावपिनाद
पानेदानुभवापत्तेश्च चित्तस्यतत्वाभावेननदवच्छिन्नस्यज्ञानत्वा
त्मभवेवाचित्तत्वयाविविषयत्वानंगीकारेणासंप्रज्ञातेचात्मानुभ
वोकेत्वकृत्वाच नसीत: करणत्वेसर्वविषयकनिर्विषयकसमनद
वच्छिन्नस्यचज्ञानत्वापत्ते: २५ ॥

कृष्णमवेजयन्तीटी·

एवंभूतस्ययोगिनोऽत्निमेकृत्यमाहशनैश्शनैरिति धृतिगृही
त्र तयाइत्माविषयात्मकवि बाह्यादवलात्मकधैर्येनगृहीताव
शीकृतातयाबुद्ध्याविवेकवत्या आत्मसंस्थं आत्मनिसम्यकतिष्ठती
तितंतथा देहेशमनः संकल्पात्मकंकृत्वा आत्मस्वरूपध्यानाशनै
शनैर्मनाधिकाभ्यासक्रमातमंदमंदंनतुहठ बलेनोपरमेत्तमा
स्व योतिष्ठन् ननएवकिंचिदपिवासवस्त्वल्पमपिनचिंतयेतनस्मरेत् २५

मधुसूदनीटी·

भूमिकाजयक्रमेणशनैशनैरुपरमेत् धृतिर्धैर्यमखिन्नतात।
यागृहीतयाबुद्धिरवश्यकर्तव्यतानिश्चयरूपातयापरा क
टाविरवश्यंभविष्यत्येवयोग: किंत्वरयेत्येवंरूपयाशनै: शनै:शु
रुपदिष्टमार्गेणमनोनिरुंध्यात् एतेनानिर्वेदनिश्चयोयोगसाधकोदर्शितो नि
त्म तथावक्ष्यति: एकैकामनसोमात्रयेद्वैज्ञानमात्मनिस्थानमात्म
निमहति नियके क्वात्मनीति वाक्यितिवावेलोकिकी

गी॰ टी॰ ष

वैदिकी च मननक्रियाव्यापारवत्ति नियच्छेत् नानुध्यायाद्बहूञ्छब्दान् वाचो
विग्लापनं हि तदिति श्रुतेर्वाग्वृत्तिनिरोधेन मनोवृत्तिमात्रशेषो भवेदि
त्यर्थः वागादिनिरोधोपायेन स्वात्मनो द्रष्टव्यः मनसीति छान्दसं दैर्घ्यं।
तच्च मनः कर्मेन्द्रियज्ञानेन्द्रियसहकारि नानाविधविकल्पसाधनं करणं
ˆति ज्ञाने जानातीति ज्ञानमिति व्युत्पत्त्या ज्ञानं प्रज्ञानमिति शास्त्रलोपाधावहंकारे नि
यच्छेत् मनोव्यापारान् परित्यज्याहंकारमात्रेण परिशेषयेत् तच्च ज्ञानं ज्ञातृ
त्वोपाधिमहंकारमात्मनि महति महत्तत्त्वे सर्वव्यापके नियच्छेत् द्विविधो
ह्यहंकारो विशेषरूपः सामान्यरूपश्चेति अयमहमेतस्य पुत्र इत्येवं व्यक्त
मभिमन्यमानो विशेषरूपो व्यष्ट्यहंकारः अस्मीत्येतावन्मात्रमभिमन्य
ˆत्व मानः सामान्यरूपः समष्ट्यहंकारः स च हिरण्यगर्भो महानात्मेति च सर्वा
नुस्यूतत्वादुच्यते ताभ्यामहंकाराभ्यां विविक्तो निरुपाधिकः शान्तात्मा।
ˆश्चिदेकर सर्वान्तरः स तस्मिन् महान्तमात्मानं समष्टिबुद्धिं नियच्छेदेवं तत्कार
णमव्यक्तमपि नियच्छेन्निरुपाधिकं तत्पदलक्ष्यः शुद्ध आत्मा सा
क्षात्कृतो भवति शुद्धो हि चिदेकरसः प्रत्यगात्मा निजशक्तिरूपमनि
र्वाच्यमव्यक्तं प्रकृतिरुपाधिः सा च प्रथमं सामान्याहंकाररूपं महत्तत्त्वं
नाम सूत्रात्मकं भवति ततो बहिर्विशेषाहंकाररूपेण ततो बहिर्मनो
रूपेण ततो बहिर्वागादीन्द्रियरूपेणेत्यनेन क्रमाभिप्रायेण इन्द्रियाणि
पराण्याहुरिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः
महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा।
सा परा गतिः तत्र गवादिष्विव वाङ्निरोधः प्रथमा भूमिः बालमुग्धा
ˆस्वा दिष्विव निर्मनस्त्वं द्वितीया तन्द्रीमिवाहंकाराद्यभावस्तृतीयः सुषुप्ता
विव महत्तत्त्वराहित्यं चतुर्थी तदेतद्भूमिचतुष्टयमपेक्ष्य शनैः शनैरुपर
मेदित्युक्तं यद्यपि महत्तत्त्वं शान्तात्मनो मध्ये महत्तत्त्वोपादानमव्याकृ
ताख्यं तत्त्वं कल्पोदाहारि तथापि तत्र महत्तत्त्वस्य नियमनं नाभ्यधायि।
सुषुप्ताविव स्वरूपलयप्रसंगात् तस्य चाकर्मत्वे सति पुरुषप्रयत्न
ˆना मेतरेणास्वत एव सिद्धत्वान्न तद्दर्शनोपयोगित्वाच्च दृश्यते त्वग्र्यया बु
द्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति पूर्वं समभिधाय तत्त्वतः सिद्धयेति शेषस
माधेरभिधानात् स च तत्त्वदृश्यो दर्शनसाधनत्वेन दृष्टत्वतत्संजीवन्
ˆच

मुक्तिप्रतिबंधरूपक्लेशात्यायाः पेत्तिनः ननु शांतात्ममवरुद्धवितम
स्य वृत्तिरहितत्वेनसुषुप्तवन्नदृश्यत्वेत्तत्वमितिचेत्न सतः सिद्ध।
स्यदर्शनस्य निवारयितुमशक्यत्वात् नन्वेके आत्मनात्माकारं स्वभा
वतोवस्थितेसदाविद्धे आत्मैकाकारतया तिरस्कृतानात्म सदृक्षेविद्
यीत यथा घटोत्पत्त्यमायः स्वतो वियत्स्फुरणेपयोमयघते जलतंदुलादि
स्फुरणेन तमसेव घटेपश्चात्स्फुरणंप्रयत्नेन भवति यत्रजलादौ निःसारिते
पिवियत्तिःसारयितुंनशक्यते मुखापिधानेष्वेनवियदवतिष्ठतएव
तथाचित्तमुत्पद्यमानेचैत्तमप्रस्फुरणमेवाप्त्यते उत्पत्त्येनतस्मिन्
घानिषिक्तद्रुतताम्रवत्घटः खादिरूपतेभोगहेतुधर्माधर्मसहकृ
तस्मामग्रीवशाद्भवति तत्रघटः खायतनात्माकारेविरामप्रत्ययाभ्या
सेन निवारितेपिततिर्निमित्तः चिदाकारोवारयितुंनशक्यते ततोनि
रोधसमाधिनानिहतेकेवलचित्तेनसंस्कारशेषतया निःस्वत्वेनतनि
दा रूपाधिकचिन्मात्राभिमुखत्वमाहतिचित्तेवनिविरुद्धमात्मानुभूयते
तदेवदाह आत्मसंस्थंमनःकृत्वानकिंचिदंतयेदिति आत्मनिरूपाधि पिति स्वभावसिद्धात्मनिति
केप्रतीचिसंस्थासमाप्तिर्यस्यतदात्मसंस्थंसर्वप्रकारवृत्तिशून्यंस्वभा
वसिद्धात्माकारमात्रविशिष्टंमनःकृत्वाधृतिगृहीतयाविवेकबुद्ध्या
संप्रज्ञातसमाधिस्थःसन्किंचिदपिअनात्मानमात्मानंवा
नचिंतयेत् नहमाविषयीकुर्यात् अनात्माकारवृत्तौहिव्युत्थानमेव
स्यात् आत्माकारवृत्तौतुसंप्रज्ञातःसमाधिरितिसंप्रज्ञातसमाधिरो
धायकामपिचित्तवृत्तिंनोत्पादयेदित्यर्थः इदंनिरोध[illegible]
[illegible]वेत्ती २५ ॥

सदानंदीटीका

गुरूपदिष्टमार्गेणोपरमेदुपशमेच्छनैःशनैः अविच्छिन्नात्मधैर्येणाभ्यका
याधीस्तयामनः १ आत्मन्येवसमाधिर्हियस्यतद्दृक्सगोचरं कृत्वा
विचिंतयेदात्मवृत्तिमप्यानवाश्रयेत् २ आत्मैवास्तिविलीनाश्चदिति
निश्चिमवाप्नुतिः नात्महिचिंतयेत्किंचिद्योगस्यायंपरोवधिः २५

नीलकंठीटीका

शनैःशनैरिति भूमिकाजयक्रमेणादिव्यादिव्यविषयेभ्यःउपरमेत्
व्याहृत्तोभवेत् कथं धृतिगृहीतयाबुद्ध्येति धृतिःधैर्यायाधार

गी॰
टी॰
५॰

यतेमनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सा।
त्विकीत्युक्तलक्षणया तया गृहीतया वशीकृतया बुद्ध्या उपरमेत् तथाप्
वमुपरते मनः आत्मनि स्वरूपे संस्थाप्य स्थितियंस न तत्स्वरूपे दृष्टरिवानन्त
या आत्मैकाकारमेकाग्रमित्यर्थः दृष्टृदृश्यापरक्तं चित्तं सर्वार्थं सर्वार्थ
कार्यत येः तयोर्दृश्यो चित्तस्यैकाग्रतापरिणाम इति स्वचित्तमेकाग्रं स्थाप
येत् सूत्रार्थस्तत्र द्रष्टृमिदं पश्यामीमं तु भवेद्धि दृष्टा दृश्यं दर्शनं च भासते।
तत्र दर्शनभानमप्रमाण्यमनो दृष्टृरिदृश्ये चोपरक्तं चित्तं सर्वार्थमिति
न तद्दर्शनोपरक्तनापि सर्वार्थना योगिनां तदभावे चित्तस्य नाशापत्तेः
दृष्टृदृश्योपरागाभावे तत्प्रकाश्यं तदुच्यते यथा स्वप्ने तत्र हि दृश्ये नास्ती
ति पामराणामपि प्रसिद्धं दृष्टापि नास्ति तदा इंद्रियाणामभावात् आ
त्मेंद्रियमनोयुक्तं भोक्तेति श्रुतेर्भोक्तृत्वमिंद्रियमनोयोगाविशिष्टत्वात्।
किंतु दृष्टृदृश्यवासनवासितं चित्रपटसदृशमेकमेव नान्यत् तत्र स्वयं
ज्योतिषात्मरूपेणाभासमानेजाग्रद्वत्स्वप्नेपि दृष्टृदृश्योपरागं प्रकाशय
ति तद्वासनावासितत्वात् एवं सति यदा सर्वार्थतायाः क्षयः एकाग्रता
या उदयश्च तदा चित्तस्यैकाग्रतारूपः परिणामो भवतीति तदेवमात्म
संस्थं मनः कृत्वेति संप्रज्ञातसमाधिरुक्तः तत्रापि पूर्वाभ्यासवशा
च्चित्तस्य दृष्टृदृश्योपरागो वासनामयो भातीति तन्निवारणेनासंप्र
ज्ञातसमाधिमाह नकिंचिदपि चिंतयेदिति ध्यानुध्यानध्येयविभा।
गमपि न स्मरेत् किंतु अखंडैकरससंविदात्मना सर्वथा तिष्ठेदित्यर्थः २५

आनंदटीका

इति योगधारणा २५॥

रामकंठीटीका

शनैः शनैः क्रमेणोत्तरविशेषारोहणाक्रमेण न तु सहसैवोपरमेत् बा।
ह्येषु विषयेष्वासंगात् तथा देहादावात्माभिमानात् निवर्तेत केन सा
धनेन ब्रह्मसम्यग्ज्ञानेन कीदृश्या धृतिगृहीतया धृतिः परमात्मन्यह
कारवशंभूतत्वात्मांध्यैर्यं तया गृहीता स्वीकृता या बुद्धिर्निश्चयात्मिका सा
कीदृशी धृतिर्या बुद्धिं धारयति सा च योगसाधनत्वमर्हतीति यस्माद्धृते लक्षणं सा॰
वक्ष्यति धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारि
ण्या धृतिः सा पार्थ सात्त्विकी एवं किं कृत्वा परमेत् मन एव परेणात्मना वि

षयेनैव चेतसा प्राक् स्थावरं जंगमं चेति संकल्पप्रभवान् विषयग्रहणा।
व्यग्रजंगममनःसमन्तात् दृष्टानुश्रविकभेदेन समस्तान् तथाप्रत्येक।
मशेषान् अविद्यमानसंस्कारमात्रान् कामान्भोगांस्त्यक्त्वा यतश्चित्तत
यानेनैव मनसा तत्तद्विषयविषयेभ्य इन्द्रियग्राममेकरणवर्गं समन्ततः सर्वेभ्यो
विहितेभ्योपि शब्दादिभ्यो विनियम्य रागादिपरिहारात्मना विशेषेण निगृ।
ह्येत्यनेन प्रशस्ततत्सम्बद्धयानुष्ठानसाध्यकर्मयोगविषयं कर्मत्यागसंद्वि
यनियमस्य च पूर्वोक्तक्रममेव स्मारयति एवमनेन क्रमेणात्मसंस्थं मत्वा।
आत्मनि ब्रह्मापरनाम्नि सम्यक् स्थितं लब्धविश्रान्ति मनोन्तःकरणं कृत्वा स
मापयन् स्थितिरिक्तं वस्त्वन्तरं न किंचिद्विचिन्तयेत्तदानीदृशं सर्वं ब्रह्म भूयात्यैव प्र
काशते २५ ॥

लाक्षिकी [illegible]टीका

एवमिति धृतिर्धारणा धैर्यविषयेद्यादि तया निगृहीतयोपलब्धया बु
ज्यात्मबोधेन मनो मननात्मकमन्तःकरणमात्मसंस्थमात्मन्यहंतास्पद
ये सम्यग्देहाद्यभिमानकालुष्यतानवतारतस्येन स्थितं विश्रान्तं कृत्वा शनैः
शनैर्मनसः सम्यग्विश्रान्त्यनुसारेण न तु सहसा विश्रान्त्यारम्भानुपरमेव
उपरमेत् उपरमस्वरूपमाह न किंचिदपि चिन्तयेत् इति आत्मानन्दाविर्भाव
र्थमात्मनि मनः संस्थापनानुसंधानमपि न कुर्यादित्यर्थः तदुक्तं श्रीकु
लार्णवे न किंचिच्चिन्तनादेव स्वयं तत्त्वं प्रकाशते स्वयंप्रकाशिते तत्त्वे तत्
क्षणात्तन्मयो भवेदिति एतदुक्तं भवति धारणया देहात्मस्मरणविवेके
नात्मानं बुद्ध्वा तस्मिन्देहाहंभावविस्मरणपूर्वं मनः प्रतिष्ठाप्य ततस्तत्प्र
तिष्ठापनानुसंधानमपि न विदध्यादिति सेषम्भवत्या योगस्य परमो विधिः सं
कल्पप्रभवानित्यादिश्लोकद्वयतात्पर्यं श्रीदेव्या पंचदश्यां भंग्यन्तरेण।
कथितं मलीने शाक्तो चेतरतु विरते विन्दुविभवे ततस्तत्त्वे चाष्टधनिव
रूपापि नु परते स्थिते शाक्ते पर्वण्यनुकलितचिन्मात्रगहनो स्वसंविन्नियो
गीरमयति शिवाख्यां परतनुमिति आभ्यां श्लोकाभ्यामात्मसंयमरूपस्य
ध्यानयोगस्य लक्षणमपदिष्टं मन्तव्यमिति अन्ये सांगाभ्यामिति [illegible]
[illegible] २५ ॥

पंचोलीटीका

परित्नशाक कृतसंस्कारेण मनो विचलेत् तर्हि धारणया स्थिरीकुर्या
दित्याह शनैः शनैरिति धृतिगृहीतया धैर्ययुक्तया बुद्ध्या शनैः शनैरु
परमेत् उपरतिं कुर्यात् न सहसा मनः आत्मसंस्थमात्मनि संस्थितं
कृत्वा आत्मैव सर्वं न ततोऽन्यत्किंचिदपि चिंतयेत् २५ ॥

रणवीरसमिद्धोधिनी ॥

स्पष्टम् २५॥

मधुभाष्य

२५॥

भाषा अनुवाद

ओर जो मन पूर्व जन्म कृत कर्म के संस्कार से चलविचल होय तोभी धारणा जो धैर्यरूप बुद्धिशक्ति जिससे थिर करै यह कहते हैं कि धारणा से वशीभूत जो बुद्धि जिससे मन को आत्मामे अच्छीतरह स्थापन करि के उपरम करै अर्थात् फेरि न कछु चिन्तन करै परन्तु यह भी सनैः सनैः कहे धीरे धीरे धैर्यवती बुद्धि के द्वारा क्रमसे मन को आत्मा मे थिर करै सहसा न करै २५

दोहा

थान थान लहें उपरामहें बुद्धिधीर सोय आत्मामे मनस्थापके
नहि कछु चिंतत जोय २५ ॥

भाषा अनुवाद

ओर जो मन एवं जन्म कृत कर्म्म के संस्कार से चलविचल हो
य तौभी धारणा जो धैर्यरूप बुद्धिशक्ति जिससे थिर करै यह
कहते हैं कि धारणा से वशीभूत जो बुद्धि जिससे मन को आ
त्मामे अच्छीतरह स्थापन करि के उपरम करै अर्थात् फेरि न
कछु चिन्तन करै परन्तु यह भी सनैः सनैः कहे धीरे धीरे धै।
र्यवती बुद्धि के द्वारा क्रमसे मन को आत्मा मे थिर करै सह
सा न करै २५

दोहा

धान धान लहैं उपरामहैं बुद्धिधीर सोय आत्मामे मनस्थापके
नहि कछु चिंतत जोय २५ ॥

110

यतो यतो निश्चरति मनश्चञ्चलमस्थिरं ततस्त।
तो नियम्यैतदात्मन्येव वशं नयेत् २६ ॥

शाङ्करभाष्यं

यत इति यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चरति निर्गच्छ-
ति स्वभावदोषान्मनश्चञ्चलमत्यर्थं चलमत एवास्थिरं ततस्तस्माच्छब्दादे-
र्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभा-
वनया चैतन्मन आत्मन्येव वशं नयेत् आत्मवश्यतामापादयेत् २६ ॥

आनन्दगिरिकृतटीका

स्वाभाविकोदोषो मिथ्याज्ञानाधीनो रागादिः शब्दादेर्मनसो नियमनं
कथमित्याशंक्याह तत्तन्निमित्तमिति याथात्म्यनिरूपणं तापित्रयदुः-
खमिश्रत्वाद्यालोचनं तेन तत्तत्र वैराग्यभावनया तत्तदाभासीकृत्य
ततस्ततो नियम्यैतन्मन इति सम्बन्धः २६ ॥

स्वामिकृतटीका

एवमपि रजोगुणवशाद्यदि मनः प्रचलेत् तर्हि पुनः प्रत्याहारेण वशी-
कुर्यादित्याह यतो यत इति स्वभावतः चञ्चलं धार्यमाणमप्यस्थिरं म-
नो येन येन विषयं प्रति निर्गच्छति ततः ततः प्रत्याहृत्यात्मन्येव वशं नयेत्
स्थिरं कुर्यात् २६ ॥

पैशाचभाष्यं

यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चरति निर्गच्छति स्वभावदो-
षादेतन्मनश्चञ्चलमत एवास्थिरं ततस्ततस्तस्माच्छब्दादेर्निमित्तान्निय-
म्यैतन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभावनया वैतत्म तन्मन आ
मेव वशमेति तथात्मन्येव वश्यतामेति २६ ॥

रामानुजभाष्यं

यत इति चलस्वभावतया अस्थिरं मनः यतो यतो विषयप्रावण्यहेतो
र्निश्चरति ततस्ततो मनो नियम्यात्मन्येवातिशयितसुखभावनया वशं
नयेत् २६ ॥

अभिनवगुप्तकृतटी॰

ह्यतिरहस्याक्रमात्क्रममभिलाषः एवमनकस्य किंचिदपि वि-
षयान्तराग्रहणादिकं न चिन्तयेत् एवमेषां त्यागेन न किंचिदपि चिन्तये

गी॰ टी॰ ध॰

रिति तदनन्तरं तत्तद्विषयेभ्यः प्रत्याहृत्य नववि षय स्पृहारम मात्मन्ये
व शात्मवशं नयेदित्यर्थः २६ ॥ यतो यतो मनो निवर्तते तन्निवर्तनं सम्मनन्तरमेवात्मनि शमयेत् अन्यथा पुन

परमार्थप्रपाटीका

वित्तं पुनरपि विषयानेवालम्बते २६

अत्यन्तं चापि रजोगुणप्रचुरं मनो यदि आत्मप्रवणं न भवति हि प्रमादा
देनवशं नयेत् इमादह यतो यत इति सूर्भवनस्वपलं बलाज्जलवितन्न
विकारवशार्थमाणमप्यस्थिरं मनो येयेविषयं प्रति निर्गच्छति ततस्त
तो विषयान्नियम्य प्रत्याहृत्य आत्मन्येव वशं नयेत् नतु केवा शिष्टे हस्ते
हस्तेन संपीड्य दैवेनैव नाविजुणेव प्रयाणेयोगैः समाकृष्य जयेदादौ स्वकं
मनः पिनमेकं न शक्तो निजनत्वात्तं प्रवर्तयेत् ध्यानवानेव दत्तफल:
सकिलोके नं तत्र न इति २ तथा चोक्तं विष्णुपुराणे विषयेभ्यः समाहृत्य
वित्तानात्मा मनोवृत्तिः चिंतयेन्मुक्तये तेन तद्ब्रह्म भूतं परमेश्वरं आत्मभावं
नयत्येनं तद्ब्रह्म ध्यायिनं मुने विकार्यमात्मनः शक्त्यालोहमाकर्षको
यथेति २६ ॥

वनमालीटीका

शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्ताच्छ
ब्दादेर्विषयादिरणाद्द्वेषादेश्च चंचलं चित्तं यथाभिमुखं सत् मनो निश्चरति वि।
त्तिं सद्विषयाभिमुखीं प्रमाणविपर्ययविकल्पस्मृतीनाममनमा।
मपि समाधिविरोधिनीं वृत्तिमुत्पादयति तथा लयहेतूनां निद्रादोषव
कषाय श्रमादीनां मध्ये यतो यतो निमित्तात् स्थिरं लयाभिमुखं सन्मन
नो निश्चरति लीनं सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति त
तस्ततो विक्षेपनिमित्तात् लयनिमित्ताद्वा नियम्यैतन्मनो निवृत्तिकं कृ
त्वात्मन्येव परमानंदघने स्वे स्वरूपे एवाति तत्त्वस्वसवशं नयेत् वशी
कुर्यात् यथा पुनर्नैविक्षिप्येत न वा लीयेतेति २६ ॥

श्रीमन्मधुसूदनयतिटी॰

नन्वति चंचलस्वभावे संकल्पात्मके मनो यदि वशीभूतं स्यात्तर्ह्येव संकल्प
प्रभवान्कामानपि त्यक्तुं शक्नुयादत्र यावन्नेति चेत्तत्राह यतो यत इति चंच
लं चपलस्वभावमत एवास्थिरमेकत्र स्थापितमपीदं मनः संकल्परूपकृपतो
यतस्त्वं च विभक्तेः तस्मिलिति सत्यात्तत्कल्पनया तत्तत्तदापन्नं विषयम्
ति निश्चरति निर्गच्छति ततस्ततस्तस्मात्तस्माद्विषयादेतन्मनो नि

यत्प्रशमात् आत्मन्येव स्वस्वरूप एव वशं स्वाधीनं नयेत्सामुपयात् प्रा
त्मनो निरवधिकातिशयसुखस्वभावत्वेन वशे कुर्यादित्यर्थः २६।।
एवं निरोधसमाधिं कुर्वन् योगी।। मधुसूदनीटीका "यस्मात्
शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादे
र्विषयाद्रागद्वेषादेश्चैव चलं विक्षेपाभिमुखं सन्मनो निश्चरति विनि
र्गतं सत् विषयाभिमुखीं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमाम
पि समाधिविरोधिनीं वृत्तिमुत्पादयति तथा लयहेतूनां निद्राशेष
बहुभोजनश्रमादीनां मध्ये यतो यतो निमित्तात् स्थिरं लयाभिमुखं सत्
"पि मनो निश्चरति लीनं सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति।
ततस्ततो विक्षेपनिमित्तात् लय[illegible] निमित्ताच्च नियम्यैतन्म
नो निर्हेतिके स्वात्मन्येव स्वप्रकाशपरमानन्दघने वशं नयेत् निरु
न्ध्यात् यथा न विक्षिप्येत न वा लीयेत तथा एवकारेणानात्मगोचरत्वं समा "नैते
धेर्वारयति एतच्च विवृतं गौडपादाचार्यैः उपायेन निगृह्णीयाद्विक्षि
प्तं कामभोगयोः सुप्रसन्नं लये चैव यथा कामो लयस्तथा १ दुःखं सर्व
मनुस्मृत्य कामभोगान्निवर्तयेत् अजं सर्वमनुस्मृत्य जातं नैव तु पश्य
ति २ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात् स
मप्राप्तं न चालयेत् ३ नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेत् निश्चलं नि
श्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ४ यदा न लीयते चित्तं न च विक्षिप्यते पुनः
अनिंगनमनाभासं निष्पन्नं ब्रह्म तत्तदेति पञ्चभिः श्लोकैः ५ उपायेन व
क्ष्यमाणेन वैराग्याभ्यासेन कामभोगयोर्विक्षिप्तं प्रमाणविपर्ययविक
ल्पस्मृतीनामन्यतमयापि वृत्त्या परिणतं मनो निगृह्णीयात् निरुन्ध्या
दात्मन्येवेत्यर्थः कामभोगयोरिति विद्यमानावस्थाभुज्यमानावस्थाभे
देन द्विवचनेन यथा लीयतेऽस्मिन्निति लयः सुषुप्तं तस्मिन् सुप्रसन्नमाया
सवर्जितमपि मनो निगृह्णीयादेव सुप्रसन्नं चेत्कुतो निग्रहेणेत्यत आह
यथा कामो विषयगोचरप्रमाणादिवृत्त्युत्पादनेन समाधिविरोधी त
था लयोऽपि निद्राख्यवृत्त्युत्पादनेन समाधिविरोधी सर्ववृत्तिनिरोधो हि स
माधिः अतः कामादिकृतविक्षेपादिव श्रमादिकृतलयादपि मनो निरो
द्धव्यमित्यर्थः १ उपायेन निगृह्णीयात् केनेत्युच्यते सर्वं द्वैतमविद्यावि

गी. जृंभितमल्पं दुःखमेवेत्यनुस्मरन् यो वै भूमा तत् सुखं नाल्पे न तत्सुखमस्ति
टी. अथ यदल्पं तन्मर्त्यं तत् दुःखमिति श्रुत्यर्थं गुरूपदेशादनु पश्चात् पर्यालोच्य
ब. कामान् इष्यमाणावस्थान् विषयान् भोगान् भुज्यमानावस्थांश्च विषयान्निव
र्तयेत् मनसः सकाशादिति शेषः कामस्य भोगस्य च कामभोगेन स्वात्मनो।
निवर्तयेदितिगा एवं द्वैतस्मरणकाले वैराग्यभावनोपाय उक्तः द्वैतवि
स्मरणं तु परमोपायमाह अजं ब्रह्म सर्वमनुस्मृत्य ततोऽतिरिक्तं किंचिदस्तीति शा
स्त्राचार्योपदेशादनंतरमनुस्मरन् तद्विपरीतं द्वैतजातं न पश्यत्येव अधिष्ठा
५भा नेत्वात् कल्पितस्याभावात् पूर्वोपायापेक्षया वैलक्षण्यसूचनार्थस्तु शब्दः २
एवं वैराग्यभावनातत्त्वदर्शनाभ्यां विषयेभ्यो निवर्त्यमानं चित्तं यदि दैनं
दिनलयाभ्यासवशात् लयाभिमुखं भवेत् तदा निद्राशेषाजीर्णबहूशन
श्रमाणां लयकारणानां निरोधेन चित्तं सम्यक् प्रबोधयेत् उत्थानप्रयत्नेन।
न यदि पुनरेवं प्रबोध्यमानं दैनंदिनप्रबोधाभ्यासवशात् कामभोगयो
र्विक्षिप्तं स्यात् तदा वैराग्यभावनया तत्त्वालोकेन च पुनः शमयेत्
एवं पुनः पुनरभ्यस्यमानो लयात्संबोधितं विषयेभ्यश्च व्यावर्तितं नापि सम।
प्राप्तमंतरालावस्थं चित्तं स्तब्धीभूतं सकषायं रागद्वेषादिप्रबलवासना
वशेन स्तब्धीभावाख्येन कषायेन दोषेण युक्तं विजानीयात् समाहिता
च्चित्ताद्विवेकेन जानीयात् ततश्च नेदं समाहितमित्यवगम्य लयविक्षेपा
भ्यामिव कषायादपि चित्तं निरुंध्यात् ततश्च लयविक्षेपकषायेषु परिहृ
तेषु परिशेषाच्चित्तेन समं ब्रह्म प्राप्यते तत्समप्राप्तं चित्तं कषायलयभ्रा
५त मात् न चालयेत् विषयाभिमुखं न कुर्यात् किंतु निगृहीतेन प्रयत्नाल्लयक।
षायप्राप्तेर्विविच्य तस्यामेव समप्राप्तावतिप्रयत्नेन स्थापयेत् ३ तत्र समा
धौ परमसुखं व्यंजकेऽपि सुखं नास्वादयेत् एतावंतं कालमहं सुखीति।
सुखास्वादरूपां वृत्तिं न कुर्यात् समाधिभंगप्रसंगादिति प्रागेव व्या।
ख्यातं यत्सुखमुपलभ्यते तत् अविद्यापरिकल्पितं मृषैवेत्येवं भावन
या निःसंगो निःस्पृहः सर्वसुखेषु भवेत् अथवा प्रज्ञया सविकल्पसुखा
कारवृत्तिरूपया सह संगं परित्यजेत् ततः स्वरूपसुखमपि निर्वृत्तिकेन चि।
त्तेन नानुभवेत् स्वभावप्राप्तस्य तस्य वारयितुमशक्यत्वात् एवं सर्वतो निव
र्त्य निश्चलं प्रयत्नवशेन कृतं चित्तं स्वभावचांचल्याद्विषयाभिमुखं न यानिश्च

रुहुहिर्निर्गछत् एकीकुर्यात्प्रयत्नतः निरोधप्रयत्नेन समे ब्रह्मण्येकतां
नयेत् ४ समप्राप्ते चित्ते कीदृशमित्यपेक्षायां यदा न लीयते नापि स्तब्धीभव
ति तामसत्वसाम्येन लयशब्देनैव स्तब्धीभावस्योपलक्षणात् न च विक्षि
प्यते पुनः न शब्दाद्याकारवृत्तिमनुभवति नापि सुखमास्वादयति राजस
त्वसाम्येन सुखास्वादस्यापि विक्षेपशब्देनोपलक्षणात् एवं भेदनिर्देश
स्तत्पृथक्प्रयत्नकरणाय एवं लयकषायाभ्यां विक्षेपसुखास्वादाभ्यां
च रहितं अनिंगनमिंगनं चलनं तेन सवातप्रदीपवत् तथाभिमु[illegible]रूपेण ख्य
रहितं निवातप्रदीपकल्पं अनाभासेन केनचिद्विषयाकारेणाभासमा
स्वा नमेन तत्कषायसुखास्वादयोरुभयोरन्तर्भावउक्तमेव एतैश्चदोषचतुष्टय
रहितं चित्तं भवति तदा तच्चित्तं ब्रह्मतिष्ठं सत्समं ब्रह्म प्राप्तं भवतीत्यर्थः
एतादृशश्च योगः श्रुत्या प्रतिपादितः यदा पंचावतिष्ठन्ते ज्ञानानि मनसा।
सह बुद्धिश्च न विचेष्टति तामाहुः परमां गतिं तां योगमिति मन्यते स्थिरा।
मिंद्रियधारणां अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति एतत्
मूलकमेव च योगश्चित्तवृत्तिनिरोध इति सूत्रं तस्माद्युक्तं ततस्ततो निय
म्यैतदात्मन्येव वशं नयेदिति [illegible] ॥

सदानंदटी

एवं क्रमेण समाधिं तेयोगी चित्तनिरोधने चित्तविक्षेपहेतूनां शब्दादीनां।
चमध्यतः यस्माद्यस्मान्निमित्तात्कृष्णादेश्चचलं मनः अनाद्यविद्यया
ध्यासादिति मेस्थिरं हितेनेन २ ततस्ततो नितिविक्षेपनिमित्तात्मनोमु
निः कृत्वा तिर्हतिकं प्रत्यगात्मन्येवाहं ये सती ३ स्वप्रकाशपरानंद।
ये नेतन्ने वशं नयेत् समस्तदुःखसीमेयं यत्मनोदृश्यगोचरं ४ समस्त
सुखसीमेयं यन्मनो ब्रह्मगोचरं विचार्यैवं विधाविद्वान्वेदान्ताचार्य।
वाक्यतः ५ भोगानुत्सृज्य तद्वत्कामोत्सुक्यत्र्येपदर्शि पंचपमनोग
वेकृष्णादौ भोगगोचरे नैव चिरायो विषये सदैव रागणाद्विवेकतः श्राभा
सीकृत्य दोषाणामाकरत्वाद्गमतनः ? ततश्चात्कृष्णपरमानंदरूपे चिरा
तिरु त्मस्थापयेदिति तात्पर्यं श्रीमद्भगवतो हरेः ८ २९

नीलकंठीटीका।

गी॰ शनैः शनैरिमं बोधकं थावदे यतो यत इति त्रिभिः यतो यतो हेतोर्यस्मि
टी॰ विषये गृहीते मनो निश्चरति बहिर्गच्छति ततस्ततस्तत्र तत्र दोषदर्शने
स॰ न ततस्ततो विषयान् एतन्मनो नियम्य प्रत्याहृत्य आत्मनि स्वरूप एव व
शं नयेत् एवं वश्यापयेत् एतेन प्रत्याहार उक्तो भवति २९ ॥

आनंदी टीका

चंचलं वायुवद्दुर्ग्रहम् अस्थिरं प्राप्तेऽपि वस्तुनि न चिरं तिष्ठतीति २९

रामकंठी टीका

एवं विधेनाभ्यासक्रमेण यतो यतो यस्माद् यस्मात् कृतश्चिद् अन्यतःभूता
ईप्सितराद्भूतात्तस्मिन्मनश्चेतो निश्चरति निर्गच्छति तस्मात्तस्मान्नियम्य प्र
तिषिध्यात्मनि परमकारण एव वशं नयेत् वनिवध्रीयात् यतः स्वभावत
एव चंचलं चपलं तथा प्रार्थितेऽपि विषयेनाचिरं भवति इत्यस्थिरम् २९

ननु मनसश्चांचल्यादात्मविश्रांति लासिकी बलरामी टीका
दुर्लभेत्याह — मनो विमर्शात्मकं यतो यतः शब्दादिषु अथवा निद्रया मार्गेषु खेन
निश्चरति संकल्पात्मरूपाख्यो वृत्तिं भजते यतश्चंचल विषयप्रवणमस्थि
रं लघु ... परवशं च एतन्मनः ततस्ततः शब्दादेर्विषयान्निद्रायाश्च नियम्य
प्रत्यावर्त्य आत्मन्येव प्रतीच्येव वशं नयेत् प्रतिष्ठापयेत् तथा च श्रु
तिः तावदेव निरोद्धव्यं यावद्धृदि गतं क्षयम् एतज्ज्ञानं च ध्यानं च शेषोऽन्यो
ग्रंथविस्तर इति [illegible]
[illegible] २९।

पंचोली टीका

एवमपि रजोगुणवशात् यदि मनः प्रचलेत्तर्हि पुनः प्रत्याहारेण वशी
कुर्यादित्याह यत इति चंचलं स्वभावतश्चंचलं धार्यमाणमप्यस्थिरं एत
न्मनः यतः यस्मात् शब्दादेर्निमित्तान्निःसरति निर्गच्छति ततस्ततो निय
मनं कृत्वा आत्मन्येव वशं नयेत् २९ ॥

रत्नावीरससिद्धोधिनी॥

कथंमनोनिरोधः स्यादिति तदुपायमाह यतोयतइति यतोयतो येनयेन यया मनो निश्चरति निर्गच्छति यतश्चंचलंचपलस्वभावं यतश्चास्थिरं स्थोचितकमैकविषयतामनापादितं ततस्ततो मार्गादेतन्मनो नियम्य प्रत्यावर्त्य आत्मन्येव यत्न एव विषयेव शं स्वायत्ततां नयेत् प्रापयेत् २६॥

मधुभाष्य

२६॥

114

भाषा अनुवाद

फिर भी जो रजोगुण वशाते मन विचलित होय तो फेरि फेरि उसको अपने वश करना यह कहते हैं कि स्वभावसे से चञ्चल मन धारणा को रक्षा करते भी जो चञ्चल होय तो जिस विषय मे गमन करै उसी उसी विषय से रोकिकरि आत्मा ही मे थिर करै २९

दोहा

जहं जहं मन सो जात है अस्थिर चंचल जोय   तहं तहं ताको
रोक के अपने वश करें सोय २९॥

प्रशान्तमनसंह्येनंयोगिनंसुखमुत्तमं उपैति
शान्तरजसंब्रह्मभूतमकल्मषं २७॥

शाङ्करभाष्यं

एवं योगाभ्यासबलाद्योगिनः आत्मन्येव प्रशाम्यति मनः प्रशान्तेति
प्रशान्तमनसंप्रकर्षेण शान्तं मनो यस्य स प्रशान्तमनास्तं प्रशान्त
मनसंह्येनंयोगिनंसुखमुत्तमं निरतिशयमुपैत्युपगच्छति शान्तरज
सं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः ब्रह्मभूतं जीवन्मुक्तंब्रह्मैवस
र्वमित्येवं निश्चयवन्तं ब्रह्मभूतमकल्मषंधर्माधर्मादिवर्जितं २७॥

आनन्दगिरिकृतटी॰

मनसो वशीकरणेनोपशमे किंस्यादित्याह एवमिति योगाभ्यासो वि
षयविवेकद्वारामनोनिग्रहाद्याहतिः प्रशान्तमात्मन्येव प्रलीनमिति
यावत् मनसस्तद्व्यापाराभावे स्वरूपभूतसुखाविर्भावस्यापातेऽप्यभिद्यि
द्योतयितं हिशब्दः मोहादिक्लेशप्रतिबन्धाद्योगिनि यथोक्तसुखाप्रा
प्तिमाशंक्य मनो विलयस्यैव परिहरति प्रशान्तेति तस्यास्तदादि
विलक्षणत्वमाह ब्रह्मभूतमिति अहंकारादेरपि सतो ब्रह्मभूतत्वेन
तस्य जीवन्मुक्तत्वमित्याशंक्याह ब्रह्मैवेति धर्माधर्मप्रतिबन्धादस्य
क्तो यथोक्तसुखप्राप्तिरित्याशंक्योक्तं अकल्मषमिति २७॥

स्वामिकृतटीका

एवंप्रत्याहारादिभिःपुनःपुनर्मनोवशीकुर्वतंरजोगुणक्षयेसतियो
गसुखंप्राप्नोतीत्याह प्रशांतमनसमिति एवमुक्तेनप्रकारेणशांतं
रजोयस्यतंअतएवप्रशांतंमनोयस्यतमेवंनिष्कल्मषंब्रह्मत्वंप्राप्तंयो
गिनमुत्तमंसमाधिसुखंस्वयमेवोपैतिप्राप्नोति २७॥

एवंयोगाभ्यासबलात्योगिनआत्म पैशाचभाष्यं न्येवप्रशाम्यति

प्रशांतंमनोयस्यसः प्रशांतमनास्तंप्रशांतमनसंह्येनंयोगिनंसुखं
[illegible] मुत्तमंनिरति
शयमुपैत्युपगच्छतिशांतरजसंप्रक्षीणमोहादिक्लेशरजसमित्यर्थः
ब्रह्मभूतंजीवन्मुक्तंब्रह्मैवसर्वमित्येवंनिश्चयंब्रह्मभूतमकल्मषं
धर्मवर्जितं २७॥ ^वन्तं

रामानुजभाष्यं

गी॰ प्रशान्तमनसं ह्यात्मनि निश्चलमनसं तत एव हेतोर्दग्धाशेषकल्मषं तत
टी॰ एव शान्तरजसं ब्रह्मभूतं स्वस्वरूपेणावस्थितमेनं योगिनमात्मानुभवस्व
घ॰ रूपमुत्तमं सुखमुपैतीति हेतोः हृतममस्वस्वरूपमात्मस्वरूपमुपैतीत्यर्थः २७

पन्दिभूतमुपैति २७

अभिनवगुप्तकृतटीका

नवात्मनि पुंसां तच्चित्तं योगिनं कर्मभूतं सुख-
यतो यतो मनो निवर्तते ततो निवर्तनेन समनेन रमेतात्मनि शमयेत् २६।

परमार्थप्रपाटीका

एवं रजोगुणात्यये सति स्वत एवात्मसुखप्राप्तिरित्याह प्रशान्तमिति य
वेवियमेनं योगिनं प्रति उत्तमं सुखं स्वयमेवोत्कृष्टमात्मसुखं स्वत एवोपैति
प्राप्नोतीति किंभूतं योगिनं प्रशान्तमनसं अतएव शान्तरजसं अतएव
ब्रह्मभूतं अकल्मषं निरस्तमोहजाले २७ ॥

वनमालीटीका

हनुमवैजयन्तीटीका

ननु वशीकृतमनसं योगिनं किंरूपेणोपैतीत्यपेक्षायामाह प्रशान्तम
नसमिति प्रशान्तमनसं प्रकर्षेण शान्तं विषयविक्षेपरहितं मनो य
स्य स तथा विषयव्याकुलतयात्मन्येव स्थितमित्यर्थः अतएव शा।
न्तरजसं शान्तमुपरतं रजो यस्मात्स तथा तं अतएव तं रवृत्त्युपरत
मनस्कमित्यर्थः अतएव कल्मषेणाखिलकल्मषं संचितविषयवासना
रूपदोषो यस्य स तथा तं अशाकृतवासनारूपमित्यर्थः अतएव ब्रह्मभू
तमेनं आत्मानं स्वरूपं योगिनं समाधिमन्तं यतिं हि निश्चयेनोत्तमं स्व
स्वरूपानुभवात्मकं श्रेष्ठं सुखमेकरसमयमेवोपैति प्राप्नोति २७ ॥

एवंयोगाभ्यासबलादात्मन्येव

मधुसूदनीटीका

योगिनः प्रशाम्यति मनः ततश्च ॥

प्रकर्षेण शान्तं निःशेषितं तथा निरुद्धं संस्कारमात्रशेषं मनो यस्य तं
प्रशान्तमनसं हि निश्चयेन तथा निर्मलत्वहेतुमाह विशेष
णद्वयेन शान्तरजसं अकल्मषमिति शान्तं विक्षेपकं रजो यस्य तं विक्षे
पशून्यं तथा न विद्यते कल्मषं लयहेतुस्तमोगुणो यस्य तमकल्मषं लयशू
न्यं शान्तरजसमित्यनेनैव तमोगुणोपलक्षणं अकल्मषं संसारहे
तुधर्माधर्मादिवर्जितमिति वा ब्रह्मभूतं ब्रह्मैव सर्वमिति निश्चयेन सम
मेव ब्रह्म प्राप्तं जीवन्मुक्तं एनं योगिनमेवंमुक्तेन प्रकारेणेति श्रीधरः
उत्तमं निरतिशयं सुखमुपैति समुपगच्छति मनसः सूक्ष्मावस्थाभावे सूक्ष्मे
स्वरूपसुखाविर्भावस्य सिद्धत्वाद्योगिनं प्रति हि शब्दः तथाचशागव्याख्यो।
तेसत्त्वमात्मनिकेयतदितिच्छ [illegible] २७॥

सदानंदीटीका

योगाभ्यासबलादेव योगिनश्चित्तमात्मनि प्रशाम्यतीत्यतो मेनं शान्तं
निर्वृतिके स्थिरे १ मनोपशमतयाशान्तं रजोविक्षेपकं मलं कल्मषं लय
हेतुं तमो यस्य न विद्यते २ धर्माधर्मादिरूपं वा कल्मषं नो भवस्तदे य
स्यैतद्ब्रह्मैवेदं सर्वमस्मीति वेदितं ३ सम्यग्ज्ञानेप्यरतत्त्वेलीनमोह
मयमले ब्रह्मभूतं मुनिं शान्तमुपैति सुखमुत्तमं ४ दृश्यं नास्तिपरं।
ब्रह्मैवास्ति सर्वं निरन्तरं इति निश्चयवन्तं तं सुखं समुपगच्छति ५
अभावे चित्तवृत्तीनां सूक्ष्मोचित्स्वरूपरं स्वप्नमाविर्भावमेवं हि शब्दो

गी॰ योत्तमम्‌ ॥ ६ २७ ॥
टी॰
स॰

नीलकंठीटीका

एवमात्मवशेन मनसि किं स्यादित्याशंक्याह प्रशांतेति हि यस्मादेवं प्र
शांतमनसं प्रकर्षेण उपरतं चेतो यस्य तं योगिनं एकायनाभ्यासं उत्तमं
सुखं संप्रज्ञातसमाधिफलमुपैति भौतिकानां बाह्यानां मानसानां
च रागादीनां विषयाणां मार्गणात्‌ शांतरजसं प्रक्षीणमोहा
दिक्लेशं ब्रह्मभूतं सद्रूपं अकल्मषं धर्माधर्मवर्जितं यथोक्तं योग
भाष्ये एकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति कर्मबंधनानि श्लथ
यति निरोधमभिमुखीकरोति क्षिणोति च क्लेशान्‌ स संप्रज्ञातो
योग इत्याख्यायत इति एतेनात्मसंस्थं मनः कृत्वेति व्याख्यातं २७ ॥

श्रीधरीटीका

प्रशांतं विषयस्पर्शस्पृहातो भ्रष्टं मनो यस्य तम्‌ अत्र हेतुः शांतं
विगतं रजः विषयप्रवृत्तिहेतुः गुणो यस्य तम्‌ २७ ॥

रामकंठीटीका

यस्मात्तस्मिन्नात्मवशं नीते सत्येनेन योगिनं प्रशांतमनसं विषयस्प
र्शान्मनसो लोभवृत्तिरहितं चेतसं तं स्वयमेवोत्तमं नित्यं निरव
ययस्वभाववत्त्वादुत्कृष्टं सुखं सहजानंदमुपैत्युपगच्छति कीदृशं यो
गिनं शांतरजसं शांतं विलीनं रजो विषयप्रवृत्तिहेतुर्गुणो यस्य
तमेव ब्रह्मभूतं परमात्मसमापन्नं यस्मादकल्मषमविद्यमानाज्ञा
नलक्षणं किल्बिषकलंकम्‌ २७ ॥

एवमात्मनि लब्धस्थैर्यमनसि तदनुसंधा [illegible]टीका नमूत्पुरस्‌ ततः किं स्यादित्यत

आह — हि एवमादरेण प्रकर्षेण प्रवृत्तिसंस्कारस्याप्यभावेन शांतं वृत्तिचक्र
शून्यं मनो यस्य तं प्रशांतमनसमेवं संततमनेन यथोक्तसमाध्यनुशी
लनपरं योगिनं कर्मभूतं उत्तमं सुखमलौकिकमानंदः स्वयमेवोपै
ति आत्मत्वेन व्याप्नोति एष एव महान्योगः अत्र चोत्तमसुखस्योपा
यानंतरत्वेनाविवक्षया योगिनः क्रियाव्याप्यत्वविवक्षया च वै
कल्पिकानंदरूपस्य सुखस्यात्र निरासः एषैवावस्था श्रीमच्छं
करसूरिभिर्निरूक्ता नाहमस्मि न चान्योऽस्ति ध्येयं वा तन्न विद्यते ।

आनंदपदसंलीनं मनः समरसीगतंति एवं समाधिसिद्ध्यनन्तरमेवनि
रायासेन ब्रह्मभावस्य भावितया भूतमिव मन्यमानो भगवान्विशेष
णान्याह समाध्यनुशीलनेन शांतं निहृतं रजोबहिर्मुखताप्रवृत्तिहेतु
र्गुणो यस्य तम् अतएव ब्रह्मत्वं प्राप्तम् अतएवाकल्मषं प्रक्षीण धर्माध
र्मरूपकर्माणाम् [illegible] ॥२७॥

पंचोलीटीका

एवं प्रत्याहारादिभिः पुनः पुनः वशीकुर्वन् रजोगुणलयेन सुखं प्राप्नोति
इत्याह प्रशान्तेति हि यस्मात् एनं योगिनं प्रशान्तमनसं प्रक्षीणमोहादि
क्लेशं रजसा सम्भूतं जीवन्मुक्तम् अकल्मषं पापरहितं उत्तमं निरतिशयं
सुखं उपैति उपगच्छति ॥ २७ ॥

रणवीरसमिद्धोथिनी ॥

एतादृशस्य प्राणादिमोक्षणस्वरूपस्य योगस्य फलमाह प्रशान्ते
ति द्वाभ्यां एवं कर्मयोगिनं प्रशान्तमनसं अन्तःस्थित तत्त्वसंकल्पाद्वै
कविषयतां प्रापितचेतस्कं कर्मभूतं उत्तमं सुखं कर्तृ उपैति
स्वयमेवोपतिष्ठते कथंभूतं शान्तरजसं शान्तं रजो रजोवत्निश्चयाव
रकः कामो यस्य तं अतएव ब्रह्मणि यन्तुर्वैदेभूतं समं साम्येन प्रव
र्तमानं अतएव चाकल्मषं गुरुवधादि पातकैरस्पृष्टं २७॥

मधुभाष्य

२७ ॥

भाषा अनुवाद

इस प्रकार मन औ इन्द्री वशकारी पुरुष को रजोगुण की लय होने से परे योग सुख प्राप्त होना है सोई कहते हैं कि पूर्वोक्त रीति से जिसका रजोगुण नाश भया औ अच्छीतरह मन भी शान्त भया है सोई पापरहित अक्षीण मोह तथा ब्रह्मभाव को प्राप्त योगी उत्तम समाधि सुख को अनायास पावता है २७

दोहा

उत्तम सुख पा योगिको मन प्रशांतको होय   शांतरजब्रह्म
रूपको पाप रहित को सोय   २७॥

119

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः सु
खेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते २८ ॥

शांकरभाष्य

युञ्जन्निति युञ्जन्नेवं यथोक्तेन क्रमेण योगी योगान्तरायवर्जितः सदा सर्वदात्मानं युञ्जन् विगतकल्मषो विगतपापः सुखेनानाया सेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं सुखम त्यन्तमुत्कृष्टं सुखं निरतिशयं सुखमश्नुते व्याप्नोति २८ ॥

आनन्दगिरिकृतटीका

उत्तमं सुखं योगिनो भवतीत्युक्तं तदेव स्फुटयति युञ्जन्निति क्रमो यथोक्तो मनसो विषयासक्तिमादि योगान्तरायो रागद्वेषादि सदा त्मानं युञ्जन्नितिसम्बन्धः २८ ॥

स्वामिकृतटीका

ततश्च कृतार्थो भवतीत्याह युञ्जन्निति एवमनेन प्रकारेण स र्वदात्मानं मनो युञ्जन् वशीकुर्वन् विशेषेण गतं कल्मषं वि यस्य स योगी सुखेनानायासेन ब्रह्मणः संस्पर्शो ब्रह्म विद्यानिवर्तकः साक्षात्कारः तदेवात्यन्तं सर्वोत्तमं सुखमश्नुते जीवन्मुक्तो भवतीत्य र्थः २८ ॥

पिशाचभाष्य

युञ्जन्नेवं यथोक्तेन क्रमेण योगी सदात्मानं विगतकल्मषः विगत पापः सुखेन अनायासेन ब्रह्मसंस्पर्शं अत्यन्तं सुखमश्नुते २८ ॥

रामानुजभाष्य

युञ्जन्निति एवमुक्तप्रकारेणात्मानं युञ्जंस्तेन विगतप्राचीन समस्त कल्मषो ब्रह्मसंस्पर्शं ब्रह्मानुभवरूपं सुखमनन्तमपरिमितं सुखे नानायासेन सदाश्नुते २८ ॥

अभिनवगुप्तकृतटी॰

[illegible]
[illegible]पैति २८ ॥ अनेनैव क्रमेण योगिनां सुखेन ब्रह्मावाप्तिः न तु कष्टयो गादिना इति तात्पर्यम् २८

परमार्थप्रपाटी॰

गी॰ ततस्सकृतार्थो भवतीत्याह एवमिति एवमनेनप्रकारेणात्मानं मनः
टी॰ युंजन्वशीकुर्वन्योगी विगतकल्मषो ज्ञाननिष्ठो भवति तथाविधः सु
घ॰ नः सुखेन सुखोपायेन ब्रह्मणः संस्पर्शः अविद्यानिवर्तकोऽपरोक्षसा
क्षात्कारः तदेवात्यंतमात्यंतिकं अलयशाश्वतं सुखं परमानंदमश्नुते
जीवन्मुक्तो भवतीत्यर्थः २८ ॥

120

वनमालीटीका

उक्तं सुखं योगिनः स्फुटीकरोति युंजन्निति एवं मनसैवेंद्रियग्राम।
मिनियम्येत्युक्तक्रमेणात्मानं मनः सदा युंजन् समादधत् योगी योगेन नियमं
वंधी विगतकल्मषः संसारहेत्वविद्याख्यमलरहितः सुखेनानाया
सेनैव परमेणाध्यात्मवीतरागनिहन्ता ब्रह्मणः सम्यक्स्पर्शो विष
यतारूपसंबंधो यस्मात्सो ब्रह्मसंस्पर्शस्तादात्म्यमतिमस्त्वन्तः वर
मेकारणे यस्मिन् तद्ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते सामतित्वाद्विषे
न स्वरूपात्मिकैव यदा ब्रह्मणः सम्यक्स्पर्शः प्रसादाख्यः संबंधो यस्मि
न्नतदत्यंतं दुःखलेशवर्जितं निखिलमायातत्संपर्कजातपरेशापरोक्षे
जीवे ब्रह्मणः प्रसादाख्यः संबंधस्तेनाविद्यानिहन्त्या विभ्रंतप्रणीत
रस्य स्वरूपसुखमश्नुते इत्यर्थः २८

कृष्णमैवजयन्तीटी॰

ननु यं योगी स्वस्वरूपानुभवरूपमेव सुखं लभते अथवा परमप्यन्यत्किं
चित्प्राप्नोतीत्याशंक्याऽपरमपि ब्रह्मानुभूतिरूपसुखं लभते इत्याह यु
ञ्जन्नेवमिति एवं पूर्वोक्तप्रकारेण सदाहरहः आत्मानं स्वस्वरूपं यु
ञ्जन् सततपरिपाकयोगाभ्यासेनानुभवन्सन् विगतकल्मषः तेनैवा
त्मानुभवरूपेण योगेनानलरूपेण निर्दग्धाशेषानादिसंचितक्रिय
माणात्मकर्मरूपदोषो योगी आत्मानुभवीछ्रवेनानायासेन ब्रह्मसं
स्पर्शं ब्रह्मणः परमात्मनः सम्यक्स्पर्शोऽनुभवो यस्मिंस्तत्तथा परमा
त्मस्वरूपानुभवमत्यंतनिरवधिकातिशयं सुखं परमानन्दरूपमश्नुते
प्राप्नोति २८ ॥

उक्तं सुखं योगिनः स्फुटीकरोति॥

मधुसूदनीटीका

एवं मनसैवेंद्रियग्राममित्यायुक्तक्रमेणात्मानं मनः सदा युंजन्।
समादधत् योगी योगेन नियमं वंधी विगतकल्मषः विगतमलः

तेस्मारद्देतः धर्माधर्मरहितः स्वेनानायासेन ईश्वरप्रणिधाना।
त्सर्वांतरायनिवृत्त्या ब्रह्मसंस्पर्शसम्यक्तेन विषयास्पर्शेन सद्ब्रह्म
णः स्पर्शनादात्मन्यपि स्मिन्नद्विषयासंस्पर्शिब्रह्मस्वरूपमिमेतत् अ
सेते सर्वांतेनानपरिच्छेदानतिक्रांतनिरतिशयसुखमानंदमश्नुते यो
गीति सर्वेतानिवृत्तिकेन चित्तेन लयविक्षेपविलक्षणमनुभवति वि
क्षेपवृत्तिमत्वात् लयेवमनसोपि स्वरूपेणासत्वात् सर्ववृत्तिशून्येन स्व
स्वेन मनसा सुखानुभवः समाधावेवेत्यर्थः अत्र चान्तरायाणामेतेनांतराय
निवृत्तिरुक्ता तेषांतरायान्दर्शितां योगसूत्रेण व्याधिस्त्यानसंशयप्र
मादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्त
विक्षेपास्तेन्तरायाः चित्तं विक्षिपंति योगादपनयंतीति चित्तविक्षेपा।
योगप्रतिपक्षाः संशयभ्रांतिदर्शने तावद्वृत्तिरूपतया वृत्तिनिरोधस्य समाधेः
साक्षात्प्रतिपक्षौ व्याध्यादयस्तु वृत्तिसहचरितेन योगान्तरप्रतिप। न
ता इत्यर्थः व्याधिर्धातुवैषम्यनिमित्तो विकारो ज्वरादिः १ स्त्यानमकर्म
ण्यता गुरुणा शिष्यमाणस्याप्यासनादिकर्मानर्हतेति यावत् २ योगः
साधनीयो न वेत्युभयकोटिस्पृक् विज्ञानं संशयोऽतद्रूपप्रतिष्ठितत्वे
न विपर्ययाद्भेदोपि सत्युभयकोटिस्पर्शैककोटिस्पर्शित्वरूपावां
न्तरविशेषविवक्षया अविपर्ययाद्भेदेनोक्तः ३ प्रमादः समाधिसाध
नानामननुष्ठानस्वभावत्वमननुष्ठानशीलता विषयान्तरव्यापृततया।
योगसाधनेष्वौदासीन्यमिति यावत् ४ आलस्यं सत्यामप्यौदासीन
प्रवृत्तौ कफादिना तमसा च कायचित्तयोर्गुरुत्वं व्याप्तित्वेनाऽप्रसिद्धम
पि योगविषये प्रवृत्तिविरोधि ५ अविरतिः चित्तस्य विषयविशेष
पकांतिकात्यंतिकोभिलाषः ६ भ्रांतिदर्शनं योगासाधनेपि तत्साध
नत्वबुद्धिस्तथा तत्साधनेप्यसाधनत्वबुद्धिः ७ अलब्धभूमिकत्वं स
माधिभूमेरेकाग्रतायाऽप्रलाभः क्षिप्तमूढविक्षिप्तरूपत्वमिति यावत् ८
अनवस्थितत्वं लब्धायामपि समाधिभूमौ प्रयत्नशैथिल्याच्चित्तस्य तत्रा
प्रतिष्ठितत्वं ९ नवैते चित्तविक्षेपा नव योगमलाः योगप्रतिपक्षा यो
गान्तराया इति चाभिधीयन्ते १० दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्र
श्वासा विक्षेपसहभुवः दुःखं चित्तस्य राजसः परिणामो बाधनाल

[दि]
गी. लण: तत्राध्यात्मिकं शारीरं मानसं च व्याधिवशात् कामादिवशाच्च भव
टी. [आ] ति आधिभौतिकं व्याघ्रादिजनितं आधिदैविकं ग्रहपीडादिजनितं हेषा।
ष. त्वे विपर्ययहेतुत्वात् समाधिविरोधि दौर्मनस्यमिच्छाविघातादिबलव
त्दु:खानुभवजनित: चित्तस्याक्षम: परिणामविशेष: तोभावरया
र्थ्य: स्थविभव: सर्वकषायमालयत्वसमाधिविरोधी २ अंगमेजयत्वमं
गकंपनमानसस्थैर्यविरोधि ३ प्राणेनवाह्यस्यवायोरंत: प्रवेशनंश्वास:
समाध्यंगरेचकविरोधी ४ प्राणेनकोष्ठ्यस्यवायोर्वहिर्नि:सरणंप्रश्वास:
समाध्यंगपूरकविरोधी ५ समाहितचित्तस्यैतेनभवंतीतिविक्षिप्तचित्त
[ति] स्यभवंतीविक्षेपसहभुवोंतरायाएव एतेभ्यासवैराग्याभ्यांनिरोद्धव्या:
ईश्वरप्रणिधानेनवा तीव्रसंवेगानामासन्नःसमाधिलाभ [illegible]तेश्वर [त्त]
प्रणिधानाद्वेतिपतोनरमुक्ता प्रणिधेयमीश्वरं क्लेशकर्मविपाका
शयैरपरामृष्ट: पुरुषविशेषईश्वर: तत्रनिरतिशयंसर्वज्ञबीजंसपूर्वे
षामपिगुरु:कालेनानवच्छेदादितित्रिभि:सूत्रैःप्रतिपाद्यतत्प्रणिधा
नेहाभ्यामसूत्रयत् तस्यवाचक:प्रणव: तज्जपस्तदर्थभावनमिति ।
तत:प्रत्यक्चेतनाधिगमोप्यंतरायाभावश्च तत:प्रणवजपपूर्वात् तदर्थ
ध्यानरूपादीश्वरप्रणिधानात् प्रत्यक्चेतनस्यपुरुषस्यप्रकृतिविवेके
नाधिगम:साक्षात्कारोभवति उक्तानामंतरायाणामभावोपिभवती
त्यर्थ: अभ्यासवैराग्याभ्यामंतरायनिवृत्तौकर्तव्यायामभ्यासदार्ढ्यार्थ
माह तत्प्रतिषेधार्थमेकतत्वाभ्यास: तेषामंतरायाणांप्रतिषेधार्थमे
[कस्मिं] कस्मिन्श्चित्तत्वेभिमतेतत्वेभ्यास: चेतस:पुन:पुनर्निवेशनंकार्यंतथा
मैत्रीकरुणामुदितोपेक्षाणांसुखदु:खपुण्यापुण्यविषयाणांभावनात
श्चित्तप्रसादनं मैत्रीसौहार्दं १ करुणाकृपा २ मुदिताहर्ष: ३ उपेक्षौ
दासीन्यं ४ सुखादिशब्दैस्तद्वंत: प्रतिपाद्यंते सर्वप्राणिषु सुखसंभोगा
पन्नेषु सुखायेतन्ममममित्राणांसुखित्वमितिमैत्रीभावयेत् नतुर्ष्यांदु:खि
तेषु कथंनुनामैषांदु:खनिवृत्ति:स्यादितिकृपामेवभावयेत् नोपेक्षां
नवाहर्षं २ पुण्यवत्सुपुण्यानुमोदनेनहर्षंकुर्यात् नतुविद्वेषंनचोपेक्षां
अपुण्यवत्सूदासीन्यमेवभावयेन्नानुमोदनंनवाद्वेषं ४ एवमस्यभावय [वे]
त: शुक्लोधर्मउपजायतेततश्चविगतरागद्वेषादिमलेचित्तेप्रसन्नेसदेका

एतानायोग्यं भवति मैत्र्यादिचतुष्टयेनोपलक्षणं अभयं सत्वसंशुद्धि
रित्यादीनाममानित्वमदंभित्वमित्यादीनां च यमादीनां सर्वेषामेतेषाम
भ्यासेनाशुचित्वेन मलिनवासनानिवर्तकत्वात् रागद्वेषौ महाशत्रू स
र्वेश्वरूपावधमनिवर्तकौ महतामपयत्नेन परिहर्तव्याविमेतन्नसंशयः
एवमन्येपि प्राणायामादय उपायाः चित्तप्रसादनोपदर्शिताः तदेतत्
चित्तप्रसादनं भगवदनुग्रहेण यस्माज्ज्ञानमनेन प्रमेयेन द्रवितं सर्वेनेति
अभ्यासेन मनःप्रशमानुपपत्तेः [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

स्फुटीकरोति भगवान्योगिनः सुखमीरिते मनसैवेंद्रियग्राममिति
युक्तक्रमेणयः १ योगेन नित्यसंबंधी मनोनिःसमादयन् संसार
हेतुधर्मादिमलमुक्तो निर्मलः २ अनायासेनमनसायोगमप्यह
वर्जितः सर्वं ब्रह्मस्वरूपं यदपरिछिन्नमानंदं ३ लयविक्षेपशून्य।
नामप्राप्नोति निरंतरं स्वयं ब्रह्मसुखं योगी भूत्वा तिष्ठति निश्चलः ॥२८

नीलकंठीटीका

अस्य फलमाह युंजन्निति एवमनेन प्रकारेण योगी आत्मानं मनो
युंजन् समाधानः विगतकल्मषो निरस्ताविद्यादिक्लेशः सुखेनअ
नायासेन ब्रह्मसंस्पर्शं निर्विशेषब्रह्मणा एकीभावं त्रिविधोपाधिप्रविलया
त् अश्नुते प्राप्नोति कीदृशं ब्रह्मसंस्पर्शं अत्यंतं अंतो द्रष्टृदृश्यभावेन
परिच्छेदस्तमतिक्रांतं निर्विशेषसुखं परमानंदैकरूपं एतेन न किं
चिदपि चिंतयेदिति चतुर्थपादो व्याख्यातः २८॥

आनंदीटीका

२८ स्पष्टम् [illegible] ॥

रामकंठीटीका

एवमनेन यथोक्तेन क्रमेण सर्वदा प्रतिपादितेन नियतमानसः सं

गी
टी ब॰

यतोंतःकारणो योगी सर्वदा सर्वावस्थासु पश्यं शृण्वन्नित्यादिना
प्रतिपादितः स्वात्मानं युंजन्समादधानः सुखेनानायासेन प्राणायाम
प्रत्याहारध्यानधारणादिक्लेशाभावादनायासेन ब्रह्मणा परम
मात्मना संयोगमभेदमत्यंतं नित्यमेवाधिगच्छति प्राप्नोति [illegible]
[illegible]
[illegible] २८ ॥

एतदेव स्फुटं प्रतिपादयति ॥

लासिकी [illegible]टीका

एवं संकल्पप्रभवान्कामानित्यारभ्य क्रमेण सदा यत्संयतेंद्रियनेष्वप
राग्यादिसमयेषु सर्वथा सर्वावस्थासु पश्यंशृण्वन्नित्यादिनात्मानं
युंजन्समादधानो योगी सततमेव विगतकल्मषः संसारहेतुधर्माधर्म
रहितः सुखेनानायासेन प्रत्याहारधारणादिक्लेशाभावादनायासेन ब्रह्मसंस्प
र्शं कस्यचिदवयवस्य परिहारेण कृत्स्नविद्यापनेनावयवसंघट्ट म
स्तुतेव्याप्नोति किमत्यंतं स्वरूपपरिच्छेदाक्रांतमानंदरूपं यदुक्तं श्रीम
द्भवने यावशावलोकनेन्यक्रास्वरूपालोकनं हियत् आत्मव्याप्तिर्भव
त्येषा शिवव्याप्तिस्ततो न्यथा चैतन्ये हेतुरूपिणीति प्रशांते मनसि
आविर्भूतस्यात्मसुखस्य समाधिकाले देहएव सत्त्वादेशतः काल
तश्च परिच्छिन्नत्वमित्यतोत्यंतमित्युक्तमात्मसुखवादेतत्त्वावच्छिन्नमव
लोकाकाशस्येव निरंशस्यापि मायाकल्पितमवयवद्वयं चेतनव
र्गोजडवर्गश्चेति तत्र चेतनवर्गव्याप्त्या परमयोगित्वं जडवर्गस्या
पि व्याप्त्या सालोद्वलतया जीवन्मुक्तत्वमेव तदुक्तं देहादिष्वचेत्य
मानेष्वपि चिदेकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्तिरिति [illegible]
[illegible]
[illegible] २८ ॥

सर्वत्तादिगुणायेषी व्यापका आवयेद्यदा शिवव्याप्तिर्भ वेदेषा [illegible]

उक्तपूर्वस्य

पंचोलीटीका

ततश्च कृतार्थो भवतीत्याह युंजन्निति एवं यथोक्तप्रकारेण सर्व
दात्मानमंतःकरणं युंजन्समाधिं कुर्वन्विगतपापो योगी।
योगांतरायवर्जितः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मरूपस्पर्शं
नेनिरतिशयं सुखं प्रत्यग्नेन प्राप्नोति २८ ॥

युञ्जन्नेवमिति एवं पूर्वोक्तप्रकारेण सदा सर्वास्ववस्थासु आत्मनो मनो युंजन् आरभ्यमाणस्वजातवितर्कमेकविषयं कुर्वन् अयं योगी योगः समन्तात् लक्षणोति प्रायेण विद्यते यस्य सः प्रतिप्रायस्य प्रतिपक्षवल्लक्षणः परिपक्वसाम्ययोगविशिष्ट इत्यर्थः अत एव विगतकल्मषः रागद्वेषादिराहित्येन केवलं धर्मबुद्ध्या प्रवृत्तिमत्त्वाद्बंधुवधादिजन्यपापास्पृष्टः सुखेनानायासेनैव अत्यंतं निरवधि सुखमश्नुते प्राप्नोतीति कथंभूतं सुखं ब्रह्मपरमेश्वरस्तद्व्यंततंतेन संस्पर्शः संबंधो यस्य परमेश्वरसुखवत्त्वमित्यर्थः अत्यंतता च सुखस्य बहुप्रकारकता ऐहिकं राज्यादिलक्षणं पारत्रिकं च स्वर्गभोगादिलक्षणमापवर्गिकं च मोक्षलक्षणमिति त्रिविधं क्रमेण प्राप्नोति योगीति पर्यवसितोयमर्थः २८॥

मधुभाष्य

२८। एवंयुंजन्निति ध्येयमाह २८॥

123

भाषा अनुवार

अब योगीजन की कृतार्थता कहते हैं कि इसी प्रकार सर्वदा मन वशीभूतकारी पुरुष जिसका सम्पूर्ण पापदूर भया है सोई योगी अनायास ब्रह्मसंस्पर्शी अर्थात् अविद्या निवृत्तिकारी जो अत्यन्त ब्रह्मज्ञान सर्वोत्तम सुख सो पावते अर्थात् जीवन्मुक्त होते हैं २८ ॥

दोहा

जोड़त ऐसें चित नित योगी सो निरपाप विनाखेद अति
सुख लहैं ब्रह्मसंगको आप २८ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते
योगयुक्तात्मा सर्वत्रसमदर्शनः २९

शांकरभाष्यं

इदानीं योगस्य यत् फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत् प्रदर्श्यते सर्वेति सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वमात्मानं सर्वभूतानि चात्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतान्यात्मन्येकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्रसमदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं विक्रियारहितं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्रसमदर्शनः २९ ॥

आनन्दगिरिकृतटीका

पापपदमपलक्षणं पुण्यस्यापि संस्पर्शाभावादात्मैकत्वं उक्तं योविषयासंस्पर्शो योगमनुतिष्ठतो ब्रह्मभूतस्य सर्वानर्थनिवृत्तिनिरतिशयसुखप्राप्तिलक्षणो द्विविधो मोक्षो हेतुना केन स्यादिति शङ्कामनूद्यमाह इदानीमिति स्वमात्मानमीक्षत इति सम्बन्धः सर्वभूतानामपि तद्विशेषणत्वेन पश्यति चेन्न भूतवत्त्वानमिति नाविद्यानिवृत्तिरित्याशङ्क्याह सर्वभूतानीति उक्ते दर्शने चित्तसमाधानमुपायं दर्शयति योगेति विषमेष्वपि भूतस्वरूपादिषु सममेव दर्शने उपदर्शितदर्शनप्रतिबन्धकं प्रत्यस्यति सर्वत्रेति २९ ॥

स्वामिकृतटीका

ब्रह्मसाक्षात्कारमेव दर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेन युक्तात्मा समाहितचित्तः सर्वत्र समं ब्रह्मैव पश्यतीति समदर्शनः तथा स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु च स्थितं पश्यति तानि चात्मन्यभेदेन पश्यति २९ ॥

पिशाचभाष्यं

इदानीं योगस्य फलं ब्रह्मैकत्वदर्शनं प्रदर्श्यते सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वात्मानं सर्वभूतानि च ब्रह्मादीन्यात्मन्येकतां गतानीक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्रसमदर्शनः २९ ॥

रामानुजभाष्यं

अथ योगविपाकदशा चतुःप्रकारोच्यते सर्वभूतस्थमिति स्वात्मनः परेषां च भूतानां प्रकृतिवियुक्तस्वरूपाणां ज्ञानैकाकारतया साम्यादेकस्य प्रकृतिगतवैषम्ययुक्तात्मा प्रकृतिवियुक्ते स्वात्मस्वरूपे सर्वे ज्ञानैकाकारतया समदर्शनः सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनीक्षते सर्वभूतसमानाकारं स्वात्मानं स्वात्मसमानाकाराणि च सर्वभूतानि पश्यति एकस्मिन्नात्मनि दृष्टे सर्वस्यात्मवस्तुनस्तत्साम्यात्तथैव दृष्टं भवतीत्यर्थः सर्वत्र समदर्शन इति वचनात् योऽयं योगस्त्वया प्रोक्तः साम्येन मत्र भाषणाच्च निर्दोषं हि समं ब्रह्मेति वचनाच्च २९ ॥

अभिनवगुप्तकृतटीका

अनेनैव क्रमेण योगिनं [illegible] व्याख्याभिः [illegible] योगादि इति तात्पर्यम् २९ ॥ सर्वेषु भूतेष्वात्मानं ग्राहकतयानुप्रविष्टं भावयेदात्मनि च ग्राह्यतां

परमार्थप्रपाटीका

एवं निरंतरमंतर्ध्यानावस्थस्य देहानुबंधेनात्मानुभवमुक्त्वा पुनः कदापि बाह्यदृष्टेः सर्वात्मकत्वेनात्मप्रतीतिमीशावास्योपनिषदुक्तां दर्शयति सर्वभूतस्थमिति योगेनाभ्यासेन युक्तः समाहित आत्मा मनो यस्यैवंविध आत्मानं स्थूलसमष्टिरूपं सर्वभूतेषु स्थूलव्यष्टिरूपेष्वोतप्रोतत्वेन स्थितं ईक्षते पश्यति तथा सर्वभूतानि आत्मनि स्थूलसमष्टिरूपे जलतरंगवत्तादात्म्येन पश्यति अत एव सर्वत्र समदर्शनः सर्वभूतेषु समं तारतम्यविवर्जितं दर्शनं प्रतीतिर्यस्य तथा श्रुतिश्च यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं न ततो विचिकित्सतीति भाष्यं यः पुरुषः सर्वाणि भूतान्यात्मन्येव पश्यति जले तरंगानिव तथा सर्वभूतेष्वात्मानमेव पश्यति तरंगेषु जलमिव एवंभूतस्थेन तदा न विचिकित्सति तारतम्यविचारं न करोतीत्यर्थः ॥ २९

वनमालीटीका

इदानीं सिद्धयोगस्य जीवन्मुक्तस्य निःशेषनिहताविद्यस्य हरिप्रसादाविर्भूतस्वरूपस्य भगवत्सहस्या प्रतिबद्धदेहेन तिष्ठतः कर्माणि विषयेषु प्रवस्था भाविकं सर्वत्र सर्वात्मत्वेन भगवद्दर्शनमाह सर्वेति योगयुक्तात्मा योगेन निर्विकारवैशारद्यरूपेण युक्तः प्रसादं नीत

त्तत्ताया म आत्मा विनेयस्स आत्मानं सर्वेश्वरं मां नियामकत्वेनव्याप
कत्वेनच सर्वभूतस्थं ब्रह्मादिस्तंभपर्यंतेषु सर्वेषु अयत्नेन प्रवरेत्
नेष्वपरोक्षतः पश्यति अथच सर्वभूतान्यात्मनि सदाधारकाणि मुनि
युक्तानि वै तत्त्वतोऽप्यन्तरनपवापरोक्षतः पश्यति कीदृशः सर्वत्र सर्व
हितात्मव हितप्रकृष्टाविप्रकृष्टवस्तुषु समं परोक्षरूपं दर्शनं यस्य स म॑
र्वेषु जीवेषु ज्ञानानंदेश्वरनियम्यत्वादिना समानं दर्शनं यस्य सः २९

ऊसमैतपन्नीटीका

एवं निष्पन्नयोगस्य योगिनः आत्मस्वरूपं परमात्मस्वरूपं च भवतीत्युक्ता
पेदानीं सकेन प्रकारेण स्वपरस्वरूपमनुभवति तस्य च कीदृशी दृशा
शोभनस्य योगविपाकदशायां अनभिज्ञो केषुतः प्रकाश्कत्वमुत
रोत्तरं श्रेष्ठत्वं च दर्शयन्नाद्यावात्मानुभवप्रकाशमाह सर्वभूतस्थमिति
त्मा योगयुक्ताः स्वात्मपरमात्मस्वरूपयोः संयोगो योगशब्देनोच्यते स्वात्म
परमात्मसंयोगे युक्तः समाधौ ध्यानेन संयुक्तः आत्मा मनो यस्य स तथा
आत्मात्मीयभावविषये ध्यानः सूक्ष्मतां प्राप्तं सर्वत्र निखिलात्मपरमा र्थः
त्मवस्तुषु समदर्शनः समं ज्ञानैकाकारस्वरूपत्वेन तत्संदर्शनं ज्ञानं
यस्य स तथा स्वस्वरूपस्य व्यतिरिक्तानां प्रकृतिसंबंधरहितानां जी।
वस्वरूपाणां च परमात्मस्वरूपस्य च ज्ञानैकाकारस्वरूपत्वात्तत्साम्यमेव
स्वरूपमिति ज्ञानवानित्यर्थः सर्वभूतस्थं सर्वेषु ब्रह्मादिस्थावरांते
षु भूतेषु जीवेषु ज्ञानाकारसाम्यस्वरूपत्वेन तिष्ठतीति तथा तं आ
त्मानं स्वस्वरूपमित्युक्तेन पश्यति च पुनरात्मनि स्वस्वरूपे सर्वभूतानि
ब्रह्मादिस्थावरान्तानि जीवस्वरूपाणि ज्ञानस्वरूपसाम्यानि पश्यति।
यथाहं ज्ञानस्वरूपो ज्ञानादिधर्मैः प्रियस्तथैवान्यपि भूतानि भवंतीत्येवं त्या
सर्वभूतसमानं स्वस्वरूपं पश्यति तथैतानि ज्ञानस्वरूपाणि ज्ञानादि
धर्माश्रयाणि यथाहमपि ज्ञानस्वरूपश्चैवं स्वस्वरूपसमानानि सर्व
भूतानि च पश्यतीत्यर्थः यथैवैकेन मृत्पिंडेन विज्ञातेन सर्वं मृन्मयं
विज्ञातं स्यात् यथैवैकेन लोहमणिना विज्ञातेन सर्वं लोहमयं विज्ञातं स्या
त् तथैवैकात्मविज्ञानेन सर्वमात्मवस्तु विज्ञातं स्यादित्यादिश्रुतेः २९

मधुसूदनीटीका

तदेवं निरोधसमाधिना त्वंपदलक्ष्ये तत्पदलक्ष्ये च शुद्धे साक्षात्कृते तदैक्यगोचरा तत्त्वमसीति
वेदान्तवाक्यजन्या निर्विकल्पकसाक्षात्काररूपा ब्रह्मविद्याभिधाना जायते ततश्च कृत्स्ना
विद्यातत्कार्यनिवृत्त्या ब्रह्मस्वरूपेणावस्थानं मुक्तिरित्युपपादयति त्रिभिः श्लोकैः तत्र प्रथमं त्वंपद

लब्धोपस्थितिमाह ॥

गी॰ सर्वेषु भूतेषु स्थावरजंगमेषु शरीरेषु भोक्तृतया स्थितमेकमेव नित्यं वि
टी॰ भुमात्मानं प्रत्यक्चैतन्यं साक्षिणं परमार्थसत्यमानंदघनं सर्वेभ्योऽनृतज
अ॰ डपरिच्छिन्नदुःखरूपेभ्यो विवेकेनैतत्त्वेन साक्षात्करोति तस्मिंश्चात्मनि
साक्षिणि सर्वाणि भूतानि साक्ष्याण्याध्यासिकेन संबंधेन भोग्यतया
कल्पितानि साक्षिसाक्ष्ययोः संबंधांतरानुपपत्तेः मिथ्याभूतानि परि
च्छिन्नानि जडानि दुःखात्मकानि साक्षिणो विवेकेनेक्षते कः योगयुक्ता
त्मा योगेन निर्विचारवैशारद्यरूपेण युक्तः समाहितः आत्मांतःक
रणं यस्य स तथा तथा च प्रागेवोक्तं निर्विचारवैशारद्येऽध्यात्मप्रसादः
ऋतंभरा तत्र प्रज्ञा श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति
तथा च शास्त्रानुमानागोचरयथार्थविशेषवस्तुगोचरयोगजप्रत्यक्षेण।
ऋतंभरसंज्ञेन युगपत्सूक्ष्मं व्यवहितं विप्रकृष्टं च सर्वं तत्त्वमेव पश्य
तीति सर्वत्र समं दर्शनं यस्येति सर्वत्र समदर्शनः स आत्मानमनात्मा
नं च योगयुक्तात्मा यथावस्थितमीक्षत इति युक्तं अथवा योगयुक्ता
त्मा यो वा सर्वत्र समदर्शनः स आत्मानमीक्षत इति योगिसमदर्शिनौ।
वा त्वेतेनाधिकारिणावुक्तौ यद्यपि चित्तवृत्तिनिरोधः साक्षिसाक्षात्
कारहेतुः तथाप्यविवेकेन सर्वानुस्यूतचैतन्यपृथक्करणमपि तद्व
श्यं योगपदवाच्यमिति ज्ञानयोगः अतएवाह वसिष्ठः द्वौ क्रमौ चित्तनाशस्य योगो
ज्ञानं च राघव योगस्तद्वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं असाध्यः कस्य
चिद्योगः कस्यचिज्ज्ञाननिश्चयः प्रकारौ द्वौ ततो देवो जगाद परमः शिव इ
ति चित्तनाशस्य साक्षिणः सकाशात्तदुपाधिभूतचित्तस्य पृथक्करण
तदृदर्शनस्य तस्य चोपायद्वयं एकः संप्रज्ञातसमाधिः संप्रज्ञातसमा
योगो धौ ह्यात्माकाकारवृत्तिप्रवाहयुक्तमंतःकरणं साक्षिणानुभूयते
निरुद्धसर्ववृत्तिकं तूपशान्ततया तत्रानुभूयत इति विशेषः द्वितीयस्तु सा
क्षिणि कल्पितं सर्वमनृतं तत्रास्येव साक्ष्येव तु परमार्थसत्यः केवलो
विद्यत इति विचारः तत्र प्रथममुपायं प्रपंचपरमार्थतावादिनो हैरण्य
गर्भादयः प्रपेदिरे तेषां परमार्थस्य चित्तस्यादर्शनेन साक्षिदर्शनं निरोधा
तिरिक्तोपायासंभवात् श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविन
स्त्वौपनिषदाः प्रपंचानृततावादिनो द्वितीयमेवोपायमुपपेदुः तेषां ह्यधि

विज्ञस्य तत्

त्यानंतानंदाद्वैतसलिलेकलितस्य बाधितसंदृश्यस्यादर्शनम।
नायासेनैवोपपद्यते अतएव भगवत्पूज्यपादैः कृतापि ब्रह्मविदो
योगापेक्षानवकाशादयो विभ्रमः अतएवोपनिषदाः परमहंसाः श्रो
तेवेदांतवाक्यविचारएव गुरुमुपसृत्य प्रवर्तते ब्रह्मसाक्षात्काराय
न तु योगविचारेणैव चित्तदोषनिराकरणे न तस्याः सुखासिद्धत्वा।
दिति कृतमधिकेन सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा २९

सदानंदीटीका

इदानीं योगसंसिद्धफलं ब्रह्मैक्यदर्शनं सर्वसंसारविच्छेदकारणं
तत्प्रदर्शयते १ आब्रह्मस्थावरांतेषु सर्वभूतेषु स्थितं स्वात्मानमेकम
द्वैतमनुस्यूतं प्रपश्यति २ तथा सर्वाणि भूतानि ब्रह्मादीन्यात्मवस्तु।
नि ऐक्यंगतानि शुद्धात्मा प्रपश्यत्यैक्यदृष्टितः ३ साक्षिभोक्तृतत्त्वतः
एभ्यो विवेकेन विविच्याथ साक्षिणं शमगात्मानमसंगं परिपश्यति ४
साक्षिण्यखिलभूतानि कल्पितान्यात्ममायया आध्यासिको हि संबंधो मा
यया साक्षिसाक्ष्ययोः ५ तैः निरस्य विवेकेन मिथ्याभूतानि पश्यति योगे
नैकाग्ररूपेण चित्तेयस्य समाहितं ६ सर्वत्राखिलसमये यस्य दर्शनं ब्रह्म
गोचरं स योगी ब्रह्मविद्ब्रह्म पश्यत्यत्र प्रपश्यति २९ ॥

नीलकंठीटीका

द्विविधस्यापि योगस्य फलमाह सर्वेति सोपाधिनिरुपाधिभेदेन
ब्रह्मविद्यते सोपाधिकः स्यात्सर्वात्मा निरुपाख्यो निरुपाधिक इति वा
र्तिकोक्तरीत्या संप्रज्ञाते आत्मनः सार्वात्म्यमनुभवन्योगी सर्वेषु भूतेषु
उपादानतया स्थितं आत्मानमीक्षते पश्यति तथा असंप्रज्ञाते सर्वाणि
भूतानि ब्रह्मादिस्तंबपर्यंतानि आत्मन्येकतां गतानि रज्जामिवाध्यस्त
सर्पदंडधारादीनि न तु स पश्यति योगयुक्तात्मा योगेन समाहितचित्तः
मा अस्यैव भूमानावस्थामाह सर्वत्रेति सर्वेषु ब्रह्मादिस्थावरांतेषु विषमेषु
भूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं यस्य स सर्वत्र समद
र्शनः तथा च श्रुतयः यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति सर्व
भूतेषु चात्मानं ततो न विजुगुप्सते सर्वस्यात्मा भवति ब्रह्मदाशा ब्र
ह्मदासा ब्रह्मैवेमे कितवा उत इदं सर्वं यदयमात्मेत्यादयः एतमर्थं प्रतिपा

गी॰ दर्शयति यत्र योगयुक्तात्मा योगी वा सर्वत्र समदर्शनः स्वात्मानमीक्ष
टी॰ त इति योगी समदर्शी वा आत्मेक्षणाधिकारी उक्तो यथाहि चित्तवृ
म॰ त्तिनिरोधः साक्षात्कारहेतुः तथा जडविवेकेन सर्वानुस्यूतचैत
न्यपृथक्करणमपि तावदेव योगपदवाच्यमिति नश्ति तत्र समाहितो भू
त्वात्मैवात्मानं पश्यति ततस्तं पश्यति निष्कलं ध्यायमान इत्यादि
श्रुतिभिः समाधिध्यानापरपर्यायस्य योगस्यैवात्मदर्शनहेतुत्वप्रति
पादनात् तत्कारणं सांख्ययोगाभिपन्नं विद्यामेतां योगविधिं च कृ
त्स्नमिति लिङ्गाच्च ज्ञानयोगयोः समुच्चयावगमात् न च श्रौतयौ
क्तिकविवेकमात्राज्जडाजडयोर्देहात्मनोः पृथक्करणं संभवति सो
पाधिकस्य भ्रमस्य उपाधिनिवृत्तिमन्तरेण निवृत्त्यसंभवात् आदर्शा
द्यनिवृत्तावपि प्रतिबिम्बादिभ्रमानिवृत्त्युपपत्तेः अतएवाधिष्ठानसान
दार्ढ्ये सति तत्र कल्पितस्य चित्तस्य न दृश्यस्यादर्शनमनायासेनैवो
पपद्यत इति निरस्तं योगं विनापि ज्ञानं ज्ञानस्यैवासंभवात् यदाहुः
तः स्वसंवेद्यं हि तद्ब्रह्म कुमारीस्त्रीसुखं यथा अयोगी नैव जानाति
जात्यन्धो हि यथा घटमिति यत्तु के भगवत्पूज्यपादैः ब्रह्मविदः कृता
पि योगापेक्षां न श्रुत्यादर्या बभूवुरिति तदथातो ब्रह्मजिज्ञासामप्रा
प्य शास्त्रचितममुक्षुविशेषणीभूतसाधनचतुष्टयान्तर्गतशमा
द्युपेयसमाधिमहत्त्वोक्तमिति तदेव दोषः लोकमात्रिति वसिष्ठवाक्य
तात्पर्येण परस्परनिरपेक्षमार्गद्वयोपगमेनाख्यः पंथा इति श्रुतिवा
ध्यापमाप्रतिपत्तिक्रमभेदमात्रपरतया प्रागेव वर्णितमिति दिक् किं
च योगप्रकारेण योगानपेक्षमार्गान्तरप्रतिपादनमसंगतं न च त
त्त्वकोऽत्र कश्चिद्ब्रह्मवर्त्तते संभवतिवाऽकृतप्रकारतो योगी वा समदर्श
न इति वा पराध्याहारोऽप्यसंगत इति दिक् २९ ॥
इयं सिद्धनिरुत्तरसंयमस्य योगि आत्मैकदर्शितां नः स्वरूपमाह॥
यो येन प्रधानजयांते नपरमसंयमेन युक्तः परमात्मनि योगितः आत्
मा येन ईदृशः सर्वत्र समं हेयोपादेयापेक्षाबुद्धिहीने निर्विकारं दर्शनं
ज्ञानं यस्य सः आत्मानं स्वकर्मयोगार्थ सङ्कमप्रयुक्ता सर्वेषु भूतेषु च
नदेशभूतसर्गप्राणिषु स्थितं वर्त्तमानमीक्षते वपनरात्मन्यस्मिन्नेव

जीवशरीरेसर्वभूतानिएधिष्ठ्यादिप्रथानांतानियोग्यताएतासनोक्तेनतं
यमप्रकारेणात्मात्मांकरोति [illegible]
[illegible] २९ ॥

इत्थंसिद्धनिष्पन्नसमाधेःकर्मयोगिनो **रामकंठीटीका** लोकोत्तरंव्यवहारंप्रतिपादयित्
माह-यथोक्तेस्मिन्कर्मयोगेयुक्तःसमाहितः सर्वत्रसर्वदासर्वथावहितचि
त्तोयोगी आत्मानमद्वयचिन्मात्रैकलक्षणंतथोक्तस्वरूपंसर्वभूतेषुपरस्प
रंभिन्नतेनावस्थितेषुचराचरेषुप्राणिषुस्थितंपश्यति यदात्मनःसमान
चिन्मात्ररूपमेकंतदात्मकान्येवभूतानिप्रेक्षतइत्यर्थः २९ ॥

एवंसर्वदासिद्धसमाधेःकर्म **लासिकी** [illegible]**टीका** योगिनश्चेतनवर्गव्यापिलक्षणंब्रह्मसंस्पर्शमाह
चतुर्भिः योगेनयत्रोपरमतेचित्तमित्याद्युक्तलक्षणेनसमाधिनायुक्तात्मावदितस्व
भावः अतएवसर्वत्रभूतमात्रे समंनिर्विशेषंब्रह्मैवपश्यतीतिसमदर्शनः
सन् आत्मानमद्वैतचिन्मात्रैकलक्षणं सर्वेषुभूतेषुपरस्परंभिन्नेषु ब्रह्मा
दिस्थावरांतेषु तथोक्तस्वरूपस्वात्मनिसर्वाणिभूतानीक्षते अभेदेनसा
त्मात्करोति सर्वत्रचेतनवर्गस्वात्मभेदमेवपश्यतीत्यर्थः सर्वेषुभूतेष्वात्मा
नेमादकतयानुप्रविशंतंभावयेत् आत्मनिचग्राह्यतयाज्ञानदाशसर्वा
णिभूतान्येकीकुर्यात् अतश्चसमदर्शनत्वंजायतेइति [illegible]
[illegible] ॥ २९

पंचोलीटीका

इदानींयोगस्यफलंब्रह्मैकत्वदर्शनेसर्वसंसारविच्छेदकारणंतंदर्शयति
सर्वेति योगयुक्तांतःकरणःसर्वभूतस्थंसर्वेषुभूतेषुब्रह्मादिस्थावरांतेषु
विषयेषुसमेनिर्विशेषंब्रह्मात्मैकत्वेआत्मानंपश्यतिच पुनःसर्वभूतानि
आत्मनिपश्यतियःसर्वत्रसमदर्शनः २९ ।

रामवीरसमिद्धांयिनी ॥

सर्वभूतस्थमिति योगेकर्मकौशललक्षणेयुक्तःसावधान आत्मा
चिंतयस्यसनातनः तथासर्वत्रसुहृन्मित्रादौसमंतुल्यंदर्शनंयस्य
स सुहृन्मित्रत्वादिकंविशेषोपाधिंविहायानतायिंनतेषांसर्वेषांवधा

ईतायां सामान्यं निमित्तमाश्रय स्वयमौहितिं प्रयोजिकां पश्यन्नि
तियावत् एतद्धि योगमहत्त्वेनच कर्मकौशलसमत्तोभयलक्षण
योगमहत्याद्दृष्टस्यपीवसीयते सचात्मानं परमेश्वरं सर्वभूतेषु स्थि
तमीक्षते साक्षात्करोति सर्वभूतानि चात्मनि परमेश्वरे स्थितानी।
क्षते साक्षात्करोति मोक्षोपि तस्यकरस्थ एवेति तात्पर्यं २९॥

मधुभाष्य

सर्वभूतस्थमिति सर्वभूतस्थमात्मानं परमेश्वरं सर्वभूतानि चा
त्मनि परमेश्वरे तंच परमेश्वरं ब्रह्मनत्वगाद्यावैश्वर्यादिनासाम्ये
न पश्यति तथोक्तं आत्मानं सर्वभूतेषु भगवन्तमुपस्थितं अपश्य
त्सर्वभूतानि भगवत्यपिचात्मनीति समं सर्वेषु भूतेषु तिष्ठन्तं पर
मेश्वरमिति फलमाह २९॥

भाषा अनुवाद

ब्रह्म साक्षात्कार रूप अपरोक्ष ज्ञानकैसा होता सो देखावते है कि योग युक्तात्मा पुरुष ब्रह्म से ले स्थावर पर्यन्त मे समदर्शी सर्वभूत कहे प्राणी मात्रमे अपनेको देखना और यावत् जीवों को भी अपने मे देखताहै अर्थात् अविद्याकृत देहादि भेद दूर होय ब्रह्ममय ज्ञानवान सर्वत्र समदर्शिन होता है २९

दोहा

सभीभूत मह आत्मको आत्म मह सभभूत देखें योगयुत चित सो सभमे समदृशाभूत २९॥

योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति तस्या
हंनप्रणश्यामिसचमेनप्रणश्यति ३० ॥

शाङ्करभाष्यं

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते योमामिति यो मां पश्यति वा
सुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु भूतेषु पश्यति सर्वं च ब्रह्मादिभूतजातं
मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनः अहमीश्वरो न प्रण
श्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति स च विद्वान्मम
वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वा
त् स्वात्मा हि नामात्मनः प्रिय एव भवति ३० ॥

आनन्दगिरिकृतटीका

उक्तस्यैकत्वज्ञानस्य फलविकल्पनशङ्कां शिथिलयति एतस्येति त
दैकत्वदर्शनमनुवदति योमामिति तत्फलमिदानीमुपन्यस्यति त
स्येति ज्ञानानुवादभागं विभजते योमामिति तत्फलोक्तिभागं व्याच
ष्टे तस्यैवमिति अनेकत्वदर्शिनोपीश्वरो नित्यत्वान्न प्रणश्यतीत्याशंक्या
ह नेति अहं परमानन्दो न तं प्रति परोक्षो भवामीत्यर्थः स चेत्यादि व्याच
ष्टे विद्वानिति विद्वानिवाविद्वानपीश्वरस्य न नश्यतीत्याशंकांके नेत्या
दिना अविदुषस्य स्वरूपेण सतोपि व्यवहितत्वादविषयता नष्टप्रायतेत्य
र्थः ईश्वरस्य विदुषश्च परस्परमपरोक्षत्वे हेतुमाह तस्य चेति आत्मैकत्वेपि
कथं मिथः परोक्षत्वं तत्राह स्वात्मेति ३० ॥

स्वामिकृतटीका

अनेनविविक्तस्त्वंपदार्थइतिदर्शिता तत्पदार्थंदर्शयन्एवंभूता
त्मज्ञानस्यसर्वभूतात्मत्वरूपामद्भुतामनेकमुख्यंकारणमिमाह यइति
मांपरमेश्वरंसर्वत्रभूतमात्रेयःपश्यतिसर्वंचप्राणिमात्रंमयियःपश्य
तितस्याहंनप्रणश्यामिअदृश्योनभवामिसचममादृश्योनभवतिप्र
त्यक्षोभूत्वाकृपादृष्ट्यातंविलोक्यानुगृह्णामीत्यर्थः ३० ॥

पिशाचभाष्य

एतस्यैकात्म्यकत्वदर्शनस्यफलमुच्यते योमांवासुदेवंसर्वत्रसर्वभूते
पश्यति षुयः सर्वंचब्रह्मादिभूतजातंमयिसर्वात्मनिपश्यतितस्यैवमात्मै
कत्वदर्शिनः अहमीश्वरोनप्रणश्यामिनपरोक्षतांगमिष्यामिस

गी॰
टी॰
६

वमेव प्रणश्यति न परोक्षीभवति तस्य चाहमात्मैकत्वात् स्वात्मा हि
नामात्मनः प्रकाश एव भवति ३० ॥

रामानुजभाष्यं

यो मामिति । ततो विपाकदशापन्नो मम साधर्म्यमागतः निरंजनः
परमं साम्यमुपैतीत्युच्यमानेन सर्वस्यात्मवस्तुनो विधूतपुण्यपापस्य स्व
रूपेणावस्थितस्य मत्साम्यं पश्यन् यः सर्वमात्मवस्तुनि मां पश्यति सर्वमा
त्मवस्तु च मयि पश्यति अन्योन्यसाम्यादेकतरदर्शनेनान्यतरमपि दृश्यमि
ति पश्यति तस्य स्वात्मस्वरूपं पश्यतोऽहं तत्साम्यात् न प्रणश्यामि नादर्शन
मुपयामि ममापि मां पश्यन्मत्साम्यात्स्वात्मानं मत्सममवलोकयन्तं तृ॰
नादर्शनमुपयाति ३०॥ अभिनवगुप्तकृतटी॰

[illegible] सर्वत्र [illegible] यस्तु [illegible] सर्वेदेवेन [illegible]
[illegible] कौरूपीनं [illegible] सर्वदर्शनवानाप्ते
[illegible] निरन्तरसमेदमादविहारणादिसर्वकालेदेवान्या
दिव्य[illegible]जीवनम् [illegible] ३० ॥

परमार्थप्रपाटीका

अथ सर्वसमष्टिरूपेण सर्वात्मकत्वेन [illegible] मत्प्राप्तिमाह यो
मामिति यः पुरुषः मां सर्वसमष्टिरूपं हिरण्यगर्भं सर्वत्र सर्वव्यष्टिरू
पेषु सर्वशरीरेषु पश्यति तथा सर्वं व्यष्टिरूपं मयि समष्टिरूपे पश्यति
तस्य पुरुषस्याहं न प्रणश्यामि सदैवानुभवारूढो भवामि स च पुरुषो
मे न प्रणश्यति मत्कृपाकटाक्षगोचर एव तिष्ठतीत्यर्थः ३०॥

वनमालीटीका

एवं दर्शने फलमाह यो मां न त्यजेत्यत्र प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति यो
योगी मां सर्वेश्वरं सर्वान्तर्यामित्वेन सर्वव्यापकत्वेन च सर्वत्र सर्वभूतेषु
पश्यति सर्वं च चिज्जडं मयि पश्यतीति एवं सम्यक् कस्यानुवादः आ
त्मपदस्य सम्यग्ज्ञानभ्रान्तिनिरासाय तस्याहं न प्रणश्यामि स तत्त्वविहितो
विप्रकृष्टो वा नादृश्यो भवामि तस्य दर्शनपरोक्षतां न व्रजामि स च मे न प्रणश्य
ति मत्तो व्यवहितो विप्रकृष्टो वा परोक्षो वा मम परोक्षतां नापि न व्रजति अ
यं भावः मत्स्वरूपादाविर्भूतस्य योगस्य [illegible]

एवं चार्थः सर्वत्रैव क्रियते । यः पश्यति [illegible]
तथा हि परमात्मनः सर्वगतं स्वरूपं नोपपद्यते यस्य परमात्मा
स्वरूपं प्रकर्षेण [illegible] सर्वगतं तथा सनातन
नित्यत्वात्मा [illegible] तथा [illegible] पश्यति सर्व
मात्मस्वरूपात्मपूर्णाह: [illegible]
[illegible] अस्माकं [illegible] भावः
[illegible] पश्यति तत्रैवाभ[illegible]
[illegible] ३० ॥

महस्ताप्रतिबद्धाविच्छिन्नप्रेमप्रवाहभक्तस्ययोगिनोहं स्वनिर्विषयो
नभवामि किंतु तद्वशीभूतः करामलकवत्सर्वं तत्तेपरोक्षतयातिशमि
ममानेन ब्रह्माण्डे दयादिकरणेनानाविधमदाराधकानां फलदाने इह
नियहे भक्तहेदानामनुयथासक्तस्या ... काशवदुदासीनस्यवप्रेमरस
नयाहृदयेवद्धमहेद्वि: सोप्यदर्शनमुपेत्तणीयतानवजनति किंतुतस्यजी
वनमुक्तस्यमदेकवद्धानुरागस्ययोगतेमेवहामीति २० ॥

दुमहेवजयन्तीटी·

एवमात्मज्ञानद्वारेणयोगविपाकदेशामुक्तेदानीतंनोपाधिकदशामा
ह योमामिति यएवमतोयोगीसर्वज्ञस्मादिस्थावरांतेषुचेतनाचेतन
रूपेषुचेतनमात्रेष्वात्मानमहमयंरूपंसर्वचेतनाचेतनात्रयामिनंसर्व
नियंतारंसर्वेश्वरंपश्यति चपुनर्मयिसर्वव्यापकरूपेसर्वाधारसर्वकारणे
पुरुषोत्तमेसर्वचेतनाचेतनपदार्थमात्रंपश्यति तस्यैवंभूतेनमत्स्वरूपंपश्य
तोमद्धीनस्थितिप्रवृत्तिकस्यमदनन्यभक्तस्यमदेकजीवनस्ययोगिनोः
हमहमर्थाभिन्नरूपोविश्वोद्भवस्थितिलयलीलः सर्वनियंतासर्वान्तरात्मा
सदेववेदनेनाप्रणश्यामिसुदर्शनोनभवामिसर्वेश्वरोभवरूपंपश्य
न्मदनन्यभक्तोमेममैश्वरस्यनप्रणश्यति सुदर्शनोनभवति २० ॥

एवंशुद्धत्वंपदार्थंनिरूप्यशुद्धं मधुसूदनीटीका तत्पदार्थंनिरूपयति ॥

योयोगीमामीश्वरंतत्पदार्थमशेषप्रपंचकारणमायोपाधिकमुपा
धिविवेकेनसर्वप्रपंचेस्फुरणेनस्फुरणरूपेणचानुस्यूतंसर्वोपाधिवि
निर्मुक्तंपरमार्थसत्यमानंदघनमनंतंपश्यति योगेनेनप्रत्यक्षेणापरो
तीकरोति तथासर्वप्रपंचजातंमायायामध्यारोपितंमद्भिन्नतयास्वरूपान्वे
यप्युद्विते नैवपश्यति तस्यैवंविवेकदर्शिनोऽहंतत्पदार्थोभगवान्प्रणश्यामि
ईश्वरःकश्चिन्मद्भिन्नोस्तीतिपरोक्षज्ञानविषयोनभवामि किंतुयोगजा
परोक्षज्ञानविषयोभवामि यद्यपिवाक्यजापरोक्षज्ञानविषयत्वंच प
दार्थाभेदेनैवतथापिकेवलस्यापितत्पदार्थस्ययोगजापरोक्षज्ञानवि
षयत्वमुपपद्यतएव एवंयोगजेनप्रत्यक्षेणमामपरोक्षीकुर्वन्सर्वमेव
प्रणश्यतिपरोक्षोनभवतिसाक्षात्कारमसविद्यानतिप्रियत्वात्स
र्वदामदपरोक्षज्ञानगोचरोभवति येयथामांप्रपद्यंतेतांस्तथैवभजा

गी॰ महमिसूके: तथैवशरणप्पाख्पभीक्षप्पानस्पगुणविष्टिरेशतिभगवतो
टी॰ के: अविद्वांस्तस्मान्नेनमपि मेतेभगवंतेनपश्यंति अतोभगवानपश्य
अ त्वपितेनपश्यंति सपनमविद्दितोनभुनक्तीतिशुतेः विद्वांस्तुसदेवम
१ भगवतो विद्दितोनुग्रहभाजनमित्यर्थः [illegible]
[illegible] ॥

131

मदानंदीटीका

तेपदार्थेनिरूप्यैवंशुद्धंतत्त्वंकामिइय विमुढस्तमदार्थोपिहरिणात्वनि
रूप्यते । योयोगीतत्पदार्थमांजगज्जन्मादिकारणं मायोपाधिविवेकेन
समस्तेजगतीश्वरं २ सतास्फुरणरूपेणानुस्यूतंनिरुपाधिकं अद्वयानं
दमात्मानमपरोक्षीकरोतिवै तथामवैजगत्सर्वमारोपितंमायायतत्ते
नस्यैवदर्शितोनाहंतमदार्थोमहेश्वरः ३ परोक्षज्ञानविषयोभवाम्मि
स्वात्मतांगतः ईश्वरकश्चिदस्मीतिमतश्चेतिपरोक्षधीः ४ पापरामो
त्सदानतपियासाविश्रणपश्यति विद्वान्सदपवास्तिनपरोक्षोममा
पिसः ५ अविद्वांस्तनत्तेनपश्यतीश्वरमात्मतः अतोनतेपरेशोपिपश्य
त्रपिप्रपश्यति ६ तानीतिमापरोक्षत्वादीशानुग्रहभाजने ८ १० ॥

नीलकंठीटीका

अस्यात्मैकत्वदर्शनस्यापिफलमाह योमामितिसर्वज्ञासच्छूह:अ
सगात्मपरः योयोगीआत्मानंसर्वत्रपश्यतिसर्वचात्मनिपश्यतितस्य
योगिनःतानश्चात्मानशरणशपतिश्चदर्शनेनआकृतिशात श्चात्मानस्य
नश्विरोभवति तत्कनहमनात्ताज्ञानस्यबीजाभावेनपुनरुदयासंभ
वादित्यर्थः नत्रुकार्यकारणमेधानाभिमानिनाशुक्तिरूप्यवद्धमएव
धप्तेननदभिमानमागमर्वकेतातस्याधिष्ठानभूतेब्रह्मवातिरोधाभि
बुद्धेस्तत्पतपातिनात् अस्मदृष्यानरूपकजीवस्यतिरस्योक्तेदोभव
तीत्याशंकाह सचमेनप्रणश्यतीतिसचविद्वान्ममतमप्रणश्यति
नतिरोभवति मदभिन्नत्वात् भवेदेतदेवयदिजीवोमयिअध्यस्तोवा
ममविकारोवाभवेत् तदातिरस्योकेदश्चाप्रयात् अहमेवतमः न
त्वमस्पहेवत्साद्मिश्रयमात्मायब्रह्मादिशास्त्रात् तस्मादुक्तमुक्तं
सचमेनप्रणश्यतीति ३० ॥

एवं संप्राप्तपरसमाधेरात्मवि **आनंदीटीका** षयां स्थितिं लक्षयित्वा परमात्मविषयां वृत्तिमीश्वरप्रणिधा

नहेतुकाम ह ॥ सर्वत्र यः परमयोगी संयमप्रज्ञा सर्वेषु भूतेषु वर्तमानः मां वासुदेवमन
न्तमितं परमेश्वरं सर्वानुग्राहकं सर्वत्र पश्यति सर्वेषु भूतेषु स्थितं मां ला
करोति सर्वं भूतवर्गं च मयि पश्यति महाप्रलये मोक्षप्रवर्तमानाणि पश्यति
जगतां स्वयं प्रसूतत्वसंभवात् तस्याहं न प्रणश्यामि इत्यादि समस्तसुगम
मेवायं प्राप्तमर्थः ३० ॥

रामकंठीटीका

यथोक्तस्वरूपे स्वात्मनि सर्वभूतानि विगलितान्योन्यभेदानि पश्यतीत्य-
न॰ त्यात्मा सर्वभूतानां चाभेददर्शनप्रतिपादनपरमेतद्यथा चैतत्संभवति
तथा प्रतिपादितमेव प्राक् तथापि स्फुटत्यर्थे पुनरुच्यते आत्मा नामाय
स्रावकः स्वग्राह्यग्राहकभूतशून्यतादिसकलविकल्पविरहितविशुद्ध
संवित्प्रकाशैकलक्षणात्मस्य संवेदितत्वं नामाख्यभिचारी गुणस्तेन
यद्यत्संवेदितं तत्तत्संवेद्यमानमेव तेन तद्रूपेणात्मानं लभते ३० ॥ :: न॰

अथ सिद्धसमाधेः सकाशाद् **लातिकीवसन्तनीटीका** अद्भुतस्य विशेषमाह ॥
योयोगी सर्वत्र भूतमात्रे मामपकलतमहैतस्वरूपमात्मानं पश्यति
संवेदयति तथा सर्वं च प्राणिजातं मयि पश्यति तस्याहं न प्रणश्यामि
मितयोगिनः सर्वदृश्यो न भवामि भुत्यानाभावात् स च ममैत्यस्य स्पादृशो
न भवति स्वरूपभूतत्वात् न चैवं विधो विधिकिंकरो योगभ्रष्टो वास्यादि
त्याह ३०

पंचोलीटीका

एतस्यात्मैकत्वदर्शनस्य फलं दर्शयति यः मां सर्वस्यात्मानं सर्वत्र
सर्वेषु पश्यति सर्वं च ब्रह्मादिभूतमात्रं मयि विश्वात्मनि आरोपितं पश्य
ति तस्यैवं आत्मैकत्वदर्शिनः अहमीश्वरो न प्रणश्यामि न परोक्षतां गा-
मिष्यामि स च विद्वान् मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य
च मम च एकात्मकत्वात् एवं श्लोकार्थं सम्यग्दर्शनमनुष्ठानफलं मोक्ष
विधानं नम्रतिबंधयाति दर्शयति ३०

योमामिति यःकर्मयोगीमांपरमेश्वरंसर्वत्रस्थानेवर्तमानंपश्य
ति साक्षात्करोति मयिचसर्वंजगत्पश्यति तस्यकर्मयोगिनोहं
नप्रणश्यामिनदृश्योभवामि सचकर्मयोगीममनप्रणश्यति
अदृश्योनभवति प्रत्यक्षोभूत्वाहृत्पादस्यान्तेविलोकनयभागि
नंकरोमीत्यर्थः ३०॥

मधुभाष्य

योमामिति तस्याहंनप्रणश्यामीतिसर्वदायोगक्षेमवहःस्या
मित्यर्थः सचमेनप्रणश्यतिसर्वदामद्भक्तोभवति सत्यपि
स्वामित्वेरक्तत्यन्मथः एवंभृत्येष्वभजन्त्यभृत्यइतिहिप्रसि
द्धिः उक्तंचसर्वदासर्वभूतेषुसमंमांयःप्रपश्यति अचलातस्य
भक्तिःस्याद्योगक्षेमंवहाम्यहमिति गारुडे एतदेवस्पष्टय
ति ३०॥

भाषा अनुवाद

अब पूर्वोक्त ज्ञानीको जो फल होना सो कहते हैं कि साक्षा
त् परमेश्वर जो मै तिसको यावद्वस्तु मात्र सब मे और सकल
यो कुछहै सो मेरे मे यो देखता है तो उसको हम अदृश्य न
हीं औ हमको वह भी अदृश्य नही अर्थात् हम प्रसन्न होय
कृपादृष्टि से उसपर अनुग्रह करते है ३०

दोहा

जो मोहि देखें सर्व मह सर्वलखें मो माहि सो दूर नहि मोह
सें मे अदृश्य नहि ताहि ३०॥

133

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा
वर्त्तमानोऽपि स योगी मयि वर्त्तते ३१॥

शांकरभाष्यं

यस्माच्चाहमेव सर्वात्मैकत्वदर्शी इत्येतत् पूर्वश्लोकार्थं सम्यग्द
र्शनमनूद्य तत्फलं मोक्षोऽभिधीयते सर्वेति सर्वथा सर्वप्रकारैर्व
र्त्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्तते नित्यमुक्त
एव सः न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः ३१॥

आनन्दगिरिकृतटीका

विद्वदीश्वरयोरेकत्वमनुवादेन विद्याफलं विवृणोति यस्माच्चेति तस्मा
देकत्वदर्शनार्थं प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलवि
धिरिति मत्वाह इत्येतदिति योगादिरहितस्य यमनियमादिसंस्कारवतः
वैधप्रवृत्त्यसम्भवेऽपि नावश्यं क्रमत्यागेनेत्याह सर्वथेति प्रतिभासतो
ऽपि यथेष्टचेष्टांगीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीतिक इत्याचार
प्रतिबन्धादित्याशंक्याह न मोक्षमिति ३१॥

स्वामिकृतटीका

न चैवंभूतो विधिकिंकरः स्यादित्याह सर्वभूतस्थितमिति सर्वेषु भू
तेषु स्थितं मामभेदमास्थितो यो भजति स योगी ज्ञानी सन् सर्वथा कर्मपरि
त्यागेनापि याज्ञवल्क्यादिवत् कुर्वन्नपि जनकादिवत् निषिद्धेनापि दत्ता
त्रेयादिवत् वर्त्तमानोऽपि मदेकेन मय्येव वर्त्तते मुच्यते न तु भ्रश्यतीत्यर्थः ३१

पैशाचभाष्यं

यस्माच्चाहमेव सर्वैकात्मकत्वदर्शी इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनू
द्य तत्फलं मोक्षोऽभिधीयते सर्वभूतस्थितमित्यादिना सर्वथा सर्वप्रका
रैर्वर्त्तमानोऽपि सम्यग्दर्शी योगी मयि विष्णोः परे देवे नैव वर्त्तते नित्यमुक्त एव
सः न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः ३१॥

रामानुजभाष्यं

ततोऽपि विपाकदशामाह सर्वभूतस्थितमिति योगदशायां सर्वभूत
स्थितं मामसंकुचितज्ञानैकाकारतया एकत्वमवस्थितः प्राकृतभेदप
रित्यागेन यः सदा भजते स योगी व्युत्थानकालेऽपि यथा तथा वर्त्तमानः स्वा
त्मानं सर्वभूतानि च पश्यति स्वात्मनि सर्वभूतेषु च सर्वदा मत्साम्यमेव पश्य

गी॰
टी॰
६

तीत्यर्थः ३१ ॥

अभिनवगुप्तकृतटीका

ज्ञानाभ्यासोत्कार्यकारिकत्वात् तस्याहि परमात्मनः सर्वगतस्य योगेन प्राप्तिस्तस्य परमात्माप्यलाभिनः स्वरूपप्रकाशकारणाभावात् यद्वेदस्य तत्त्वेनावस्थितस्य तत्त्वपरमात्मनि निविष्टभाति ३१ ॥ यस्येवंज्ञानं

परमार्थप्रपाटीका

अथैतद्दनेनतरं सर्वं दृश्यजातमात्माकारेण पश्यतीत्याह सर्वभूतेति । यः सर्वभूताकारेण स्थितं एकत्वमास्थितः सन् भजति अनुवर्तते स वर्तमानोऽपि नामरूपाकारेण स्थितोऽपि मयि वर्तते महाकाशो भवति तदुक्तं पुराणमुख्यामड्डमनुज्ञमानं गतं रगमेव गत्वा ज्ञात्रुहिरसनव्ययोमाहिषस्तुवे महाभूतोद्भूतसविड्डटपिपीलादिसकलं नवेतन्मात्सतस्मात्रतिपुत्रतोमनयनयारिति श्रुतिरपि यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति भाष्यं यस्य विज्ञानतो विज्ञानवतः पुरुषस्य सर्वाणि भूतानि सर्वभूतात्मकं विश्वमात्मैवाभूत् भूतभावनातो हि येन आत्माकारमेव जातं तस्य एकत्वमद्वैतं अनुपश्यतः को मोहः मायाविलासरूपमस्तानकुतः तथा तस्य कुतः शोकश्च कुत इत्यर्थः ३१ ॥

वनमालीटीका

सर्वभूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु नियामकत्वेन व्यापकत्वेन वा स्थितं मे य एकत्वं केवलं जीवन्मुक्तिमास्थितो भजति तेन यथा यद्वद्विक्रियावा सर्वान्सन्नधीशर्विकाले हसंततिमपि करोति स योगी सदा सम्यग्परोत्तमुक्तो यावच्छरीरादिकं वर्तते तावत्स्वास्थ्यकर्मेशावल्यात्सर्वकर्मत्यागेन यथावल्कादिवत् विहितेन वा कर्मणा जनकादिवत् प्रतिषिद्धेन वा कर्मणा दत्तात्रेयजडभरतादिवत् सर्वथा येन केनापि रूपेण । वर्तमानोऽपि मत्प्रसादेन निश्शमस्व स्वरूपानंदमग्नस्वरूपाकारकाविद्यत्वेनापरीतीभूतेन मय्येव जले मत्स्यवद्रमते विहरति कृतकृत्यस्य कार्यं किंचिन्नास्तीत्यर्थः ३१ ॥

ऊसमवैजयन्तीटीका

ततोऽप्यधिकदृशामाह सर्वभूतस्थितमिति सर्वभूतस्थितम् सर्वेषु निखिलेषु भूतेषु चेतनेष्वन्तर्यामिरूपेण तिष्ठतीति सन् यानन्तिखिलचेतना

चेतना

विद्या साधकरूपमेवैकत्वमागतं सर्वगतं विद्
स्वभावस्यागतो पिन लिप्यते ३१

येन नानान्तःशरीरस्थानेमामहमर्थाभिन्नेन गुणशक्तिस्वरूपकं सर्वेश्वरं
पुरुषोत्तमं योयोगी पीयकत्वे सकलब्रह्मादिस्थावरान्तेषु वेतनाचेतना
त्मकेषु विशेषकपेषु सर्वस्वतन्त्र्यामित्वेणानिष्ठतीये भावनया।
कत्वे महापरमेश्वरा वनारायणादेवमनुष्याद्याकारेर्गौरश्यामादिरूपे
श्वभिन्नभिन्नत्वेऽपि तत्र तत्रेश्वरस्वरूपएकपवेति भावनये कत्वं पद्वा सर्वे
षामनन्तस्वरूपाणां जीवात्मनां सहरनरादिशाकृत्नदेहाद्येः पृथक्त्वस्य
कृ[illegible]। [illegible]
गुणशक्त्यादिविशिष्टैर्भिन्नभिन्नदृश्यमानत्वेऽपि प्रकृतिसंबंधरहि
तत्वेसतिसात्स्वरूपेण स्वाभाविकः समानएव स्वरूपत्विति भावेन ए
कत्वम् आस्थितः सन्भजते सेवते ध्यायति वा सर्वदृशो योगी सर्वथा
सर्वप्रकारेण वर्तमानोऽपि ध्यानकाले व्युत्थानकाले वेष्टमनिष्टं कर्म
कुर्वत्रपि मयि प्रविसे मद्ये सच्चिदानंदरूपे वर्तते निष्ठति वर्तमानदेहे
स्थितोऽपि मद्रावे एव तिलत्वेणो मोक्षेतिष्ठतीत्यर्थः ३१॥

[1] आसमन्तात् विचारेण आस्थितः

एवं त्वंपदार्थं तत्पदार्थं च शुद्धं निरूप्य तत्त्वमसिवाक्यार्थं निरूपयति ॥

मधुसूदनीटीका

सर्वभूतेष्वधिष्ठानतया स्थितं सर्वानुस्यूतं सन्मात्रं मामीश्वरं तत्
पदलक्ष्येण त्वंपदलक्ष्येणाहमेकत्वमत्यन्ताभेदमास्थितः घ
टाकाशो महाकाश इतिवदुपाधिभेदनिराकरणेन निरस्तभेदो भजति [छि]
अहं ब्रह्मास्मीति वेदान्तवाक्यजेन साक्षात्कारेणापरोक्षीकरोति सो
ऽविद्यानिवृत्त्या जीवन्मुक्तः कृत्य एव भवति यावत्तस्य बाधि [कृत]
तानुवृत्त्या शरीरादिदर्शनमनुवर्तते तावत्प्रारब्धकर्मवशात् स
र्वकर्मत्यागेन वा याज्ञवल्क्यादिवत् विहितेन कर्मणा वा जनकादि वत् प्रतिषिद्धेन कर्मणा वा
वत् सर्वथा येन केनापि रूपेण वर्तमानोऽपि व्यवहरन्नपि स योगी ब्रह्मा दत्तात्रेयादि
हमस्मीति विद्वान् मयि परमात्मन्येवाभेदेन वर्तते सर्वथा तस्य मोक्षं
प्रति नास्ति प्रतिबंधशंका तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां
स भवतीति श्रुतेः देवा महाप्रभावा अपि तस्य मोक्षाभवनाय नेशा
ते किमुतान्ये तत्त्वज्ञानस्यार्थः वस्तुविदो निषिद्धकर्मणि प्रवर्तकयोः।
रागद्वेषयोरसंभवेन निषिद्धकर्मासंभवेऽपि तदंगीकृत्य ज्ञानस्तुत्यर्थमि

गी.
टी.
स.

मिदमुक्तं सर्वं यावन्नेमानोपीति हत्वापि स इमांल्लोकान्न हंति न निब
ध्यत इति वत् ॥ [illegible] ॥ ३१

सदानंदीटीका

तत्त्वंपदार्थमुक्त्वैवमखंडार्थो निरूप्यते ब्रह्मादिस्थावरांतेषु भूतेषु
स्थावरेष्वयः १ निर्विशेषे चिदानंदे मासहंने निरंजने गुणरूपक्रियाव
स्तुविक्रियाद्यकर्त्तृके २ भेदमस्कोभ्यजस्तद्वस्थितिमात्रतयास्थितं त
मद्वैकलक्ष्यमखंमोलक्षणाभिदिएा ३ सहैकत्वमेतोमिइममेना
भेदमास्थितः श्रहंब्रह्मेति वेदांतवाक्यजज्ञानवत्तया ४ श्रपरोक्षीकरो
मात्मुस्मकाःविद्यावतत्कृतं कृतकृत्यमतयासोपंजीवन्मुक्तउदारधीः ५
यावत्तस्य शरीरादिदर्शनं वानुवर्तते श्राभासमात्रं तु यस्य यथा स्वाप्नस्य
दर्शनं ६ प्रारब्धकर्मशावल्लेनावल्कर्माणि वा भजन् कुर्वन्यावद्विहितं क
र्म निषिद्धं वा समाचरन् ७ येन केनापि रूपेण योगीव वर्तत्रपि ब्रह्मा
स्मीति धिया विद्वान् मय्येव परमात्मनि ८ पंकेनवर्तते नित्यम्हेतेवसर्व
पदे निमग्नकस्वभावत्वात्कर्मभिर्न वलिप्यते ९ धर्माधर्मावतीतेन हि
पदे नित्यं विराजते १० यस्मादारब्धकाकदाचिल्मदेरागद्युत्खोदया
त्स्यकत्वमसीति नेगमशिरोत्नात्मबोधाश्रिता हंगधास्ताममशेषभे
दजनकं धीराः परं विद्वते तिष्ठमात्मपदं श्रद्धेत मतिंशक्त्वभजेहं सदा ॥३१॥

नीलकंठीटीका

यस्मात्सर्वात्मैकत्वदर्शी ग्रहमेवग्रनेनानात्मतः अतिवध्यतइत्याह
सर्वभूतेति सर्वोपादानतया सर्वेषु भूतेषु समानरूपेण स्फुरणरूपेणाव
स्थितं मां परमात्मानं एकत्वं जीवब्रह्मणोरैक्यमास्थितः सन् भजति नि।
र्विकल्पेन समाधिना सेवते स योगी व्युत्थानदशायां प्रारब्धकर्मवशात्

बाधितानुवृत्त्यादेहमात्रः सर्वथा सर्वप्रकारेण यात्तवल्क्यादिवत्क
मा र्मयोगेनवावसिष्ठजनकादिवद्विहितकर्मणावादत्तात्रेयादिवन्निषिद्ध
कर्मणावावर्तमानोपिअवहरन्नपिमय्येववर्ततेनमत्तश्च्युतोभवति
यतोदेवेभ्योपिनास्यभयमितिश्रूयते तस्यहनदेवाश्चनाभूत्याईशत
आत्माह्येषांसभवतीति च नेनवयमप्येषे देवाश्चपितस्यब्रह्मविदः
अभूत्यैअनैश्वर्यायनईशतेनसमर्थाभवंति यतोयमेषामात्मेतिश्रु
त्यर्थः सतथतःसंसारीसर्ववद्वर्ततीत्यर्थः ३१ ॥

आनंदीटीका

एकत्वमास्थितः कर्मभोगार्थंनानाशरीरस्थोप्यहमत्रैकएवत्याय
भूषणोक्तप्रकारसर्वव्यापीभोक्तेति सयोगीसर्वथामनसंधारयन्यो
मांपरमेश्वरंभजति सयोगीसर्वथासर्वेषांकर्मभोगार्थं संक्रांताना
तेषांतेषांशरीराणांप्रकारैः कायिकैर्वाचिकैश्चवर्तमानोपिमयिवर्तते
मत्सायुज्यमाप्तः व्याख्यातंचैतत् संस्कारमात्रात्कारात्सर्वज्ञाति परि
ज्ञानमितिसूत्रे परत्राप्येवमेवसंस्कारमात्रात्कारात्सर्वज्ञातिसंवेदनमि
ति [illegible] ३१ ॥

रामकंठीटीका

संवेद्यमेतनाचनिर्विकल्पावस्थाप्रविकाभवति तेनयद्यत्किंचिद्यदा
यदायत्रयत्रयेनयेनप्रमात्रासंवेद्यते तत्तदहयानंतचिन्मात्रस्वरूपमि
त्यात्मनः संवेदितुर्वेद्यानांचसर्वभूतानांनास्तिकश्चिद्भेदोवास्तवः केव
लमचिंत्यपारमेश्वरमायोत्त्राविता वेद्यवेदकविकल्पः सर्वमिदमन्योन्य
विभिन्नतयावभासयति सचपरमेश्वरप्रसादादुल्लसितयाविद्याख्यया
दृष्ट्यातत्वविच्छिन्नात्दशोविभाव्यमानोयदाविगलति तदाभिन्नसेत सा
गरसलिलवत्सर्वमिदमात्मतयैवैकेनावभासते ज्ञानकर्मसमुच्चयानुष्ठा मु
नात्मनिचास्मिन्महायोगप्रसादेन विद्याशक्तिरेवाधिकृतइतिकर्मयोगी
सर्वत्रस्थावरजंगमेव[illegible]भूतग्रामेसमदर्शनेहेतात्मक[illegible]तत्वेकदर्शीस्व
कैः [illegible] ॥

लासिकी[illegible]टीका

सर्वभूतेषुमामभेदेनयोभजते सयोगीसर्वथाकर्मत्यागेनवर्तमा

नोपि मय्येववर्त्तते नतस्यभ्रश्यतेइत्यर्थः ३१ ॥

पंचोलीटीका

सर्वभूतस्थितमिति यः सर्वभूतस्थितं मां एकत्वमास्थितः सर्वत्र। अभेदबुद्ध्या भजते स योगी सम्यग्दर्शी सर्वथा सर्वप्रकारैः कर्मस्योग नवापि वै सर्वेपरेषु देववर्त्तते न केनचित् प्रतिषिध्यत इत्यर्थः ३१ ॥

रणवीरसमिद्धोधिनी ॥

सर्वभूतस्थितमिति यः कर्मयोगी मां परमेश्वरं सर्वभूतस्थितं सर्वप्राणिहृदयेषु स्थितत्वात् तां तत्क्रियासु प्रवर्तयंतं भजति साध्यसिद्ध्येस्मरणं करोति कथंभूतः एकत्वं सुहृदादिषु सममतां समास्थितः स कर्मयोगी मयि परमेश्वरे वर्तमानः यथेश्वरेच्छा स्यात्तथा भवतु नाम परं त्वहं स्वधर्ममनुतिष्ठाम्येव येनाहं वाच्यो न भवामीत्येवं निश्चयवान् सर्वथा वर्त्तते सर्वैः प्रकारैः प्रवर्त्तते यद्वा सर्वथा सर्वैः प्रकारैर्वर्तमानः कर्मसु प्रवृत्तिमान् स कर्मयोगी मयि वर्त्तते अंतकाले मामेव प्राप्नोतीत्यर्थः ३१ ॥

मधुभाष्य

सर्वभूतस्थितमिति एकत्वमास्थितः सर्वैकपरमेश्वर इति स्थितः सर्वप्रकारेण वर्त्तमानोपि मय्येव वर्त्तते एकमपरोक्षं प्रपन्नोस्तान फलं नियतमित्यर्थः तथापि प्रायेनाधर्मं करोति कुर्वंस्तु महदेव दुःखसूचकं भवतीत्युक्तं भवस्मात् प्रादेव कदाचिदपि नाधर्मे बुद्धिर्विस्फुरणं भवेत् प्रमादात् तत्कृते पापं स्वल्पं भस्मीभविष्यति आदिराजैस्तथा देवैरृषिभिः क्रियते क्रियतु वा कृत्याकर्मणस्तेषां दुःखसूचकमेव न तदिति साम्यप्रकारान्तरेण व्याचष्टे ३१

भाषा अनुवाद

एवम्भूत पुरुष विधि करके कर्म के अधीन नहीं है सो कहते हैं कि सर्व भूत मे वर्तमान जो मै तिस को एक बुद्धि करके एक मो हिं केर और बुद्धि नहीं है जिस के सो मेरे ही को आश्रय करि भजता है सो योगी तत्त्वज्ञानी सकल कर्म परित्याग करिके सर्वथा वर्तमान करके जीवित दशा मे भी मेरे मे प्राप्त है अर्थात् सायुज्य गतिको प्राप्त है ३१

दोहा

सभीजीवमें स्थितमोहिको भजेंजो एकता पाय सभ वि
धि वर्तत योगी जोसो मो मांहि समाय ३१॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सुखं
वा यदि वा दुःखं स योगी परमो मतः ३२॥

शांकरभाष्य

किंचान्यत् आत्मेति आत्मौपम्येन आत्मा स्वयमेव उपमीयतेऽनयेति
उपमा तस्याः उपमायाः भाव आत्मौपम्यं तेनात्मौपम्येन सर्वत्र स
र्वभूतेषु समं तुल्यं पश्यति योऽर्जुन स च किं समं पश्यतीत्युच्यते य
था मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वाशब्दश्चार्थे य
दि वा यच्च दुःखं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुः
खमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखे अनुकूलप्रतिकू
ले तुल्यतया सर्वभूतेषु समं पश्यति न कस्यचित् प्रतिकूलमाचरत्य
हिंसक इत्यर्थः य एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी परम उत्कृ
ष्टो मतोऽभिप्रेतः सर्वयोगिनां मध्ये ३२॥

आनन्दगिरिकृतटीका

स्वैराचरणस्याप्रतिबन्धकत्वकथनात् परपीडनस्य योगिनः सम्यग्द
र्शने प्रत्यप्रतिबन्धकत्वप्रसक्तावुक्तं किंचेति अन्यदपि किंचिदुच्यते।
परमयोगिनो निर्देशद्वारा योगमाहात्म्यमित्यर्थः उपमैवौपम्यमा
त्मा च तदौपम्यं च तेन सर्वभूतेषु यः समं पश्यतीत्युक्तं तदेव समद
र्शनं प्रश्नपूर्वकं विवृणोति किमित्यादिना विकल्पार्थत्वं वारयति वा
शब्द इति उपदर्शनसमदर्शनफलमभिलपति न कस्यचिदिति कि
मपेक्षया तस्य परमत्वं तदाह सर्वेति ३२॥

स्वामिकृतटीका

एवंभूतानां योगिनां मध्ये सर्वभूतानुकम्पी श्रेष्ठ इत्याह आत्मौ
पम्येन सर्वत्रेति आत्मौपम्येन स्वसादृश्येन यथा मम सुखं प्रियं दुःखं
चाप्रियं तथान्येषामपीति सर्वत्र समं पश्यन् सुखमेव सर्वेषां यो वा
ञ्छति न तु कस्यापि दुःखं स योगी श्रेष्ठो मम अभिमत इत्यर्थः ३२॥

पिशाचभाष्य

किंच आत्मा स्वयमेव उपमा तद्भावमात्मौपम्यं तेनौपम्येन सर्व
त्र सर्वभूतेषु समं तुल्यं पश्यति योऽर्जुन किं च पश्यतीत्यपेक्ष्यते यथा मम

गी. टी. ष.

१३८

मस्य सुखमिष्टं तथा प्राणिनां सुखमनुकूलं वाशब्दार्थे यदि वा यथा
दुःखं मम प्रतिकूलमनिष्टं तथा सर्वप्राणिनामनिष्टं प्रतिकूलमित्ये
वमात्मौपम्येन दुःखसुखे वानुकूलप्रतिकूले तुल्यतया सर्वभूतेषु सम
पश्यति न कस्यचित्प्रतिकूलमाचरति अहिंसक इत्यर्थः य एवमहिं
सकः सम्यग्दर्शननिष्ठः स योगी परमः उत्कृष्टो मतोऽभिमतः विनत
इत्यर्थः ३२ ॥

रामानुजभाष्यं

ततोऽपि काष्ठामाह आत्मौपम्येनेति आत्मनश्चान्येषां च आत्मनामसं
कुचितज्ञानैकाकारतयौपम्येन स्वात्मनि चान्येषु सर्वत्र वर्तमानं पु
त्रजन्मादिरूपं सुखं तन्मरणादिरूपं दुःखं च असंबन्धसाम्यात् समं यः
पश्यति परपुत्रजन्ममरणादिसमं स्वपुत्रजन्ममरणादिं यः पश्यती
त्यर्थः स योगी परमयोगकाष्ठां गतो मतः ३२ ॥

अभिनवगुप्तकृतटी ॰

तथाविधं योन पश्यति स परमार्थकरणाव्ययणष्टः तदवनिर्देकेसम
निर्विकल्पात् यतः सर्वगतं मां पश्यति तस्मादहं न प्रणष्टः स्वरूपेण भा
सनात् भावांस्तु नापि पश्यति भावेषु भासमानो यदृनोदयसनाबोधसं
भासनेन प्रणष्टः परमात्मनः ३२ ॥ सर्वस्य च सुखदुःखे आत्मतुल्यतया पश्यतीति स्वरूप

निमित्तपुरुषस्य ३२ पुनर्योगस्थितिविधिः

परमार्थप्रपाटीका

अथैतादृशस्यापि पुरुषस्य लोकव्यवहारवर्तेऽसमानस्य दशामाह ।
आत्मौपम्येनेति यः पुरुषः सर्वत्र सर्वभूतेषु सुखं दुःखं वा आत्मौप
म्येन पश्यति यथा मे आत्मनः सुखमिष्टं असारदुःखमनिष्टं तथैव सर्वे
षामित्यादि इति पश्यति स परमः श्रेष्ठः परमहंसाश्रमी योगी मतः ३२ ॥

वनमालीटीका

भगवदुपरोक्तस्यानिरोनिहतावियस्य प्रारब्धकर्मवशात्समाधे।
र्व्युत्थानेऽपीत्थंवर्तनमित्याह आत्मेति आत्मैवोपम्यमुपमा तेनात्मदृष्टा
न्तेन सर्वत्र प्राणिजाते सुखं यदि वा दुःखं समं तुल्यं पश्यति स्वस्यानिष्टं
यथा न संपादयति तथा परस्याप्यनिष्टं न संपादयति प्रद्वेषनदीजावि
द्याशून्यत्वात् एवं स्वस्येष्टं यथा संपादयति तथा परस्यापीष्टं यः संपा
दयति तथाप्यनिष्टं न संपादयति प्रद्वेषनदीजाविद्याशून्यत्वात् एवं

स्वस्येष्टं यथा संपादयति तथा परस्यापीष्टं यः संपादयति रागद्वेष
विशून्यत्वात् सनिर्वासनतयोपशांतमनाः परमः श्रेष्ठः पूर्वस्मात् ।
उभयत्रापि भगवदपरोक्षे कश्चिन्मनोनाशवासनाक्षययोर्निःशेषतया
भावाज्जीवन्मुक्तिसुखं स्वयोग्यरूपं नानुभवति चित्तविक्षेपेण
यद्दुःखमनुभवति सोऽपरो योगी देहपाते कैवल्यभागित्वात् देहस
द्भावपर्यंतं तद्दुःखं त्वनुभवन् अपरस्तु ज्ञानस्य योगस्याशेषभगवद्विशे
षापरोक्षोत्पन्नपूर्णानंदसमाधेर्निवृत्तिः शेषाविद्योज्जातमनोनाशवा
सनाक्षयः युगपदभ्यासाद्दुःखं त्वतिरहितः सर्वकं जीवन्मुक्तिसुखमेव
मनुभवन्प्रारब्धकर्मवशात्समाधेर्व्युत्थानेपि स्वदृष्टांतेन सर्वप्राणि
नां सुखमेव समं पश्यन्नाक्षिपति स परमो योगीति भावः ३२ ॥

ऊस्मैवैजयन्तीटीका

ततोप्यधिकां योगविपाकदशामाह आत्मौपम्येनेति हे अर्जुन शुद्धां
न्तःकरणयत्नस्ततोप्यधिकदशामापन्नो योगी सर्वत्र सर्वेषु उद्भिज्जस्वे
दजांडजजरायुजेषु चतुर्विधेषु भूतेषु आत्मौपम्येन स्वोपरेषामात्मना
मौपम्येन तान्नेकस्वरूपत्वेन साम्येन समानदर्शनेन वा सुखं वा मित्रमिल
नादिरूपं यदि वा दुःखं शत्रुमिलनादिरूपं सममुभयोस्तुल्यमानं पश्य
ति यत्रा सुखं आध्यात्मिकादितापत्रयरहितं दुःखं च यत्रैकं समं पश्यति
यथा स्वमित्रपुत्रकलत्रादिशरीरादीनां तापत्रयप्रभृतिरूपं सुखं न सुखी
नपुष्टकत्वेन दुःखी भवेत्तथा परमित्रपुत्रादिशरीरादीनामपि तापत्रयर
हितात्मकसुखेन सुखी न पुष्टकत्वेन दुःखी भवेदिति अभिप्रायः समसुखदुःखः
एवं समसुखदुःखं समत्वेन पश्यन् योगी परमः श्रेष्ठो मतो मम अभिमतो
भवति स्वपरत्वदृष्ट्या समदृष्टित्वं न तु ततोपि श्रेष्ठो न भवतीति भावः ३२

मधुसूदनीटीका

+ आत्मैवोपम्यमुपमा तेनात्मदृष्टांतेन सर्वत्र प्राणिजाते सुखं वा य
दि वा दुःखं समं तुल्यं यः पश्यति स्वस्यानिष्टं यथा न संपादयति एवं पर
स्याप्यनिष्टं योन संपादयति प्रद्वेषशून्यत्वात् एवं स्वस्येष्टं यथा संपाद
यति तथा परस्यापीष्टं यः संपादयति रागशून्यत्वात् सनिर्वासनतयो
पशांतमना योगी ब्रह्मवित् परमः श्रेष्ठो मतः पूर्वस्मात् हे अर्जुन उक्त

+ पूर्वमुक्तयोपि तत्त्वबोधे कश्चित् मनोनाशवासनाक्षययोरभावाज्जीवन्मुक्तिसुखं नानुभवति चित्तवि
क्षेपेण च दुःखमनुभवति सोपरमो योगी देहपाते कैवल्यभागित्वात् देहसद्भावपर्यंतं च दुःखं त्वा
त्रभावात् तत्त्वज्ञानमनोनाशवासनाक्षयाणां युगपदभ्यासाद्दुःखं त्वनिहतिः सर्वकं जीवन्मुक्तिसु
खमनुभवन्प्रारब्धकर्मवशात् समाधेर्व्युत्थानकाले ॥
+

गी॰
टी॰
अ

१३९

अतस्तत्त्वज्ञानमनोनाशवासनाक्षयाणामक्रमेणाभ्यासाय महान्प्रयत्न
आस्थेय इत्यर्थः नन्वेवं सविदेहेन ज्ञातमद्वितीयचिदानन्दात्मतत्त्वं मायया क
ल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानन्दाद्वयोऽहमस्मी
ति ज्ञाने तत्त्वज्ञाने १ प्रदीपज्वालासन्तानवद्वृत्तिसन्तानरूपेण परिणाम ॰९म
मानः अन्तःकरणद्रव्यं मननात्मकत्वान्मन इत्युच्यते तस्य नाशो ना
म वृत्तिरूपपरिणामं परित्यज्य सर्ववृत्तिविरोधिना निरोधाकारेण परि
णामः २ पूर्वापरपरामर्शमन्तरेण सहसोत्पद्यमानस्य क्रोधादिवृत्ति
विशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना पूर्वपूर्वाभ्यासेन चित्ते
वास्यमानत्वात् तस्याः क्षयो नाम विवेकजन्यायां चित्तप्रशमवासनायां
दृढायां सत्यपि बाह्यनिमित्ते क्रोधाद्यनुत्पत्तिः ३ तत्र तत्त्वज्ञाने सति मिथ्या
भूते जगति नरविषाणादाविव धीवृत्त्युदयादात्मतत्त्वस्फुरणे न प्रत्य। तु
क्षमनुपयोगाद्विरोधिनाश्रितत्वान्मनो न नश्यति न हि मनसि संस्कारो बाधक
स्य वासस्य निमित्तस्य प्रतीतौ वासना लीयते एवं क्षीणायां वासनायां हे
तुभावेन क्रोधादिवृत्त्यनुदयान्मनो न नश्यति न हि च मनसि शमदमादि
संपन्ने तत्त्वज्ञानमुदेति एवमुत्पन्ने तत्त्वज्ञाने रागद्वेषादिरूपा वासना।
लीयते क्षीणायां च वासनायां प्रतिबन्धाभावात् तत्त्वज्ञानोदय इति पर ॰का
स्परकारणत्वं दर्शनीयं अत एव भगवान् वसिष्ठ आह तत्त्वज्ञानं मनोना
शो वासनाक्षय एव च मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि हि।
तस्माद्राघव यत्नेन पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेत
त्समाश्रयेदिति पौरुषो यत्नः केनाप्युपायेनावश्यं संपादयिष्यामीत्येवंवि
धोत्साहरूपो निर्बन्धः विवेको नाम विविच्य निश्चयः तत्त्वज्ञानस्य श्रव
णादिकं साधनं मनोनाशस्य योगः वासनाक्षयस्य प्रतिकूलवासनो
त्पादनमिति एतादृशविवेकयुक्तेन पौरुषेण प्रयत्नेन भोगेच्छायाः
त्यागायापि हि विषाक्तस्यान्नस्येव तिरस्कारेण वासनाक्षयहेतुत्वाद्दूरत
इत्युक्तं द्विविधो हि विद्याधिकारी कृतोपास्तिरकृतोपास्तिश्चेति तयो
रुपास्य साक्षात्कारपर्यन्तानुपास्तिकृतत्वात्तत्त्वज्ञानाय प्रवृत्तस्य वासना
क्षयमनोनाशयोरेकत्वेन तत्त्वज्ञानार्थं जीवन्मुक्तित्वमेव सिध्यति
इदानीन्तनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुत्वेन सकलमाज्ञानं हसा ॰स

विद्यायां प्रवर्तते योगं विना विद्वत्त्वविवेकमात्रेणैव च मनोनाशवा
सनाक्षयौ न तु तात्कालिकौ संपाद्यौ शमदमादिसंपन्नः श्रवणमनननि
दिध्यासनानि संपादयति तेषु दृढाभ्यस्तेः सर्वेषु विच्छेदितवत्ता
तत्त्वविदिति अविद्याग्रन्थिर्ब्रह्मात्मनोर्हृदयग्रन्थिः संशयः कर्माणि सर्वे
कामश्च मे स्युः पुनर्जन्म चैवमनेकविधो बंधो ज्ञानान्निवर्तते तथा श्रूय
ते यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ब्रह्म
विद्ब्रह्मैव भवति भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य
कर्माणि तस्मिन्दृष्टे परावरे सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहा
यां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति तमे
व विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय यस्तु विज्ञानवा
न्भवति समनस्कः सदाशुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जा
यते य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यसर्वत्वानिर्दिष्टफ
लमुदाहार्यं सेयं विदेहमुक्तिः तत्त्वविदे हि तत्त्वज्ञानोत्पत्तिसमकालीनास्त
वि या ब्रह्मण्यध्यारोपितानामेतेषां बन्धानामविद्यानाशे सति निवृ
त्तौ पुनरुत्पत्त्यसंभवात् अतः शोधितत्वंपदार्थज्ञानेन तस्यानुव
र्तते मनोनाशवासनाक्षययोरदृष्टाभ्यासाभावाद्भोगप्रदेन प्रारब्धेन
कर्मणा बाध्यमानत्वाच्च सप्रवातप्रदेशप्रदीपवत् सहसा निवर्तते अत
इदानीं तत्स्वरूपं तत्साधनं प्राक्सिद्धेन तत्त्वज्ञानेन प्रत्यक्षाप्ता किं त
मनोनाशवासनाक्षयौ प्रयत्नसाध्याविति तत्र मनोनाशः संप्रज्ञा
तसमाधिनिरूपणेन निरूपितः प्राक् वासनाक्षयस्त्विदानीं निरूप्यते
तत्र वासनास्वरूपं वसिष्ठ आह दृढभावनया त्यक्तपूर्वापरविचारणं
यदादानं पदार्थस्य वासना सा प्रकीर्तिता अत्र वस्तुस्वदेशाचारकुलध
र्मस्वभावभेदतज्जनापशब्दसुशब्दादिषु प्राणिनामभिनिवेशः सा
मान्यमनोदाहरणं सा च द्विविधा मलिना शुद्धा च शुद्धा दैवीसंपल्लक्षणास
संस्कारप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपैव मलिना तु त्रिविधा
लोकवासना शास्त्रवासना देहवासना चेति सर्वे जना यथा न निंदन्ति मा
तथैवाचरिष्यामीत्यशक्यार्थाभिनिवेशो लोकवासना तस्याश्च को
लोकमाराधयितुं समर्थ इति न्यायेन संपादयितुमशक्यत्वात् पुरुषा

गी. र्थानुपयोगित्वाच्च मलिनत्वं १ शास्त्रवासनास्त्रिविधा पाठव्यसनं
टी. बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चेति क्रमेण भरद्वाजस्य दुर्वाससो
ष. निदाघस्य च प्रसिद्धं मलिनत्वं चास्याः क्लेशावहत्वात् पुरुषार्थानुपयो
गित्वाद्दर्पहेतुत्वाज्जन्महेतुत्वाच्च २ देहवासनापि त्रिविधा अनात्मनि आ
139 त्मत्वभ्रान्तिः गुणाधानभ्रान्तिः दोषापनयभ्रान्तिश्चेति तत्रात्मत्वभ्रान्तिर्वि
रोचनादिषु प्रसिद्धा सा च लौकिकी गुणाधानं द्विविधं लौकिकं शास्त्री
यं च समीचीनशब्दादिविषयसंपादनं लौकिकं गंगास्नानसालिग्रामादि देवस्मा
यन तीर्थादिसंपादनं शास्त्रीयं दोषापनयमपि द्विविधं लौकिकं शास्त्रीयं ।
चिकित्सकोक्तैरौषधैर्व्याध्यपनयनं लौकिकं वैदिकस्नानाचमना
दिभिरशौचापनयनं वैदिकं ३ एतस्याश्च सर्वप्रकारायाः मलिन
त्वमप्रामाणिकत्वात् अशक्यत्वात् पुरुषार्थानुपयोगित्वात् पुनर्ज
न्महेतुत्वाच्च शास्त्रप्रसिद्धं तदेतल्लोकशास्त्रदेहवासनात्रयमविवेकि
नामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्पत्तिविरोधित्वा
द्विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयं तदेवं बाह्यविषयवास
नास्त्रिविधा निरूपिता आभ्यंतरवासनास्तु कामक्रोधदंभदर्पाद्याः
आसुरसंपद्रूपा सर्वानर्थमूलं मानसवासनेत्युच्यते तदेवं बाह्याभ्यंतर
वासनाचतुष्टयस्य शुद्धवासनया त्यागः संपादनीयः तदुक्तं वसिष्ठेन
मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभावनानामगृहा
णामलवासना इति तत्र विषयवासनाशब्देन पूर्वोक्तास्तिस्रो लोक
शास्त्रदेहवासना विवक्षिताः मानसवासनाशब्देन कामक्रोधदंभदर्पा
द्यासुरसंपद्विवक्षिता यद्वा शब्दस्पर्शरूपरसगंधा विषयाः तेषां भुज्यमा
नत्वदशाजन्यः संस्कारो विषयवासना २ काम्यमानत्वदशाजन्यः सं
स्कारो मानसवासना अस्मिन्पक्षे पूर्वोक्तानां चतसृणामनयोरेवांत
र्भावः बाह्याभ्यंतरव्यतिरेकेण वासनांतरासंभवात् तासां वासनानां प
रित्यागो नाम तद्विरुद्धमैत्र्यादिवासनोत्पादनं तास्तु मैत्र्यादिवासना
भगवता पतंजलिना सूत्रिताः प्राक्संक्षेपेण व्याख्याता अपि पुनर्व्या
ख्यायंते चित्ते हि रागद्वेषपुण्यपापैः कलुषीक्रियते तत्र सुखानुशयी रा
गः मोहादनुभूयमानं सुखमनुशेते कश्चिद्धीवृत्तिविशेषो रागजसः स

वैसर्वजातीयेमे भूयादिति तच्च दृष्टादृष्टसामग्र्यभावात् संपादयितु
मशक्यं अतः सरागः चित्तं कलुषीकरोति यदा तु सुखिषु प्राणिषु ये
मैत्रीं भावयेत् सर्वेप्येते सुखिनो मदीया इति तदा तत्सुखं स्वकीयमेव
संपन्नमिति भावयतस्तत्र रागो निवर्तते यथा स्वस्य राज्यनिवृत्तावपि
पुत्रादिराज्यमेव स्वकीयं राज्यं तद्वत् निवृत्ते च रागे वर्षापाये जलमिव
चित्तं प्रसीदति तथा दुःखानुशयी द्वेषः दुःखमनुशेते कश्चिद्दोषविशे
षः तमोनुगतरजःपरिणाम ईदृशो मे सर्वं दुःखं सर्वदा मे मा भूदिति तच्च श
त्रुव्याघ्रादिषु सत्सु न निरावयितुं शक्यं न च सर्वे ते दुःखहेतवो हंतुं शक्यं
ते अतः स द्वेषः सदा हृदयं दहति यदा तु स्वस्येव परेषां सर्वेषामपि दुः
खं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तं
प्रसीदति तथा च स्मर्यते प्राणा यथात्मनो भीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतेषु दयां कुर्वंति साधव इति एतदेवेदमुक्तं आत्मौपम्ये
न सर्वत्र समादि तथा प्राणिनः स्वभावत एव पुण्यं नानुतिष्ठंति पापं त
नुतिष्ठंति तदाहुः पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मानवाः न पापफ
ˇन लमिच्छंति पापं कुर्वंति यत्नत इति तेषु पुण्यापुण्येषु क्रियमाणेष्वक्रियमा।
णापश्चात्तापं जनयतः स च क्रमाद् दीनः किमहं साधु नाकरवं किम
हं पापमकरवमिति यदा सौ पुण्यपुरुषेषु मुदितां भावयेत् तदा तद्वा
सनावान् स्वयमेवाप्रमत्तो शुक्ला कर्मे पुण्ये प्रवर्तते तदुक्तं कर्माशुक्ला
कृष्णं योगिनस्त्रिविधमितरेषां अयोगिनां त्रिविधं शुभं कृष्णमशुभं शु ˇकर्माशुक्लं
क्लकृष्णं शुभाशुभमिति तथा पापपुरुषेषूपेक्षां भावयन् स्वयमपि तद्वा
सनावासनायां निवर्तते ततश्च पुण्यकरणापापकरणनिमित्तस्य पश्चा
त्तापस्याभावेपि चित्तं प्रसीदति एवं सुखिषु मैत्रीं भावयतो न केवलं रा।
गो निवर्तते किं त्वसूयेर्ष्यादयोपि निवर्तंते परगुणेषु दोषाविष्करण
मसूया परगुणानामसहनमीर्ष्या यदा मैत्रीवशात् परसुखं स्वकीयमेव सं
पन्नं तदा परगुणेषु कथमसूयादिकं संभवेत् तथा दुःखिषु करुणां भा
वयतः शत्रुवधादिको द्वेषो यदा निवर्तते तदा दुःखितप्रतियोगिका।
स्मत्सुखित्वप्रयुक्तदर्पोपि निवर्तते एवं दोषांतरनिवृत्तिरप्यूहनीया तथासि
द्धरामायणादिषु तदेवं तत्तन्मैत्र्यादिनानाप्राणिवासनात्प्रसन्नचित्तं त्वयमभ्य

गी· सत्रीयं नडुक्तेनापिहारेणपुनः पुनस्तत्तानुस्मरणं तत्वज्ञानाभ्यासः
टी· तडुक्तं तद्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वंचब्रह्म
ध· भ्यासंविडुर्बुधाः सर्गादावेवनोत्पन्नंदृश्यंनास्त्येवतत्सदा इदंजगदहं
चेतिबोधाभ्यासंविडुःपरमितिदृश्यभा[illegible]संविशोधियोगाभ्यासोमनो ʼव
ʼस निरोधाभ्यासः तडुक्तं शमेनाभावंमज्ञोत्तानैर्ययस्यवत्नः शमा
शाखेर्यतेनेयतेष्वज्ञाभ्यासिनःस्थिताइति ज्ञात्नेयपोर्मिथ्यात्वधीरभा
वसंपत्तिः स्वरूपेणाप्यप्रतीतिरभावसंपत्तिः नद्वर्थफलायोगे
ʼव नद्धणासंभवाधेनरागद्वेषादितानवे रतिर्वेनोदिताया सोब्रह्माभ्यासः
सडुच्यते इतिरागद्वेषादिक्षीणतादृपवासनात्याभ्यासडुक्तः तस्मा
डुपपत्रमेतत्सत्वज्ञानाभ्यासेनमनोनाशाभ्यासेनवासनात्याभ्यासेन
चदेहप्रमसनयाय: स्वपरसुखदुःखादिषुसमदृष्टिःसपरमोयोगीम
ʼवान नोयस्तुविषमदृष्टिः सतत्वज्ञान्यपरमोयोगीति [illegible] ३२

मधुसूदनटीका

स्वदृष्टांतेनसर्वत्रप्राणिजातेचतुर्विधे सुखंवायदिवादुःखंतत्स्यसंयः
परिपश्यति १ यथाममसुखंनित्यमिष्टमेवहिदेहिनां सर्वेषाम
नुकूलंस्यादितिपश्यतिसन्मतिः २ प्रतिकूलंयथादुःखंममैवंसर्वदे
हिनां प्रतिकूलंतथावाच्यसर्वभूतहितेरतः ३ कस्यचिन्मनसावा
वापीऽनाचरतीदृयः कर्मणावासयोगीतुसर्वोत्कृष्टतयामतः ४३२

नीलकंठटीका

यद्यपिनिषिद्धकर्मणापिआत्मविन्नबध्यतेनथापिसुशीलवानेवयोगी
श्रेष्ठइत्याह आत्मौपम्येनेति यथास्वस्यसुखमिष्टंदुःखमनिष्टंतद्व
त्परस्यापीतिबुध्यायोन्यस्येदुःखंनप्रयच्छतिसोऽहिंसकःपरमयो
गीमतइत्यर्थः ३२ ॥

धनपतिटीका उक्तमर्थसिद्धांतयति ॥

३२ स्पष्टम[illegible]
च

यद्वात्मासोऽहमेवेत्यभेदंभगवान् रामकंठीटीका

प्रतिपादयितुमाह-योयोगीसर्वत्रभावजातेमायथोक्तात्मतत्वैकरूपमन्तकयोपपत्यापश्य

ति मयि सर्वं तथैव पश्यति तस्य तत्त्वदर्शिनोऽहं न प्रणश्यामि नादृश्यो भवामि सोऽपि मे स्वरूपभूतत्वात्र प्रणश्यति नादृश्यत्वमापद्यत इति कर्मयोगसिद्धस्य योगिनः स्वात्मनश्चाभेदप्रतिपादनपरमेतद्भगवद्वचनम् किं च यो योगी सर्वत्र सर्वस्मिन्देहप्रभृति सुखं दुःखं वा स्वं वाऽर्कं विश्वाण्यथ समस्तं योऽपपश्यास्वेव मानस्य संविदात्मकतापत्तिरूपतया समं सेविन्नात्रैकस्वभावं पश्यति उच्यते कथमात्मौपम्येनात्मानमनुपमातीतत्वस्वानुभववदित्यर्थः स सर्वथा सर्वेणाकेनविर्हेकसाधारणेनप्रकारेणावर्तमानोऽपि न विवर्तते मदभिन्नो ब्रह्मैवासावित्यर्थः स एवंविधो योगी सर्वास्ववस्थास्वविलुप्तनिरुद्धरसमाधिफलात्स्वदेहं वाऽविघ्नहन्तानुबंधः साधयेगानुष्ठाननिष्ठोपलभ्यसमाधिफलस्सर्वोक्तयोगपदेशयापरमोनिरुत्तरातिशयप्रक्तः ईश्वरवत्साम्यदशाधिरूढत्वाज्जीवन्मुक्त इत्यर्थः [illegible] [illegible] ॥

लासिकी [illegible] टीका

किंच यो योगी सर्वत्र प्राणिजातेषु सुखं दुःखं वा स्वं वाऽर्कं वित्प्राणिणथर्ममात्मौपम्येनात्मतत्त्वतयास्वानुभववदित्यर्थः समं निर्विशेषं किंचिन्मात्रमपि न विपर्यस्तं पश्यति साक्षात्करोति स योगी मम योगिषु मध्ये श्रेष्ठो मतः एवमस्य स्वरूपमेतदानुदिते न पुनरेषा सर्वो विधिः तदुक्तं कुलार्णवे जनः स्वदेहकं कृतिं विजानाति यथा तथा परं ब्रह्मस्वरूपी चवेत्ति विश्वविचेष्टितमिति योगित्वनिर्देशेनास्याहैतललक्षणात्तानिसकाशाद्व्यतिरेक उक्तः [illegible] [illegible] ३२ ॥

पंचोली टीका

ज्ञानिनामपि सर्वभूतानुकंपा श्रेष्ठा इत्याह आत्मौपम्येनेति हे अर्जुन यः सर्वत्र सर्वभूतेषु सुखं वा यदि दुःखं आत्मौपम्येन आत्मा स्वयमेवोपमा याभावं श्रोपम्येन समं पश्यति यदात्मनः सुखकारि तदन्यस्य करोति यत्त्वात्मनः असुखकारि तदन्यस्य न करोति स योगी परमो मतः ३२ ॥

आत्मौपम्येनेति आत्मनः स्वस्यौपम्यं सदृशत्वं प्रतिद्वंद्विभाव इति याव
त् प्रतिद्वंद्वीति तत्तुल्यरयापारोद्गणस्य पूर्वं पाणादिवर्षणं समानमेव
प्रतिमुंचतीति तथा चात्मौपम्येन स्वप्रतिद्वंद्विभावेन देहनेति फलि
तोर्थः यद्वा आत्मनः शास्त्रप्रहरणादिरूपस्य यत्तस्यौपम्येन तुल्यत्वेन दे
हनेति कोर्थः यथा विपक्षः प्रतिरथीभूय शस्त्रप्रहरणादिकं कुर्वीति त
थैव चेन्मित्रादयोपि कुर्युः किमंतरं तेषामुभयेषां येन प्राग्विपक्षवधा
द्दीनवुनर्मित्रादयः अतो वध्यताप्रयोजकं तुल्यमेवाततायित्वमुभ
येषामिति तथोक्तं आततायिनमायांतं हन्यादेवाविचारयन् तथा
नाततायिवधे दोषो हंतुर्भवति कश्चनेति तदुपेक्षणं च निषिद्धं परा
शरेण आहतो न निवर्तेत द्यूताच्च रणाच्चेति मनुनापि समो
त्तमाधमै राजा त्वाहूतः पालयन् प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्म
मनुस्मरन्निति तथा चायमन्वितोर्थः आत्मौपम्येनैकरूपयत्नवत्वे
नाततायित्वेन वध्यताप्रयोजकेन हेतुना यो योगी समतालक्षण
योगारूढः सर्वत्रारिषु मित्रादिषु विषयेषु समं साधारणं पश्यति मि
त्रत्वादिविशेषं परित्यज्य प्रतिरथीभावमेव तदा त्वे परामृशति यदि वा
शब्दः समुच्चये सुखं दुःखं च समं समानं पश्यति सुखं वा दुःखं वा भव
तु नाम नाथमेमां स्पृशताविति निश्चिनोति यद्वा यदि शब्दोवधारणे
वा शब्दः समुच्चये तथा च सुखं च दुःखं यदि वा दुःखमेव दुःखादभि
न्नमेव पश्यति कोर्थः स्वयंबुद्धा निवृत्तेः सुहृदादीनां सुखकारण
मथमित्रादयो गत्यादिप्रापणेन दुःखदायकमेवेति स योगी परि
पक्वसाम्ययोगारूढः परमः पराञ्छत्रून्मीनाति हिनस्तीति परमः
शत्रुहनने प्रवृत्तत्वेन कर्मकौशललक्षणयोगारूढश्च मतो मह
र्षेरिति शेषः यद्वा परम उत्कृष्टो मतः इत्यर्थः ३२॥

मधुभाष्य

आत्मौपम्येनेति एतस्य योगस्य स्थिरां स्थितिं न पश्यामि मन
सश्चंचलत्वात् उक्तं च मनसश्चंचलत्वाद्धि स्थितिर्योगस्य वै स्थिरा

विनाभ्यासं न शक्यास्याद्वैराग्याद्धानसंशयइतिव्याम
योगे नकदाचित्स्वयमेवमनोनिरुध्यते शुभेच्छादि
तानांतद्वेषिणांचरमापत्तौ नास्तिकानांचवैमुक्तिसाम
दामुक्तिर्नजायतइतिनिषेधात् ब्राह्मे प्रयतिरप्रयत्नः
योगस्यजिज्ञासुरपि ज्ञातव्योमयायोगइतिपश्यन्ती
वेच्छामोपिशाद्भ्रब्रह्मातिवर्तते परंब्रह्मप्राप्नोतीत्यर्थः
नैकजन्मनीत्याह ३२॥

भाषा अनुवाद

और ऐसे योगी जनोंके बीच मे जीवों पर अनुग्रह करने वाला श्रेष्ठहै सो कहते हैं कि हे अर्जुन जो अपनी उपमा करके और सब मे भी अपने समान सुख या दुख तथा प्रिय अप्रिय देखता है और सब को सुखकी इच्छा करता दुख नही देख सकता है सोई योगी श्रेष्ठ है ३२

दोहा

आपहि सदृश सर्वमें समदृष्टि देषैं नर जोय सुख अथवा दुः
खको परम योगी मानियें सोय ३२॥

143

अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधु
सूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ३३

शांकरभाष्यं

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसंपाद्यतामा
लक्ष्य शुश्रूषुः ध्रुवं तत्प्राप्त्युपायमर्जुन उवाच योऽयमिति योऽयं योग
स्त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन एतस्य योगस्याहं न पश्यामि
नोपलभे चंचलत्वान्मनसः किं स्थिरामचलां स्थितिं प्रसिद्धमेतत् ३३

आनंदगिरिकृतटीका

मनसश्चंचलमस्थिरमित्युपश्रुत्य निर्विशेषे चित्तस्थैर्ये दुःशकमिति
मत्वा तदुपायबुभुत्सया पृच्छतीति प्रश्नमुत्थापयति एतस्येति
तत्प्राप्त्युपाये शुश्रूषुरिति मत्वा नः मनसश्चंचलत्वेऽपि तन्निग्रहद्वारा यो
गस्थैर्यं संपाद्यतामिमामाशंक्याह एतस्येति प्रसिद्धमिति समन्वयः ३३

स्वामिकृतटीका

उक्तलक्षणस्य योगस्यासंभवं मत्वार्जुन उवाच योऽयमिति साम्ये
न मनसो लयविक्षेपशून्यतया कैवल्याकारावस्थानेन योऽयं योग
स्त्वया प्रोक्तः एतस्य योगस्य स्थिरां दीर्घकालां स्थितिं न पश्यामि मनस
श्चंचलत्वात् ३३॥

पिशाचभाष्यं

सर्वयोगिनामेतस्य यथोक्तस्य सद्दर्शनलक्षणस्य योगस्य दुःसंपाद्य
तामालक्ष्य शुश्रूषुस्तत्प्राप्त्युपायमर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः सा
"हे मधुसूदन म्येन एतस्य योगस्याहं न पश्यामि नोपलभे चंचलत्वान्मनसः स्थितिं
स्थिरामचलां प्रसिद्धमेतत् ३३॥

रामानुजभाष्यं

योऽयं देवमनुष्यादिभेदेन जीवेश्वरभेदान [illegible] भिन्नत्वेनावर्तनकालम
नुभूतेषु सर्वेष्वात्मसु ज्ञानैकाकारतया परस्परसाम्येनात्मनः कर्मवश्यत्वेन चै
श्वरसाम्येन सर्वत्र समदर्शनरूपो योगस्त्वया प्रोक्तः एतस्य योगस्य स्थि
रां स्थितिं न पश्यामि मनसश्चंचलत्वात् ३३॥॥

गी.
टी.
ष.

अभिनवगुप्तकृतटी.

योयमिति परोक्षप्रत्यक्षवाचकाभ्यामेवेदमुच्यते भगवद्भिर्विहितान
न्तरोपायपरम्परया स्फुटमपि प्रत्यक्षनिर्दिष्टमपि ब्रह्म मनसश्चाञ्च
ल्यदोषात्प्रत्यक्षहेरवर्तते इति परोक्षायमाणम् ३३ ॥

परमार्थप्रपाटीका

अथैतस्य योगस्य दुःसाध्यत्वमन्यमानोऽर्जुनः प्राह योयमिति मनसः
साम्येन विक्षेपशून्येन यो यं योगः केवलमात्माकारावस्थानरूपस्त्वया
प्रोक्तः एतस्य स्थास्नोः स्थितिं न पश्यामि कुतः मनसश्चञ्चलत्वात् अ
नेकविक्षेपैरस्थिरत्वात् अतएव मधुसूदनेति संबुद्धिः यतो मधा
दिदैत्यविवर्हणशक्तोसि परं त्वम् मनोनिग्रहे तत्कृति न शक्तिः
मत्र किंचित्करा न त्वमेवोपदिशसीमर्थः अत्र पार्थस्याद्रे स्वत्वे
२४ देववचोः यथार्थत्वं आसेप्रहतः परे चेतो विश्वसने न तद्विषय
स्वादयतीति विना पैशाच्ये किमु वाच्यमस्य मनसो यत्र पेव मनोऽह
ने किं कुर्यान्न दधीन हन्ति रहमप्यात्मा पयस्य प्रभो ३३

वनमालीटीका

उक्तमर्थमाक्षिपन्नाह योयमिति योऽयं सर्वत्र समत्वदुःखादिल
क्षणः परमो योगः साम्येन समत्वेन विज्ञानगतानां रागद्वेषादीर्षादी
नां विषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेन स्वरेणोक्तः हे मधु
सूदन सर्वान्तर्यामिन् सर्ववैदिकसंप्रदायप्रवर्तक एतस्य त्वदुक्तस्य
सर्वमनोवृत्तिनिरोधलक्षणस्य योगस्य स्थितिं विद्यमानत्वात् स्थि
रां निरन्तरदीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि कुतश्च
ञ्चलत्वान्मनस इति शेषः ३३ ॥

कृष्णमवैजयन्तीटी.

इत्येवं भगवदुक्तिं निशम्यार्जुनः संदिग्धहृदयो भगवन्तं स्वसार
थिं पृच्छति स्म योऽयमिति हे मधुसूदन मधुदैत्यदलन साम्येन स्व
रनरादिविचित्रशरीरयोगेनात्मनोपरस्परात्मत्वविजातीयस्वरूपप्र भि
तीयमानत्वेपि ज्ञानैकाकारतया तौल्यादकर्मवशतयेश्वरतौल्याव

स्वपरसुखदुःखतौल्येन योऽयं सर्वसमदर्शनरूपो योगो ज्ञानयोगस्त
या सर्वसमदर्शनेन सर्वज्ञेन प्रोक्तः प्रकर्षेण सपरिकरेणोक्तः कथितः
एतस्य योगस्य स्थिरां सर्वदैकरूपां स्थितिं निश्चलां सत्तां नाभिजा
नामि अर्थरूपकोऽपि न पश्यामि नैतत्कुतो न पश्यतीत्यपेक्षायां हेतुमाह चंच
लत्वात् अतिबलिष्ठस्यातिचपलस्यानादिविषयवितिमग्नस्य मनस
श्चंचलत्वाच्चपलतरत्वात् ३३ ॥

मधुसूदनीटीका

॥ उक्तमर्थमाक्षि

पनू॥ योऽयं सर्वत्र समदृष्टिलक्षणः परमो योगः साम्येन समत्वेन चित्तग
५म तानां रागद्वेषादीनां विषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेने
श्वरेणोक्तः हे मधुसूदन सर्ववैदिकसंप्रदायप्रवर्तक एतस्य त्वदुक्त
स्य सर्वमनोवृत्तिनिरोधलक्षणस्य योगस्य स्थितिं विद्यमानतां स्थि
रां दीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि अहमस्मदादिर्यो
गाभ्यासानिपुणः कस्मान्न संभावयसीति चेदाह चंचलत्वान्मन
स इति शेषः ॥ सर्वलोकप्रसिद्धत्वेन तदेव चंचलत्वमुपपादयति ३३

सदानंदीटीका

दुःसंपाद्यत्वमात्मलक्ष्ययोगस्योक्तस्यार्जुनः तत्रास्युपायं शुश्रूषुः
पृच्छति स्वहृदि मतिं १ योऽयं सर्वत्र साम्येन योगः प्रोक्तः परात्मना
सर्वज्ञेन महेशेन त्वया निगमयोनिना २ एतस्याहं त्वदुक्तस्य योगस्या
विचलात्मनः न पश्यामि स्थितिं सतां दीर्घकालानुवर्तिनीं ३ मन
सोऽत्यन्तचांचल्यान्नैवं संभावयाम्यहं ४ ३३ ॥

नीलकंठीटीका

साम्ययोगमशक्यं मन्वान उपायान्तरं बुभुत्समानोऽर्जुन उवाच योऽय
मिति योऽयं योगस्त्वया साम्येन प्रोक्तः हिंसाद्यभावेन संन्यासपूर्व
कं न त्वया वर्णितः हे मधुसूदन तस्य योगस्य सर्ववृत्तिनिरोधरूपस्य
स्थिरां स्थितिं न पश्यामि मनसश्चंचलत्वादिति शेषः ३३ ॥

आनंदीटीका

तदेवमस्य संयमयोगस्य दुष्करतां प्रतिपादयितुमर्जुन उवाच ॥ ॥

गी॰ परां स्थितिं प्रोक्तं कर्मी साम्यस्य रूपां मनसश्चंचलत्वात्प्राप्यां न संभावयामीत्यर्थः ३३

टी ६

अथ संप्रत्यनुभूतत्वादस्य सर्व

रामकंठी टीका

साम्यप्रतिपत्तिफलस्य समाधेरसंभाव्य तां मन्यमानोऽर्जुन आह हे कृष्ण योयं समत्वलक्षणो योगस्त्वया प्रोक्तः एतस्य परां स्थितिं प्रकृष्टां प्रतिष्ठां न तर्कयामि न पश्यामि चंचलत्वादनवस्थितत्वात् [illegible]

144

एवं सर्वत्र समतया सुखादिसंवेदन

लासिकी [illegible] टीका

रूपस्य योगस्यानुभूतत्वादसंभाव्यतां मन्यमानोऽर्जुन उवाच योयमिति परोक्षप्रत्यक्षवाचकाभ्यामेव सूच्यते भवदभिहितानंतरोपायपरंपरयास्फुटं प्रत्यक्षतिर्दिष्टोप्यननुभूतत्वात्परोक्षत्वान्मायोग योयं योगः साम्येन सर्वशात्म तुल्यतया सुखाद्यनुभवरूपेणात्वया मधुसूदन प्रोक्तः एतस्य योगस्य मनसश्चंचलतया स्थिरां दीर्घकालानुवर्तिनीं स्थितिं न पश्यामि न तर्कयामि [illegible] ३३

पंडोलीटीका

सर्वयोगिनामपि यत्स्य पयोक्तस्य समदर्शनलक्षणस्य योगस्य दुःशकत्वमालक्ष्य तन्मात्रमुपायविविदिषुःअर्जुन उवाच योयमिति हे मधुसूदन त्वया योयं योगः साम्येन समत्वबुद्ध्या प्रोक्तः अहमेतस्य योगस्य मनसःचंचलत्वात् स्थिरां अचलां स्थितिं न पश्यामि ३३ ॥

रणवीरसमिद्धोधिनी ॥

अथोक्तलक्षणस्य योगस्य दुष्करत्वेनासंभवं मन्वानोऽर्जुन उवाच योयमिति निगदगम्यते तत्पद्यं किंतु चंचलत्वादित्यत्र मनस इति शेषः परां स्थितिं चिरकालमवस्थानमिति मनसोऽतिचपलत्वेन क्षणमात्रस्थायी योगोयमिति भावः ३३ ॥

मधुभाष्य

३३ ॥

भाषा अनुवाद

ऐसे योग के लक्षण भगवान से सुनि करि असम्भव जानि अर्जुन कहते हैं कि मनकी लय औ विक्षेप शक्ति हर करि केवल आत्मा मे जो अवस्थान करे सम भाव से मन का थिर हो रहना रूप योग जो आप ने कहा सो हे मधुसूदन मन की चंचलताईके हेतु हमको इस योग की दीर्घ काल अवस्थिति करे थिर रहना देख पड़ता नहीं है ३३

दोहा

जो मधुसूदन तुम कह्यो समतासें यह योग चंचलतासें ना
लखों या स्थिति परम किम होग ३३॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् तस्याहं नि-
ग्रहं मन्ये वायोरिव सुदुष्करं ३४ ॥

शाङ्करभाष्यं

चञ्चलमिति चञ्चलं हि मनः कृष्ण इति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषाकर्षणात् कृष्णः हि यस्मान्मनः चञ्चलं न केवलमत्यर्थं चञ्चलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिन्द्रियाणि च विक्षिपति परवशीकरोति किञ्च बलवत् प्रबलं न केनाचिन्नियन्तुं शक्यं दुर्निवारत्वात् किञ्च दृढं तन्तुनागवदच्छेद्यं तस्यैवंभूतस्य मनसोऽहं निग्रहं रोधं मन्ये वायोरिव यथा वायोर्दुष्करो निग्रहस्ततोऽपि मनसो दुष्करं मन्य इत्यभिप्रायः ३४ ॥

आनन्दगिरिकृतटीका

मनसश्चञ्चलत्वेऽपि कृष्णपदपरिनिष्पत्तिप्रकारं सूचयति कृष्ण इतीति कथं कर्षकत्वमाप्तकामस्य भगवतः सम्भवतीत्याशङ्क्याह भक्तेति ऐहिकामुष्मिकसर्वसम्पदामाकर्षणशीलत्वाच्चेति द्रष्टव्यं प्रमथ्नाति क्षोभयति तदेव क्षोभकत्वं प्रकटयति विक्षिपतीति दुर्निवारत्वमभिप्रेतादिविषयादाक्रष्टुमशक्यत्वं विशेषणान्तरमाह किञ्चेति अच्छेद्यत्वे विशेषणान्तरमाह किञ्च दृढमिति तन्तुनागो वरुणपाशशब्दितो जलचारी पदार्थोऽत्यन्तदृढतया छेत्तुमशक्यत्वेन प्रसिद्धो विवक्षितः वायोरिवेत्युक्तं व्यनक्ति यथेति ३४ ॥

स्वामिकृतटीका

एतदेव स्फुटयति चञ्चलमिति चञ्चलं स्वभावेनैव चपलं किञ्च प्रमाथि प्रमथनशीलं देहेन्द्रियक्षोभकं किञ्च बलवत् विचारेणापि जेतुमशक्यं किञ्च दृढं विषयवासनानुबद्धतया दुर्भेदं अतो यथाकाशे दोधूयमानस्य वायोः कुम्भादिषु निरोधनमशक्यं तथा तस्य मनसोऽपि निग्रहं निरोधं दुष्करं सर्वथा कर्तुमशक्यं मन्ये ३४ ॥

पिशाचभाष्यं

कृष्ण इति कृषतेर्विलेखनार्थस्य योगीभक्तजनपापादिदोषकर्षणात्

गी. टी. ष

कृष्ण न केवलमस्थिरं चंचलं मनः प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिंद्रियाणि च विक्षिपत् तत्परवशीकरोति किं च बलवत् केनचित् नियंतुमशक्यं किं च दृढं तन्तुनागवत् तस्यैवंभूतस्य मनसः अहं निग्रहं निरोधं मन्ये वायोरिव सुदुष्करं यथा वायोर्दुष्करो निग्रहस्तथा दुष्करं मन्ये इत्यभिप्रायः ३४

रामानुजभाष्ये

तथा हि नवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषं बलात् भ्रमयद्यदृच्छया सञ्चरति तस्य तदभ्यस्तविषयेष्वपि चंचलस्वभावस्य मनसस्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं प्रतिकूलगतेर्महावातस्य व्यजनादिनेव दुष्करमहं मन्ये मनो निग्रहो वायोरपि दुःशकः तन्निग्रहोपायो वक्तव्य इत्यभिप्रायः ३४ ॥

श्रीमदभिनवगुप्तकृतटी·

चंचलमित्यादौ चंचलत्वादेव ज्ञानमेव दुर्लभमिति भगवदभिहितं तदेव गोचरयति ... मनस्तन्निर्दिष्टमपि ३४ ॥ जमघ्नातिदृष्टाद्दृष्टेवल

[illegible] ३६

रामानुजभाष्ये

तथा हि नवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषं बलात् भ्रमयद्यदृच्छया सञ्चरति तस्य तदभ्यस्तविषयेष्वपि चंचलस्वभावस्य मनसस्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं प्रतिकूलगतेर्महावातस्य व्यजनादिनेव दुष्करमहं मन्ये मनो निग्रहो वायोरपि दुःशकः तन्निग्रहोपायो वक्तव्य इत्यभिप्रायः ३४ ॥

परमार्थप्रपाटी·

अपयश्च तत्त्वार्थमेव प्रकटयति चंचलमिति भोः कृष्ण तस्य मनसो निग्रहं निरोधं सुदुष्करं स्वतन्त्रं दुःखेन कर्तुमशक्यं मन्ये कस्येव वायोरिव यथाकाशे धावमानस्य वायोः कुम्भादिषु निरोधः कर्तुं न शक्यते न हि वायोरेकत्रावस्थानं शक्यते तद्वत् अपि तस्य दुर्निग्रहत्वे चतुर्भिः प्रकारैरुपपत्तिं चंचलमिति चंचलमेकत्रानवस्थितं प्रमाथि प्रमथनशीलं देहेन्द्रियक्षोभकं बलवत् विचारेणापि जेतुमशक्यं दृढं अनादिविषयवासनानुविद्धतया वैराग्यादिनाऽभेद्यं ३४ ॥

तदेवोपपादयति चंचलं सदातिचलनस्वभावं मनो हि यस्मि इमेवैतर
त् भक्तानां पापादिदोषान्सर्वान्वारयितुमशक्तानपि कृष्णति तेषामे
व सर्वेषां प्राणिनामशक्तानपि पुरुषार्थान्प्रकर्षति श्रापयतीति वा कृ
ष्णस्तेन तद्रूपेण संबोधयन् दुर्निवारमपि चित्तं वायुं निवार्य दुःखाप
मपि समाधिसुखं त्वमेव प्रापयितुं शक्नोषीति सूचयति न केवलं चंच
लं प्रमाथि शरीरमिंद्रियाणि च प्रमथितुं तेषां शीलं यस्य तत् किं च व
लवत् अभिप्रेताद्विषयात् केनाप्युपायेन निवारयितुं न शक्यं किं च दृ
ढं वासनासहस्रसंतानाद्भेत्तुमशक्यं तस्मान्निरष्फलत्वाद्बलवतो बलवत
या प्रमाथिनः प्रमाथित्वादतिचंचलस्य महामत्तगजस्येव मनसो नि
ग्रहं निरोधं निर्वृत्तिकतयावस्थानं सुदुःकरं सर्वथा कर्तुमशक्यमहं मन्ये
वायोरिव यथाकाशे दोधूयमानस्य वायोर्निश्चलत्वं संपादयितुं निरोधन
मशक्यं तद्वत् ३४ ॥

कृष्णमैत्रेयन्नीटी·

नन्वात्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः
प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेंद्रिय
मनोयुक्तं भोक्तेत्याहुर्मनीषिण इति श्रुतेर्मनसो बुद्धिनियम्यत्वश्रव
णात् विवेकवत्या बुद्ध्या मनोनियमनं कर्तुं शक्यमेवेति चेन्नेत्याह चंचलं हीति।
हे कृष्ण सदाकर्षणशील यस्मान्मनश्चंचलं स्वभावेनैवातिचपलं तथापि प्रमा
थि बुद्धिसहितं पुरुषं प्रकर्षेण मथितुं विलोडितुं शीलं यस्य तत्तथा।
विवेकिन्या बुद्ध्या सह पुरुषं हठात्स्वमप्यात्मविषयेषु स्वेच्छाचारेण प्र
मतीत्यर्थः कुत एवं यतो बलवत् यथा बलवान्स्वो दुर्बलमस्वावारेति
रस्कमेतल्लनो धावन्संलग्नान्दोषानपनयति स्वयमपि न पाबलवन्मनो
पि बुद्धिं पुरुषं चानाहत्य विषयेषु नयति पातयतीत्यर्थः ननु निर्वीर्या
ण्यपि विर्यपाण्यनेकानि वस्तूनि प्रभेदस्यानुगतस्य स्वतंत्रस्याधीनानि क
रोति न याति रति पायवस्तु विचारात्मिका कुशाग्रा बुद्धिर्मनो विचारेण
प्रभेयस्यानुगतस्यात्मनो वशीकर्तुं न करोतीति चेन्नेत्याह दृढमिति दृ
ढमतिकठिनं यथा तालतोरं सूचीनभिन्नं न तथा बुद्धिरपीत्यर्थः त

गी० स्यानादिकालस्याभ्यस्तविषयाकुलस्वभावस्य मनसो निग्रहं निरोधं
टी० वायोरिव महतो नभस्यस्य नभस्यतो ब्रदादिषु निरोधमिव सुदुःकरं बहु
ष० नरयत्नेनापि कर्तुमशक्यमहं मन्ये ज्ञानेन तस्मात्त्वोपायं कथयेति प्रश्ना-
भिप्रायः ३४ ।।

मधुसूदनीटीका

केवलमसमर्थं चलं सदा चलनस्वभावं मनः हि प्रसिद्धमेवैतत् भक्तानां पापादिदोषान् सर्वथा निवारयितुमशक्यानपि कृषति निवारयति यथा मेवं सर्वथा शमशक्यानपि श्रुत्वा यो नाकर्षयति प्रापयतीति वाकृष्णेन तद्रूपेण संबोधयन्नर्जुनो निवारमपि चित्तचाचल्यं निवार्यं दुःप्रापम पि समाधिसवलमेव प्रापयितुं शक्तोसीति सूचयति न केवलमसमर्थं चलं प्रमाथि शरीरमिन्द्रियाणि च प्रमथितुं क्षोभयितुं शीलं यस्य तत् तो भक्तेन यथा शरीरेन्द्रियसंघातस्य विवशतां हेतुरित्यर्थः किंच बलवदभि मतात् विषयात् केनाप्युपायेन निरोद्धुमपि न शक्यं किंच दृढं विषयवा सनासहस्रानुस्यूततया भेत्तुमशक्यं तन्नागवद्दृढं कथमिति भाष्ये तंतु मं
नागो नागपाशः तन्तनोतीति गजेन्द्राशोप्रसिद्धो महाहृदनिवासी जन्तु। विशेषो वा तस्मात्तिदृढं तथा बलवत्ता बलवत्तया प्रमाथित्वः प्रमाथित्व
म यात् चलस्य महोत्ववनगजस्येव मनसो निग्रहं निरोधं निर्वृत्तिकतया वस्थानं सुदुष्करं सर्वथा कर्तुमशक्यमहं मन्ये वायोरिव यथाकाशे दोधू यमानस्य वायोर्निश्चलत्वं संपाद्य निरोधनमशक्यं तद्वदित्यर्थः अयं भावः जातेपि तत्त्वज्ञाने प्रारब्धकर्मभोगाय जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसु खदुःखरागद्वेषादिलक्षणः चित्तधर्मः क्लेशहेतुत्वाद्बाधितानुवृत्त्यापि यो भवति चित्तवृत्तिनिरोधरूपेण योगेन तस्य निवारणं जीवन्मुक्तिरि त्युच्यते यस्याः संपादनेन योगी परमो मतः षष्ठके तत्रेदमुच्यते बंधः किं साक्षिणो निवार्यते किं वा चित्तात् नाद्यः तत्त्वज्ञानेनैव साक्षिणो बंधस्य। निवारितत्वात् न द्वितीयः स्वभावविपर्ययायोगात् विरोधिसद्भावाच्च न हि जलादार्द्रत्वमग्नेरौष्ण्यं निवारयितुं शक्यते प्रतिक्षणपरिणामिनो हि भावा ऋते चितिशक्तेरिति न्यायेन प्रतिक्षणपरिणामस्वभावत्वाच्चित्तस्य प्रा रब्धभोगेन च कर्मणाक्षिप्तत्वात् चित्तकार्यनाशने प्रवृत्तस्य तत्त्वज्ञान।

स्यापि प्रतिबंधकत्वात्स्वफलदानाय देहेंद्रियादिकमवश्यापेक्षितं
न च कर्मणा स्वफलस्य दुःखादिभोगस्य तद्वृत्तिभिर्विना संपाद
यितुं शक्यते तस्माद्यद्यपि स्वाभाविकानामपि चित्तपरिणामानां क
र्मवियोगेनाभिभवः शक्यते कर्तुं तथापि तत्तज्ज्ञानादिवियोगादपि प्रा
रब्धफलस्य कर्मणः प्राबल्यात्स्वरूपभावित्वेन तस्य वा चले योगेन तन्
निवारणमशक्यमहं स्वाबोधादेव मन्ये तस्मादुपपन्नमुक्तमात्मौ
पम्येन सर्वत्र समदर्शी परमो योगी मतः श्रेष्ठो न स्यादेवः [illegible]
[illegible] ३४ ॥

मरानंदीटीका

अनर्थचलनशीलं हि यस्मादिदं मनः एवं ततः हे कृष्ण भक्तदोषाणां सर्वथा
विनिवारक १ इंद्रियाणां शरीरस्य क्षोभकत्वात्प्रमाथि तत् नैव
केनाप्युपायेन निरोद्धुं शक्यते बलात् २ दृढं भेत्तुमशक्यं वायुकैर्न
तनागवत् अनादिवासनाजालैः स्यूतत्वेन निरंकुशं ३ महामतंग
जस्येव वनस्थस्यास्य निग्रहं निर्हेतिकं तथा समग्रावस्थानं सदुष्करं ४
यथा देशे प्रयमानस्य वायोराकाशगामिनः निरोधो न दैवं समादीक
नैकश्चिन्नशक्यते ५ अपि मिणानां महतो मरोहन्मूलनादपि अपि
वक्राशनानां योविषमश्चित्तनिग्रहः ६ अयमेवं मनसो दार्ढ्यं वासि
ष्ठे सम्यगीरितं ३४ ॥

नीलकंठीटीका

एतदेवोपपादयति चंचलं हीति प्रमाथि बलवद्दृढमेकस्थम
मथनशीलं ३४ ॥

आनंदीटीका

प्रमाथि प्रमथनशीलं कुशलत्रामपि भ्रमिकां मुन्मार्गप्रवर्त
नात्याजयत्तस्माद्वर्तयितुं शक्यम् अतो बलवद् दुर्निरोधनात्
दृढमनेकशर्वजन्माभ्यस्तेषु विषयेषु सक्तम् ३४ ॥ ॥

रामकंठीटीका

यस्मात्साधनं चंचलं प्रकृतिचपलं मतः प्रमाथि प्रमथनशीलं यतः कुशलस्यापि भ्रमिकां मुन्मार्गप्रवणत्वा
दाशुविनाशनं वततस्थावर्तयितुं शक्यते बलवत् अस्य विषयान्प्रत्यभिधावतः
यति ॥

गी॰ शैलेंद्रशिखरविशीर्यमाणसलिलौघवत् दुर्धरं बलं यतो जन्मसह
टी॰ ४ स्रेभ्यस्तेषु विषयपरमेषु दृढासक्ततया दृढं तस्यैवंविधस्यास्य मन॥
सो निग्रहमन्तर्मुखतयान्तर्निरोधं मनसो दुष्करं दुःसाध्यं संभावयामि क
स्येव वायोरिव यथा वायुः स्वास्थ्यन् येन दिन्न प्रस्तरनिग्रहीतुमशक्य
मे कः सिवं तन्मनः [illegible]

लासिकी [illegible]टीका

[illegible] कृतइत्यतआह॥

हे कृष्ण यस्मात्तावन्मनः प्रकृतिचपलं अतएव प्रमाथि प्र
त् मथनशीलं क्षोभकं बलवद्दुर्धरं अतएव दृढं विषयवासना
नुविद्धतया दुर्भेद्यं अतो यथाकाशे दोधूयमानस्य वायोः कुंभा
दिषु निरोधनमशक्यं तथा तस्य मनसोपि निग्रहं निरोधं सुदुष्करं
सर्वथा कर्तुमशक्यं मन्ये [illegible] ३४

पंचोलीटीका

एतदेव स्फुटयति चंचलमिति हे कृष्ण हि यस्मान्मनः चंचलं प्र
माथि शरीरेंद्रियाणां मथ्नाति परवशानि करोति किंच बलव
त्केनचिन्नियंतुं शक्यं किंच दृढं नैव नागवत् यंत्रस्यैवंभूतस्य
मनसो निग्रहं निरोधं वायोरिव दुष्करं मन्ये यथा वायोः दुःक
रो निग्रहः ततोपि दुःकरं मनस इत्यभिप्रायः ३४॥

रमवीरसमिद्बोधिनी॥

मनश्चापल्यमेव स्फुटयति चंचलं हीति हिः प्रसिद्धौ मनश्चंचलं
प्रकृतिचपलं भवतीति प्रसिद्धमेवैतदिति भावः यतश्चपलं त
तः प्रमाथि प्रमथितं मदाय आसमासमां निश्चयभूमिकामन्यथा प्र
णयात् स एव विनाशयितुं शीलमस्येति यतो बलवत् विष
यान्प्रति धावतोस्य शैलेंद्रशिखरविशीर्यमाणजलौघवद्दुर्धरं

बलमित्यनउत्पथास्तुत्रमित्रस्येदचूपाद्यावर्तयितुमशक्यं यत
श्चेदं दृढं रागादिदोषानुस्यूततत्वेनभेत्तुमशक्यं तस्यैवंविधस्यम
नसोनिग्रहं दुष्टसंकल्पेभ्योव्यावृत्तिहृतिजनकेभ्यः प्रतिषेधनं
सुदुष्करं सुतरांदुःसाध्यंमन्ये कस्येववायोरिव यथास्वाकुंघेना
कापोदोधूयमानोवायुर्निश्चलीकर्त्तुनिग्रहीतुमशक्यएवमेत
न्मनइतिभावः ३४॥

मधुभाष्य

३४॥

149

भाषा अनुवाद

और वही चंचलता को विस्तार करि कहते हैं कि हे कृष्ण यह म
न स्वभाव ही से चंचल औ प्रमाथी अर्थात् देह इन्द्रियों को विति
प्रकारी और बलवान कहे विचारसे इसका जीतना असाध्य है त
था दृढ कहे विषयवासना से बड़ इस मन को विषयोंसे भिन्न
करना अति दुष्कर कठिन है इस से जैसे आकाश मे वायु को
निश्चल करना कठिन तैसे इस मन का भी निग्रह कहे थिर क
रना हम को अति असाध्य बोधहोताहै ३४ ॥

दोहा

चंचलहै मन कृष्ण दृढ प्रमथशील बलवान ताकोनिग्रहजा
निए दुसकर पवनसमान ३४

159

130

श्रीभगवानुवाच असंशयं महाबाहो मनो दुर्निग्रहं
चलं अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ३५

शाङ्करभाष्यं

श्रीभगवानुवाच एवमेतद्यथा ब्रवीषि असंशयं नास्ति संशयो म
नो दुर्निग्रहं चञ्चलमित्यत्र हे महाबाहो किन्तु अभ्यासेन तु अभ्यासो
नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्तस्य वैराग्येण च गृ
ह्यते वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासात् वैरस्यं विषये
षु विरक्तो वैराग्यं तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य
न वं तन्मनो गृह्यते निगृह्यते निरुध्यत इत्यर्थः ३५ ॥

आनन्दगिरिकृतटीका

अर्धमंगीकृत्य प्रतिवचनमुत्थापयति श्रीभगवानिति कुत्र संशयरा
हित्यं तत्राह मनस इति कथं तर्हि मनोनिरोधो भवति तत्राह किन्त्विति ।
अभ्यासस्वरूपं सामान्येन निदर्शयति अभ्यासो नामेति कस्यांचिच्चित्त
भूमाविति विशेषितो ध्येयो विषयो निर्दिश्यते समानप्रत्ययावृत्तिर्विजा
तीयप्रत्ययानन्तरितेति शेषः चित्तस्येति षष्ठी प्रत्ययस्य तद्विकारत्व
द्योतनार्था वैराग्यस्वरूपं निरूपयति वैराग्यमिति तेषु वैर[illegible] वैराग्यं ग्यं
नामेति सम्बन्धः तद्धेतुं सूचयति दोषेति विषयेषु विरक्ता विषयेषु
दोषदर्शनमभ्यस्यते तेन वैरस्यं जायते तेन निगृह्यमाणं निर्दिशति वि
क्षेपेति तस्मिन् गृहीते निरुद्धे मनोनिरोधः स्यात् किंस्विदित्यपेक्षायामाह
एवमिति अभ्यासहेतुकवैराग्यद्वारा चित्तप्रचारनिरोधे निरुद्धवृत्तिकं म
नो विषयविमुखमन्तर्निष्ठं भवतीत्यर्थः ३५ ॥

स्वामिकृतटीका

तदुक्तं चंचलत्वादिकमंगीकृत्यैव मनोनिग्रहोपायं च श्रीभगवानुवाच
असंशयमिति चंचलत्वादिना मनो निरोद्धुमशक्यमिति यद्वदसि एतत्
निःसंशयमेव तथापि तु अभ्यासेन विषयाचिन्तनपूर्वकपरमात्माकार
प्रत्ययावृत्त्या विषयवैतृष्ण्येन च गृह्यते अभ्यासेन लयप्रतिबंधाद्वैराग्ये
ण च विक्षेपप्रतिबंधादुपरतवृत्तिकं सत्परमात्माकाररूपेण तत्परिणतं।
तिष्ठतीत्यर्थः तदुक्तं योगशास्त्रे मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थि

गी.
टी.
ष.

160

तिः यः संप्रज्ञातनामासौ समाधिरभिधीयते ३५ ॥

पिशाचभाष्यं

श्रीभगवानुवाच असंशयं नास्ति संशयो मनो दुर्निग्रहं चलमित्यत्र किंतु अभ्यासेन अभ्यासो नाम चित्तभूमौ कस्यांचित्समानप्रत्ययावृत्तिः वैराग्यं दृष्टादृष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन वैराग्येण च गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य एवं तन्मनो गृह्यते निरुध्यत इत्यर्थः ३५ ॥

रामानुजभाष्यं

चलस्वभावतया मनो दुर्निग्रहमेवेत्यत्र न संशयः अथाप्यात्मनो गुणाकाराभ्यासजनिताभिमुख्येनात्मव्यतिरिक्तेषु विषयेषु दोषाकारदर्शनजनितवैतृष्ण्येन च कथंचिद्गृह्यते ३५

अभिनवगुप्तकृतटी॰

बलमनसं बोधनलवैराग्याभ्यासावर्तनवति परोक्तायमाणं सम्यग्जानि द्वयात्मके चलचक्रके रहेंद्रियाणां गोचरापितमशक्यम् ३५ ॥

परमार्थप्रपाटीका

अथ द्विःप्रकारं निग्रहोपायमुपदिशन् भगवानाह असंशयमिति ॥ चंचलत्वादिस्वभावं मनो निरोद्धुमशक्यमिति यद्वदसि तदसंशयं निःसंदिग्धमेव तथापि अभ्यासेन वैराग्येण च गृह्यते वशीक्रियते तत्राभ्यासो नाम निरंतरमात्मानुध्यानं वैराग्यं च विषयवैरस्यं ननु तदुभयमप्यसाध्यमिति प्रतिभाति यतो मनसि निगृहीते अभ्यासो वैराग्यं वा सिध्यति तथाभ्यासवैराग्याभ्यां मनो गृह्यत इति चेत्सत्यं एतस्योभयस्य विचाराधीनत्वात् तच्च श्रोतरं भगवता प्रागेवदत्तं शनैःशनैरुपरमेदिति तदेव अभ्यासेन तु कौंतेय वैराग्येण च गृह्यत इत्यनेन स्मारितं तथाहि तत्र परमार्थप्राप्तौ तावदात्मविचार एव शरणमिति द्रष्टव्यः श्रोतव्यो मंतव्य इति तथा वेदाहमेतमित्यादिश्रुतयो वदंति तत्रात्मा देहेंद्रियादिविलक्षणस्तद्द्रष्टृत्वात् नहि घटद्रष्टा घट एव संभवति अयमकर्ताऽसंगश्चेति विचारेण तावद्रूपरसादिविषयग्राहकत्वेन प्रतिक्षणमन्वेषणीयः सोऽयमेव प्रयत्नमभ्यासः तथा उत्पत्तेरनंतरमेतावत्समयपर्यंतं सुखदुःखयोर्मध्ये किमधिकमनुभूतमिति परामर्शे बाल्यपौगंडकैशोरयौवनवार्धकाद्यवस्थासु दुःखमेव स्मर्यते यथा विषयलोभार्थं प्रयत्नो भयान्। रयो

घा

अभ्यासेन वैराग्येण विषयानुकूलाविना प्रयत्नं अभ्यासेन मोक्ष
दं: कृष्णार्जुनसंवादे विषयी क्रियते इति द्वैत यादगं उक्तं वक्तव्यं भगवता
माधवकृता उभयाधीनः चित्तस्थितिरित्यर्थः इति ३५

यी
प्राणपर्यवसायित्वात: सदुःखरूप: भोगसमयस्तु निमेषमात्रेणावदेव
सुखं तदपि मन्त्याभिषमायेन परिणामविरसत्वात् दुःखपर्यवसायेव
तिविचारेणावैराग्यप्रकार: किंच केवलेविषयलोलुपेपिमनसि ग्रभ्या
सोविरागश्चसंभवति तदुक्तं योगशास्त्रे यत्रैवयातिचपलंनत्रचितमे
ततत्रैवभातिपरमेस्वरपवसात्वात् प्रागदुःखेद्यविरमेविरस:पदा
र्थान्नात्मा विरसत्वेदस्नतिशंविविंसति ग्रतएवकौंतेयमहाबाहो
इतिसंबुद्धाविवेकसागयोग्रहणं वचंत्वात्मभावस्या: साहायकरि
ष्यामएवेमर्थ: ३५ ॥ वनमालीटीका

उत्तरमाह ग्रसंशयमिति सम्यग्विदितंतेचित्तवेष्टितंमनोनिग्रहीतं
प्राकासीतिसंतोषेणसंबोधयति हेमहाबाहो प्रारब्धकर्मप्राबल्यादसं
यतात्मना दुर्निग्रहंदुःखेनापिनिग्रहीतमशक्यंचलं चलस्वभा
वेमनइत्यसंशयेनास्त्येवात्रसंशय: एवंसत्यपिसंयतात्मनापिमात्रो
पायेनयोगिनाभ्यासेनचगृह्यते मनोनिग्रहेभ्यासवैराग्ययो: सम्प्रेत्य
बोधनायचशब्द: ३५ ॥

कृष्णमैवेजयन्तीटी·

एवमर्जुनप्रश्नेमनस्समंचलत्वादिकमेंगीकृत्यतस्यनिग्रहोपायंपार्थ
सारथिर्भगवानाह द्वाभ्याम् ग्रसंशयमिति हेमहाबाहो इत्यनेनय्
थानेशौर्येणशत्रूनतपसितथातिशयविवेकेनमनोपिजयेतिसूचि
तम् यद्यपिमनोदुर्निग्रहंदुःखेनातिकष्टेननिःशेषेणग्रहीतुंशक्यं
नश्चलंवायोरप्यतिचपलंभवति ग्रसंशयमत्रसंशय:संदेहोनास्ति
थापिहेकौंतेयत्वनिश्चयेनाभ्यासेनात्मस्वरूपानुभवानंदजनितसुखा
सक्तिनंदनुभवेककामेनगुणानुरूपसानेनतच्पुन:वैराग्येणग्रात्मस्वरू
पेतरवस्तुनिरयवंदुःखरूपदोषदर्शनजनितत्यागेनगृह्यतेमनोनि।
ग्रहीतुंशक्यते कौंतेयेतिसंबोधनेनयथागुणदोषविवेकवतीकुन्ती।
स्वपतिमरणभयात्ममासहसंगमकामरूपंदोषंविहायतदाज्ञयादेवग
जाहृतशावनरूपेगुणाभूतेत्वामगृह्णात्तथात्वमपिगुणदोषवि
वारेणवमनोजयेतिसूचित ३५ ॥

मधुसूदनीटीका

तमिम माक्षेपं परि हरत् ॥

गी॰ टी॰ ष॰

सम्यगिवदितं तेनैवमिवं हि नैव श्रुतो मनो निग्रहीतुं शक्यसीति संकोचेण।
संबोधयति हे महाबाहो महांतौ सालान्महादेवेनापि सह कृतप्रहरणौ
बाहू यस्येति निरतिशयमुत्कर्षं सूचयति प्रारब्धकर्मशावल्यात्संयता
त्मना दुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं प्रमाथि बलवद्दृढमिति वि
शेषणत्रयं पिंडीकृत्योक्तं चलं चंचलस्वभावं मनः असंशयं नास्त्येव
संशयोत्र ममापि मत्वैतद्वीर्यार्थः एवमपि संयतात्मना समाधिसाधो
पायेन योगिनाः भ्यासेन वैराग्येण च गृह्यते सर्ववृत्तिशून्यं क्रियते न तु म
नः समर्थः असंगृहीतरसंयतात्मनः सकाशात्संयतात्मनो निग्रही
तुर्विशेषद्योतनाय तुशब्दः मनोनिग्रहे अभ्यासवैराग्ये सत्त्वद्वयंवोप
नायवशाद् हे कौंतेयेति पितृष्वसृपुत्रत्वसंबंधेन मया त्वावश्यं कर्तव्य इ
ति स्नेहसंबंधसूचनेनाश्वासयति अत्र प्रथमार्द्धेन विनस्यहठनिग्रहो।
न संभवतीति द्वितीयार्द्धेन तु क्रमनिग्रहः संभवतीत्युक्तं हि विधामन
सो निग्रहः हठेन क्रमेण च तत्र हठः श्रोत्रादीनि ज्ञानेंद्रियाणि वाक्पा।
ण्यादीनि कर्मेंद्रियाणि च तत्तद्गोलकमात्रोपरोधेन हठान्निगृह्यंते तदृष्टां
तेन मनोपि हठेन निग्रहीष्यामीति मूढस्य भ्रांतिर्भवति न च तथा।
निग्रहीतुं शक्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात् अत
एव क्रमनिग्रहस्यैव युक्तत्वेन तु गवान्वसिष्ठस्त्वाह उपविश्योपविश्यै
व चित्तज्ञेन मुहुर्मुहुः न शक्यते मनो जेतुं विना युक्तिमनिंदितां अंकुशे
न विना मत्तो यथा दुष्टमतंगजः अध्यात्मविद्याधिगमः साधुसंगम एव
च वासनासंपरित्यागः प्राणस्पंदनिरोधनं एतास्ता युक्तयः पुष्टाः संति
चित्तजये किल सतीषु युक्तिष्वेतासु हठाच्चित्तं नियच्छंति ये चेतनस्ते दीपमुत्।
सृज्य विनिघ्नंति तमोंजनैरिति क्रमनिग्रहे चाध्यात्मविद्याधिगम एक उ
पायः स हि दृश्यस्य मिथ्यात्वं दृग्वस्तुनश्च परमार्थसत्यपरमानंदस्वप्रका।
शत्वं बोधयति तथा च सत्येतन्मनः सर्वगोचरे दुःखरूपे च मिथ्यात्वेन प्रयो
ना८ जनाभावं प्रयोजनवति च परमार्थसत्यपरमानंदरूपे दृग्वस्तुनि स्वप्रका
शत्वेन स्वागोचरत्वं बुद्ध्वा निरिंधनाग्निवत्स्वयमेवोपशाम्यति यस्तु बो
धितमपि तत्त्वं न सम्यग्बुध्यते यो वा विस्मरति तयोः साधुसंगम एवो।
पायः साधवो हि पुनः पुनर्बोधयंति स्मारयंति च यस्तु विद्यामदादिदो

स्तनयापीड्यमानो न साधनानुवर्त्तितुमुत्सहते तस्य पूर्वोक्तविवेके
न वासनापरित्यागप्रवेशोपायः यस्तु वासनानामतिप्राबल्यात्तास्त्य-
क्तुं न शक्नोति तस्य प्राणस्पन्दनिरोधोपायः प्राणस्पन्दवासनयोः चि-
त्तप्रेरकत्वात्तयोर्निरोधे चित्तशान्तिरुपपद्यते तदेतदाह स एव हि
बीजी चित्तवृक्षस्य प्राणस्पन्दनवासने एकस्मिंस्तयोः क्षीणे क्षिप्रं द्वे
अपि नश्यतः प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया आसनाशन
योगेन प्राणस्पन्दो निरुध्यते असंगव्यवहारित्वाद्भवभावनवर्जनात्
शरीरनाशदर्शित्वाद्वासना न प्रवर्त्तते वासनासंपरित्यागाच्चित्तं ग-
च्छत्यचित्ततां प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु एतावन्मा-
त्रकं मन्ये रूपं चित्तस्य राघव यद्भावनं वस्तुनोन्तर्वस्तुत्वेन रसेन च य-
दा न भावनं किंचिद्धेयोपादेयरूपि यत् स्थीयते सकलं त्यक्त्वा तदा
चित्तं न जायते अवासनत्वात्सततं यदा न मनुते मनः अमनस्ता।
तदोदेति परमोपशमप्रदेति अत्र हठविवेकयोः पर्यवसितो प्राणस्प-
न्दनिरोधार्थमभ्यासः वासनापरित्यागार्थं वैराग्यमिति साधुसं-
गमाध्यात्मविद्याधिगमोऽभ्यासवैराग्योपपादकतया अन्यथासि-
द्धे तयोरेवान्तर्भवतः अत एव भगवताभ्यासेन वैराग्येण चेति द्व-
यमेवोक्तं अत एव भगवान् पतंजलिरप्यसूत्रयत् अभ्यासवैराग्याभ्यां
तन्निरोध इति तासां प्रागुक्तानां प्रमाणविपर्ययविकल्पनिद्रास्मृतिरू-
पाणां पंचविधानामानंतानामासुरत्वेन क्लिष्टानां दैवत्वेनाक्लिष्टानाम-
पि वृत्तीनां सर्वासामपि निरोधो निरिंधनाग्निवदुपशमाख्यः परिणा- निv
मोऽभ्यासेन वैराग्येण च समुच्चितेन भवति तदुक्तं योगभाष्ये चित्त-
नदी नामोभयतोवाहिनी वहति कल्याणाय वहति पापाय च तत्र या कै-
वल्यप्राग्भारा विवेकनिम्ना सा कल्याणवहा या त्वविवेकनिम्ना सं-
सारप्राग्भारा सा पापवहा तत्र वैराग्येण विषयस्रोतः खिलीक्रियते
विवेकदर्शनाभ्यासेन च कल्याणस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृ-
त्तिनिरोध इति प्राग्भारनिम्नपदे तदा विवेकनिम्नं कैवल्यप्राग्भारं
चित्तमित्यत्र व्याख्याते यथा तीव्रवेगोपेतं नदीप्रवाहं सेतुबन्धेन ति-

गी॰ वार्यकल्याणप्रापणेनस्वैराभिमुखंतिर्यक्प्रवाहोन्तर्मुखमापद्यते त
टी॰ थावैराग्येणचित्तनद्याविषयप्रवाहंनिवार्यसमाध्यभ्यासेनप्रशान्त
अ॰ वाहितासंपादनइतिद्वाभ्यांसमुच्चयपक्षाहारेनैवव्रीहियव
ति वद्विकल्पःस्यादिमंत्रजपदेवताध्यानादीनांक्रियारूपाणामावृत्तिलक्ष
णोभ्यासःसंभवति सर्वव्यापारोपरमरूपस्यसमाधेः कैनामाभ्यासइ
तिशंकांनिवारयितुमभ्यासंसूत्रयतिस्मतत्रस्थितौयत्नोभ्यासइति त
त्रस्वरूपावस्थितेद्रष्टरिशुद्धेचित्तस्यवृत्तिकस्यप्रशान्तवाहि
तारूपानिश्चलतास्थितिः तदर्थंयत्नोमानसउत्साहः स्वभावचाञ्च
ल्याद्बहिः प्रवाहशीलंचित्तंसर्वथानिरोत्स्यामीत्येवंविधः सआवर्त्त
मानोभ्यासउच्यते सतुदीर्घकालनैरन्तर्यसत्कारासेवितोदृढभू
मिः अनिर्वेदेनदीर्घकालसेवितोविच्छेदाभावेननिरन्तरासेवितः सत्
कारेणश्रद्धातिशयेनचासेवितः सोभ्यासोदृढभूमिर्विषयसुखवासन
याचालयितुमशक्योभवति अदीर्घकालत्वेदीर्घकालत्वेपिविच्छि
द्यविच्छिद्यसेवनेश्रद्धातिशयाभावेचलयविक्षेपकषायसुखास्वा
दानामपरिहारेव्युत्थानसंस्कारप्राबल्यादृढभूमिरभ्यासःफल
य न स्यादितित्रयमुपात्तं वैराग्यंतुद्विविधं परमपरंचयतमानसंज्ञा
व्यतिरेकसंज्ञैकेन्द्रियसंज्ञावशीकारसंज्ञाभेदैरपरंचतुर्धा तत्रपूर्वभू
मिजयेनोत्तरभूमिसंपादनविवक्षयाचतुर्थमेवासूत्रयत् दृष्टानुश्र
विकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यमितिस्त्रियोन्नपानमै
श्वर्यमित्यादयोदृष्टाविषयाः स्वर्गोविदेहताप्रकृतिलयत्वमित्यादयोवै
दिकत्वेनानुश्रविकाविषयास्तेषूभयविधेष्वपिसत्यामेवतृष्णायांविवे
कतारतम्येनयतमानादित्रयंभवति अत्रजगतिकिंसारंकिमसार
मितिगुरुशास्त्राभ्यांज्ञास्यामीत्युद्योगोयतमानंस्वचित्तेपूर्वविमान
दोषाणांमध्येभ्यस्यमानविवेकेनैतेपक्वाएतेवशिष्टाइतिचिकित्स
विदी कवद्विवेचनंव्यतिरेकः दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मत्वबोधेनबहि
रिन्द्रियप्रवृत्तिमजनयन्त्यास्तृष्णायाऔत्सुक्यमात्रेणमनस्यवस्थानमेके सियव
न्द्रियं मनस्यपितृष्णायाअभावेनसर्वेष्वपिदृष्टस्यतृष्णाविरोधिनीचित्तवृ

ज्ञानप्रसादरूपावशीकारसंज्ञावैराग्यंसंप्रज्ञातस्यसमाधेरंतरं।
गसाधनमसंप्रज्ञातस्यतुबहिरंगं तस्यत्वंतरंगसाधनंपरमेववै
राग्यंतच्चास्वरूपतत्त्वतःपरंपुरुषख्यातेर्गुणवैतृष्ण्यमिति संप्रज्ञात
समाधिपाटवेनगुणत्रयात्मकात्प्रधानाद्विविक्तस्यपुरुषस्यख्या ३५
तिःसाक्षात्कारउत्पद्यते ततश्चाशेषगुणत्रयव्यवहारेषुवैतृष्ण्यंपद्
वतितत्परंश्रेष्ठंफलभूतंवैराग्यंतत्परिपाकनिमित्तश्चचित्तोप।
शमपरिणामादविलंवेनकैवल्यमिति [illegible]
[illegible]
[illegible] ३५॥

सदानंदीटीका

इमेवमर्जुनप्रश्नेश्रुत्वाभगवज्जगद्गुरुः सत्यमेवंयथाब्रवीषिवलेम
नश्चापिहे १ महाबाहुतयात्वंतनिगृहीतंवशतासि प्रारब्धकर्मशा
वल्याद्रेरणासचलात्मना २ दुःखेनापिमनोशक्यंनिगृहीतुंवलेह
ठे एवंसम्यग्धीरेणसमाधौनश्वरेणातत् ३ अभ्यासेनविशुद्धेन
वैराग्येणानिगृह्यते अभ्यासोनामकस्यांचिच्चित्तभूमौनिरंतरं ४
समानप्रत्ययावृत्तिश्चित्तस्याधिवियोगिनः दृष्टादृष्टेषुभोगेषुदो
षप्रत्यक्षदर्शनात् ५ विषयेषुयहेतस्यवैराग्येनतद्दीरितं ताभ्यां
निगृह्यतेतस्यामंतविक्षेपशीलता ६३५॥

नीलकंठीटीका

मनसोदुर्ग्रहत्वमभ्युपेत्यभगवानुवाच यद्यप्येवंतथाप्यभ्या
सवैराग्याभ्यांसमुच्चिताभ्यांतुनिग्रहमपिमनोनिगृह्यते तत्राभ्या
सोनामकस्यांचिच्चित्तभूमौसमानप्रत्ययावृत्तिः वैराग्यंतुदृष्टा
दृष्टेष्टभोगेषुसमाधनेषुदोषदर्शनेनवैतृष्ण्यं तत्रयथाकेदारि
कःकेदारेषुकुल्याजलंसंचारयन्एकस्यद्वारंपिधायापरस्योद्घा
टयतितद्वत्वैराग्येणविषयस्रोतःखिलीक्रियतेअभ्यासेनकल्या
णस्रोतउद्घाटयतइतिद्वयोरपिश्रावणकत्वं तथाचसूत्रं अभ्यास
वैराग्याभ्यांतन्निरोधइति ३५॥

गी
टी॰
अ॰

163

आनंदीटीका

तथाच योगसूत्राणि चित्तवृत्तिनिरोधो योगः अभ्यासवैराग्याभ्यां तन्निरोधः तत्रस्थितौ यत्नोभ्यासः दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यमिति ३५

यद्येतदभ्युपगमसर्वकृत्तं भगवा रामकंठीटीका

नाह — नास्त्यत्र संशयः दुश्चलं स्वभावचपलं मनो दुःखेन निग्रहीतुं शक्यते किंतु अभ्यासेन वैराग्येन चोपायद्वयेन गृह्यते अभ्यासस्यात्र कर्मयोगपर्यंतस्याविच्छिन्नत्यादिना प्रागुक्तक्रमेण सर्वेन्द्रियवृत्तिषु विहितविषयोन्मुख्येन प्रवर्तमानासु मार्गप्रापणवृत्तिषु शरीराद्यभिचारित्वात्तथैव प्रवर्तमानासु परदेशावस्थारिणाक्रमेण यथोक्तस्वात्मनि निवेशनात्मकस्थितिलाभविषयो यत्नः वैराग्यं चातिबिद्धविषयस्पर्शानुभूयमाने स्वविमूढज्ञानंदनिरूपमास्वादविस्मरणादनासंगः ताभ्यामेवं विधाभ्यां कर्मयोगापि कृतपुरुषैकगोचराभ्यां

अभ्यासवैराग्याभ्यामेतत्त्व चंचलमपि चित्तं नियंतुं शक्यमेव [illegible]

अथैतदभ्युपगमपूर्वकं लाक्षिकी [illegible]टीका वेंकटनं श्री भगवानुवाच॥

हे महाबाहो मनश्चंचलं अतएव दुर्निग्रहं दुःखेन सर्ववृत्तिशून्यतयानिरोद्धुं शक्यते इत्यत्र नास्ति संशयः किंत्वेतन्मनोभ्यासेन शनैः शनैर्निरात्मकया परमात्माकारप्रत्ययावृत्त्या वैराग्येण विषयवैतृष्ण्येन च गृह्यते सर्ववृत्तिशून्यं क्रियते अभ्यासे लयप्रतिबंधात् वैराग्येण चाविक्षेपप्रतिबंधाद्बुपरतवृत्तिकं सत्परमात्माकारतया परिणतं भवतीत्यर्थः तदुक्तं अभ्यासवैराग्याभ्यां तन्निरोधः इति चः समुच्चये उक्तं चात्रभगवता भाष्यकृता उभयाधीनश्चित्तवृत्तिनिरोध इति [illegible] ३५॥

२८

पैशाचीटीका

ततोमनसश्चंचलत्वादिकमंगीकृत्यमनोनिग्रहोपायंदर्शयतिभगवान् असंशयमिति हेमहाबाहोमनःअसंशयंनिश्चितंदुर्निग्रहंचलमित्यत्रसंशयोनतुनः हेकौंतेयअभ्यासेनआत्मविषयसंततमनोवृत्तिः आत्मव्यतिरिक्तविषयप्रवृत्तिरहितअभ्यासस्तेनदृष्टादृष्टैहिकामुष्मिकेषुदोषदर्शनाभ्यासात्वैतृष्ण्यंवैराग्यंतेनवैराग्येणचगृह्यतेनिगृह्यतेइत्यर्थः ३५ ॥

रत्नावीरसमिद्धोधिनी॥

अथैतदभ्युपगम्यार्जुनाक्षेपंपरिहरन्भगवानुवाच असंशयमिति हेमहाबाहोचंचलत्वादिनामनोदुःखेननिग्रहीतुंशक्यतेइत्यत्रनास्तिसंशयः सत्यमेवैतदसीति किंत्वभ्यासेनवैराग्येणचेत्युपायद्वयेनग्रहीतुंशक्यते नतुतुःसर्वथास्यनिग्रहासंभवइति तत्राभ्यासःकर्मयोगविषयः यथायथाएवत्रिन्यायुक्तकर्मेणविषयाननुभवन्स्वपीडितेष्वशास्त्राचार्योपदेशानुसारिणाक्रमेणमनसआरब्धकार्यैकतानीभावरूपोयत्नः वैराग्यंच केमेपुत्रादयोयेलोभाविष्टाङमपिमांलज्जास्तेहत्तरोयंपरित्यज्यथास्वपापायः प्रवर्तमागच्छंतीति सर्वथास्नेहत्यागःकोयोदीपकः

३५॥

मधुभाष्य

३५॥

164

भाषा अनुवाद

अर्जुन की कही मन की चञ्चलता अंगीकार करि भगवान उसके निग्रह करनेकी उपाय कहते हैं किहे महाबाहो हो मन की चञ्चलता रोकना कठिन यह जो तुम कहते हो सो निःसन्देह ठीक। है पर तो भी हे कौन्तेय अभ्यास के द्वारा मन परमात्माकार वृत्ति मे विषयो की वैराग्य वशाते निग्रहीत हो सके है अभ्यास से लय और वैराग्य से विक्षेप ये दोनो दूर होय यह मन निवृत्ति होय परमात्माकारता पायकर थिर होता है क्यों कि योगशास्त्र मे कहा है कि वृत्तिशून्य मनकी ब्रह्माकारा करकारित रूप स्थिति होती है उसी को निर्विकल्पकसमाधि कहते हैं ३५॥

दोहा

संशय नहि महाबाहो चंचल मनदुर्याद कौंतिसुत अभ्यास
सें गहें विरागसें ताह ३५॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः । व
श्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ३६

शांकरभाष्यं

यः पुनरसंयतात्मा तेन असंयतेति असंयतात्मना अभ्यासवैराग्या
भ्यां असंयत आत्मा अन्तःकरणं यस्य सोयमसंयतात्मा योगो दुःप्रा
पो दुःप्राप्य इति मे मतिः यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां व
श्य मापादित आत्मा मनो यस्य सोयं वश्यात्मा तेन वश्यात्मना तु
यतता भूयोपि प्रयत्नं कुर्वता शक्योवाप्तुं योग उपायतो यथोक्ता
दुपायात् ३६

आनन्दगिरिकृतटीका

संयतात्मनो योगप्राप्तिः स्फुलभेत्युक्ता व्यतिरेकं दर्शयति यःपुन
रिति व्यतिरेकोपन्यासपरं पूर्वार्द्धमन्वय व्याकरोति असंयतेति पू
र्वोक्तान्वयव्याख्यानपरमुत्तरार्द्धं व्याचष्टे यस्त्विमादिना अन्तःकरण
स्य स्ववशत्वे सिद्धेपि वैराग्यादभ्यासावता भवितव्यमित्याह यततेति
उपायवैराग्यादिपूर्वको मनोनिरोधः ३६ ॥

स्वामिकृतटीका

एतावोक्तद्विहतिश्चयरमाह असंयतात्मनेति उक्तप्रकारेणाभ्या
सवैराग्याभ्यामसंयतः आत्माचित्तं यस्य तेन पुरुषेण योगो दु
ष्प्रापः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्त्ती आत्माचित्तं य
स्य तेन पुरुषेण तु अनेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ३६

पिशाचभाष्यं

यःपुनःअसंयतात्मा तेन असंयतात्मनेति अभ्यासवैराग्याभ्यामसं
यतोन्तःकरणोऽसंयत आत्मा तेनासंयतात्मना योगो दुष्प्रापः दुःख
संप्राप्य इति मे मतिः यस्तु पुनः वश्यात्मा तेन वश्यात्मना अभ्यासवैरा
ग्याभ्यां वश्यत्वमुपपादित आत्मा मनो यस्य सोयं तेन वश्यात्मना तु य
तता भूयोपि प्रयत्नं कुर्वता शक्योवाप्तुं योग उपायतः यथोक्तादुपायात् ३६

रामानुजभाष्यं

[1] तेन असंयतात्मना

गी.
टी.
ष.

असंयतात्मनाः जितमनस्का महताऽपि प्रबलेन योगो दुःप्राप एव
उपायतस्तु वश्यात्मना पूर्वोक्तेन मदाराधनरूपेणानर्गलेन ज्ञानकर्म
णा जितमनसा यतमानेनायमेव समदर्शनरूपो योगोऽवाप्तुं शक्यः ३६

अभिनवगुप्तकृतटी·

वैराग्येण विषयोत्सुकता विनाश्यते अभ्यासेन मोक्षोपायः कर्मा
कर्मविषयी क्रियते इति एतदपवादे उक्तं तत्र भगवता भाष्यकृ
ता उभयाधीनश्चित्तवृत्तिनिरोध इति [illegible] ३६

अत्र यथा प्रत्ययता असंयता
त्मनोऽविरक्तस्य न कुत्र विद्यायां
प्राप्तिः वश्यात्मनेति वैराग्यवता
यतमानेनेति साभ्यासेनोपाया
न् अनेकासिद्धान्तादिशास्त्रविद्भि
नान् संश्रित्य २६

168

परमार्थप्रपाटीका

अथोभयप्रकारं विधुरस्य योगो दुःसाध्यस्तथाऽभयोपेतस्य सुसा
ध्य इत्याह असंयतेति अभ्यासवैराग्याभ्यामसंयत आत्मा चित्तं
यस्य तेन योगो दुःप्रापः प्राप्तुमशक्यस्तु ताभ्यां वश्यः वशवर्ती
आत्मा यस्य तेन यतता प्रयत्नं कुर्वता पुरुषेणोपायतोऽभ्यासवैरा
ग्यरूपात् प्राप्तुं शक्य इति मे मतिः मदभिमतं ३६ ॥

वनमालीटीका

प्रारब्धकर्मणामनन्तानामतिप्रबलेन स्वफलदानाय मनसो वृत्ति
षु नानाप्रमाणानां लक्ष्यत्वान्न निरोध इति यदुक्तं तदेव परंतूपायेन नि
रोधः संभवतीत्याह असंयतात्मनेति भगवान्मतान्तरेऽपि
वैराग्याभ्यासाभ्यां न संयतो निरुद्धो हृत्कन्नाप्यपित आत्मा चित्तं
येन तेनासंयतात्मना योगो मनोनिरोधः दुःप्रापः दुःखेनापि प्राप्तुं
त्र न शक्यते प्रारब्धकर्मकृतानां चित्तचाञ्चल्यादीनां वृत्तीनां बलवत्त्वादिति मे मतिः
संमतिस्तथैव सर्वः वश्यात्मना तु वैराग्यपरिपाकेन वासनाक्षये
सति वश्यः स्वाधीनो विषयपारतन्त्र्यशून्य आत्मा मनो यस्य तेन वैरा
ग्येण विषयेभ्यो विमुखीकरणात् अभ्यासेन भगवदाकारताकरणाच्च
उपायतो मनोनिरोधः प्राप्तुं शक्यः पुरुषप्रयत्नस्य च लौकिकस्य
वा प्रारब्धकर्मापेक्षया प्राबल्यात् अन्यथा लौकिकानां कृष्यादिप्र
यत्नस्य वैदिकानां ज्योतिष्टोमादिप्रयत्नस्य च वैयर्थ्यापत्तेः प्रारब्ध
कर्मसत्त्वे ततः फलं संभवेत् किं पुरुषप्रयत्नेन तदसत्त्वे तु सर्वथाऽसं
भवात् किं तेनेति विकल्पस्य सर्वत्र संभवात् अथ कर्मणः स्वयम

दृष्टद्वारस्य दृष्टस्य साधनं विना फलजननासमर्थत्वादयेत्वितः
कृष्यादेः पुरुषप्रयत्नस्य इति चेन्न योगाभ्यासेऽपि समे प्रारब्धकर्म
फलेन तत्त्वज्ञानानां च बलमिति दृष्टत्वात् तथा च तस्मादपि कर्मणो यो
प५ गाभ्यासः प्रबलस्तु शास्त्रीयप्रयत्नस्य सर्वतः प्रबलत्वात् यद्वा जीवन्
मुक्तितः प्रागेव मनोनिरोधस्य शक्यत्वाशक्यत्वविचारो जीवन्मु
क्तस्य ज्ञानभगवन्महाप्रसादस्य निहतनिःशेषविघ्नस्य मनोनिग्रहा
दिके किमपि कर्तव्यं नास्तीत्यर्थः ३९ ॥

इत्यवैजयन्तीटी०

किंच असंयतात्मनेति असंयतात्मना अभ्यासवैराग्याभ्याम् न
संयतः समग्रविषयाद्युपरमित आत्मा मनो येन स तथा तेन विषय
व्याकुलचित्तेन तत्त्वज्ञानिनापि पुरुषेण योगः सर्वेन्द्रियवृत्तिनिरो
धलक्षणो ज्ञानयोगशिरस्कोऽष्टाङ्गयोगो दुःप्रापः दुःखेनापि प्राप्तुम
शक्यः तन्निश्चयेन वश्यात्मना वश्यत्वाभ्यां वशीकृत आत्मा मनो येन
स तथा तेन स्वाधीनमनसा तथापि यतता इह हो मनोनिरोधनायैव
प्रयत्नं कुर्वता उपायतः सर्वेश्वरस्य भगवतो ममाराधनात्मकेनात्म
गतज्ञानेन कर्मणा वा मेऽवाप्तुमपि योगः शक्यो नान्यथेत्यर्थः ३९

यत्तु त्वमवोचः प्रारब्धभोगेन क **मधुसूदनीटीका** र्मणा तत्त्वज्ञानादपि प्रबलेन स्वफलदानाय मनसो वृत्तिषूत्पाद्य
मानासु कथं तासां निरोधः क
र्तुं शक्य इति तत्रोच्यते ॥

उक्तेऽपि तत्त्वसाक्षात्कारे वेदान्तव्याख्यानादिव्यासंगादालस्यादि
दोषाद्वा अभ्यासवैराग्याभ्यामसंयतोऽनिरुद्ध आत्मा अन्तःकरणं यस्य तेनासं
यतात्मना तत्त्वसाक्षात्कारवतापि योगो मनोवृत्तिनिरोधः दुःप्राप
दुःखेनापि प्राप्तुं न शक्यः प्रारब्धकर्मकृतात् चित्तचंचलत्वादिति त्वयैव
दर्शितं त्वमेव मतिः मम सम्मतिः तत्रैवेत्यर्थः केन तर्हि प्राप्यते उच्य
ते वश्यात्मना तु वैराग्यपरिपाकेन वासनात्तये सति वश्यः स्वाधीनो
विषयपारतंत्र्यशून्यः आत्मा अन्तःकरणं यस्य तेन तु शब्दोऽसंयतात्मनो
वैलक्षण्यद्योतनार्थः अवधारणार्थो वा यतता इदानीमपि यतमाने
न वैराग्येन विषयस्रोतः खिलीकरणपात्मस्रोत उद्घाटनार्थमभ्यासं प्रा
गुक्तं कुर्वता योगः सर्ववृत्तिनिरोधः शक्योऽवाप्तुं चित्तवाचस्पति

मित्वानि प्रारब्धकर्माण्यभिभूय प्रामेऽशक्ताः कथमतिबलवतां प्रा
रब्धभोगानां कर्मणामभिभवः उच्यते उपायतदुपायात् उपायः पु
रुषकारस्तस्य लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात्
अन्यथा लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादि
प्रयत्नस्य च वैयर्थ्यापत्तेः सर्वत्र प्रारब्धकर्मसद्भावविकल्पग्रास्ता
त् तथा हि प्रारब्धकर्मसत्वेन तत एव फलप्राप्तेः किं पौरुषेण प्रयत्नेन
तदसत्वेन सर्वथा फलासंभवात् किं तेनेति प्रयत्नकर्मणः स्वयमदृ
ष्टरूपस्य दृष्टसाधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वादुप
त्तेः कृष्यादेः पुरुषप्रयत्न इति चेत् योगाभ्यासेऽपि समं समाधानं त
स्माध्यायाजीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धकर्मफलान्तर्भा
वात् अन्यथा यथा प्रारब्धकर्मफलेन तत्त्वज्ञानात् प्रबलमिति कल्पने
दृष्टत्वात् तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोऽस्तु शास्त्रीयप
यत्नस्य सर्वत्र ततः प्राबल्यदर्शनात् तथा चाह भगवान् वसिष्ठः सर्वमेवे
ह हि सदा संसारे रघुनन्दन सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवा
प्यते उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं तत्रोच्छास्त्रमनर्था
य परमार्थाय शास्त्रितं उच्छास्त्रं शास्त्रप्रतिषिद्धमनर्थाय नरकाय १
शास्त्रितं शास्त्रविहितं अन्तःकरणशुद्धिद्वारा परमार्थायवनर्थेषु
परमार्थमोक्षाय २ शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् पौ
रुषेण प्रयत्नेन योजनीया शुभे पथि १ अशुभेषु समाविष्टं शुभेष्वेवा
वतारय स्वमनः पुरुषार्थेन बलेन बलिनां वर २ प्रागभ्यासवशाद्या
ति यदा ते वासनोदयं तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन ३ वा
सनाशुभेतिशेषः संदिग्धायामपि भृशं शुभामेव समाहर शुभायां
वासनावृद्धौ तात न दोषो नकश्चन अव्युत्पन्नमना यावद्भवानज्ञाततत्प
दः गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ततः पक्वकषायेण नूनं
विज्ञातवस्तुना शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निरोधिनेति ४ तस्मा
त्सातिगतस्य संसारस्याविवेकनिबंधनस्य विवेकसाक्षात्कारादपन
यपि प्रारब्धकर्मपर्यवस्थापितस्य चित्तस्य स्वाभाविकीनामपि वृत्ती

नो योगाभ्यासप्रयत्नेनापनयेत्स तु जीवन्मुक्तः परमो योगी चित्त
वृत्तिनिरोधाभावेन तत्त्वज्ञानवानप्यपरमो योगीति सिद्धं प्रपंचि
तं जीवन्मुक्तिविवेके सविस्तरमनुसंधेयं ३९ एवं प्राक्तनेन ग्रं
थेनोक्तौ तत्र तत्त्वज्ञानिनौ सुसमग्रजीवन्मुक्तिः परमो योगी मतः असमग्र।
तत्त्वज्ञानी असमग्रजीवन्मुक्तिरपरमो योगी मत इत्युक्ते तयोरुभयो
रपि ज्ञानिनोः ज्ञाननाशेऽपि यावत् प्रारब्धभोगकर्म देहेंद्रियसंघाता
वस्थानान्नारब्धभोगकर्मापायेऽवर्तमाने देहेंद्रियसंघातापाया
त्पुनरुत्पादकाभावाद्विदेहकैवल्यप्राप्तिः कापि नास्त्याशंका यस्तु प्रा
क् कृतकर्मभिर्लब्धविविदिषापर्यंतचित्तशुद्धिः कृतकार्यत्वात्स
र्वाणि कर्माणि परित्यज्य प्राप्तपरमहंसपरिव्राजकभावः परमहं
सपरिव्राजकमात्मज्ञानात्कारणजीवन्मुक्तेः परमबोधनदत्ते।
गुरुमुपसृत्य तत्त्वतो वेदांतमहावाक्योपदेशं प्राप्य तद्वाक्यैः संभावनावि
परीतभावनाख्यप्रतिबंधनिरासाय ध्यानाभ्यासजिज्ञासेमाघःना
वृत्तिः शब्दादिभ्यो यावत्तलेतणमीमांसया श्रवणमनननिदिध्या
सनानि गुरुप्रसादात् कर्तुमारभते समग्रद्धयानोऽपि सत्रा प्रयोल
त्वेनाल्पप्रयत्नत्वादलब्धज्ञानपरिपाकः श्रवणमनननिदिध्यास
नेषु क्रियमाणेष्वेवमध्येप्रयतेसज्ज्ञानपरिपाकस्यान्यत्वेनातः नष्टा
ताज्ञानमस्याते नाप्युपासनासहितकर्मफले देवलोकमनुभव।
मर्चिरादिमार्गेण नापि केवलकर्मफलं पितृलोकमनुभवति मा
मा धूमादिमार्गेण कर्मणामुपासनानां च यत्कृतत्वात् अतएव नादृशो यो
गभ्रष्टः कीटादिभावेन कष्टां गतिमियादत आह सततिर्देवयानमार्गा पितृयान
संबंधित्वात् वर्णाश्रमाचारभ्रष्टवदथवा कष्टां गतिं नेयात् शास्त्र
निंदितकर्मशून्यत्वाद्वामदेववदिति संशयपर्याकुलमना ३९॥

सदानंदटीका

ताभ्यामसंयतं यस्य मनो विक्षेपशालिनः चित्तवृत्तिनिरोधाख्यो
योगस्तस्यातिदुर्लभः १ प्रारब्धकर्मप्राबल्याच्चांचल्यादिमनोस्वभाव
त् दुर्निग्रहत्वं चित्तस्य तत्र मे संमतिरिह: वैराग्यपरिपाकेन वासना
नोदये सति वश्यः स्वाधीनप्राणांतःकरणो यस्तेन तत्र २ ईदृशो ना

पिष्टैकमभ्यासं कुर्वतादरात् चितवांचल्यकारीणिकर्मीण्येवा।
भिभूयच ४ ग्रामेषु शक्तः सयोगोहि चित्तवृत्तिनिरोधकः सशक्तो
भिभवः कर्त्तेक एव प्रारब्धकर्मणां मेवेभेः सो युपायेन कर्त्तुशक्यो
विवेकिना शास्त्रीयस्य प्रयत्नस्य प्राबल्यादपि कर्मणां ६ कर्त्तव्या
भिभवः शक्तो वासिष्ठेपि तथोक्तं सर्वमेवेह हि सदा संसारे रघुनं
दन सम्यक् प्रयुक्तात् सर्वेणापौरुषात् समवाप्यते उक्तात् स्वशास्त्रितं वे
ति पौरुषं हि विधीयते ८ नयोक्ता त्वमनर्थाय परमार्थाय शास्त्रितं
शुभाशुभाभ्यां मार्गाभ्यां वहंती वासना सरित् ९ पौरुषेण प्रयत्नेन
योजनीया शुभे पथि अशुभेषु समाविष्टं शुभेष्वेवावतारय १० स्वम
नः पुरुषार्थेन बलेन बलिनां वर शान्ताभ्यासवशाद्याति यदा तेवा
सनोदयं तदभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन संदिग्धायामपि भृशं
नप यावद्भवान्नतांतमदः ११ गुरुशास्त्रप्रमाणेस्तु निर्णीतेनावराचरः
तनुः पक्वकषायेण नूनं विज्ञातवस्तुना शुभोप्यसो त्वया मार्गो वास
नौघो निरोधिना तस्मात् मोक्षमाश्रित्य शक्तः प्रारब्धकर्मणां १४
कर्त्तव्याभिभवोपीति सिद्धमित्याशयो हरेः १५ योगाभ्यासपरे मनो
नवरतं संस्थाप्य नेयत्र वै बन्धनान्नेंद्रस्तीर्थरोहयत्यतिज्ञानमात्रयोगी
यते वैराग्यादिगुणैः सत्तावसत्तलभोपद्रकिलेशाद्दृणां सोस्माकं
हृदि सर्वदाजनस्तोभयान्मुकुंदो हरिः ११३६ ॥

नीलकंठटीका ।

असंयतात्मनाअजितचित्तेन वश्यात्मना जितचित्तेन उपायतः
अभ्यासवैराग्यरूपात् ३६ ॥

आनंदटीका

न संयतो निरुद्ध आत्मा मनो येन तेन दुष्प्रापो योगो इति म
या मन्यते तु पुनः वश्यात्मना निरुद्धचेतसा यतता यत्नं पूर्व
मभ्यस्यता उपायतः वैराग्यादियोगसेवनादवाप्तुं शक्यः [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

रामकंठीटीका

अतएव — यतो व्याख्याताभ्यासवैराग्यलक्षणसाधनाभावादसंयतात्मना अ
नियमितांतःकरणेन पुरुषेण एष योगो दुष्प्रापो दुर्लभः वश्यात्मना
विधेयांतःकरणेन पुनः पुरुषेण यतता नित्यमविच्छिन्नोत्साहेन यत्नं प्रय
त्नं कुर्वता उपायतो यथोक्तात्तल्लक्षणादुपायात्स्वीकर्तुं शक्य एवं [illegible]
[illegible]
[illegible]
[illegible] ३६

नासिकी[illegible]टीका

किंच — अभ्यासवैराग्याभ्यां न संयतः सम्यग्वृत्तिशून्यतया निरुद्ध आत्मांतः
करणं येन तेन पुरुषेण अयं योगो दुष्प्रापो दुर्लभः तर्हि उपायः को वश्या
त्मना विधेयांतःकरणेन वैराग्यवतेत्यर्थः यतता साभ्यासेनैवानेनो
पायेन स्वीकर्तुं शक्यः ३६ [illegible]
[illegible]
[illegible]
[illegible] ३६॥

पंचोलीटीका

एतावांस्तु शह विशेषः इत्याह असंयतात्मनेति योगः असंयतात्मना
अभ्यासवैराग्याभ्याम् असंयतचित्तेन दुःप्राप इति मे मतिः तु पुनः वश्यात्म
ना अभ्यासवैराग्याभ्यां वशीकृतमनसा यतता यत्नं कुर्वता उपायतः य
थोक्तेन उपायेन योगेन प्राप्तुं शक्यः ३६

श्रणवीरसमिद्बोधिनी॥

अतएव असंयतात्मनेति न संयतो निगृहीतो दुष्टसंकल्पेभ्यः प्रत्या
वर्तित आत्मा मनो येन तेनावशीकृतमनसा योगः समतालक्षणः
कर्मकौशललक्षणश्च कर्मयोगो दुःखेनापि प्राप्तुं न शक्यः इत्यने
न प्रकारेण मे मम मतिर्निश्चयः वश्यात्मना स्वायत्तीकृतचित्तेन य

ततोयत्नंकुर्वतायांयोगः कर्मयोगउपायतः मोक्षलक्षणनिश्चय
रूपात् अवाप्तुं शक्यः अतोमनोजयेसत्येवनिश्चयरूपार्थो
स्सर्वंसिध्यतीतिभावः ३९॥

मधुभाष्य

३९॥

भाषा अनुवाद

और संयतआत्मा को योगप्राप्ति सुलभ है यह कहते हैं कि उक्त रीति से अभ्यास औ वैराग्य के द्वारा जिस का चित्त वश नहीं है उस को यह योग दुःप्राप है और जिस का चित्त वशीभूत है और जो पूर्व कथित उपाय से यत्न करता है वह मेरे मतसे योग प्राप्त हो सकता है ३९

दोहा

नमन जाकेवश तिहयोग अलभ्यमोमत मनवश जाके ता
हिको यतन लभ्यहै सत ३८॥

170

अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमा
नसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ३७

शांकरभाष्यं

तत्र योगाभ्यासांगीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्मा
णि संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्त
मिति योगी योगमार्गान्मरणकाले चलित विनश्यति तस्य नाशमा
शंक्यार्जुन उवाच अयतिरिति अयतिरप्रयत्नवान् योगमार्गे श्रद्ध
यास्तिकबुद्ध्या योगतो योगादन्तकालेपि चलितं मानसं मनो यस्य
स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं स
म्यग्दर्शनं कां गतिं हे कृष्ण गच्छति ३७ ॥

आनन्दगिरिकृतटीका

प्रश्नान्तरमुत्थापयति तत्रेत्यादिना मनोनिरोधस्य दुःखसाध्यत्वमाशं
का परिहृते सति प्रश्नान्तरावकाशं प्रतिलभ्यावाचेति सम्बन्धः।
लोकद्वयप्रापककर्मसंन्यासे कुतो योगिनो नाशाशंकेत्याशंक्याह
योगाभ्यासेति तथापि योगानुष्ठानपरिपाकपरिप्राप्तिसम्यग्दर्शन
सामर्थ्यान्मोक्षोपपत्तौ कुतस्तस्य नाशाशंकेति चेन्नैवमनेकान्त
रायवत्त्वाद्योगस्येहजन्मनि प्रायेण संसिद्ध्यसिद्धिरित्यभिसन्धाया
ह योगसिद्धीति अभ्युदयनिःश्रेयसबहिर्भावो नाशो योगमार्गात्त
त्फलस्य सम्यग्दर्शनादिति शेषः तर्हि ततो बहिर्मुखत्वमेवास्तु
किं संन्यस्तमित्याशंक्याह श्रद्धयेति तर्हि योगमार्गमाश्रयते नेत्याह
योगादिति मरणकाले व्याकुलेन्द्रियस्य ज्ञानसाधनानुष्ठानावकाश
भावादुक्तं तत्स्खलितमानसत्वमित्याशंक्याह भ्रष्टेति गम्यत इति
गतिः पुरुषार्थः सामान्यप्रश्नमन्तर्भाव्य विशेषप्रश्नो द्रष्टव्यः ३७॥

स्वामिकृतटीका

अभ्यासवैराग्याभावेन कथंचित्प्राप्तसम्यग्ज्ञानः किं फलं प्राप्नोती
त्यर्जुन उवाच अयतिरिति प्रथमं श्रद्धयोपेत एव योगे प्रवृत्तः न तु
मिथ्याचारतया ततः परं तु अयतिः न सम्यग्यतते शिथिलाभ्यास इ
त्यर्थः तथा योगाच्चलितं मानसं विषयप्रवणं चित्तं यस्य मन्दवैराग्य

गी॰
टी॰
ध॰

इत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिफलं ज्ञानमप्राप्य
कां गतिं प्राप्नोति ३७

पिशाचभाष्यं

तत्र योगाभ्यासांगीकरणे परलोकेहलोकशास्त्रनिमित्तानि कर्माणि
संन्यस्तानि योगस्य फलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति यो
गी योगमार्गान्मरणकाले चलितचित्त इति तस्य नाशमाशंक्याह
अर्जुनः अयतिरिति अप्रयत्नवान्योगमार्गे श्रद्धयास्तिक्यबुद्ध्योपे
तो योगादन्तकाले चलितं मानसं मनो यस्य स चलितमानसः नष्टस्मृ
तिः अप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनफलं कां गतिं कृष्ण
गच्छति ३७ ॥

रामानुजभाष्यं

अथ नेहाभिक्रमनाशोस्तीत्यादावेवोक्तं योगमाहात्म्यं यथावच्छ्रोतुम
र्जुनः पृच्छति अनेनात्मज्ञानतया योगशिरस्केन पावककर्मयोग
माहात्म्यं नेदितं तेन च योगमाहात्म्यमेव पृष्टेन उवाच श्रद्धयायो
गे प्रवृत्तो हृत्फलताभ्यासरूपयत्नवैकल्येन योगसंसिद्धिमप्राप्य यो
गाच्चलितमानसः कां गतिं गच्छति ३७ ॥

अभिनवगुप्तकृतटी॰

आत्मायोगाद्यदि चलिते पि चित्ते श्रद्धा न हीयते विनष्टश्रद्धे हि सिद्धयोगोपि सर्वं निष्फ
लं कुरुते उक्तं हि यदा प्राप्यापि विज्ञानं दूषिते चित्तविभ्रमात् तदैव ध्वंसते शीघ्रं तूल
राशिमिवानल इति योगस्य सम्यक् सिद्धावजातायां किं लोकात्रिष्क्रान्तः सम्यक्
ब्रह्मणि न लीन इति नश्येत् अथवा ब्रह्मण्यप्रतिष्ठत्वाद्विनश्यति परलोकबाध
येति प्रश्नः ॥ ३७ ॥ ३७ ॥

परमार्थप्रपाटीका

अथो भयपरस्मृत्वेन शिथिलाभ्यासवतः कां गतिरित्यर्जुनः पृच्छति
अयतिरिति प्रथमे श्रद्धयोपेतः ईश्वरार्पणतया कर्म कुर्वाणः सन्
योगे प्रवृत्तः न तु मिथ्याचारतया परं तु अयतिः सम्यग्यतनेन योग
सामग्रीविकलः सन् योगाच्चलितं विषयासक्तं मानसं यस्य सः तथा
भूतो योगसंसिद्धिमप्राप्य कां गतिं गच्छति ३७ ॥

वनमालीटीका

एवं प्रकरणत्रयेणोपन्यस्तभगवदुपदेशोक्तोऽनन्तनिःशेषाविद्यानिवृ
त्तिपूर्वकस्वस्वरूपाविर्भावरूपजीवन्मुक्तिरूपो योगीमतः ३

मत्त्वपरंब्रह्मापरोक्षमत्रजीवन्मुक्तिस्तु परमो योगी मतः पूर्वं।
स भगवदाज्ञादिकाविद्यायानिवृत्तत्वेपि स्वस्वरूपानंदाज्ञादिका
याअनिवृत्तत्वात् अंतस्यत्वविद्याहृदयस्यापिनिवृत्तिः विमुक्तस्य
ध्यानश्रमारोबपदपनिवृत्तमुक्तेरिसके यत्नकर्मफललब्धविविदि
षापर्यंतवृत्तशुद्धिः कृतकर्मत्वात् कर्माणि संन्यस्य जीवन्मुक्तं
परबोधनदृगुरुमुपसृत्यनतोवेदांतोपदेशंप्राप्यासंभावनविपरी
तभावनानिवृत्तिपूर्वकभगवंतमापरोक्षीकर्तुं प्रयातेप्रसक्ति।
तासेमाधनावृत्तिः शमादिसंपन्नयावल्लेतणमीमांसयाश्रवण
मननिदिध्यासनानि गुरुमुपसाद्यकर्तुमारभतेसम्यग्ध्यानेनाप्रा
घोसवेनाल्पप्रयत्नत्वाल्लब्धज्ञानपरिपाकः श्रवणादिषु क्रियमा
णेष्वेवमध्येअपयत् सोज्ञानसम्पां भगवदपरोक्षत्वेनतंसंसारान् कृ
मुक्तेनापिस्वर्गादिफलभोक्ता तत्साधककर्मणामभावात् अतप
नादृशोयोगभ्रष्टः कीटादिभावेनकष्टांगतिमियादन्तत्वेसतिदेव
पित्र्यानाद्यसंबंधित्वात् सुवर्णाश्रमाचारभ्रष्टत्वान् अयवाकष्टां
गतिंनैयाविति इतिकर्मभ्रष्टत्वात्सामदेवांवदितिसंदिहानःपृ दि
च्छति अयतिरिति अयतिरल्पयत्नवान् अश्रवणापवागरितिव
त्तनस्यार्थकथ्यहृपोपेनोगुरुवेदांतवाक्यविद्यासक्तः अज्ञाव
शमाद्युपलक्षणे शांतोदांतउपरतस्तितिक्षुश्रद्धावित्तोभूत्वात्मन्ये
वात्मानंपश्येदितिश्रुतेः नित्यानित्यवस्तुविवेकइहामुत्रभोगवि
ति रागः शमदमोपरतितितिक्षाश्रद्धादिसंपत् मुमुक्षुत्वं चेति साधन
यु चतुष्टयसंपन्नोप्यश्रुतोस्यत्वेनमरणकालेचेंद्रियव्याकुलत्वेनसाध।
नांसंभवायोगाच्चलितमानसः योगात्श्रवणादिजन्मनस्तत्त्वज्ञा
नाच्चलितंतत्फलमप्राप्तमानसः योगसंसिद्धिंब्रह्मापरोक्षनि
मित्तांमुक्तिमप्राप्यानन्तत्वपदमतकांगतिंउगेतिमृगतिर्वागच्छ
ति स्तोचितकर्मत्यागात् शास्त्रोक्तसाधनानुष्ठायित्वाद्दृष्टिंत
कर्मभ्रष्टत्वाच्च ३७ ॥

गी॰ फलानुसंधानरहितस्य ज्ञानगर्भस्याष्टाङ्गयोगशिरस्कस्य कर्मयोगा
टी॰ स्यानेहाभिक्रमनाशोऽस्तीत्याहितापूर्वं माहात्म्यं श्रुतमपि पुनस्तस्य
अ॰ विस्तरश्रवणेच्छयार्जुनो भगवन्तं पृच्छति त्रिभिः अयतिरिति द्व
कस्य यः कश्चित्पुरुषः प्रथमं तावच्छास्त्राचार्यवचनविश्वासेनोत्पन्न
याश्रद्धयोपेतो युक्तो भवति ततः प्रमादयतिः स्वधर्माचरणे अप्रय
त्नवान् अल्पार्थे नञ् अनुदरा कन्येतिवत् अतएव योगाद्धोगयो
गात् चलितमानसः अभ्यासवैराग्ययोः शैथिल्यप्रयत्नत्वात्सा
ये: स्वकाशाच्चलितं विषयेष्वभ्यस्तं मानसं यस्य स तथा ईदृशोऽसम्य
ग्योगो योगी योगसंसिद्धिं सर्वाङ्गसम्पन्नज्ञानगर्भस्य कर्मशिर
स्कस्याष्टाङ्गस्य संसिद्धिमात्मावलोकनरूपं फलमप्राप्य स्वधर्मानुष्ठा
नाभ्यासवैराग्यशैथिल्यादात्मानमनधिगम्य कां गतिं किं शास्त्रोक्ता
नेकविधां शंकां संस्थयति गतिं शास्त्रस्वर्गादिस्थानं यानयति तथा
हि देवयोनिं वा मनुष्ययोनिं वा पशुपक्षिसरीसृपादियोनिं वा निरय
योनिं वा स्थावरयोनिं वा गच्छति प्राप्नोति यय प्रयतिः योगाच्चलि
तमानसस्त्र भगवति तथापि श्रद्धावांस्तत्र किं विफलेशाम्नोमेवनद
टस्वैत्यर्थः ॥ ३७ ॥ मधुसूदनीटीका
यतिः यत्नशीलः अल्पार्थे नञ् अल्पतृष्णा यवागूरितिवत् अयतिः
अल्पयत्नः श्रद्धया गुरुवेदान्तवाक्येषु विश्वासबुद्ध्या उपेतो युक्तः
श्रद्धावत्त्वस्य सहकारिणां शमादीनामुपलक्षणं शान्तो दान्त उपरतस्ति
तिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवात्मानं पश्येदिति श्रुतेः तेन नित्यानि
त्यवस्तुविवेक इहामुत्रफलभोगविरागः शमदमोपरतितितिक्षा
श्रद्धादिसंपत् मुमुक्षुत्वं चेति साधनचतुष्टयसंपन्नः गुरुमुपसृत्य वे
दान्तवाक्यश्रवणादि कुर्वन्नपि परमायुषोऽल्पत्वेन मरणकाले चेन्द्रि
ना४ याणां व्याकुलत्वेन साधनानुष्ठानासंभवात् योगाच्चलितमानसः योगा
च्छ्रवणादिपरिपाकलब्धजन्मनस्तत्त्वसाक्षात्कारात् चलितं नतं फल
मप्राप्तमानसं यस्य सः योगो निष्पत्ते वा अप्राप्य योगसंसिद्धिं तत्त्वज्ञान

तिमित्यामस्ताननन्तकार्यनिवृत्तिमप्तनराहतिसहितामप्राप्यात्मज्ञ
त्तएवमस्तः सन्कांगतिंहेकृष्णगच्छतिसुगतिंदुर्गतिंवाकर्मणो
परिभ्रष्टात्त्वज्ञानस्यचाप्राप्तेः शास्त्रोक्तमोक्षसाधनानुष्ठापितत्वात्क
र्मणहितकर्मभ्रष्टत्वाच्च [illegible] ३७ ॥

सदानंदीटीका

योगाभ्याससहितेनसम्यक्त्वेसर्वकर्मणत् इहामुत्रफलप्राप्तिहेतवः।
तेषुप्रवृत्तत्वात् १ योगसिद्धिफलंमोक्षसाधनेनतत्त्वदर्शनं नप्राप्तयोगात्म
गोवप्रपाणेचलितामतिः २ यस्यतस्याभितोनाशमालक्ष्योवाचपा
ण्डवः गुरुवेदांतवाक्येषुविश्वासेनयुतोपियः विरक्तःसाधनोपेतःप्र
वृत्तोयोगपद्धतौ शिथिलप्रयत्नोयोमदेवान्मध्येमनोयदि योगसि
द्धिमसंप्राप्यकांगतिंयातिसोच्युत ३७ ॥

नीलकंठीटीका

मनसोऽनिग्रहत्वाद्योगसिद्धौविघ्नेपश्यन्नर्जुनउवाच हेकृष्ण यो
गात्कर्मयोगाच्चलितमानसस्त्यक्तकर्मासंन्यासीयतिः श्रद्धयोपे
तोयोगमार्गंप्रविष्टोपि अयतिः प्राप्तेषाल्पत्वाद्वैराग्यदौर्बल्या
द्वाअल्पप्रयत्नः अलवणाययवागूरितिवदत्रासार्थेनञ् सकदाचि
त्योगसंसिद्धिंयोगफलंसम्यक्दर्शनमप्राप्यमरणोत्तरंकांगतिं
गच्छति ३७ ॥

आनंदीटीका

[a] अत्रहेतवःअनेकविधः नैकत्रविज्ञेयस्यविभ्रांतेनकापिलप्रस्थितिः।
मोहस्यानात्मज्ञानस्यवशंगतः हेकृष्णयोगसिद्धिमप्राप्यकांगतिंग
च्छति ३७॥

रामकंठीटीका

+ आत्मोपदेशाद्युपायान्निःसंशयतयाफलस्यचसंभवनाश्रद्धाश्रतिकिलो
कात्तयोपेतःश्रद्धावान् अतएवसतांमनसिरूढाणामनुष्ठानफलार्थिनो
ऽपिसंप्रयाणेऽप्यूरूरणि यदियोगाद्दुष्कालेभ्राम्यात्सायपेच्चलितमानसः
विक्षिप्तचित्तवृत्तिः अतएवायतोयत्नशून्यः ततश्चबलाभाःपरस्योपे
यस्यतत्त्वस्यपर्थिप्राप्युपायरूपेमार्गेप्रमूढःप्रकर्षेणामूढःसम्यग्ज्ञा
नरहितः ३७॥

+ अथोपायस्यज्ञानरूपस्याकृतिमात्रावगतत्वादभ्यासवैराग्ययोरप्राप्तेनदुःसाध्यत्वादात्मनश्चसंसारिधर्मात्परमा
त्मयोगस्यदुर्लभत्वापत्तेमन्यमानःश्रद्धामात्रमेकस्यकारणस्ययोगप्रत्युपायत्वंस्यान्नवेतिसंशयोर्जुनउवाच ॥+

[a] अयतः श्रद्धयोपेतो योगाच्चलितमानसः लिप्समानः सतां मार्गं प्रमूढो ब्रह्मणः पथि। अनेकचित्तविभ्रान्तो मोहस्यैव वशं गतः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति अभ्यासवैराग्ययोः दुःसाध्यत्वाद्योगस्य तिष्ठाप्तुमाप्तं मन्यमानोऽर्जुन उवाच अयतेति नञ् स्वल्पभावे अयतः यत्नशैथिल्यादभ्यासपरिपाकं न प्राप्तः अतएव योगाच्चलितमानसः परमं योगमप्राप्तः किं नु ज्ञानयोगाद्वब्रह्मप्राप्तिः स्यादिति श्रद्धयोपेतः नतु त्यक्तश्रद्धः अतएव सतां योगिनां मार्गं ब्रह्मस्थितिं लब्धुमिच्छुर्ब्रह्मणः पथि उपायरूपे मार्गे प्रकर्षेण मूढः ॥

गी०
टी०
प०

+ ननु ध्यानयोगेनत्वत्त्वानियतसमाधिरपिबुद्धियोगादारभ्यात्मनोऽनुभूततयाश्रद्धावश्यशक्तिप्रदमिष्टेतत्त्वतत्त्वज्ञानोत्कर्षमप्राप्तोजन्मप्रदसंसारासक्तेरभावात्कांगतिंप्राप्नोतीतिसंदिहानोऽर्जुनउवाच ॥ +

173

लासिकीवक्लनोटीका

+ अयतिरल्पयत्नः यथायथोक्तसमाधानरूपपरमात्माकारमनन्यवृत्तिनिरूपाभ्यासरहितः तथाश्रद्धयोपेतः प्रागायोगाद्बुद्धियोगादेर्भूयसः समाधिरूपाभिध्यासाच्चलितंव्युत्थितंच मानसंयस्यसः योगस्यसंसिद्धिमहेतन्रूपांज्ञानधारणमप्राप्यप्रकृषुः हेकृष्णदेहपातानन्तरंकांगतिं सुगतिंदुर्गतिंवाप्राप्नोति [illegible] ॥

पंचोलीटीका

अभ्यासवैराग्यशैथिल्येनकथंचिद्योगसमाधानशीलः मरणकालेयोगाच्चलितमानसः सर्वकर्मसंन्यासीकिंफलंप्राप्नोतीतिपृच्छतिअयते न अयतिः इति हेकृष्णअयतिःयोगमार्गेअश्रयत्नवान् श्रद्धयाऽऽस्तिक्यबुद्ध्याउपेतःयोगात् अन्तकालेचलितमनाःयोगसंसिद्धिंयोगफलंसम्यग्ज्ञानंअप्राप्यकांगतिंगच्छति ३७ ॥

रणवीरसत्सिद्धोधिनी ॥

अथवैराग्याभ्यासाद्वेवप्रोक्तलक्षणौमनोनिग्रहसिद्धयेपरमोपायतयाशास्त्राविति सिद्धान्तिते तत्रतावत्तयोरेवदुःसाधत्वात्सति मनोनिग्रहेप्रोक्तलक्षणस्यकर्मयोगस्यदुरवापत्वंतद्वश्यमेवमन्यमानः श्रद्धामात्रस्यकस्यचिल्लाभवान्कारणत्वंयोगेप्रतिस्यान्नवेति संशयानोऽर्जुनउवाच अयतिरिति यास्त्वाचार्योपदिष्टेर्थे एवमेवेतदिति निःसंशयताश्रद्धातयोपेतएवयोगेप्रह्वसः अन्तरमनायत्तवित्तत्वेनपुत्रमित्रादिस्नेहादिनातिबलवत्तरेणयोगात्प्रोक्तलक्षणात्कर्मयोगात्समतालक्षणाद्वाचलितंमानसंयस्यसोऽपरिपक्वप्रोक्तलक्षणवैराग्यइतियावत् अतएवायतिः अल्पार्थेनञ् मन्दप्रयत्नः शिथिलाभ्यासइतियावत् सयोगस्यकर्मयोगस्यसंसिद्धिमैहिकामुष्मिकसर्वप्राप्तिलक्षणामप्राप्यानवाप्य हेकृष्णकांगतिंगच्छति प्राप्नोति अयंभावः उपायो

तरवादित्येन प्रह्लमात्रैकालम्बनस्य तस्याल्पप्रयत्नत्वेन संप्रा
मात्विहृतेः संभवाच्छत्रुभिरेत्यदन्तत्वेनाये लोको विमुखीभू
यमरणेन वादे लोकाभावड्तुमयलोकाभावे कस्यां योनौ सं
क्रमणं तस्येति प्रश्नाभिप्रायः ३०॥

मधुभाष्य

174

भाषा अनुवाद

अभ्यास वैराग्य के अभाव से या और कोई प्रकार उपाय से जिसको तत्वज्ञान न भया ऐसा मनुष्य कौन फल पायसकता है औ किस गती को जाता है यह प्रश्न अर्जुन करते हैं कि हे कृष्ण जो प्रथम कपट रहित श्रद्धा युक्त होय योग मे प्रवृत्त भया परन्तु तिस पीछे यत्न न किया अर्थात् अभ्यास से शिथिल कहे ढीला रहा और जिसका मन विषय मे मग्न रहा कहे विषय से विराग नभया ऐसा मनुष्य योग संसिद्धि जो ज्ञानरूप फल तिसको । न प्राप्त होके किस रूप गति को पाय सकता है अर्थात् कौन गति को जाताहै ३७

दोहा

यत्नरहित श्रद्धायुक्त योग हि सें चलचित्त कृष्ण सिद्धि विनयो
गकी का गति लहैं कहित ३७ ॥

125

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति अप्र
तिष्ठोमहाबाहोविमूढोब्रह्मणःपथि ३८ ॥

शाङ्करभाष्यं

कच्चिदिति कच्चित् किंनोभयविभ्रष्टः कर्म्ममार्गात् विभ्रष्टः सन्छि
न्नाभ्रमिव नश्यति किंवा ननश्यति अप्रतिष्ठो निराश्रयो हेमहाबाहो
विमूढः सन्ब्रह्मप्राप्तिमार्गे ३८ ॥

आनन्दगिरिकृतटीका

प्रश्नमेव विवृणोति कच्चिदिति प्रश्नत्वमस्यार्थत्वे कच्चिदिमस्याङ्गीकृ
त्य आचष्टे किमिति उभयविभ्रष्टत्वं स्पष्टयति कर्म्ममार्गादिना वायुना
छिन्नं विशकलितमभ्रं यथा नश्यति तद्वदित्याह छिन्नेति नाशाशङ्का
निमित्तमाह निराश्रय इति कर्म्ममार्गरूपावष्टम्भाभावेपि ज्ञानमा
र्गावष्टम्भस्तस्य भविष्यतीमाशंक्याह विमूढः सन्निति नहि कर्म्मिणं
प्रतीयमाशङ्का मुक्ताभिलाषं त्यक्तेश्वरे समर्प्य वा कर्म्मानुतिष्ठतो
निरुपचारेण तदंशवचनासम्भवात् सर्वकर्म्मसन्न्यासिनस्तु विहि
तानो मार्गात् ज्ञानोपायाच्च विच्युतेरनर्थप्राप्तिशङ्का युक्तेतिभावः ३८

स्वामिकृतटीका

प्रश्नाभिप्रायंविवृणोति कच्चिदिति कर्मणामीश्वरेनर्पितत्वादन
नुष्ठितत्वाच्च नतावत्कर्मफलंस्वर्गादिकंप्राप्नोति योगानिष्पत्तेश्चन
मोक्षंप्राप्नोति एवमुभयस्माद्भ्रष्टः अप्रतिष्ठोनिराश्रयः अतएवब्रह्म
णः प्राप्त्युपायेपथिमार्गेविमूढःसन्कच्चिन्ननश्यतिकिंवानश्यती
त्यर्थः नाशेदृष्टान्तः यथाछिन्नमभ्रंपूर्वस्मादभ्राद्विच्छिन्नमभ्रान्तरंचाप्रा
प्तंसत् मध्यएवविलीयतेतद्वत् ३८ ॥

पिशाचभाष्यं

कच्चिदुभयविभ्रष्टःकर्ममार्गाद्योगमार्गाच्चविभ्रष्टःछिन्नाभ्रमिवनश्य
तिकिंवाअप्रतिष्ठोनिराश्रयः हेमहाबाहोविमूढोब्रह्मणःपथिब्रह्मप्रा
प्तिमार्गे ३८ ॥

रामानुजभाष्यं

गी. टी. ५

उभयविभ्रष्टोऽयं छिन्नाभ्रमिव कच्चिन्न नश्यति यथा मेघशकलः पूर्वस्मा
न्महतो मेघाच्छिन्नः परं महान्तं मेघमप्राप्य विनष्टो भवति तथैव कच्चि
न्न नश्यति कथमुभयविभ्रष्टता अप्रतिष्ठः विमूढो ब्रह्मणः पथि
यथावस्थितस्वर्गादिसाधनमनेककर्मफलाभिसंधिरहितस्यास्य प्रत्य
वायफलसाधनत्वेन प्रतिष्ठानं भवतीत्यप्रतिष्ठः अज्ञानेन ब्रह्म
णः पथि विमूढस्तत्साधनात् प्रच्युतः उभयभ्रष्टतया कि
मयं नश्यत्येव उत न नश्यति ३८ ॥

अभिनवगुप्तकृतटीकायामस्यार्थः ३८ पूर्वश्लोके उक्तार्थः

परमार्थप्रपा

एतन्मे संशयं छेत्तुमर्हस्यशेषतः त्वदन्यः संशयस्यास्य छेत्ता ३

प्रश्नाभिप्रायं विशदयन्नर्जुन आह कच्चिदिति द्वाभ्याम् पूर्वं प्रवृत्त्या
कर्मणामीश्वरार्पणतया स्वर्गादिफलभ्रष्टः पुनर्योगाच्चलितत्वादन
धिगतमोक्षः एवमुभयविभ्रष्टः सन् छिन्नाभ्रमिव अयत्नः पृष्ठतो वा
महापीभूताभ्रान्तराभावान्मध्यस्थितमभ्रं यथा विलीयते तद्वद्ब्रह्म
णः पथि मोक्षमार्गे विमूढः अतएवाप्रतिष्ठोऽतिनिराश्रयः कच्चिन्न
श्यति ३८ ॥

वनमालीटीका

कच्चिदिति साभिलाषप्रश्ने महाबाहो सर्वेषां भक्तानां सर्वोपद्रवनिवा
रणे समर्थः पुरुषार्थवत्कृपयादानसमर्थो वा तन्नाशे बाहवो यस्य
सः ब्रह्मणः ब्रह्मप्राप्तिमार्गे विविक्तः अनुभवज्ञानेन तु ब्रह्मालयस्य ब्र
ह्मणः साक्षात्कारो यस्य सः अप्रतिष्ठः देवयानादिप्रतिष्ठाभिल
ष्यापकसाधनैः रहितः स उभयविभ्रष्टः कर्ममार्गाज्ज्ञानमार्गाच्च वि
भ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं विशकलितं पूर्वस्मान्मेघाद्भ्रष्टमु
त्तरमेघं चाप्राप्तं मध्ये यथा सूक्ष्मयोगस्पर्शेन शलयं वा नश्यति तथायो
गभ्रष्टोऽपि पूर्वस्मात्कर्ममार्गादिति छिन्नः उत्तरं तु ज्ञानमार्गमप्राप्तोऽन्तरा
ल एव नश्यति कर्मफलं ज्ञानफलं च लब्धुमयोग्यो न किमिति प्रश्नार्थः ३८

उत्तमवैजयन्तीटी.

किंच प्रश्नाभिप्रायं स्पष्टयति कच्चिदिति हे महाबाहो अप्रतिष्ठः अ

गवदर्पितत्वात्कर्मफले स्वर्गादौ स्पृहारहितः एवं च ब्रह्मणः प
रमेश्वरस्य पथि मार्गे भक्तिसाधने विमूढः विशेषेणैव क्लिष्टः भग
वत्प्राप्तिसाधनानुष्ठानसमर्थः ईदृशोऽयं पुरुष उभयविभ्रष्टः स
न् उभयस्मात्कर्मफलात्स्वस्वरूपावलोकनाच्च विभ्रष्टः अप्रतिष्ठः सन्।
छिन्नाभ्रमिव यथा पूर्वस्मान्महतो मेघात् छिन्नोऽभ्रमेघशकलः प
रमहान्तमेघमप्राप्य नश्यति तथा कच्चित् किं नश्यति वा न नश्यति १८
एतदेव संशयबीजं विवृणोति ॥

मधुसूदनीटीका

कच्चिदिति साभिलाषप्रश्ने हे महाबाहो महान्तः सर्वेषां भक्तानां स
र्वोपद्रवनिवारणसमर्थाः पुरुषार्थचतुष्टयदानसमर्था वा बाहवो यस्येति प्रश्ननिमित्तकोपाभावस्तदुत्तरदानसामर्थ्यं च
सूचितं ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढः विक्षिप्तः अ
तएव ब्रह्मात्मैक्यसाक्षात्कार इति यावत् अप्रतिष्ठः देवयानपितृ
याणमार्गगमनहेतुभ्यामुपासनाकर्मभ्यां प्रतिष्ठाभ्यां साधनाभ्यां र
हितः सोपासनानां सर्वेषां कर्मणां परित्यागात् एतादृश उभयभ्रष्टः
कर्ममार्गात् ज्ञानमार्गाच्च विभ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं वि
शकलितं पूर्वस्मान्मेघाद्विश्लिष्टमुत्तरं मेघं चाप्राप्तमभ्रं यथा वृष्टियोग्यं
सदन्तराल एव विनश्यति तथा योगभ्रष्टोऽपि पूर्वस्मात्कर्मम
र्गाद्विच्छिन्नस्तदुत्तरं ज्ञानमार्गमप्राप्तोऽन्तराल एव नश्यति कर्मफले
ज्ञानफले च लब्धुमयोग्यो न किमिति प्रश्नार्थः एतेन ज्ञानकर्मस
मुच्चयो निराकृतः एतस्मिन् हि पक्षे ज्ञानफलालाभेऽपि कर्मफलला
भसंभवेनोभयविभ्रष्टत्वासंभवात् न चैतस्य कर्मसंभवेऽपि फला
कामनाभावान्न फलभ्रंश इति वचनमवकल्पत इति वाच्यं निष्कामाना
मपि कर्मणां फलसद्भावस्यापस्तम्बवचनाद्युदाहरणेन बहुशः प्रति
पादितत्वात् तस्मात्सर्वकर्मत्यागिनं प्रत्येवायं प्रश्नः अनर्थप्राप्ति
शंकायास्तत्रैव संभवात्
॥ ३८ ॥

सदानंदीटीका

कर्ममार्गात् योगाद्विभ्रष्टः सन् किं दैवात् छिन्नाभ्रमिव नश्ये

ह्यसौ नश्यति निराश्रयः १ विमूढो ब्रह्मविन्मार्गे मत्कर्माश्रयो यतः भक्तानां दोषसंदोहवारणाय यस्य बाहवः समर्थाः स्वत्वदाने च महाबाहो त्वमिमहो ६ ३८ ॥

नीलकंठीटीका

कच्चिदिति कच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः छिन्नाभ्रमिव पूर्वमपरं वा मेघं संबंधमप्राप्य मध्ये एव नश्यति नह्यत् अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढो ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ३८ ॥

आनंदीटीका

कच्चिदिति इष्टप्रश्ने श्रद्धोपेतः पुरुषः उभयस्माद्भोगापवर्गाख्यस्माद्विभ्रंशात् लाभात् छिन्नाभ्रमिव न नश्यति वाऽविशीर्णो मेघो यथा न विनश्यति पुनः स्थानमाप्नोति तथायं किं योगायाः योगभ्रंशे स्थानमवाप्नोति वा प्रश्ने उताप्रतिष्ठस्थानमनाप्तः विनाशमेव पुनः स्थानमेवाधिगच्छति ३८ ॥

रामकंठीटीका

अनन्तोपायानिश्चयादनेकवृत्तिः विकल्पाकुलत्वादप्रतिष्ठत्वांचलत्वाद्बहुविधमनोवृत्तिः अतएवाविज्ञातो नच्छिन्नाभ्रस्थितिः यतो ब्रह्मैवाज्ञानस्य वशीगतः विधेयतां प्राप्तः तदेतया दोषसामग्र्या योगसंसिद्धिसमाप्तिलाभमप्राप्तः सन् कां गतिं गच्छति [illegible] ३८ ॥

अत्र विकल्पांतरमाह ॥

लाक्षिकी धनपतीटीका

कच्चिदिति साभिलाषप्रश्ने हे महाबाहो उभयस्मात्संसारमार्गाद्विभ्रष्टः प्रच्युतः अनासक्ततया वासनानाशनात् ज्ञानमार्गाच्च च्युतोऽपरागान्पिरोहात् कच्चिदपि नाशमनवाप्य वर्तते आत्यंतिकमभावं प्राप्नोति यतः संसारानासक्ततया प्रतिष्ठो निरालंबः तथा निरूपाधिकस्य ब्रह्मणः प्रविज्ञानमार्गे विमूढो न स्पष्टप्रवृत्तः तथा पूर्वस्मान्मेघाच्छिन्नं उत्तरं मे

नवतो

बंधाभासो मेघखंडेन यथा तिनहत तमेवं भगवानित्याह शंसंदेहनिवर्त
कोनान्यइत्याह ३९॥

पंचोलीटीका

प्रस्ताभिप्रायं विवृणोति कच्चिदिति द्वाभ्यां कच्चिदिति कोमलप्रलेहेक
लब्रह्मणः पथि प्राप्तिमार्गे विमूढः अप्रतिष्ठो निराश्रयः उभयविभ्रष्टः
कर्ममार्गात् ज्ञानमार्गाच्च उभयतो नष्टः छिन्नाभ्रमिव नश्यति ३८

भगवीरसमिहोयिनी॥

तदेव पृच्छति कच्चिन्नेति कच्चिदित्यभीष्टप्रश्ने अप्राप्तावेव योगी उभ
यस्माल्लोकाद्विभ्रष्टः अप्रतिष्ठो निरवलंबनः वैराग्याभ्यासाव
लंबनहेयहीनत्वात् अतएव ब्रह्मणः पाथि यत् वेदमार्गे विमूढो
मोहप्राप्तः छिन्नाभ्रमिव पवनविघीर्णो मेघ इव कच्चिन्न नश्यति
कर्मफलं ज्ञानफलं चालब्धमयोग्यो न किमिति अयं भावः यथा
पवनविघीर्णो मेघः पूर्वस्मान्मेघाद्भ्रष्ट उत्तरमेघं चाप्राप्तोतएव
हृष्टयोग्यः सन्नंतरालपवननश्यति तथा योगभ्रष्टोपि पूर्वस्मा
त्स्वकीयात्सुरादेविच्छिन्नः उत्तरेणाच परकीयेनालब्धसंयोगोम
ध्यएव चविसुखीभूय पलायमानः सन प्राडुभिर्भैत्यहन्यत इति
पापसंबंधान्न किं डर्गयोनिं गच्छतीति साभ्यांकस्य प्रश्नः ३८॥

मधुभाष्य

३८॥

178

भाषा अनुवाद

पूर्वोक्त प्रश्न की अभिप्राय विस्तार से अर्जुन कहते हैं कि नतो निष्काम कर्म्म करि ईश्वर को समर्पण किया और न काम्यकर्म्म ही का अनुष्ठान किया तो स्वर्गादि फलसे भी रहित रहा और योग की असम्पन्नता कहे अपूर्णता से मोक्ष भी न मिली तो फेरि हे महाबाहो वह अप्रतिष्ठित कहे प्रतिष्ठा रहित मनुष्य दोनो ओर से भ्रष्ट होय छिन्न मेघ केसमान क्या नष्ट तो नहीं। मा होता है जैसे मेघदल से भिन्न भया मेघ और मेघ को न प्राप्त होयके अन्तरित्त ही मे विलाय जाय है ३८

दोहा

कोनभ्रष्टदोउलोक सें ज्योंमेघ छिन्नहोयनाश ब्रह्मपथमें
आलंबबिन मूढ़ जो विश्वनिवास ३८॥

179

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः त्वदन्यः
संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ ॥

शांकरभाष्यं

एतदिति एतन्मे मम संशयं कृष्ण छेत्तुमपनेतुमर्हसि अशेषतः
त्वदन्यः त्वत्तोऽन्यः ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य नहि य
स्मादुपपद्यते न सम्भवति अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ३९ ॥

आनन्दगिरिकृतटीका

यथोपदर्शितसंशयापाकरणार्थमर्जुनो भगवन्तं प्रेरयन्नाह एतदि
ति मत्तोऽन्यः कश्चिदृषिर्वा देवो वा तदीयं संशयं छेत्तुमीशो नास्तीत्याह त्व
दन्य इति अन्यस्य संशयच्छेतृत्वाभावे फलितमाह अत इति ३९ ॥

स्वामिकृतटीका

त्वयैव सर्वज्ञेन अयं मम संदेहो निरसनीयः त्वत्तोऽन्यस्तु संदेहनिवर्त
को नास्तीत्याह एतन्म इति एतदेनं छेत्ता निवर्तकः उपपद्यते ३९ ॥

पिशाचभाष्यं

एतन्मे संशयं कृष्ण छेत्तुमर्हसि अशेषतस्त्वदन्यस्त्वत्तोऽन्यः ऋषिर्वा दे
वो वा छेत्ता नाशयिता संशयस्यास्य नहि यस्मादुपपद्यते नास्तीत्यर्थः ३९

रामानुजभाष्यं

तमेनं संशयमशेषतश्छेत्तुमर्हसि यस्त्वं गुणपरत्वेन सदा स्वत
एव प्रत्यक्षेणैतत्त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ ॥

अभिनवगुप्तकृतटीका [illegible] ३९ स्पष्टोऽर्थः

एतदेव मे संशयं छेत्तुं मोहकृत ॥ परमार्थप्रकाश·
त्वमेवार्हसीति प्रश्नः शेषं स्पष्टं ३९ ॥ ३९ ॥ ३९

वनमालीटीका

एतद्रूपं त्वं सर्वज्ञ मे मम संशयमशेषतः संशयमूलाधर्मानुच्छेदे
वृं तत्त्वदन्यस्त्वत्तः सर्वज्ञो शास्त्रकृतः परमात्मा निकाशाणिकादे
दा मोऽनेषयोगी जीवश्छेत्ता सम्यगुत्तरदानेन नाशयिता हि यतो नोपपद्यते
संभवति तस्मात्त्वमेव सर्वप्रमाणदर्शी सर्वस्य परमगुरुश्छेत्तुं संशयं

गी. च्छेत्तुमर्हस्यशेषतः ३९ ॥

हनुमत्पैशाचीटीका

टी. एतदिति हे कृष्ण मे मम एतं संशयं त्वमशेषतः संशयं छेत्तुमर्हसि अशेषतो
स. निःशेषाच्छेत्ताशितेन त्व मर्हसि योग्यो भवसि ननु मत्सदृशा वद
वः संशयच्छेत्तारो जगति सन्ति अहमेवैकोऽस्य छेत्ता कथं भवामी
ति चेत्तत्राह त्वदन्य इति हि शाह्नोऽन्य योगभ्रष्टच्छेदायैकोऽवधारणाप
रः कृष्णपदवाच्यदेवो नान्यऋषिवत् अस्यैव मनुष्यस्य संशयस्यच्छेत्ता
नाशकः त्वदन्यस्त्वत्तः सर्वज्ञात्सर्वेश्वराद्योगिप्रियप्रद्युम्नादन्योऽस्म
त्तो नीश्वरो ब्रह्मादिरन्येश्वरोऽपि नैवोपपद्यते नैव योग्यो भवतीति तस्मा
३९ त्वमेव मम संशयमपनेतुमर्हसि ३९ ॥

एतदेनं पूर्वोपदर्शितं मेमम संशयं **मधुसूदनीटीका** हे कृष्ण छेत्तुमपनेतुमर्हसि अ
प्रोषत: संशयस्य लाघवमोघच्छेदेन मदन्यः कश्चिदृषिर्वा देवो वान्वदीपमि
मं संशयमच्छेत्तुमस्य तीव्रायोग्यत्वाह त्वदन्यः त्वमपरमेश्वरात्सर्वज्ञा
च्छास्त्रकृतः परमगुरोः कारुणिकादन्यः अनीश्वरत्वेनासर्वज्ञः क
श्चिदृषिर्वा देवो वाऽस्य योगभ्रष्टपरलोकगतिविषयस्य संशयस्य
च्छेत्ता सम्यगुत्तरदानेन नाशयिता हि यस्मान्नोपपद्यते न संभवति
तस्मात्त्वमेव प्रमत्तदर्शी सर्वस्य परमगुरुः संशयमेतं मम छेत्तुम
र्हसीत्यर्थः [illegible]

सदानंदीटीका

तदेतत्संशयं सर्वं छेत्तुं योग्यस्त्वमेवासि त्वत्तोऽन्यः परमेश्वरादन्यः कश्चिद्दे
वो मुनिर्वा सम्यगुत्तरदानेन संशयस्यास्य सर्वतः छेत्ता संभव
तीत्यस्मात्सर्वज्ञत्वं जगद्गुरुः प्रमत्तदर्शी सर्वस्य संशयं छेत्तुमर्हसि ३३९

नीलकंठीटीका

एतत् एते स्पष्टमन्यत् ३९ ॥

आनंदटीका

त्वत्तः संसारस्वर्गापवर्गगतिवेदिनोऽन्यो द्वितीयः संशयस्यास्य छेत्ता न संभा
व्यते इत्यर्थः ३९ ॥

रामकंठीटीका

नस्यैवंविधस्य श्रद्धामोक्षैकालंबनस्य परिशिष्टोपायरहितस्य देहान्तं कीदृशी योन्यतरे गमनं तदेव पृच्छ
ति — कच्चिदित्यादि उभयस्माद्विनाशमेव अस्य तथा नः पुरुषः स्वर्गापवर्गगतिद्वयस्मा
द्भ्रंशादभावादेकतरगतिप्रत्याशासंभवे छिन्नाभ्रमिव पवनविशी
र्णो जलदो यथा नश्यति तद्वत् पुनः स्थानमप्राप्य याते उत गतिद्वयोपा
यतिस्थयाभावादप्रतिष्ठो निरवलंबनः संक्रान्तं तिकमेव विनाशमाप्नो
ति अशुनरुस्यानायैव संसारस्य प्रेपततीत्येतमेवं विधं संदेहं मम विनाश
यितुमर्हसि यतस्त्वत्तः सर्वसंसारिगतिवेदिनः सर्वज्ञादन्यो यथोक्तसंश
यस्य परिहर्त्ता न संभाव्यते यत उक्तं बहूनि मे व्यतीतानि इत्यादि श्लोके सर्वज्ञ
त्वेन नानागतिवेदित्वं [illegible] ३९

नास्तिकी दसहनीटीका

त्वत्तः सर्वसंसारिगतिवेदिनः सर्वज्ञादन्योऽस्य संशयस्य छेत्ता निवर्तको
नोपपद्यते न संभाव्यते यदुक्तं उत्पत्तिं च विनाशं च भूतानामागतिं गतिं
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति [illegible] ३९

पंचोलीटीका

एतदिति हे कृष्ण मे मम एतत् एवं अशुनाशप्रकारेण संशयं योगभ्रष्टस्य
नाशानाशलक्षणं संदेहमशेषतः सर्वप्रकारेण छेत्तुमर्हसि अस्य सं
शयस्य हि यस्मात् त्वदन्यः छेत्ता नोपपद्यते ३९ ॥

रणवीरसमिद्धोधिनी ॥

असंभाय विछित्तये सर्वज्ञं भगवन्तमर्थयते एतदिति स्प
ष्टमेतत् ॥ ३९ ॥

मधुभाष्य

३५ ॥

१४

भाषा अनुवाद

जिस से आप सर्वज्ञ हो इस से आप को छोड़ और कोई इस । हमारी संशय का हर करने वाला नहीं है अर्जुन यह कहते । हैं कि हे कृष्ण मेरी इस सन्देह को आप ही छेदन करने यो ग्य हो और आपके विना दूसरा इस सन्देह का निवृत्ति कर्ता न ही है सो इस सन्देह को कृपाकर मेरे मन से हर करो ३९

दोहा

मम सम संशय छेद कर तुमहि कृष्ण दे योग और न संशय ।
छेद को तुम सें दूसर लोग ३९ ॥

श्रीभगवानुवाच पार्थनैवेहनामुत्रविनाशस्तस्य
विद्यते नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ४०

शांकरभाष्यं

पार्थेति हे पार्थ नैवइह लोके नामुत्र परस्मिन् वा लोके विनाशस्त
स्य विद्यते नास्तिनाशो नामपूर्वस्माद्धीनजन्मप्राप्तिः सतस्ययोगभ्रष्ट
स्य नास्ति नहि यस्मात् कारणात् कल्याणकृत् शुभकृत् कश्चिद्दुर्गतिं
कुत्सितां गतिं हेतात तनोत्यात्मानं पुत्ररूपेणेति पितातात उच्यते।
पितैवपुत्रइति पुत्रोपि तातउच्यते शिष्योपिपुत्रइत्यत उच्यते यतोनग
च्छति ४० ॥

आनन्दगिरिकृतटीका

योगिनोनाशाशङ्कां परिहरन्नुत्तरमाह भगवानिति यदुक्तमुभयभ्रष्टो
योगीनश्यतीति तत्राह पार्थेति तत्रहेतुमाह नहीति योगिनो मार्गद्वया
द्विभ्रष्टस्येहिकोनाशः शिष्टगर्हालक्षणोनभवतीति श्रद्धादेः सद्भावात
थापि कथमामुष्मिकनाशस्यानभिप्रायशंका तद्व्यतिरूपणपूर्वकं तद
भावं प्रतिजानीते नाशोनामेति तत्रहेतुमाह विभजतेनहीत्यादिना उ
भयभ्रष्टस्यापि श्रद्धेन्द्रियसंयमादेः सात्त्विकत्वश्रवणादेश्च भावादुपप
न्नं शुभकृत्त्वं तातेति कथं पुत्रस्थानीयः शिष्यः सम्बोध्यते पितुरेव ता
तशब्दवाच्यत्वादित्याशंक्याह तनोतीति तेनपुत्रस्थानीयस्य शिष्यस्य तातेति
सम्बोधनमविरुद्धमित्यर्थः नगच्छति कुत्सितां गतिं कल्याणकरत्वा
दिति नाशाभावः ४० ॥

स्वामिकृतटीका

अत्रोत्तरंश्रीभगवानुवाच पार्थेतिपञ्चभिः इहलोकेनाश उभय
भ्रष्टतापत्तिः अमुत्रपरलोकेनाशोनरकप्राप्तिः तदुभयंतस्यनास्त्येव
यतः कल्याणकृत् शुभकारीकश्चिदपिदुर्गतिंनगच्छति अयंचशुभ
कारीश्रद्धयायोगेप्रवृत्तत्वात् तातेति लोकरीत्योपलालयन्संबोधयति ४०

पिशाचभाष्यं

श्रीभगवानुवाच पार्थनैवेहलोकेनामुत्रपरस्मिंल्लोकेवाविनाशस्तस्य
विद्यतेनास्तिनाशोनामपूर्वस्माद्धीनजन्मप्राप्तिःसयोगभ्रष्टोनास्ति नहि

गी· टी· श्री· यस्मात्कल्याणकृत्शुभकृत्कश्चिद्दुर्गतिंकुत्सितांगतिंहेतातननाशंयाति ता
त्मानंपुत्ररूपेणतनोतिपितातातउच्यतेपितैवपुत्ररूपेणेतिपुत्रोपितातातउच्यतेगच्छ
ति ४० ॥

रामानुजभाष्यं

श्रद्धयायोगेप्रक्रान्तस्यतस्मात्प्रच्युतस्येहचामुत्रचविनाशोनविद्यतेप्राकृ
तस्वर्गादिभोगेब्रह्मानुभवेचाभिलषितानवाप्तिरूपप्रत्यवायाख्योनिष्टा
वाप्तिरूपोविनाशोनविद्यतइत्यर्थः नहिनिरतिशयकल्याणरूपयोगारम्भे
कश्चित्कालत्रयेपिदुर्गतिंगच्छति ४० ॥

अभिनवगुप्तकृतटी·

अत्रनिर्णयं पार्थनैवेत्यादिना नतस्ययोगभ्रष्टस्येहलोकेपरत्र
वानाशोस्ति अनश्रद्धत्वादितिभावः किमिति तस्यलोकद्वया
विनाशिनःसहिकल्याणंभगवन्मार्गलक्षणंकृतवान् नचा
ग्निष्टोमादिवत्तयि ४० ॥ ४० ॥

परमार्थप्रपाटीका

अथोत्तरंभगवानाह पार्थेति तस्यपुरुषस्यइहामुत्रवानाशोनास्ति इ
हलोकेधर्मयोनिप्राप्तिर्नाशः अमुत्रचनिरयप्राप्तिर्नाशःएवमुभयत्र
नाशोनास्ति कुतःभोताततनोत्यात्मानंपुत्ररूपेणेतितातःपुत्रःएवमर्जु
नस्यपरमप्रेमास्पदत्वात्तातेतिसंबुद्धिः हियस्मात्कारणात्कल्याणकृ
त्एवंभीस्वरार्पणतयाकर्मकुर्वन्कश्चिदपिदुर्गतिंनगच्छति ४०॥

वनमालीटीका

उभयविभ्रष्टोयोगीनश्यतीतिकोर्थःकिमिहलोकेनिंदितोभवतिस्वक
र्मत्यागात्किंवापरत्रनिकृष्टांगतिंप्राप्नोतितदुभयमपिनेत्याह हेपार्थ
तस्योभयत्रविनाशोनिंदानिकृष्टप्राप्तिरूपोनविद्यतेहियतःकल्याणकृ
त्शास्त्रविहितकारीकश्चिदपिदुर्गतिमिहाकीर्तिंपरत्रकीटादिरूपतां
नगच्छति अयंतुजातजिज्ञासःश्रवणाद्यनुष्ठातासर्वोत्कृष्टएवदुर्गतिं
नगच्छतीतिकिमुतवक्तव्यं यत्तुक्तंयोगभ्रष्टःक्वगतिंगच्छतिदेवयानाद्य
संबंधित्वेमनस्तत्वात्स्वधर्मभ्रष्टवदितितदयुक्तं देवयानाद्यसंबंधित्वेहेतो

रसिद्धेः यश्चैवंविदुर्येवामीत्यरणेब्रह्मासमसगुणास्तनेनेश्वर्विरभि
संभवतीतिपंचाग्निविद्यायांपंचाग्निविदामिवानर्कतूनांब्रह्मास्त।
मवतांसगुणत्वेणासपिदेवयानेनब्रह्मलोकप्राप्तिकथनात् सगुणा
दिपरायणास्यब्रह्मा विनोमूतत्वेनब्रह्मायाः प्रामन्वात् शांतोदांत
स्यादिनोन्तनभाषणाच्चपचाद्वि यमस्यसमस्य प्रामत्वात् बहिरिंद्रियोपु
मेखलव्यापारनिरोधरूपदमस्ययोगांगत्वेनयमनियमादिस्रप्रथाम
त्वात् श्रुततत्कतवेपिब्रह्मलोकप्राप्तिसंभवात् संन्यासाद्ब्रह्मणः।
स्थानमितिस्मृतेः ४०॥

ऊलमवैजयन्तीटीका

इत्येवमर्जुनस्याशंकांनिशम्यास्यसंशयमपनुदन्सर्वेश्वरःपार्थस
खः श्रीभगवानुवाच पार्थनैवेहनेतिहेपार्थश्रद्धापनेः श्रद्धाप्र
कस्ययोगाच्चलितमानसस्ययोगिनः इहास्मिन्देवमनुष्यादिप्राक
तकेलोकेविनाशः स्वर्गादिलोकसंबंधिसुखभोगभ्रंशरूपोन
विद्यतेनभवति किंतुतत्सुखभोगोभवत्येवश्रेष्ठवानुत्तमसुखपरस्वरू
पानुभवविनाशस्तत्तदनुभवजनितस्वखभ्रंशरूपोनविद्यतेनभव
४८ तिकिंतुनतेस्तरवभवत्येवनत्वेवमेवकुतोभवतीत्यपेक्षायामाह नही
ति हेतातनपुत्ररूपेणात्मानंतनोतीतितातःपितातस्यात्तिवात्सल्येनवे
नसंबोधनंहेतातनपुत्रशिष्ययोरन्येनकारुण्येनवात्सल्येनवतातेति
सम्बोधनंवक्तृनामसङ्कृतमित्यर्थः हियस्मात्कल्याणकृत्कल्याणंमो
क्षसाधनभूतंयोगंकरोतीतिसतथासंसारबन्धमुक्तयेस्वधर्माच।
रणपूर्वककर्मयोगानुष्ठानेत्यर्थः ईदृशःकश्चिदपिब्राह्मणादिस्व
द्रांतयन्तोमातेषुःकोपिदुर्गतिंतदुभयपापमहूपांदतिद्भतानदुभयप्र
च्युतिजनितदोषात्तिरर्यवानैवगच्छतिनैवप्राप्नोति ४०॥

एवमर्जुनस्ययोगिनंप्रतिनाशा मधुसूदनीटीका शंकापरिहरत्युत्तरं ॥

उभयविभ्रष्टोयोगीनश्यतीतिकोर्थः किमिहलोकेपिगर्हणी
योभवतिवेदविहितकर्मत्यागात् यथाकश्चित्कृच्छ्रलः किंवाप
रत्रनिकृष्टांगतिंप्राप्नोति यथोक्तक्रमात्प्रथेनयोः यथोर्नकनर
णवर्तकीटाःपतंगायदिदंदंदशूकमिति तथाचोक्तमनुनावानाश्र

कामहतोप्यसौ यस्य ब्रह्मविचारणे क्षणमपि स्थेमनः प्राप्नुयादि
ति ४ [illegible]
[illegible] ४० ॥

सदानंदी टीका

अर्जुनस्यैवमाशंकां निराकुर्वन्नुवाचह श्रीमन्नारायणः कृष्णः
शरणागतवत्सलः सुव्रतोऽत्र वेदांतश्रवणादि प्रकुर्वतः वि
नश्यति निरोधे हि प्रवृत्तस्य विरागिणः २ अंतराले मृतस्यापि वि
नाशो नो भयत्रवै नेह शिष्टविनिंदास्य यथाशास्त्रं प्रकुर्वतः ३
नानिष्टां गतिमाप्नोति परत्रापि जनेनवत् यस्मात्कल्याणकृत्
कश्चित्कुभक्तदुर्गतिं गतिं ४ इहाकीर्तिं परत्रापि कुत्सितां नैव
गच्छति अथैतः सर्वतः श्रेष्ठः कथं गच्छेद्दुर्गतिं शिष्यस्य त्व
रूपेण कृपापात्रतनस्थवने नानेतिपरतः साक्षाद्धरिणा कृतनम
र्जुने ५ ४० ॥

नीलकंठी टीका

अत्रोत्तरं भगवानुवाच पार्थेति हे तात नैवात्र तस्यात्मबोधय
ति तस्य इह विनाशो नीचयोनिप्राप्तिः अमुत्र विनाशो नरकप्रा
प्तिस्तदुभयमपि न जायते हि यतः कल्याणकृत् शुभकृत् दुर्ग
तिं नैव प्राप्नोति ४० ॥

आनंदी टीका

एतत्संशयं छेत्तुं भगवानुवाच ॥ तस्य भोगापवर्गबीजभूतश्रद्धा
युक्तचेतसः इहामुत्र विनाशो नास्ति हि यस्मात् कल्याणकृत् कल्याण
मीश्वरार्पणबुद्ध्या कृतं कर्म तत्कारी कश्चन कोऽपि दुर्गतिं न गच्छति ३ ४०
[illegible] ॥

रामकंठी टीका

अथैवंविधसंशयच्छेदाय भगवानुवाच ॥
तस्यैवंविधस्य भोगापवर्गलक्षणसिद्धिबीजभूतश्रद्धायाः संपन्न
तविनस्य पुंसः क्वचिदपि विषये विनाशः सर्वदुर्गतिहेतुर्नैव भ्रंशल
क्षणस्तिरोभावो न विद्यते कुतः विद्यते इहामुत्र वा इहेति दृष्टानुश्र

गी॰ विकभोगाधिकरणे संसारे अमुत्रेत्येतस्मादन्यत्र स्वात्मप्रतिष्ठारे

टी॰ ६॰ तावपवर्गे यतः कल्याणवान् कुशलाभिनिवेशी कश्चिद्दुर्गतिमसा न॰

नहूषितत्वाद् इष्टां योनिं प्राप्नोति श्रद्धावतश्च कल्याणकारित्वमेवरूप

मेव स्थितम् श्रद्धादिनामपरमेश्वरप्रसादकल्पद्रुमस्य बीजकणिका

तं भोगापवर्गलक्षणसंपत्तिसमृद्धमफलानान्निवर्तते केवलं मृदु

मध्याधिमात्रत्वादिना तत्तत्फलविशेषायैतिणी स्वकार्यं निवर्त्त

यति [illegible] ॥

लासिकी टीका

श्रद्धोत्तरं श्रीभगवानुवाच ॥

हेपार्थ इह लोके संसारे परत्र लोके स्वर्गादौ वा ततस्य योगभ्र

ष्टस्य संसाराना सक्तत्याविरक्तत्वात् सक्तो यो विनाशः आत्यंतिको

भावः प्रकृतिलय इति यावत् तदुक्तं वैराग्यात्प्रकृतिलय इति

स न विद्यते इत्येतिमप्रश्नस्योत्तरमभाव व्याहृत्यर्थं एवमेवोक्तं नत्र

मात्स्वभावः स्वर्गे तिदुर्गत्यारन्यतमागतिः स्यादेवेत्यत आह नही

ति हि रवधारणे तातेति लोकरीत्योपलयन्नेवोधयति कश्चिदपि

शुभकारी दुर्गतिं पूर्वस्माद्धीनजन्मप्राप्तिं देहपातादूर्ध्वं नैव प्राप्नोति

अयं च शुभकारी श्रद्धया योगे प्रवृत्तत्वात् तदुक्तं कुलार्णवे प्राप्य

तः क्षणमात्रं वा श्रद्धया परमेश्वरः यस्त्वेतन्मम हृत्कर्णं न स्पृत्तोत्येव

गणपते त्वां ब्रह्माहमस्मीति यः कुर्यादात्मचिंतनम् तत्सर्वं पात

कं हन्यात्तमः सूर्योदये यथा बालकृतत्वपस्तीर्थदानादेवार्चनादि

षु यत्फलं कोटिगणितं तत्स्वाप्नोति न संविदिति तथा च स्मृतिः

॰तेन स्नातं तीर्थसमस्ततीर्थसलिले सर्वापि दत्तावनिर्यज्ञानां च कृतं सह

स्रमखिला देवाश्च संपूजिताः संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक

पूज्योप्यसौ यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनो गच्छतीति ४॰

[illegible] ॥

पंवोलीटीका

प्रश्नोत्तरमाह भगवान्पार्थेति चतुर्भिः हे पार्थ तस्य योगभ्रष्टस्य इह
लोके परलोके वा विनाशः सर्वस्मात् हीनजन्मप्राप्तिर्न विद्यते न संभव
ति हि यस्माद्धेतोः हे तात कश्चित्कल्याणकृत् दुर्गतिं कुत्सितां गतिं न ग
च्छति ४०॥

रत्नवीरसमिद्धोधिनी ॥

अथैवंविधसंशयच्छेदनाय भगवानुवाच पार्थेति तस्य श्रद्धाव
त्वेनैव योगे प्रवृत्तस्य इहलोके विनाशः सुखभोगप्रतियोगिका
भावो नास्ति तथामुत्र परलोकेपि नास्ति हि यतः कल्याणकृत्
कल्याणाय करोतीति कल्याणोद्देशेन कर्मसु प्रवृत्तः कश्चिद्दुर्ग
तिं नरकादियोनिं न गच्छति तातेति संबोधनेनानुकंप्यत्वं द्योत्य
ते ४०॥

मधुभाष्य

४०॥

भाषा अनुवाद

अर्जुन की इस प्रश्न का उत्तर श्रीभगवान साढे चारि श्लोक से। कहते है कि हे पार्थ उस अधूरे योगाभ्यासी को योगभ्रष्ट होने से यह लोक नाश करे इस लोकमे पातक और परलोक मे नरक प्राप्ति ये दोनो नहीं होय हैं जिस हेतु किसी कल्याण कृत करे शुभ आचरण करनेवाला पुरुष तात कहे हे भाई अर्जुन दुर्गतिको नहीं प्राप्त होता है तात शब्द से लोक रीति देखावते भये भगवान ने स्नेह पूर्वक अर्जुन को सम्बोधन करि कहा है तात का अर्थ पिता औ पुत्र है ४०

दोहा

तातिहनासें लोक अरु परलोकन पार्थनपाय कोउनहि सुकृत करणसें तात दुर्गति जाय ८०॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शु
चीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ४१॥

शांकरभाष्यं

किन्त्वस्य भवति प्राप्येति योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्
प्राप्य गत्वा पुण्यकृताम् अश्वमेधादियाजिनां लोकांस्तत्र उषित्वा वास
मनुभूय शाश्वतीर्नित्याः समाः संवत्सरान् तद्भोगक्षये शुचीनां
यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते ४१

आनन्दगिरिकृतटीका

योगभ्रष्टस्य लोकद्वयेऽपि नाशाभावे किं भवतीति पृच्छति किंत्विति
तत्र श्लोकेनोत्तरमाह प्राप्येति कथं संन्यासीति विशेष्यते तत्राह।
सामर्थ्यादिति कर्मिणो ह्यात्मज्ञस्य कर्मिणो योगमार्गप्रवृत्तस्य नुपप
त्तिस्तत्प्रवृत्तावपि फलाभिलाषविकलस्येश्वरे समर्पितसर्वकर्मण
स्तद्भ्रंशाशंकानवकाशादित्यर्थः समानां नित्यत्वं मानुषसमाति
लंघनं वैराग्याभावविवक्षया विभूतिमतां गृहे जन्मेति विशेष्यते ४१

स्वामिकृतटीका

तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह प्राप्येति पुण्यकारिणामश्व
मेधादियाजिनां लोकान्प्राप्य तत्र शाश्वतीः समाः बहून्संवत्सरानुषि
त्वा सुखमनुभूय तद्भोगेन पुण्यक्षये शुचीनां श्रीमतां सदाचाराणां धनि
नां गेहे स योगभ्रष्टोऽभिजायते जन्म प्राप्नोति ४१॥

पैशाचभाष्यं

किंतस्य भवति प्राप्येति योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्य ग
त्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्रोषित्वा वासमनुभू
य शाश्वतीर्नित्याः समाः संवत्सरांस्तद्भोगक्षये शुचीनां यथोक्तका
रिणां श्रीमतां गेहे विभूतिमतां गृहे योगभ्रष्टोऽभिजायते ४१॥

रामानुजभाष्यं

कथमयं भविष्यतीत्यत्राह [illegible] यज्जातीयभोगकांक्ष
या योगात्प्रच्युतोऽयमतिपुण्यवतां लोकान् प्राप्य तज्जातीयानतिक।
ल्याणभोगान् ञ्जोगोपाययोगमाहात्म्यादेव भुंजानो यावत्तद्भोगतृ
ष्णावसानं शाश्वतीः समास्तत्रोषित्वा तस्मिन्भोगे वितृष्णः शुचीनां श्रीमतां

गी· योगोपक्रमयोग्यानां कुले योगोपक्रमे भ्रष्टो योगमाहात्म्याज्जायते ४१

टी· शिवीश्रिवर्षाणि शुचीनामिति येषां भगवदंशस्पर्शो वित्तम् ४१ अभिनवगुप्तकृतटीका [illegible] णा स्यन्तस्य दिव्याः समाः वैष्णवा

स·

परमार्थप्रपाटीका

किं तर्हि तत्र प्रथममल्पकालयोगभ्रष्टस्य गतिमाह प्राप्येति ॥ स योगभ्रष्टः पुण्यकृतामश्वमेधयाजिनां लोकान् प्राप्य तत्र शाश्वतीः समाः बहून् संवत्सरान् उषित्वा शुचीनां सदाचारपरायणानां श्रीमतां धनिनां गृहे जायते उत्पद्यते ४१ ॥

वनमालीटीका

तदेवं योगभ्रष्टस्य दिव्यगती निवार्य प्राप्यमाह प्राप्येति योगभ्रष्टः कश्चित् पूर्वोपचितयोगवासनाशक्तिभावाद्विषयेभ्यः स्पृहयति कश्चित् वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोः प्रथमः पुण्यकृतामश्वमेधादिकृतामचिरमार्गेण ब्रह्मलोकादीन् प्राप्य तत्रोषित्वा शाश्वतीः समाः ब्रह्मपरिमाणेनैतावतः संवत्सरान् तदन्ते शुचीनां श्रीमतां राज्ञां गेहे भोगवासनाशेषसद्भावात् जनकादिवद्योगभ्रष्टोऽभिजायते योगवासनाप्रावल्याद् ब्रह्मलोकान्ते सर्वेकर्मसंन्यासयोग्यो महाराजस्तत्र कृतवती भवतीत्यर्थः ४१ ॥

कृष्णसेवेजयन्ती

ननु यद्येवं भवति तर्हि स किं फलं प्राप्नोतीत्यपेक्षायामैहिकं सर्वभोगात्मकं फलमाह प्राप्येति स योगभ्रष्टो यादृशात्तादेवमनुष्यादिभ्यः अन्यलोकानां विषयभोगवाञ्छया योगाद्भ्रष्टस्तु तो योगी पुण्यकृतान् पुण्येनाश्वमेधादिमहायज्ञेन कृतान् संपादितान् लोकान् स्वर्गादीन् ताद्दशान् प्राप्य तत्र देवादिजन्मावाप्य तत्रानेकसुखरूपविषयभोगान् भुञ्जानः सन् तत्रैव भोगेन निष्ठितवासनः सन् शाश्वतीः समाः अनेकसंवत्सरान् उषित्वा वासं कृत्वा शुचीनां सदाचारवतां तत्र योगविनिमय निमित्तिककर्मणा विशुद्धमनसां शास्त्रविचारकुशलानां तत्रापि श्रीमतां श्रद्धया तथा सदाचारपूर्वकरूपबलगुणादिसम्पन्नानां नरादिवर्णगेहे लक्ष्मीसरस्वतीक्रीडास्थले गेहेऽभिजायते उत्पन्नो भवतीत्यस्माद्योगाद्भ्रष्टस्य योगिनो गतिरियं दर्शिता स्वल्पकयोगाद्भ्रष्टस्य त्वनेन फलं भवतीत्याशयः ४१

तदेवं योगभ्रष्टस्य शुभकृत्त्वेन **मधुसूदनीटीका** लोकद्वयेऽपि नाशाभावे किं भवतीत्युच्यते ॥
योगमार्गं प्रवृत्तः सर्वकर्मसंन्यासी वैराग्यवान् श्रवणादि कुर्वन्नन्तराले म्रि
यमाणः कश्चित् पूर्वोपचितभोगवासनाप्रादुर्भावाद्विषयेभ्यः स्पृ
हयति कश्चित्तु वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोः प्रथमः प्राप्य पु
प४ ण्यकृतामश्वमेधयाजिनां लोकानर्चिरादिमार्गेण ब्रह्मलोकान् एकस्मि
न्नपि ब्रह्मलोके भोगभूमिभेदेन यावद्ब्रह्मवचनं तत्रोषित्वा वासमनु
भूय शाश्वतीः ब्रह्मपरिमाणेनाक्षयाः समाः संवत्सरान् तदन्ते शु
चीनां शुद्धानां श्रीमतां विभूतिमतां महाराजचक्रवर्तिनां गेहे कुले भो
गवासनाशेषसद्भावाज्जनकादिवद्योगभ्रष्टोऽभिजायते
भोगवासनाप्राबल्याद्ब्रह्मलोकान्ते सर्वकर्मसंन्यासायोग्यो महाराजो भ
वतीत्यर्थः ४१ ॥

सदानंदीटीका

योगमार्गप्रवृत्तः समीनराले मृतो द्विधे: सगना तावत्को लोकानश्व
मेधादियाजिनां २ कोटीः संवत्सराणामुषित्वा ततः त्वये यथो
क्तकारिणां गेहे धनिनां र्जयतेमतां २ वासनाशेषसद्भावादल्पवैराग्य
वान्यदि जनकादिवदेवासौ राज्ञां गेहेऽभिजायते ६ ४१ ॥

नीलकंठीटीका

इहामुत्रचनस्यमहत्त्वमेवाल्पीमाह प्राप्येति उषित्वा वासं कृत्वा शा
श्वतीः समाः नित्यान् वत्सरान्योगभ्रष्टो रागी चेत् अल्पकालाभ्यस्तयो
गश्चेत् श्रीमतां गेहे जायते तथापि श्रीमान् योगच्छतीत्याशंक्य शुची
नामित्युक्तं शुचयो हि सत्कार्ये षेवश्रियमुपयुंजानाः पूर्वाभ्यस्तयोगसं
स्कारं स्थानमासादयंतीत्यर्थः ४१ ॥

श्रानंदीटीका

[illegible] ४१ सप्राप्येमू
मदर्थकृतस्यकर्मणोऽक्षयत्वात्केवलमङ्गमध्याधिमात्रतादितारतम्यात्कालविशेषापेक्षेतिदर्शय
ति ॥ ४१ ॥

रामकंठीटीका

यत एव मतः ॥
योगभ्रष्टो योगाद्यथोक्तज्ञाननिष्ठतया शास्त्रविहितस्वकर्मानुष्ठानलक्षणा

गी॰
टी॰ब॰

लमायेभ्रष्टः परमेश्वरसमापत्तिलक्षणं फलमप्राप्यैवविच्छिन्नस्सन् शु
द्धागीजेसत्यपीश्वरेच्छावशादेवमेप्रमितीव्रसंवेगाभावायत्नादिसहकारि
सामग्रीवैकल्याद्दिकालान्तरापेक्षिफलःसन्पुण्यकृतांप्रकृष्टयज्ञदानत
पःप्रभृतिशुभकर्मकारिणांमवंधिनोलोकान्तत्कर्मोचितभोगाधिक
रणभूतानिभुवनानिप्राप्यासाद्य तत्रचतत्कर्मानुरूपाःशाश्वतीःसमाः
सहस्रसंख्यानिवर्षाण्युषित्वानिवासमनुभूय ततस्तादृशकर्मफलोप
भोगान्तेकर्मभूमावस्मिन्शुचीनांश्रीमतांशुद्धाभिजनकर्मणांलक्ष्मीवतांकु
लेन्वयेभिजायते येनभोगाभिवाञ्छालेशकलुषितचित्तत्वादसम्यगनु
ष्ठिताकर्मयोगाद्भ्रष्टःप्रागस्तस्यैवागतिर्निर्दिष्टा यस्तुत्वपवर्गप्रवणाते
पिसतिकुतश्चित्प्रतिबन्धात्कर्मयोगःसम्यङ्निर्वृत्तस्सइमांगतिमाप्नोती
ति [illegible] ४१ ॥

लासिकी [illegible]टीका

नर्हिकगव्हतीत्यपेक्षायामाह ॥

पुण्यकृतांयज्ञदानतपआदिशुभकारिणांलोकांस्तत्तत्कर्मोचितभोगा
धिकरणभुवनानिप्राप्य तत्रचशाश्वतीःसमाःसहस्रसंख्यान्संवत्सरा
नुषित्वा तन्निवाससुखमनुभूय ततःशुद्धाभिजनकर्मणांश्रीमतांल
क्ष्मीवतांमहाराजचक्रवर्तिनांगेहे अजातशत्रुजनकादिवद्योगभ्रष्टोभिज
जायते जन्मलभते तदुक्तंयोगवासिष्ठे योगभूमितयोत्क्रान्तजीवितस्य
शरीरिणः भूमिकांशानुसारेणक्षीयतेपूर्वदुष्कृतम् ततःकतिपयेकाले
शेषंदुष्कृतकर्मणाम् भुक्त्वास्वकृतभोगायथातिपुण्यवद्गाम्स्पदम् योगभू
मिगतायेयेम्रियन्तेपुरुषाधमाः तेतीर्णदुष्कृतामन्तारमन्तेसरसाद्यखिलति ४१
[illegible]
[illegible] ४१ ॥

पंचोलीटीका

किंतपरस्यभवतितदाह प्राप्येतियोगभ्रष्टोयोगमार्गात्स्खलितःसंन्या
सीपुण्यकृतामश्वमेधयाजिनांलोकान्प्राप्यतत्रशाश्वतीःसमाःदीर्घसंव
त्सरानुषित्वाततः भोगक्षयेशुचीनांपवित्रकारिणांश्रीमतांगेहेऽभि
जायते ४१ ॥

रणवीरसमिद्धोयिनी॥

तर्हिकांगतिमसावित्यर्जुनाभिप्रायमाशंक्यक्रमतउभयलो
कसिद्धिंप्रतिपादयतिप्राप्येति योगाच्छास्त्रविहितस्वकर्मा
नुष्ठानलक्षणाद्वितसमाधेर्भ्रष्टोविच्युतःसन् श्रद्धावीजेमन्य
पीस्वेरेच्छावशादेवसंप्रतितीव्रतरसंवेगाभावायत्नादिसह
कारिसामग्रीवैकल्याद्धिकालांतरापेक्षिफलःसन् पुण्यकृ
तामश्वमेधादियज्ञयूपपुण्यकारिणांप्राप्यांल्लोकान्स्वर्गादि
कान्प्राप्य तत्रचशाश्वतीःसमाबहून्वत्सरानुषित्वाभोगानुप
भुज्य अनंतरंशुचीनांपवित्राचाराणांश्रीमतांमहासंपत्तिमा
लिनांगेहेसपूर्वोक्तलक्षणोभिजायते जन्मलभते ४१॥

190

भाषा अनुवाद

तो फेरि वे योगभ्रष्ट लोग किस गति को जाते हैं इस अपेक्षा पर कहते हैं कि जिस स्वर्ग आदि लोक को अश्वमेध आदिक यज्ञ करि के मनुष्य जाते हैं पुण्यकर्मकारी योगभ्रष्ट पुरुष भी उसी उत्तम लोक मे जाय कर बहुत बरस तक तहां बसि सुख भोग करि के फेरि सत् कर्मकारी धनी लोगों के घर मे आय जन्मग्रहण कहते हैं ४१

दोहा

होय प्राप्त पुण्यलोक को बहुत वर्ष स्थिति पाय   लक्ष्मीयुत
सुचीगेहमह योगभ्रष्टभीजाय   ४१॥

अथवा योगिनामेव कुले भवति धीमतां एतद्धि
दुर्लभतरं लोके जन्म यदीदृशं ४२॥

शांकरभाष्यं

अथेति अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेव दरिद्राणां कुले
भवति जायते धीमतां बुद्धिमतां एतद्धि जन्म यद्दरिद्राणां योगिनां कु
ले दुर्लभतरं दुःखेन लभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्त।
विशेषणे कुले यस्मात् ४२॥

आनंदगिरिकृतटीका

श्रद्धावैराग्यादिकल्याणाधिके पक्षान्तरमाह अथवेति योगिनामि
ति कर्मिणां ग्रहणमाभूदिति विशिनष्टि धीमतामिति ब्रह्मविद्या
वतां शुचीनां दरिद्राणां कुले जन्म दुर्लभं प्रमादकारणाभावादित्याह
एतद्धीति किमपेक्षयास्य जन्मनो दुःखलभ्यादपि दुःखलभ्यतरत्वं तदा
ह पूर्वमिति यद्यपि श्रीमतां शुचीनां गृहे जन्म दुःखलभ्यं तथा
पि तदपेक्षया इदं जन्म दुःखलभ्यतरं यदीदृशं शुचीनां दरिद्राणां वि
द्यावतामिति विशेषणोपेते कुले लोके जन्मलक्षणमित्यर्थः यद्दु।
र्लभतरं जन्मोक्तं तस्योत्तमत्वे हेत्वन्तरमाह यस्मादिति ४२॥

स्वामिकृतटीका

अल्पकालाभ्यस्तयोगभ्रंशे गतिरुक्ता चिरकालाभ्यस्तयोगभ्रंशे
तु पक्षान्तरमाह अथवेति योगनिष्ठानां धीमतां ज्ञानिनामेव कुले जा।
यते न तु पूर्वोक्तानामनारूढयोगानां कुले एतज्जन्मास्तीति ईदृशं हि य
ज्जन्म तल्लोके दुर्लभतरं मोक्षहेतुत्वात् ४२॥

पैशाचभाष्यं

अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जा
यते धीमतामेतद्धि जन्म दरिद्राणां योगिनां कुले दुर्लभतरं पूर्वापेक्ष्य
लोके जन्म यदीदृशं यथोक्तविशेषणे कुले यस्मात् ४२॥

रामानुजभाष्यं

परिपक्वयोगवलितश्च योगिनां धीमतां योगं कुर्वतां स्वयमेव योगोप
देष्टॄणां कुले भवति तदेतदुभयविधयोगाद्योगभ्रष्टानां योगिनां च कुले ज

गी॰
टी॰
स॰

न्मशाकृतानांदुर्लभतरमेतद्योगमहात्म्यकृतं ४२ ॥

अभिनवगुप्तकृतटीका स्पष्टार्थं ४२ यदिनुतावनन्यनास्या पर्वतीयमविनवं न योगिकुलयः जायते यतपवाह एतद्धि दुर्लभमिति योगिनांगेहे किंतावयामवेविशु सति ४२

परमार्थप्रपाटीका

अथवा चिराभ्यस्तयोगभ्रंशे पक्षांतरमाह अथवेति अथवा योगिनां
योगनिष्ठानां तथा धीमतां ज्ञानिनामेव कुले जायते न तु हीनकानां
मनारूढयोगानां यतदीदृशं यज्जन्म तद्दुर्लभतरं मोक्षहेतुत्वात् ४२॥

वनमालीटीका

द्वितीयं प्रतिपक्षांतरमाह अथवेति श्रद्धावैराग्यादिकल्याणगुणा
धिकेन भोगवासनविरहात् अप्राप्यैव लोकान् प्राप्यैवा किं वनानां
धीमतां ब्रह्मविदां कुले योगभ्रष्टो भवति यदुक्तं धीनां श्रीमतां गेहे
गेहे योगिनां जन्मनदपि दुर्लभं अनेकसुकृतसाध्यत्वात् मोक्षपर्य
वसायित्वाच्च यच्छुकवीनामपि किं वक्तव्यं नाम ऋषीणां ब्रह्मविद्यावतां वा
शिष्टानां कुले जन्म एतद्धि प्रसिद्धशुकादिवत् दुर्लभतरं दुर्लभादपि दुर्लभं
लोके यदीदृशं सर्वप्रमादशून्यं जन्मेति द्वितीयः स्यात् यतो भो
गवासनाशून्यत्वेन समाप्तार्हत्वात् ४२ ॥

ज्ञमवैजयन्तीटीका

इत्येवमल्पकालाभ्यासाद्योगभ्रष्टस्य गतिरुक्ता इदानीं चिरकालाभ्या
सयोगभ्रष्टस्य गतिमाह अथवेति अथशब्दः पक्षान्तरे वा शब्दो वि
कल्पे चिरकालाभ्यासेन यदि परिपक्वयोगो योगी भवेत् तर्हि धीमतामु
पदेशकर्तृणां ज्ञानिनां योगिनामस्मदादीनामपि योगानुष्ठानं कुर्वतां हि
विप्रयोगयोग्यानामेव कुले वंशे भवति उत्पद्यते हे विप्र इत्यनेन जन्मनो मा
हात्म्यमाह एतदिति योगयोग्यानां योगं कुर्वतां च कुले पूर्वजन्मदः
फलं शमदमसाधनं बलकृतमीदृशं यज्जन्म हि निश्चयेन लोके प्राकृ
ते लोके प्राकृतानां जनानां एतज्जन्म दुर्लभतरमतिशयदुर्लभं दुःप्रा
प्यं भवतीत्यर्थः ४२॥

मधुसूदनीटीका

द्वितीयं प्रतिपक्षांतरमाह ॥

श्रद्धावैराग्यादिकल्याणगुणाधिकेन भोगवासनाविरहादप्राप्यैव
लोकान् प्राप्यैव योगिनामेव दरिद्राणां ब्राह्मणानां न तु श्रीमतां राज्ञां कु

लेभवतिधीमतांब्रह्मविद्यावतां एतेनयोगिनामितिनिकर्षेऽयह
णंयच्छ्रुचीनांश्रीमतांराज्ञांगृहेयोगभ्रष्टस्यजन्मतद्दुर्लभं अने
कसुकृतसाध्यत्वान्मोक्षपर्यवसायित्वाच्च यत्तुशुचीनांदरिद्राणां
ब्राह्मणानांब्रह्मविद्यावतां कुलेजन्म एतत्प्रसिद्धशुकादिवद्दुर्ल
भतरंदुर्लभादपिदुर्लभंलोकेयदीदृशंसर्वप्रमादकारणशून्यंजन्मे
तिद्वितीयःस्तूयतेभोगवासनाशून्यत्वेनसर्वकर्मसमाप्तिहेतुत्वात्
४२॥

सदानंदीटीका

वैराग्यादिगुणाधिक्येवाभक्ताविरहात्सुतिः योगभ्रष्टःसुकृतिनां
लोकानप्राप्ययोगिनां ब्राह्मणानांदरिद्राणांब्रह्मविद्यावतांकुलेजा
यतेतत्कुलेजन्मदुर्लभादपिदुर्लभं २ पुण्यसाध्यत्वयाजन्मराज्ञां
गेहेपिदुर्लभं तस्मादपीदृशंजन्मयोगिगेहेतिदुर्लभं ३ समवाया
दण्णांगृहस्थाकालंजिगेमिसे चक्रवाकाःशरदीवहंसाःसरसिमा
नसे ४ तेपिजानातुकुलेवेब्राह्मणावेदपारगाः प्रस्थितादीर्घमेधाने।
प्रयेतेभ्योवसीदथ तद्दुर्लभदृशिवंशेच्चवंशप्रत्नावनस्थले ५ ४२॥

नीलकंठीटीका

तयोगीविरक्तश्चिराभ्यस्तयोगोवाचेत्तस्यगतिमाह अथवेति ४२

आनंदीटीका

:स्पष्टार्थ

पत्नान्तरेपून्यासेनाह॥

रामकंठीटीका

अथवायोगभ्रष्टोयोगिनांयथोक्तकर्मसमाप्तिनिष्ठानामतएवधीम
तांमहत्त्वज्ञानशक्तत्वात्मशास्त्रबुद्धिमतांकुलेसमुत्पद्यते ईदृशमेतदेवं
विधानांयोगिनांकुलेजन्मदुर्लभतरंकर्मयोगभ्रष्टमनस्करानकेनवि
त्तमत्तुशक्यं ४२॥

लासिकीटीका

एवमल्पकालाभ्यस्तयोगभ्रष्टेगतिरिमुक्त्वा चिरकालाभ्यस्तयोगभ्रंशेत्वपक्षान्तर
माह॥ योगिनांयोगनिष्ठानांदरिद्राणांधीमतांविद्यावतांकुलेगेहेभवति जाय
तेशुकादिवत् एतज्जन्मलोकेति ह्ययस्मात् ईदृशंयज्जन्मएतद्धिदुर्लभं लोके
नर दुर्लभादपिदुर्लभंश्रीमतांगेहेजन्मदुर्लभम्
४२॥
४२

गी.
टी.
६.

पंचोलीटीका

अल्पकालाभ्यस्तयोगभ्रंशेगतिंउक्त्वाचिरकालाभ्यस्तयोगभ्रंशेप
तोनंतरमाह अथवेति अथवाधीमतांज्ञानिनांयोगिनांअकिंचनानां
कुलेजन्मभवतिजायते हि[illegible]तानिश्चितेयतः ईदृशंयतनत्योगिनां
कुलेजन्मलोकेदुर्लभतरंदुःखशाप्यतरंश्रीमतांकुलेजन्मापेक्षयायो
गिनांकुले अथयतनतदुर्लभतरं ४२ ॥

रणवीरसमिद्धोधिनी ॥

अल्पकालाभ्यस्तयोगभ्रंशेगतिमुक्त्वाचिराभ्यस्तयोगभ्रंशे
तुपक्षांतरमाह अथवेति अथवाशब्दःपूर्वस्मात्पक्षाद्विशेष
द्योतनार्थः योगिनांकर्मयोगिनां क्षत्रियप्रवराणामेवकुलेप्र
वृत्तिलक्षणेयोगभ्रष्टोभवति जन्माप्नोतीतियावत् कीदृशानां
धीमतां पितामहकालग्राहित्वाद्बुध्याप्रुक्तानांनिश्चयदार्ढ्या
दस्खलितांतःकरणानां यदीदृशंकर्मयोगिनांकुलेभवंजन्म
हीतिनिश्चये एतस्म लोकेस्यांकर्मभूमौदुर्लभतरं अतस्त्वम
पिमहाराजकुले उद्भूत आसन्नतरं महाफलोमासमराग्निव
र्तस्येत्यभिप्रायः ४२॥

मधुभाष्य

४२॥

भाषा अनुवाद

थोडे दिन योगाभ्यास करि के योग से भ्रष्ट भये पुरुष की गति कहि चुके अब बहुत काल अभ्यास कर के भ्रष्ट हुये योगी की गति कहते हैं कि अथवा सतपात्र धनियों के घर जन्म लेने से और जो दरिद्र बुद्धिमान योगाभ्यासियों के कुल मे जन्म ग्रहण सो उत्तम है ऐसा जन्म लोक मे अति दुर्लभ है सो चिरकाल योगाभ्यासी योगभ्रष्ट होय ऐसे ही घर मे उत्पन्न होते हैं ४२

दोहा

योगिनके बुद्धिवंतके कुलमें अथवा होय दुर्लभ है यह लो
कमें ऐसो जन्महि सोय ४२॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च।
ततो भूयः संसिद्धौ कुरुनन्दन ४३ ॥

शांकरभाष्यं

तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकं यतते च प्रयत्नं च करोति ततस्तस्मात् पूर्वकृतात् संस्काराद्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनन्दन ४३ ॥

आनन्दगिरिकृतटीका

बुद्धेरात्मविषयेति शेषः पूर्वस्मिन् देहे भवं तत्रानुष्ठितसाधनविशेषप्रक्रमित्यर्थः तदीयप्रयोजनमाह साधनानुष्ठानमन्तरेणैव। बुद्धिसम्बन्धः स्यादित्याशंक्याह यतत इति प्रयत्नः श्रवणाद्यनुष्ठानविषयः ४३ ॥

स्वामिकृतटीका

ततः किमत आह तत्रेति सार्धेन तत्र हि प्रकारद्वयेऽपि जन्मनि पूर्वदेहे भवं पौर्वदैहिकं तमेव ब्रह्मविषयया बुद्ध्या संयोगं लभते ततश्च भूयोऽधिकं संसिद्धौ मोक्षे प्रयत्नं करोति [illegible] विषयेष्वः [illegible] ४३ ॥

पैशाचभाष्यं

यस्माच्च तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वदेहे भवं पौर्वदेहिकं [illegible] यतते च यत्नं करोति च त-
तस्मात्पूर्वकृतात्संस्काराद्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कुरुनन्दन ४३ ॥

रामानुजभाष्यं

तत्र तमिति तत्र जन्मनि तमेव पूर्वदैहिकं योगविषयिकबुद्धिसंयोगं लभते ततः सम्यगनिवृत्तवदूयः संसिद्धौ यतते यथानान्तरायहतो भवति तथा यतते ४३

त्रि^ अभिनवगुप्तकृतटीका [illegible] ४३ संसिद्धौ मोदात्मिकायामु ४३

परमार्थप्रपाटीका

गी. तत्र किं भवतीत्याह सार्धेन तत्रेति तत्र योगिनां कुले तं पूर्वदैहिकं प्रा
टी. क्संस्कारागतं बुद्धिसंयोगं लभते ततस्तेन बुद्धिसंयोगेन संसि
ध. द्धौ मोक्षसाधने यतनं बहुतरं प्रयत्नं करोति ४३ ॥

वनमालीटीका

तत्र हि प्रकारेऽपि जन्मनि पूर्वदेहे भवे पौर्वदैहिके सर्वकर्मसंन्यासगु
रूपसदनश्रवणमनननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं
तावत्पर्यन्तमेव तं परब्रह्मविषयया बुद्ध्या संयोगं तत्साधनकलाप
मिति यावत् लभते प्राप्नोति न केवलं लभत एव किं तु ततस्तल्लाभा
नन्तरं भूयोऽधिकं साधनसंपत्तिप्राप्यसंसिद्धौ मोक्षाय यतनं प्रयत्नं करोति ४३

ऊस्तमवैजयन्तीटीका

प्राग्भविकं स्वं स्वकं पूर्वसंस्कारनिमित्तकं साधनमाह तत्र तमिति
बुद्ध्या तत्रोभयविधे जन्मनि पौर्वलक्षणया संयोगं तया सह संबन्धं लभते
सम्प्रति बुद्ध्या येन पूर्वजन्मकृतमात्मपरमात्मतत्त्वानुसंयोगात् प्रबोधो
योगी प्राप्नोतीत्यर्थः हे कुरुनन्दन ततस्तादृशाद्बुद्धिसंयोगादितोऽपि संसि
द्धौ स्वान्तःकरणशुद्धिपूर्विकायां स्वपरस्वरूपदर्शनरूपायां निमित्ते वा
पुनर्भूयो बहुतरं यतनं यथा सर्वविघ्नविहतो योगी भ्रष्टो भवन्नपीदानीं
मा भूदित्येवं मनसि निश्चित्यातिदृढतरं यत्नं करोतीत्यर्थः ४३ ॥

मधुसूदनीटीका

एतादृशजन्म हि यस्माद्दुर्लभं तत्कस्मा
यस्मात् ॥ तत्र हि प्रकारेऽपि जन्मनि पूर्वदेहे भवं पौर्वदेहिकं सर्वकर्मसंन्यासगुरू
पसदनश्रवणमनननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं ताव
त्पर्यन्तमेव तं ब्रह्मात्मैक्यविषयया बुद्ध्या संयोगं तत्साधनकलापमि
ति यावत् लभते प्राप्नोति न केवलं लभत एव किं तु ततस्तल्लाभानन्त
रं भूयोऽपि अधिकं लब्धाया भूमेरग्रिमां भूमिं संपादयितुं संसिद्धौ संसिद्धि
र्मोक्षः तन्निमित्तं यतते च प्रयत्नं करोति च यावन्मोक्षं भूमिकाः संपा
दयतीत्यर्थः हे कुरुनन्दन त्वमपि शुचीनां श्रीमतां कुले योगभ्रष्टज
ति त्मजातोऽसि पूर्ववासनावशादनायासेनैव ज्ञानलाभो भविष्यतीति ।
त्वमपि महाप्रभावस्य कुरोः कीर्तने प्रथमपक्षो भगवदभिप्रेत एव
नेव्यक्तः यथा श्रीरामः एकं मध्यहितीयो वा तृतीयां भूमिकां प्राप्त ।

प्राङ्कस्य मरणस्यापि कीदृशी भगवन्गतिः एवं हि सप्तभूमयो व्याख्या
ताः तत्र नित्यानित्यवस्तुविवेकपूर्वकादिहामुत्रार्थभोगवैराग्याद्युत्त
मदमश्रद्धातितिक्षा सर्वकर्मसंन्यासादिपुरःसरा मुमुक्षा शुभेच्छा
ख्या प्रथमा भूमिका साधनचतुष्टयसंपदिति यावत् ततो गुरुमुप
सृत्य वेदांतवाक्यविचारणात्मिका द्वितीया भूमिका श्रवणमनन
संपदिति यावत् २ ततः श्रवणमननपरिनिष्ठस्य तत्त्वज्ञानस्य नि
र्विचिकित्सनात्तनुमानसानाम तृतीया भूमिका निदिध्यासनसंप
दिति यावत् ३ चतुर्थी भूमिका तत्त्वसाक्षात्काररूपा ४ पंचमषष्ठ
सप्तमभूमयस्तु जीवन्मुक्तेरवांतरभेदा इतीये शास्त्रव्याख्याते
तत्र चतुर्थी भूमिकाप्राप्तस्य मरणस्य जीवन्मुक्त्यभावेऽपि विदेहकैवल्य
प्राप्ति नास्त्येव संशयः तदुत्तरभूमित्रयप्राप्तस्तु जीवन्नपि मुक्तः कि
मु विदेह इति नास्त्येव भूमिकाचतुष्टये शंका साधनभूतभूमिकात्रय
तु कर्मत्यागात्तत्तल्लाभाच्च भवति शंकेति तत्रैव प्रश्नः श्रीवसिष्ठः
योगभूमिकयोत्क्रांतजीवितस्य शरीरिणः भूमिकांशानुसारेण दी
यते पूर्वदुष्कृतं ततः सुरविमानेषु लोकपालपुरेषु च मेरूपवनकुंजे
षु रमते रमणीसखः ततः सुकृतसंभारे दुष्कृते च पुराकृते भोगतया
परिक्षीणे जायंते योगिनो भुवि शुचीनां श्रीमतां गेहे गुप्ते गुणवतां स
तां जनित्वा योगमेवैते सेवंते योगवासिताः तत्र प्राग्भावनाभ्यस्तयो
गभूमिक्रमं बुधाः दृष्ट्वा परिपतंत्युच्चैरुत्तरं भूमिकाक्रममिति अत्र
प्रागुपचितभोगवासनाप्राबल्यादल्पकालाभ्यस्तवैराग्यवासनादौर्ब
ल्येन प्राणोत्क्रांतिसमये प्रादुर्भूतभोगस्पृहः सर्वकर्मसंन्यासी यः स प
वोक्तः यस्तु वैराग्यवासनाप्राबल्यात्प्रकृष्टपुण्यपरिपाकोदितपरमेश्वरप्र
सादवशेन प्राणोत्क्रांतिसमये नोद्भूतभोगस्पृहः संन्यासे भोगव्यवधा
नेनैव ब्राह्मणानामेव ब्रह्मविदां सर्वप्रमादकारणशून्ये कुले समु
त्पन्नः तस्य प्राक्तनसंस्काराभिव्यक्तेरनायासेनैव संभवाद्वास्ति पूर्वस्यैव
मोक्षप्रत्याशंकेति स च वसिष्ठेनोक्तो भगवतानापरमकारुणिकेना
पार्थेति प्रश्नानंतरमुक्तोऽत एव स्पष्टमयतं

[illegible]

196

सदानंदटीका

यतस्तेषांकुलेबुद्ध्यासंयोगंलभतेऽम्यया पूर्वदेहसमुद्भूतमवलोक
र्यानया १ पूर्वस्मादेवसंस्कारायतंबहूतरंततः करोतिनत्त्वविज्ञान
संसिद्धौयोगानमरः २ तत्रापिश्रीमतांगेहेजन्मास्तिकुरुनंदन प्रना
यासान्तवक्ष्यानेभविष्यमेवमाशयः ३ अयमर्थोपिवासिष्ठेव्यक्तःश्री
रामबोदनात् एकामथद्वितीयावात्तृतीयांभूमिकामुत ४ आरूढस्य
मृतस्यास्यकीदृशीभगवन्गतिः श्रीवसिष्ठःयोगभूमिकयोत्क्रांत
जीवितस्यशरीरिणः ५ भूमिकांशानुसारेणक्षीयतेपूर्वदुःकृतं त
तःसुरविमानेषुलोकपालपुरेषुच ६ मेरूपवनकुंजेषुरमतेरमणी
सखः ततःसुकृतसंभारेदुःकृतेचपुराकृते ७ भोगक्षयात्परिक्षीणा
जायंतेयोगिनोभुवि शुचीनांश्रीमतांगेहेकुलेयगुणवतांसतां ८ जनि
त्वायोगमेवैतेसेवंतेयोगवासिताः तत्रप्राग्भावनाभ्यस्तयोगभूमिक्रमं
बुधाः ९ दृष्ट्वापरिपतंत्युच्चैरुत्तरंभूमिकाक्रमं १० ४३॥

नीलकंठटीका

तत्रद्विविधेपिजन्मनिपौर्वदेहिकंपूर्वदेहसंबंधंबुद्धिसंयोगं यावती।
वद्योगभूमिः पूर्वजन्मनिजितातत्रैवयावान्बुद्धिलाभोजातस्तावंतंबुद्धि
संयोगंपूर्वाभ्यासाद्दल्पेनैवाभ्यासेनलभतेतस्माद्पिभूयस्यावकां।
संसिद्धौ ऊर्ध्वभूमिलाभार्थमितिमर्थः यततेयत्नंकरोति ४३॥

आनंदटीका

यस्याभूमिकायाःपतितस्तस्यापवत्र्याज्ञानेनसंयोगंकृत्वाततस्तस्या
भूमेर्जयानंतरंभूयः पुनरप्युत्तरभूमिजयायसिद्धौयतते ४३॥

रामकंठटीका

[illegible]

तस्मिंश्च जन्मनि तं बुद्धिसंयोगं तादृशेन ब्रह्मज्ञानसंस्कृतया मत्या संबन्धं लभ-
ते कं तं पौर्वदेहिकं पूर्वस्मिन्देहे भवं यत्र ज्ञानक्रियासमुच्चयानुष्ठानरू-
पो योगस्तेनाश्रितस्तत्र निर्वाहितः तत्र किल तथाविधयोगसमाश्रयणा-
द्धेतुभूतज्ञानसंस्कृतया बुद्ध्या संबन्धो स्याभूदेव स च परमेश्वरानुग्रहं वि-
ना न भवति स चेश्वरानुग्रहो नादत्तफलो विरमति अतः कृतविद्धिरलंभ-
प्राक्के विलकालविलंबस्तु नरभिव्यज्यत एव ततस्तु बुद्धियोगमाहात्म्या-
द्भूयः पुनरपि प्रयत्नमारभते संसिद्धिनिमित्तं योगफलवाप्त्यर्थं धन्

लासिकीदत्तगणीटीका

एताहृशाजन्मद्द यस्तदुर्लभं त्वंक

तेनतदाह॥ तत्र हि प्रकारे जन्मनि पूर्वदेहे भवं पौर्वदेहिकं तेनादृशमेव संस्का-
रात्मनास्थितं बुद्धिसंयोगं बुद्ध्यात्मबोधेन संयोगं संबन्धं लभते ततो
बोधलाभानन्तरं संसिद्धौ ज्ञानोत्कर्षसामर्थ्यं भूयोपि कं पुनरपि वा यत-
ते प्रयत्नं करोति परमात्माकारसमाधानमावर्तनेश्वरार्थः तदुक्तं त-
स्य च परमार्थमयी धारा समगात्स्वमध्यविश्रान्तेः तत्पदलाभोत्क-
कवेनको पि मरणं कदाचित्स्यात् योगभ्रष्टः शास्त्रकथितो सौ चित्र-
भोगभुवनपतिः विश्रान्तिस्थानवशाज्जन्मान्तरे शिवी भवतीति ४३

[illegible] धन॥

पंचोलेटीका

कृतोदुर्लभमित्यत आह तत्रेति हे कुरुनंदन तत्र योगिनां कुले तं पौर्व-
देहिकं पूर्वस्मिन् देहे भवं बुद्धिसंयोगं बुद्ध्या योगं लभते वपुनः ततः पूर्वे-
स्मात्संस्काराद्भूयः बहुतरं संसिद्धौ मोक्षनिमित्तं यतते प्रयत्नं करोति ४३

रत्नवीरसमिद्धेयिनी॥

तत्रेति तत्र तस्मिन्कर्मयोगिकुल विषयके जन्मनि तं पौर्वदेहि-
दिकं प्राग्भवीयदेहे भवं बुद्धियोगं स्वकर्मानुष्ठाननिश्चयं संबन्धं
लभते ततश्च भूयः पुनरपि सम्यक्सिद्धये यतते यत्नं करोति ह

दप्रयत्नस्तत्रभवनीतिभावः ४३॥

मधुभाष्य

४३॥

भाषा अनुवाद

सोई जन्मग्रहण के बादि क्या होताहै यह देख श्लोक से कहते हैं कि हे कुरुनन्दन तेई दोनो प्रकार के योग भ्रष्ट लोग जन्म धारण करिके भी पूर्व देह के अभ्यासमे ब्रह्म विषयक बुद्धि से योग युक्त होते हैं और फेरि भीमोक्ष की सिद्धिके लिये अधिक यत्न करते हैं ४३

दोहा

ताको बुद्धिसंयोग तहां पूर्वजन्मको होय कर्तयतनता सिद्धि
" हे कुरुनंदनसोय ४३॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः जिज्ञा
सुरपि योगस्य शब्दब्रह्मातिवर्त्तते ४४ ॥

शांकरभाष्यं

कथंभूत पूर्वदेहबुद्धिसंयोग इति तदुच्यते पूर्वेति यः पूर्वजन्मनि कृतोऽभ्यासः स पूर्वाभ्यासस्तेनैव बलवता ह्रियते संसिद्धौ हि यस्मादवशोऽपि सः योगभ्रष्टः न कृतं चेत् योगाभ्यासजात् संस्कारात् बलवत्तरमधर्म्मादिलक्षणं कर्म्म तदा योगाभ्यासजनितेन संस्कारेण ह्रियतेऽधर्म्मश्चेद्बलवत्तरः कृतस्तेन योगजोऽपि संस्कारोऽभिभूयत एव तत्क्षये तु योगजः संस्कारः स्वयमेव कार्य्यमारभते न दीर्घकालस्थस्यापि विनाशस्तस्यास्तीत्यर्थो जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन् योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात् सोऽपि शब्दब्रह्म वेदोक्तकर्म्मानुष्ठानफलमतिवर्त्तते कर्म्मानुष्ठानलक्षणमतिक्रामत्यपाकरिष्यति किमुत बुद्ध्वा योगं तन्निष्ठोऽभ्यासं कुर्यात् ४४ ॥

आनन्दगिरिकृतटीका

यदि पूर्वसंस्कारः श्रेयोऽनुपपादयन् प्रवर्त्तयति तथापि अप्रवृत्तिरनिच्छया स्यादित्याशंक्याह पूर्वेति स हि योगभ्रष्टः समनन्तरजन्मकृतसंस्कारवशादुत्तरस्मिन् जन्मन्यनिच्छन्नपि योगे प्रेर्यते वाकृष्टो भवतीत्यर्थः तत्र कैमुतिकन्यायं सूचयति जिज्ञासुरिति पूर्वार्द्धं विभजते पूर्वेति तस्मा देवेच्छया तस्य प्रवृत्तिरिति शेषः योगभ्रष्टस्याधर्म्मादिप्रतिबन्धेऽपि न हि पूर्वाभ्यासवशाद्बुद्धिसम्बन्धः स्यादित्याशंक्याह नेत्यादिना यदि योगभ्रष्टेन योगाभ्यासजनितसंस्कारप्राबल्यात् प्रबलतरं धर्म्मप्रभेदरूपं कर्म्म न कृतं स्यात्तदा तेन संस्कारेण वशीकृतः सन्निच्छादिरहितोऽपि बुद्धिसम्बन्धभाग् भवतीत्यर्थः विपक्षे योगसंस्कारस्याभिभूतत्वान्न कार्यारम्भकत्वमित्याह अधर्म्मश्चेदिति योगजसंस्कारस्याधर्म्माभिभूतस्य कार्यमकृत्वैवाभिभावकप्रध्वंसे प्रणाशः स्यादित्याशंक्याह ततःक्षय इति। कालव्यवधानाद्विस्मृतिं शंकित्वोक्तं नेति तत्क्षणजन्मोत्कटहेतुत्वं योगाभ्याससंस्कारस्य दीर्घकालः समतिगतत्वादिति भावः कैमुतिकन्यायोक्तिपरमुत्तरार्द्धं विभजते जिज्ञासुरपीत्यादिना अत्रापि संन्यासीति विशेषणं पूर्ववदवधेयमित्याह सामर्थ्यादिति नहि कर्म्मी कर्म्ममार्गे प्रवृत्तस्ततो भ्रष्टः

शेकितं शक्यते अतः सन्न्यासी पूर्वोक्तैर्विशेषणैः विशिष्टो योगभ्रष्टो-
भीष्टः सोपि वैदिकं कर्म्म तत्फलं चातिवर्त्तते किमुत योगे बुद्धा नि-
ष्ठः सदाभ्यासं कुर्वन् कर्म्म तत्फलं चातिवर्त्तते किमिति वक्तव्यमिति
योजना योगनिष्ठस्य कर्म्म तत्फलातिवर्त्तने ततोधिकफलावाप्तिर्वि-
वक्ष्यते ४४

स्वामिकृतटीका

१ तद्देहेनः तेनैव पूर्वदेहकृता-
भ्यासेनावशोपि कृतस्थिर-
तरायादिनिकृत्यपि सत्क्रि-
यते विषयेभ्यः पराहृत्य ब्र-
ह्मनिष्ठः क्रियते

१ तद्देवे पूर्वाभ्यासवशेन प्रयत्नं कुर्वन् शनैःशनैर्मुच्यते इतीममर्थं कैमु-
त्यन्यायेनस्फुटयति जिज्ञासुरिति योगस्य स्वरूपं जिज्ञासुरेव के-
वलं न तु प्राप्तयोगः एवंभूतो योगे प्रविष्टमात्रोपि पापवशाद्योगभ्रष्टो-
पि शब्दब्रह्म वेदमतिवर्त्तते वेदोक्तकर्मफलान्यप्यतिवर्त्तते अतिक्राम-
ति तेभ्योप्यधिकं फलं प्राप्य मुच्यत इत्यर्थः ४४ ॥

पिशाचभाष्यं

पूर्वजन्मनि कृतोभ्यासस्तेन पूर्वाभ्यासेन बलवता तेनैव ह्रियते हियस्मा-
माप्यते बुद्धिं योगं प्रत्यवशोपि सः योगभ्रष्टः किंच जिज्ञासुर्योगस्य ज्ञा-
तुमिच्छुर्यो योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्सोपि शब्दब्रह्म वेदोक्तके-
वलं कर्मानुष्ठानमतिवर्त्तते योगजिज्ञासापि केवलात्कर्मणो गुरुतरे-
त्यभिप्रायः किमुत बुद्ध्वा योगनिष्ठाभ्यासं कुर्वन् ४४ ॥

रामानुजभाष्यं

तेन पूर्वाभ्यासेन पूर्वेण योगविषयेणाभ्यासेन स योगभ्रष्टोप्यवशोपि
योग एव ह्रियते प्रसिद्धं ह्येतद्योगमाहात्म्यमित्यर्थः जिज्ञासुरिति ।
प्रवृत्तयोगो योगजिज्ञासुरपि ततश्चलितमानसः पुनरपि तामेव
जिज्ञासां प्राप्य कर्म्म योगादिकं योगमनुष्ठाय शब्दब्रह्मातिवर्त्तते शब्द-
ब्रह्म देवमनुष्यान्तरिक्षस्वर्गादिशब्दाभिलापयोग्यं ब्रह्म प्रकृतिः प्रकृ-
तिर्वायादिमुक्तो देवमनुष्यादिशब्दाभिलापानर्हं ज्ञानानन्दैकतानमा-
त्मानं प्राप्नोतीत्यर्थः ४४ ॥

अभिनवगुप्तकृतटीका, स्पष्टार्थं ॥

परमार्थप्रपाटीका

प्रवशः परतन्त्र एव किल तेन पू-
र्वाभ्यासेन बलादेव योगाभ्यासं
प्रति नीयते नचैतत्सामान्यं यो-
गजिज्ञासामात्रेणैव शब्दब्रह्मा-
तिवृत्तिमनुष्ठायानयं शब्द-
ब्रह्मातिवर्त्तितं स्वीकृतं ४४ १

तद्देहेनमाह पूर्वेति तेनैव पूर्वाभ्याससंस्कारेणावशोपि कृतस्थिर-
तरायादिनिकृत्यपि क्रियतेव बलात्कारेण विषयेभ्यः पराहृत्य ब्रह्मनि-
ष्ठः क्रियते तदुक्तं विष्णुपुराणे अनिष्पन्नसमाधिस्तु परब्रह्मोपलब्धि-

अथयोगस्यसामर्थ्यमाह जिज्ञासुरिति योगस्वरूपंजिज्ञासुरपि योगप्रवृत्तमात्रोपि शब्दब्रह्मातिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीनि अतिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीनि अतिवर्तते अतिक्रामति तेभ्योधिकं फलं प्राप्य मुच्यते इत्यर्थः एवं मंदप्रयत्नोपि योगी परां गतिं याति

मात् यथेनरायदोषेणदूष्यतेरस्यमानसं जन्मांतरैरस्यसततोमुक्तिः सर्वस्यजायते विविधान्समाधिस्तमुक्तिमांवैवजन्मनि प्राप्नोतियोगीयोगाग्निदग्धकर्माचयोविरान् ४४ ॥

वनमालीटीका

ननुयोवैराग्यवासनाशावल्यात्सकृत्प्रवृत्तप्रकटितपरमेश्वराभ्यासवशेनशनैर्नोक्तिसमयेनद्भुतभोगस्यह्रस्वत्वसंबद्धाविदःकुलेजातस्यप्राचीनसंस्कारोहोयास्तुतरपिपरेवस्यानिष्टमोक्षपर्यंतमस्तु यस्तुश्रीमतांराज्ञांकुलेबहुविधविषयभोगव्यवधानेनोसमुत्पन्नस्यकायमतिव्यवहितत्वात्तेसंस्कारोहोयस्तत्राहपूर्वेति अतिव्यवहितजन्मोपचितेनापितेनैवपूर्वाभ्यासेनयोगजनितसंस्कारेणावशोपिमोक्षसाधनायाप्रयत्नमानोपिक्रियतेस्ववशीक्रियते अकस्मादेव। भोगवासनाभ्याभ्युपायमोक्षाभिमुखोक्रियते जिज्ञासुस्तावदमिकुरपियोगस्यमोक्षसाधनत्वात्तस्य ज्ञानमशक्यमस्तोबहुविषयोभुक्तामहाराजकुलेसमुत्पन्नोपियोगभ्रष्टः प्राचीनसंस्कारवशात्तस्मिन्जन्मनिशब्दब्रह्मवेदकर्मप्रतिपादकमतिवर्तते कर्माधिकारातिक्रमेणज्ञानाधिकारीभवतीत्यर्थः ४४ ॥

कृष्णमवैजयन्तीटी·

सयोगीकेनयत्नेनरम्येपत्तयोहेतुमाह पूर्वाभ्यासेनेति सयोगभ्रष्टोयोगीहीतिनिश्चयेनावशोपिकस्माचित्दपिविघ्नाद्योगमतिक्रम्यपिनैवयोगविषयकेनपूर्वाभ्यासेनपूर्वजन्मदेहकृताभ्यासेनक्रियते आकृष्यतेविषयेभ्यःपराङ्मुखात्मनिष्ठःक्रियतइत्यर्थः अस्ययोगस्यकेमुतिकन्यायेनमाहात्म्यमाह जिज्ञासुरिति अस्ययोगस्यज्ञानगर्भकस्याष्टांगशिरस्कस्यजिज्ञासुरपियोगानुष्ठानाशक्तः केवलयोगज्ञानमेवेच्छुरपिजनःशब्दब्रह्मअभिरायामलोवायुःस्वमनोवदिरेवचेत्यादिशब्दोनामयस्यतद्ब्रह्माभिप्रायपराप्रकृतिस्तामतिवर्ततेअतिक्रम्यवर्ततेप्रकृतिकार्यभूतस्यस्वर्गादिसुखभोगस्यप्राप्त्यभिलाषंत्यजतीत्यर्थः यद्येवंभूतोप्यजिज्ञासुरपिस्यात्तर्हियोःविरताभ्यासयुक्तोभवतिसप्रकृतिमुल्लंघ्यवर्ततइतिकिमुवक्तव्यंतादृशस्येतिमर्माभिप्रायः ४४ ॥

मधुसूदनीटी·

ननुयोगभ्रष्टस्यविरोधाद्याश्रयाणांसर्वप्रमादकारणशून्येसमुत्पन्नः तस्यमध्येविषयभोगव्यवधानाभावादव्यवहितप्राग्भवीयसंस्कारोद्बोधात्पुनरपिसर्वकर्मसंन्यासपूर्वकंज्ञानसाधनलाभोभवतुनामयस्तुश्रीमतांमहाराजचक्रवर्तिनांकुलेबहुविषयभोगव्यवधानेनोत्पन्नः तस्यविषयभोगवासना

अतिचिरव्यवहितजन्मोपचितेनापि तेनैव पूर्वाभ्यासेन प्रागर्जितज्ञा
नसंस्कारेणावशोऽपि मोक्षसाधनायाप्रयतमानोऽपि ह्रियते स्ववशी
क्रियते अकस्मादेव भोगवासनाभ्यो व्युत्थाप्य मोक्षसाधनोन्मुखः
क्रियते ज्ञानवासनाया एवासकालाभ्यस्ताया अपि वस्तुविषयत्वेना
वस्तुविषयाभ्यो भोगवासनाभ्यः प्राबल्यमशक्यप्रत्याख्यानमेव शुद्धेश हतो
ज्ञानायाप्रयतमानोऽपि पूर्वसंस्कारप्राबल्यादकस्मादेव रागभोगेभ्यो ज्ञानो
न्मुखो भवतीति अत एव प्राक् नेहाभिक्रमनाशोऽस्तीत्युक्तं अनेकजन्म
सहस्रव्यवहितोऽपि ज्ञानसंस्कारः स्वकार्यं करोत्येव सर्वविरोध्युपमर्दे
नेत्यभिप्रायः सर्वकर्मसंन्यासाभावेऽपि क्षत्रियस्य ज्ञानाधिकारः स्थि
त एव यथा पाटच्चरेणापहृतानां रत्नानां मध्ये विद्यमानमपि श्रेष्ठरत्नं
बलवत्तममनिकृष्टमपि तान्सर्वानभिभूय स्वसामर्थ्यविशेषादेवापह्रिय
ते यस्मात्तस्कराः परतन्त्रमिति विमर्शो भवति एवं बहूनां ज्ञानप्रतिब
न्धकानां मध्ये विद्यमानोऽपि योगभ्रष्टः स्वयमनिच्छन्नपि ज्ञानसंस्कारेण
बलवता स्वसामर्थ्यविशेषादेव सर्वान्प्रतिबन्धकानभिभूयावशो वशी
क्रियत इति दृष्टान्तः प्रयोगो नलविनं अत एव संस्कारप्राबल्यात् जिज्ञा
सुर्ज्ञातुमिच्छुरपि योगस्य मोक्षसाधनज्ञानस्य विषयं ब्रह्म प्रथमभू
मिकायां स्थितः संन्यासीति यावत् सोऽपि तस्यामेव भूमिकायां मृतो न
रलोके बहून्विषयान्भुक्त्वा महाराजचक्रवर्तिनां कुले समुत्पन्नोऽपि यो
४४ गभ्रष्टः प्रागुपचितज्ञानसंस्कारप्राबल्यात्तस्मिन्जन्मनि शब्दब्रह्म वेदक
र्मप्रतिपादकमतिवर्तते अतिक्रम्य तिष्ठति कर्माधिकारातिक्रमेण ज्ञा
नाधिकारी भवतीत्यर्थः एतेनापि ज्ञानकर्मसमुच्चयो निराकृत इति
द्रष्टव्यं समुच्चये हि ज्ञानिनोऽपि कर्माधिकारातिक्रमाभावात् [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible] ॥

सदानंदीटीका

पूर्वजन्मकृताभ्याससंस्कारेणावशोपिसन् मोक्षमार्गेप्रवृत्तोपिस्वा
वशीक्रियतेबलात् १ अकस्मादेवप्राप्यभोगवासनातोजनः ज्ञानसं
स्कारप्राबल्यात्क्रियतेसाधनोन्मुखः २ अल्पकालमपिज्ञानाभ्यासवा
सनयानया सम्यगभ्यस्तयानस्याबासनायाविशेषतः ३ महत्त्वविषय
त्वेनप्राबल्यादप्रगोचरात् पश्यामेवपुरेस्मिन्पूर्वाभ्यासवशेनच ४ ज्ञा
नाभ्यासोन्मुखोकस्मादेवाभूदितिवाशयः अतःसंस्कारप्राबल्याज्ज्ञानमि
क्षुरपीह्यः ५ मोक्षसाधनबोधस्यविषयेब्रह्मविदः भुक्ताभोगान्बहून्स्व नं४
र्गेजन्मप्राप्योत्तमेकुले ६ योगभ्रष्टोपिवेदोक्तकर्मानुष्ठानजंफलं अ
तीत्यवर्ततेनत्विंकिंवाच्यंब्रह्मवेदिनः ७४४ ॥

नीलकंठीटीका

कुतोयत्नतेशित्वतोपीत्यतआह पूर्वेति अवशोपिप्रमादादिवमित्रा
नो४ दिभिरन्यथानीयमानोपितेनैवपूर्वाभ्यासेनबलवताह्रियतेयोगमवा
णःक्रियते यतः योगस्यजिज्ञासुः ज्ञानमात्रमिच्छन्नपिभवतिसोपि
शब्दब्रह्मकर्मकांडंवेदमपिअतिक्रम्यवर्ततेकिंपुनःपित्रायाज्ञा ३
स्यपूर्वाभ्यासबलेयन्महोनमपिपित्रादिपरित्यक्तहयाकरोतीत्यर्थः ४४

आनन्दीटीका

अत्रहेतुमाह अवशःअप्राप्तसिद्धिःउद्याद्विवशोपिसन्तेनैवपूर्वा
भ्यासेनप्राग्जन्मसंचितसंस्कारेणाकृष्यतेपितातामृत्युभूमिकांप्रापय्यपर
ब्रह्मप्रतिनीयतेइत्यपिशब्दस्यार्थः तदेवंयोगसिद्धेःअहेतुपरमोपायइ
तिप्रसिद्धंस्तोति विवेकख्यात्यासंयमात्समृदितप्रज्ञालोकेशास्त्रज्ञा
नमपार्थकंसर्वदीपवदितियोगानुष्ठानरहितयोगस्यजिज्ञासुः अत्र
याज्ञातुमिच्छन्नपिअपिशब्दाद्योगमनुष्ठातुमनारब्धोपिशब्दब्रह्मशास्त्र
मतिक्रामते अत्रेदंतात्पर्यम् अहोपुंडेह्रियस्यचेतः नस्यक्षेत्रेननमन्
मध्यतीव्रसंस्कारापेक्षाकेमरणासंयमेनावरूपंब्रह्मप्राप्तिरितिनतः
पदंज्ञानवृत्त्याभावादृष्टब्रह्मत्वंरोक्षज्ञानसाधनमप्यनापेक्षेति ४४

रामकंठीटीका

यस्मात्तेनैव पूर्वजन्मसंबद्धेन मदेनाप्यभ्यासेन योगविषयेणासंस्का
रात्मनावस्थितेनावशोऽप्यनिच्छन्नपि ह्रियते आत्मसात्क्रियते कस्मा
त्तेनाभ्यासयोगेन क्रियतेऽत्याह यस्मात्कर्मसमाधिलक्षणस्य यो
गस्य जिज्ञासुरपि स्वरूपं ज्ञातुकामोऽपि शब्दब्रह्मशास्त्रात्मकं तम
तिवर्ततेऽतिक्रामति निश्चयाभावायोगविषयाप्रवृत्तिरेव न संभवति
संशयितस्य च शास्त्रमुपकारकमतो योगजिज्ञासुः शब्दब्रह्मातिव
र्ततेऽत्युक्तम् ४४ ॥

लासिकीलक्ष्मनीटीका

ज्ञातश्चिदंतरायादवशोऽपि अनिच्छन्नपि सन् तेनैव तादृशेनैव मन्नाग
प्यनुदितेन पूर्वाभ्यासेन संस्कारात्मनास्थितेन पूर्वदेहकृताभ्यासेना
त्रजन्मन्यभिव्यक्तेन स योगभ्रष्टो ह्रियते आत्मसात्क्रियते ननु कृतो
स्य योगाभ्यासस्य हृष्टं बलवत्त्वं यदंतरायसंभवेऽपि ह्रियतेऽत्यतोऽस्य
प्रभावमाह जिज्ञासुरिति योगस्य जिज्ञासुरपि योगस्वरूपं ज्ञातुकामो
ऽपि शब्दब्रह्म वेदं तस्मात्तत्रायभूतकर्मणो बलवत्त्वप्रतिपादकमतिव
र्ततेऽतिक्रामति योगांतरायभूतकर्मपरवशो न भवतीत्यर्थः किमुत
प्राप्तयोगः एवमल्पप्रयत्नोऽपि योगी विज्ञानवान् यथाभ्यासक्रमेण परां
गतिं प्राप्नोति ४४ ॥

पंचोलीटीका

कथं पूर्वदेहबुद्धिसंयोग इति तत्राह पूर्वाभ्यासेनेति हि यस्मात्स योग
भ्रष्टः तेनैव पूर्वाभ्यासेन पूर्वजन्मनि कृतोऽभ्यासः पूर्वाभ्यासस्तेनैव अ
वशः अस्वतंत्रः क्रियते पुनरपि योगाभ्यासे प्रवर्तते योगस्य जिज्ञासुर
पि योगस्वरूपं ज्ञातुमिच्छन्नपि योगभ्रष्टः शब्दब्रह्म वेदोक्तकर्मफलम
तिवर्तते उत्लंघ्य गच्छति ४४

रणावीरसमिद्धेयिनी ॥

पूर्वाभ्यासेनेति तेनैव पूर्वाभ्यासेन प्राग्भवीयेनैव संस्कारेण स
योगभ्रष्टो महाकुलोत्पन्नः अवशोऽपि सन् यतनं कर्तुमनिच्छन्न

विसन् ह्रियते प्रकृतिनिमित्तीभूतदुष्टसंकल्पेभ्यः पराव
र्त्यतेत्तोमुखः संपाद्यते योगस्य मोक्षलक्षणस्य कर्मयोगस्य
स्वरूपं ज्ञातुकामोपि शब्दब्रह्म शब्दस्वरूपं यत्तु वेदमिति यत्तु
वेदप्रतिपादितेषु शुद्धो वर्त्तते हतिं करोति शुद्धादिनिष्ठो भवति
प्रहुवत्वेन संस्कारस्य दुरुच्छेद्यत्वात् किं पुनर्यत्नं कुर्वन्नेवन
शुद्धादिकर्म पारयतीति कैमुतिकन्यायेन फलितं ४४॥

मधुभाष्य

४४॥

भाषा अनुवाद

वह पूर्व देह का बुद्धि संस्कार कैसा है और उस का कारण यह है कि सोइ पूर्व देह की अभ्यासे अवश अर्थात् जो कोई कारण या विघ्न वलते इच्छा न भी होय तो भी मोक्ष सिद्धि के अर्थ पूर्व संस्कार के जोर से अवश की नाईं यत्न करते हैं अर्थात् विषयों से विमुख हो ब्रह्म निरत होते हैं और इस तरह पूर्व अभ्यासके कारण से मुक्ति के अर्थ यत्नकारी मनुष्य जिस क्रम से मुक्त होते हैं सो कै मुक्तिक मायेस डेढ़ श्लोक के द्वारा कहते हैं कि जिज्ञासु कहे योग स्वरूप जानने की इच्छा करने वाला कुश केवल योग ही को नहीं प्राप्त होता किन्तु योगप्रविष्ट मनुष्य पापवशते योगभ्रष्ट होय भी शब्द ब्रह्म जो वेद तिस को अति वर्तन करता अर्थात् वेदोक्त फलकी अपेक्षा अधिक फल प्राप्त होय फेरि मुक्त होता है इतनाही नहीं इससे भी अधिक इस की कैसू तिकमाय कहते हैं ४४

दोहा

सो पूर्व अभ्यास सें करैं यत्न अवश सोय जान्यो चाहत योगकों
पाइ ब्रह्म स्थित होय ४४॥

203

प्रयत्नाद्यतमानस्तु योगी संसिद्धकिल्बिषः अ
नेकजन्मसंसिद्धस्ततो याति परां गतिं ४५ ॥

शांकरभाष्यं

कुतश्च योगित्वं श्रेय इति प्रयत्नादिति प्रयत्नात् यतमानादधिक
तरं यतमान इत्यर्थः तत्र योगी विद्वान् संशुद्धकिल्बिषो विशुद्धकिल्बि
षः संशुद्धपापोऽनेकेषु जन्मसु किंचित् किंचित् संस्कारजातमुपचित्य
तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धः ततो लब्ध
सम्यग्दर्शनः सन् याति परां प्रकृष्टां गतिं ४५ ॥

आनन्दगिरिकृतटीका

योगनिष्ठस्य श्रेष्ठत्वे हेत्वन्तरं वक्तुं उत्तरश्लोकमवतारयति कुतश्चेति ।
मन्दप्रयत्नोऽक्रमेण मोक्षते चेदधिकप्रयत्नस्य क्लेशहेतोरकिंचित्करत
मित्याशंक्य हेत्वन्तरमेव प्रकटयति प्रयत्नादिति तत्र योगविषये प्रय
त्नातिरेके सतीत्यर्थः ततः संचितसंस्कारसमुदायादिति यावत् सम्
यक्सम्यग्दर्शनवशात् प्रकृष्टा गतिः मुक्त्याख्या लभ्यते तेन शीघ्रं
मुक्तिमिच्छताधिकप्रयत्नो भवेदस्य प्रयत्नस्य विशेषेव मुक्तिभागीत्य
र्थः ४५ ॥

स्वामिकृतटीका

यदैवं मंदप्रयत्नोऽपि योगी परां गतिं याति तदा यस्तु योगी प्रयत्नादुत्तरो
त्तरमधिकं योगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूत
पापः सोऽनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्ज्ञानी भूत्वा ततः
श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः ४५ ॥

पिशाचभाष्यं

कुतश्च योगित्वं श्रेय इति प्रयत्नादधिकं प्रयतमान इत्यर्थः ततो योगी
विद्वान् संशुद्धकिल्बिषः संशुद्धपापः अनेकेषु जन्मसु किंचित्संशुद्धसंस्का
रजातमुपचित्य तेनोपचितेन संस्कारेणानेकजन्मकृतेन संसिद्धोऽने
कजन्मसंसिद्धस्ततो लब्धसम्यग्दर्शनः संन्यासी याति परां प्रकृष्टां गतिम् ४५

रामानुजभाष्यं

प्रयत्नादिति यत एवं योगमाहात्म्यं ततोऽनेकजन्मार्जितपुण्यसंचयैः

+ किं पुनः प्रयत्नादित्याह प्रयेति अथ प्रयत्नात् उत्तरोत्तरमधिकयोगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽप्यनेकेषु जन्मसु उपचितयोगेन संसिद्धः सम्यक् ज्ञानी भूत्वा श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः यस्मादेवं तस्मात्

गी॰ टी॰ स

शुद्धकिल्बिषः संसिद्धश्च संजातः प्रयत्नाद्यतमानस्तु योगी चलितो ऽपि पुनः परां गतिं याम्येव ४५॥

अभिनवगुप्तकृतटीका ४५ ततो जिह्वास्तान

परमार्थप्रपाटीका +

प्रयत्नोपयमानस्तु योगमाह जितात्मेति येन तत्त्वं जितात्मा योगी यो मनसो वशीकृत्य प्रतिष्ठितः यो ऽपि शक्त्यासक्तिवर्जितः शनैः शनैः क्रमशः प्रयत्नात् कर्मयोगी ज्ञानी योगी चलितो ऽपि तत्त्वं प्राप्य पुनः योगी परां गतिं याति ४५॥

वनमालीटीका

प्रयत्नात् पूर्वकृतादप्यधिकमधिकं प्रयत्नं कुर्वन् योगी सर्वोपचितसंस्कारवान् तेनैव योगप्रयत्नपुण्येन संशुद्धकिल्बिषः धौतज्ञानप्रतिब-
५ न्धकपापमलः अत एव संस्कारोपचयात् पुण्योपचयाच्चानेकैर्जन्मभिः संसिद्धः संस्कारातिरेकेण पुण्यातिरेकेण च प्राप्तचरमजन्मा ततः स पुण्यपरिपाकाद्याति परां श्रेष्ठां गतिं मुक्तिं ४५॥

कृष्णमैवेजयन्तीटीका

एवमैहिकीं सर्वसम्पत्तिं मुक्त्वा पारत्रिकीमाह प्रयत्नादिति तुशब्दः न त्वेवावकीर्णशब्दार्थः अथैहिकसर्वसाम्येनेन सम्प्रयत्नात् पूर्वजन्मकृतयत्नादपि विघ्नभयान्नावधानेन यद्यप्यधिकतरेण प्रयत्नादतिदृढाभ्यासे योगात् यतमानः विक्षेपभयाद्वारंवारं प्रयत्नेन कुर्वन् संशुद्धकिल्बिषः विषयवासनारूपपापेन सततं अनेकजन्मसंसिद्धः एवं निर्विघ्नेन प्रयत्नेन शमसकलसपरिकरसाधनैरनेकैरपरिमितैः कृतपुण्यपुञ्जैर्जन्मभिर्वियोगः मुक्तिसकलमस्तैः संसिद्धः सम्यक् परिपक्वयोगः सन् योगी आत्मदर्शी केवलविशिष्टेन प्रयत्नाच्चलितोऽपि ततः प्राप्तपरिपक्वयोगाद्धेतोः परां सर्वोत्कृष्टामात्मपरमात्मावलोकनरूपां गतिं मुक्तिं याति प्राप्नोति ४५

मधुसूदनीटीका

यदा चैवं प्रथमभूमिकायां मृतोऽपि अनेकभोगवासनाव्यवहितमपि विविधकारणमपि महाराजकुलेऽपि जन्म लब्ध्वापि योगभ्रष्टः पूर्वोपचितज्ञानसंस्कारप्राबल्येन कर्माधिकारमतिक्रम्य ज्ञानाधिकारी भवति तदा किमु वक्तव्यं द्वितीयायां तृतीयायां वा भूमिकायां मृतो विषयभोगान्ते लब्धमहाराजकुलजन्मा यदि वा भोगम

तत्रैव तत्त्वज्ञानविद्वत्कुले जन्मा योगभ्रष्टः कर्माधिकारातिक्रमेण ज्ञानाधिकारी भूत्वा तत्साध
नानि संपाद्य तत्फललाभेन संसारबंधनात् मुच्यत इति तदेतदाह ॥

+प्रयत्नात् पूर्वकृतादप्यधिकमधिकं यतमानः प्रयत्नातिरेकेण
तेन योगी पूर्वोपचितसंस्कारवान् तेनैव योगप्रयत्नपुण्येन संशुद्ध
किल्बिषः धौतज्ञानप्रतिबंधकपापमलः अत एव संस्कारोप
चयात् एवमेव अनेकजन्मभिः संसिद्धः संस्कारातिरेकेण
पुण्यातिरेकेण च प्राप्तचरमजन्मा ततः साधनपरिपाकात् याति
परां प्रकृष्टां गतिं मुक्तिं नास्त्यत्र कश्चित्संशय इत्यर्थः [illegible]
[illegible]]

सदानन्दी कृष्णमेवतत्त्वबोटी

योगभ्रष्टो वंजन्म लब्ध्वा ब्रह्मविदां कुले तत्त्वज्ञानेऽधिकारी सन् ज्ञा
नसाधनतत्परः १ ज्ञानलाभेन संसारबंधनान्मुच्यत इति यतमा
नोऽधिकं योगी प्रयत्नात् पूर्वकृतादपि २ योगप्रयत्नपुण्येन धौतपा
पमलोऽभितः संस्कारोपचयात् पुण्योपचयाद् बहुजन्मभिः संस्का
रातिशयात्सिद्धः पुण्यातिशययोगतः लब्धप्राप्तमजन्मा सोऽसा
धनातिशयात्ततः ४ सात्त्विकमपरं तत्त्वं मुक्तिं प्राप्नोति सद्गतिं ५ ४५

नीलकंठटीका

एवं योगभ्रष्टगतिमुक्त्वा योऽविषये क्रियमाणोऽपि प्रयत्नेन योगमे
वाभ्यसितं प्रवर्तते तस्य गतिमाह प्रयत्नादिति प्रयत्नात् हठात्
हठात् वायुनिरोधादिरूपात् ब्रह्मचर्यादिमुद्राविशेषाभ्यासाद्यतमानः।
मानः संशुद्धकिल्बिषो निष्पापो भवति यदाहमनुः प्राणायामैर्द
हेद्दोषानिति हठयोगानां सर्वेषां पापनिर्हरणयोगित्वेन तत्त्वसाक्षा
त्कारे साक्षात्साधनत्वमित्यर्थः अत एव सः अनेकैर्जन्मभिः संसिद्धः
प्राप्तयोगो भूत्वा ततः परां गतिं मोक्षं याति एतेन चतस्रैर्वा तरेऽयुवो
ऽतिरिति पवमानेयनह्यवितत्त्वव्याख्याते ४५॥

ज्ञानेश्वरटीका

एतदेव सिद्धान्तयति तद्वन्तेव हि संयोगं लभते पूर्वदैहिकमित्युक्तप्र
२त कारप्रयत्नादेकस्मिन्जन्मनि परमपि जितेऽन्त्रबाबाह्यप्रयत्नाद्योगाद्य
तमानो योगमनुतिष्ठन् अत एव संशुद्धकिल्बिषः प्रापणापरभूमिज
यात प्रसक्तालितांतःकरणमलः अनेकैर्जन्मभिः संसिद्धः योगसिद्धिं
मारूढः ततः परां गतिं याति परब्रह्माधिगच्छति ४५ [illegible]

गी॰
टी॰ ४॰

[illegible]

[illegible] ४५॥

रामकंठीटीका

प्रयत्नाद्योगी यतमानो योगमनुतिष्ठंस्तदनुष्ठानसंस्कारवशाच्च संशुद्धकिल्बिषः प्रक्षालिताज्ञानमयकलंको बहुभिर्जन्मभिः परां काष्ठामपि रूढेनादृशेन ज्ञानेन ततोनन्तरं संसिद्धः सम्यक्प्राप्तप्राणीयः परां गतिं परमार्थसमापत्तिलक्षणां प्रकृष्टां भूमिं प्राप्नोति यतः परस्मान्नान्तरं न विद्यते [illegible] ४५

लासिकी टीका

तद्दृढीकरोति यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं यतमानः परमात्मसमाधानमावर्तमानः अत एव संशुद्धकिल्बिषो विगतकर्मबंधनो नेकजन्मसंसिद्धो नेकेषु जन्मसु पौर्वतनयोगेन संसिद्धः सम्यग्दृढतलक्षणज्ञानोत्कर्षप्राप्तः सन् ततः संसिद्ध्यनन्तरमेव परां गतिं मोक्षाख्यां प्राप्नोति न पुनरभ्यासक्रममपेक्षत इत्यर्थः तदुक्तम् यथाग्निः पावकोज्ज्वलनो हुतसंभूतं प्रयायास्तनुके न मयः अज्ञानपंकेपि तथा निरस्तकालेन कैवल्यमुपैति देहीति [illegible] ४५

पंचोलीटीका

सात्वतानुयोगमाश्रितः फलविशेषमाह प्रयत्नादिति न पुनः योगी प्रयत्नादधिकं यतमानः संशुद्धकिल्बिषः निर्धूतपापः अनेकजन्मसंसिद्धः अनेकजन्माभ्याससंस्कारोपचयेन संसिद्धः सम्यग्दर्शनस्ततस्तदनंतरं परां मोक्षाख्यां गतिं याति गच्छति ४५॥

रणवीरसमिद्बोधिनी॥

अथैतस्य गतिं स्पष्टयति प्रयत्नादिति प्रकृष्टयत्नात्कायवाङ्मनोभिः समेत्योत्तरोत्तरमधिकं यतमानः स्वकर्मणि व्याप्रियमाणो योगी कर्मकौशललक्षणायोगाद्धेतोः संशुद्धकिल्बिषः अंतराय

भूतजन्मांतरार्जितपापकर्मभ्यः शुद्धः सन् यतोनेकजन्मसंसि
द्धः अनेकेषुजन्मसुसम्यक्सिद्धः इत्थंभूतयत्नविषयनिश्चय
त्वेन कर्मयोगेभ्युत्पन्नोयोगारूढ इति यावत् अनंतरं परांगति
मुत्तमामैहिकीमामुष्मिकींचसर्वप्रधानांगतिंप्राप्नोति ४५॥

मधुभाष्य

प्रयत्नादिति जितासक्तौ प्रयत्नंकरोति एकमनेकजन्म
भिः संसिद्धोपरोक्षज्ञानीभूत्वापरांगतिंयाति आदेव अतीव
प्रवृद्धयायुक्तोजितासुविस्मृतत्परः ज्ञात्वाध्यात्वातथादृष्टजन्म
भिर्बहुभिःधीमान् विशेषान्नारायणंदेवनान्यथातुकथंचनेति
नारदीये ज्ञानिभ्यः योगज्ञानिभ्यः तपस्विभ्यः कृच्छ्रादिचारि
भ्यः उक्तंच कृच्छ्रादेरपियज्ञादेर्ध्यानयोगोविशिष्यते तत्रापिवि
ष्णुश्रीब्रह्मशिवादिध्याननतोद्भवेः ध्यानंकोटिगुणंप्रोक्तमधिके
वामृतुल्यगामिति गारुडे अज्ञानावाध्यायिनोध्यानाज्ज्ञानमेव
विशिष्यते ज्ञात्वाध्यानंज्ञानमात्रान्ध्यानादपितद्दर्शनं दर्शना
द्वैवभक्तेस्यनाकिंचित्तायनाधिकमितिनारदीये ४५॥

भाषा अनुवाद

जिस हेत मन्द यत्नकारी योगी श्रेष्ठगति प्राप्त होते हैं तो उ
त्तरोत्तर योग से अधिक यत्न करने वे योग से निःपाप होय
अनेक जन्म संचित योगसे संसिद्ध अर्थात सम्यक ज्ञानी हो
य श्रेष्ठगति पावैंगे इस मे और कुछ कहना या सन्देह वा को
है सोई कहा कि अच्छी तरहसे यत्न करता योगी सो संशुद्ध ।
किल्विष निःपाप अनेक जन्मसे सम्यक सिद्ध होय फेरि परम
गति को पाता है ४५ ॥

दोहा

यत्न करतसो यत्नसें योगी शुद्ध विनपाप जन्म अनेक संसि
द्धिसें परमगतिलहैं आप ४५ ॥

207

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६

शाङ्करभाष्य

तस्मादेवं तस्मात् तपस्विभ्य इति तपस्विभ्योऽधिको योगी ज्ञानिभ्यो
ऽपि ज्ञानमत्र शास्त्रार्थपाण्डित्यं तद्वद्भ्योऽपि मतो ज्ञातोऽधिकः श्रेष्ठः
इति कर्मिभ्योऽग्निहोत्रादि कर्म तद्वद्भ्योऽधिको योगी विशिष्टः त
स्माद्योगी भवार्जुन ४६ ॥

आनन्दगिरिकृतटीका

सम्यग्ज्ञानद्वारा मोक्षहेतुत्वे योगस्योक्तमनूद्य योगिनः सर्वाधिकत्व
माह यस्मादिति योगस्य सर्वस्मादुत्कर्षादवश्यकर्तव्यत्वाय योगिनः
^भ्यः सर्वाधिकत्वं साधयति तपस्वि इति योगिनो ज्ञानित्वस्य पर्यायत्वात् क
थं तस्य ज्ञानिभ्योऽधिकत्वमित्याशङ्क्याह ज्ञानमिति योगिनः सर्वाधि
कत्वे फलितमाह तस्मादिति ४६ ॥

स्वामिकृतटीका

यस्मादेवं तस्मात्तपस्विभ्य इति कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यः ज्ञा
निभ्यः शास्त्रज्ञानवद्भ्योऽपि कर्मिभ्य इष्टापूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभि ^दिकर्म
मतः तस्मात्त्वं योगी भवात्मविद्भव ४६ ॥

पैशाचभाष्य

[illegible] तस्मादेवं तस्मात् तपस्विभ्योऽधिको योगी ज्ञानेभ्योऽत्र [illegible] शास्त्रार्थ
पाण्डित्यं तद्वद्भ्योऽपि मतः ज्ञातः [illegible] अधिक इति कर्मिभ्योऽग्निहो
त्रादिकर्मिभ्यस्तद्वद्भ्योऽधिको योगी तस्माद्योगी भवार्जुन ४६ ॥

रामानुजभाष्य

अतिशयितपुरुषार्थनिष्ठतया योगिनः सर्वस्मादाधिक्यमाह तप
स्विभ्य इति केवलतपोभिर्यः साध्यते आत्मज्ञानव्यतिरिक्तज्ञानैश्च यः
कश्च न केवलैरश्वमेधादिभिस्तेभ्यः सर्वेभ्योऽधिकपुरुषार्थसाधनत्वा
त् योगस्य तपस्विभ्यः ज्ञानिभ्यः कर्मभ्यश्चाधिको योगी तस्माद्योगी भ
वार्जुन ४६ ॥

अभिनवगुप्तकृतटीका

योगस्य प्राधान्यमाह तपस्विभ्य इति तपस्विभ्योऽधिकत्वे सर्वमेवमति

गी॰
टी॰
व॰

ज्ञानिभ्योऽधिकत्वं ज्ञानस्य योगफलत्वात् कर्मिभ्य उत्कर्षः स्पष्ट एव कर्माणि
कर्तव्येति तदतिरिक्तं कष्टयोगमार्गे सिद्धिरिति व्याख्याने ४६ ॥

परमार्थप्रपाटीका

किंच यस्मादेवमाह तपस्वीति अयमपरमात्मनो नाधिको योगी
तस्मात् सर्वथा योगो वैराग्यपूर्वकाभ्यासलभ्य इति सोऽयं
एवं योगेन परमात्मनि स्थितिः ... अभ्यासेनैव
सिद्धिरित्यभिप्रायः यस्मादेवं तस्मात् तपस्विभ्य इति तपस्विभ्यः
कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यः ज्ञानिभ्यः शास्त्रविद्भ्यः कर्मिभ्य इष्टा
पूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभिमतः तस्मात्त्वं योगी भव ४६ ॥

वनमालीटीका

योगिनस्तौति तपस्वीति तपस्विभ्यः कृच्छ्रादिनिष्ठेभ्यः अधिक उत्
कृष्टो योगी तत्त्वज्ञानेन संनिरोधेन मनोनाशवासनाक्षयकारी योगी
मतः ज्ञानिभ्योऽपि श्रेष्ठः कर्मिभ्योऽपि ज्योतिष्टोमाद्यनुष्ठातृभ्यश्चा
धिको योगी कर्मितपस्विभ्यो ज्ञानित्वे तमोज्ञानत्वात् ज्ञानिभ्यः परो
क्षज्ञानवद्भ्योऽप्यपरोक्षज्ञानवानधिको मतः मम संमतः यस्मादेवं त
स्मात् स्वपिकाधिकमयत्नवलात् योगभ्रष्टः इदानीं तत्त्वज्ञानमनोनाशवा
सनाक्षयैर्युगपत् संपन्नैः योगी जीवन्मुक्तोऽयं स योगी परमो मत इ
तिभावः सततं ज्ञानी भव साधनपरिपाकात् ४६

कुसुमांजलीटीका

आत्मतत्त्वविषये ज्ञानयोगात् कर्मादिसाधनेभ्यः फलानुसंधानरहि
तस्य तात्पर्यं योगयोगिरूपकर्मयोगस्याधिक्यमाह त
पस्विभ्य इति हे अर्जुन यस्मात् तपस्विभ्यः आत्मविषयव्यतिरिक्तेभ्यः
कृच्छ्रचान्द्रायणादितपःकर्तृभ्यः ज्ञानिभ्यः आत्मविषयेतरेभ्यः केव
लार्थशास्त्रज्ञेभ्यश्च कर्मिभ्यो भगवदाराधनव्यतिरिक्तकेवलाश्वमेधा
दिकर्मकर्तृभ्यश्चापि योगी उक्तलक्षणयोगनिष्ठोऽधिकः श्रेष्ठ इति मतो
मम सम्मतो भवति तस्मात्कारणात्त्वमपि योगी योगानुष्ठाननिष्ठो भव ४६ म॰

मधुसूदनीटीका

इदानीं योगी स्तूयते अर्जुनं प्रति श्रद्धातिशयोत्पादनपूर्वकं योगं विधातुम् ॥
तपस्विभ्यः कृच्छ्रचान्द्रायणादितपःपरायणेभ्योऽप्यधिक उत्कृष्टो यो

गीतत्त्वज्ञानेनामयत्नेनतरं मनोनाशवासनाक्षयकारीविषयानहारोहेति
पश्चकामाः पराग्नतः तत्तपद्तिनागोपिनुविहोसत्लपश्विनश्चतिस्म
तेः अतएवकर्मिभ्योपतिष्ठामहितज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्चा
धिकोयोगीकर्मिणोतपस्विनोवास्तमेतमोत्तानेहत्तान् ज्ञानिभ्योपि
व परोक्षज्ञानवड्योप्यपरोक्षज्ञानवानधिकोमनोयोगीएवमपरोक्षज्ञान
वड्योपिमनोनाशवासनाक्षयाभावाद्जीवन्मुक्तेभ्योमनोनाशवा
सनाक्षयवत्वेनजीवन्मुक्तोयोग्यधिकोमतः ममसंमतोयस्माद्वेतस्मा
स्मादधिकप्रयत्नवलात्वंयोगभ्रष्टस्तानीतत्त्वज्ञानमनोनाशवास
नाक्षयेष्वगयत्नसंपादितेयोगीजीवन्मुक्तोयः सयोगीपरमोमत
इतिभावः तस्मात्हृष्णोभवसाधनपरिपाकात् हेअर्जुनेतिशुद्धइति
संबोधनार्थः ४६ [illegible]

सदानंदीटीका

श्रेष्ठाधिकोद्यायाम्ययोगीसंस्तूयतेपुना तपःकृच्छ्रोपवासादितप
रेभ्योपियोगयुक्तो १ अकृष्णब्रह्मवित्तातानीतिहनिकतायतः ज्योतिष्टोमा
दिकर्मानुष्ठायिभ्यश्चाधिकोमतः २ मोक्षानईनयासत्वात्कर्मिणाव
तपस्विनां परोक्षज्ञानवड्योप्यपरोक्षज्ञानिनोवराः ३ तेभ्योप्येवमनो
या नाशसनाक्षयसंयुतः जीवन्मुक्तोमुनियोगीश्रेष्ठःसर्वोत्तमोमतः ४ ४६

नीलकंठीटीका

एवंयोगिनंस्तौति तपस्विभ्यइति तपस्विनःकृच्छ्रचान्द्रायणमासो
पवासादिकर्तारः ज्ञानिनःशास्त्रीयपाण्डित्यवंतः कर्मिणोग्निहोत्रा
द्यनुष्ठातारः तेभ्यःसर्वेभ्योयोगीयतोधिकोमतस्तस्माद्योगीभवा
र्जुन ४६ ॥

योगः फलस्पृहांविनाकर्मकरणम् आनंदीटीका किः योगमश्चित्तवृत्तिनिरोधश्च तदुभयार्थंयोगिनंसर्वोत्कर्षे
णस्तौति - तपस्विभ्योपिकेवलस्यतपसोमुनीनांकोधादिनाक्षयश्रवणाद्योगी
ज्ञानकर्मसमुच्चयानुष्ठातासंयमीतपस्विभ्योप्यधिकः अष्टः ज्ञानिभ्यः
विदितंकर्मसंयमंचत्यक्त्वाकेवलज्ञानपरेभ्योप्यधिकोयोगीकर्मिभ्यः ज्ञा
नंसंयमंचविनाकेवलंयज्ञादिकंकर्मस्वर्गादिकामनयाकुर्वद्भ्योप्यधिको
योगीतस्माद्योगीभवार्जुन सर्वेषामेषांफलस्यसमानत्वायत्नमनन्तवत्त्वं

गी॰ वयोगिनस्तु निर्विघ्नमक्षयं फलमित्युक्तं सर्वैः योगी भवेति वद्भगवा
टी॰ष त्कस्य वक्ष्यमाणस्य ज्ञानकर्मणोस्समन्वयस्यानुष्ठानपरो भव एतद
नुष्ठानसिद्ध्यर्थमष्टांगयोगाभ्यासी भवेति ज्ञानकर्मसमन्वयानुष्ठा
नोपदेशाद्युद्धोन्मुखो भवेत्यर्जुनं प्रति भगवन्नियोगः ४६ [illegible]
[illegible]
[illegible] ४६ ॥

एवंविधस्य कर्मयोगिनः प्रशंसार्थमाह ॥ रामकंठीटीका

स्वतीव्रस्यापि तपोमात्रस्यानवत्फलत्वात्तपस्विभ्यो योगी नित्यनिर
तरानंदमयसमाधिमानधिकः प्रकृष्टः ज्ञानिभ्योपि केवलज्ञानमात्र
परायणेभ्यः तथा कर्मिभ्यो यज्ञादिकेवलकर्मवद्भ्योधिकः तस्मा
त्वं यथोपदिष्टयोगस्वीकारपूर्वकं सर्वोत्कृष्टो योगी भव [illegible]
[illegible]
[illegible] ४६ ॥

लासिकी [illegible]टीका

अथ योगिनं प्रशंसति ॥

तपस्विभ्यः कृच्छ्रचांद्रायणादितपोनिष्ठेभ्यो ज्ञानिभ्यः परोक्षज्ञानस
हितेभ्यः शास्त्रज्ञानवद्भ्योपि कर्मिभ्य इष्टापूर्तादिकारिभ्योपि परमात
मना जीवात्मनः योजनं योगः इति योगशब्दस्य मुख्यो व्यापारः तदुक्तं कु
लार्णवे ऐक्यं जीवात्मनोराहुर्योगं योगविशारदा इति अन्यत्र च हियो
गादौ गौणप्रायोऽस्य प्रयोगः स विद्यते यस्येति योगी अनंतफलत्वादप
रोक्षज्ञानवत्त्वान्मोक्षहेतुत्वाच्च श्रेष्ठो मतः तस्मात्त्वं योगी आत्मस्वप्रम
त्तो भवेत्यर्थः [illegible] ४६ ॥

पंचोलीटीका

यस्मादेवं तस्मात्तपस्विभ्य इति हे अर्जुन यस्मात्तपस्विभ्यस्तपः कृच्छ्र
चांद्रायणादि तदनुष्ठातृभ्यो योगी अधिकः ज्ञानिभ्योपि ज्ञानेन शास्त्र
ज्ञानेन तत्प्रवृत्तेभ्योप्यधिकः कर्मिभ्यः कर्म अग्निहोत्रादिकं तेन प्रवृत्ते
भ्योपि योगी आत्मवित् अधिकः तस्मात्कारणात् योगी भव ४६ ॥

भगवीरमसिद्धोधिनी ॥

अथैवमाहात्म्यापवर्णनेनार्जुनाय तत्रैव प्रवृत्तिं रोचयति त
पस्विभ्य इति कृच्छ्रचान्द्रायणादिकं तपः शास्त्रार्थवेदनं ज्ञानं
इष्टापूर्तरूपं कर्म तत्त्रितयविशिष्टेभ्योऽपि कर्मयोगी अधिकः
श्रेष्ठो मतः हे अर्जुन अवदातबुद्धे त्वं योगी कर्मनिष्ठो भव स्ववर्णा
श्रमोचितकर्मणि तत्परयपि ४८ ॥

मधुभाष्य

४८ ॥

210

भाषा अनुवाद

जिस कारण ऐसा है कि कृच्छ्चान्द्रायण आदि तपमे निरत औ शास्त्र से जो ज्ञानी ईनसे भी योगी अधिक है तथा यज्ञ कूंवा ताल बाग दान कर्म्मकारी जो कर्मी तिससेभी अधिक है हमारे मतमे योगी इससे हे अर्जुन योगी होउ ४९ ॥

दोहा

अधिक तपस्विसें योगीहै अधिक ज्ञानीसें मान अधिककर्मिसें योगीजो तोहो पार्थ योगी प्रमान ४९॥

योगिनामपिसर्वेषांमद्गतेनान्तरात्मना श्रद्धावा
न्भजतेयोमांसमेयुक्ततमोमतः ४७ ॥
इतिश्रीभगवद्गीतायोगशास्त्रेश्रीकृष्णार्जुनसंवादे
ध्यानयोगोनामषष्ठोध्यायः ६ ॥

शांकरभाष्ये

योगिनामिति योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये
मद्गतेन मयिवासुदेवे समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावान्स श्रद्धावान्:
न्भजते सेवते योमांसमेमम युक्ततमोऽतिशयेन युक्तोमतोऽभि
प्रेतइति ४७॥ इतिश्रीमद्भगवद्गीताभाष्येषष्ठोध्यायः ६॥

आनन्दगिरिकृतटीका

तत्वादिभ्योविशिष्टात्मा स्वे कारणमत्रस्मिंस्तेषामुपासकानां भूयांसो
योगिनोगम्यन्ते तेषां कतमः श्रेयानिष्यते तत्राह योगिनामिति योभ
गवन्तं सगुणं निर्गुणम्वायथोक्तेन चेतसा श्रद्दधानः सन्ननवरतमनुस
न्धत्ते सयुक्तानामप्यतिशयेन युक्तः श्रेयानीश्वरस्याभिप्रेतः तदित
रीयोभिप्रायोमया भवितव्यमितीत्यर्थः तदनेनाध्यायेन कर्मयोग
स्यसंन्यासहेतोर्मर्यादां दर्शयता सांख्ययोगं विवृण्वता मनोनिग्र
होपायोपदेशेन योगभ्रष्टस्यामुत्रिकनाशशंकांच शिथिलयता
तेषामपिमितस्य ज्ञानानिष्ठतोमया वाक्यार्थज्ञानान्मुक्तिरितिसाधितं ४७
इतिश्री आनन्दगिरिकृतटीकायां षष्ठोध्यायः ६ ॥

स्वामिकृतटीका

योगिनामपियमनियमादिपराणांमध्येमद्भक्तःश्रेष्ठइत्याह योगिना
मिति मद्गतेनमय्यासक्तेनअंतरात्मनामनसायोमांवासुदेवंपरमेश्वरं
श्रद्धायुक्तःसन् भजतेसयोगयुक्तेषुश्रेष्ठोममसंमतः अतोमद्भक्तो
भवेतिभावः ४७ आत्मयोगमवोचद्योभक्तियोगशिरोमणिं तं
वंदेपरमानंदंमाधवंभक्तसेवधिं ॥ इतिश्रीभगवद्गीतायांसुबो
धिन्यांटीकायांआत्मसंयमयोगोनामषष्ठोध्यायः ६ ॥

पिशाचभाष्ये

गी० योगिनामपि सर्वेषां रुद्रादित्यादिपराणां मद्गतेन वासुदेवे मय्यासमाग
टी० तेनान्तरात्मनान्तःकरणेन श्रद्धावान् भजते मां स मे युक्ततमः अति
षी० शयेन युक्तो मतोऽभिप्रेत इति ४७ ॥ इति पैशाचभाष्ये षष्ठोऽध्यायः ६

रामानुजभाष्यं

तदेवं परविद्यांगभूतं प्रजापतिवाक्योदितं प्रत्यगात्मदर्शनमुक्त्वा प्रा
प्यपरविद्यां प्रस्तौति योगिनामिति पंचम्यर्थे षष्ठी सर्वभूतस्थमित्या
दिना वक्तुं विधायोगिनः प्रतिपादिताः तेष्वनेन मतत्वाद्वक्ष्यमाणस्य यो
गिनो न निर्धारणे षष्ठी भवति अपि सर्वेषामिति सर्वशब्दनिर्दिष्टाः तपस्वि
प्रभृतयः तथा युक्ततमाः येन पंचम्यर्थो गृहीतव्यः योगिभ्योपि सर्वेभ्यो वक्ष्य
माणो योगी युक्ततमस्तद्रूपतया वरत्वेन परिप्रश्नी नो योगिनां चन कि
वत् विशेषरसत्यः मातव्ये तत्याविषयाणामिवयत्तविषयेषु मोमस्तु
नाधिकभावो विद्यते तथा मेलापेतयावरत्वेन सर्वेषामपि विद्ययापि
न्य सर्वेभ्यो मोऽस्तु नाधिकभावो विद्यते तथापि मेलापेत यावरत्वतिरेशः
समानः मत्प्रियत्वातिरेकेण अनन्यसाधारणस्वभावतया महते नात
शत्वनामनसाभावसाम्येनरसकलहालिविशेषाश्रयभूतेमनोऽश्नता
त्यात्यर्थमत्प्रियत्वेन मयाविना स्वधारणालाभात् मद्गतेन मनसा प्र
कर्षानन्यप्रियत्वेन तत्रैव वियोगासहनतयानन्याभिप्रवृत्तो
न्तरात्मा यो मां भजते मां भजते सोऽविच्छिन्नेन भोगरूपमेरु व र्गभोगपक
रणभोगस्थानपरिपूर्णं निखिलजगदुदयविभवलयलीलम् स्पृष्टाशे
वी षदोषमनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः प्र
भृत्यसंख्येयकल्याणगुणगणनिधिं स्वाभिमतानुरूपैकरूपाचिन्त्य
नित्याद्भुतनिरवद्यनिरतिशयौज्ज्वल्यसौगंध्यसौकुमार्यलावण्ययौवनाद्य
णा नेतगुणानिधिं दिव्यरूपवासप्रमाणपरिच्छेद्यस्वरूपस्वभावमपारकारुण्य
सौशील्यवात्सल्यौदार्यैश्वर्यमहोदधिमनालोचितविशेषलोकशरण्य
प्रणतार्तिहरमाश्रितवात्सल्यजलधिमखिलजननयनविषयतां गतम
जहत्स्वभावं वसुदेवगृहे अवतीर्णमनवधिकातिशयतेजसा निखिलम
गदापूरयंतमात्मकांत्याविश्वमाप्यायंतं भजते सेवते उपास्ते स मे युक्तः।
स मे युक्ततमो मामतः सर्वेभ्यः श्रेष्ठतम इति सर्वं सर्वदा यथावस्थितम
तया वसातात्वं वेदमहमस्मि ४७ ॥ इति श्रीमद्रामानुजाचार्यवि

इति गीताभाष्ये षष्ठोऽध्यायः ६ ॥

नचनिरीश्वरं कष्टयोगमात्रं संसि **अभिनवगुप्तकृतटीका** द्धिदमित्युच्यते

योगिनामपीति सर्वयोगिमध्येऽप्ययमेव मन्तःकरणोन्निवेशपूर्वभक्ति
श्रद्धानमदीयगुरुचरणसेवालब्धसंप्रदायक्रमेण मामेव नान्यद्भजते
विमृशति स युक्ततम इति सेश्वरस्य सांख्यस्य सर्वप्राधान्ययुक्तमिति
शिवम् ४७ संग्रहोऽत्र भगवन्नामसंस्पर्शात्तिमाज्ञान्तर्वमसवायाते फ
लिनाः शालयः सम्यग्दृष्टिमात्रेवलोकिते इति श्रीमद्राजानकाभि
नवगुप्तविरचिते षष्ठोऽध्यायः ६ ॥

परमार्थप्रपाटीका

यमनियमपरायणानां योगिनामपि मद्भक्तः श्रेष्ठ इत्याह योगि
नामिति मद्गतेन मय्यासक्तेनान्तरात्मना मनसा यो मां परमेश्वरं श्रद्
धायुक्तः सन् भजते स योगयुक्तेषु श्रेष्ठो मम मतः अतो मद्भक्तो भवेति
भावः यतो मद्भक्तो मत्प्रसादेन सकलसाधनयोगपथवान् स्वत एव
भवतीत्यर्थः श्रुतिरपि योगे योगे तवस्तरं वाजे वाजे हवामहे सखा
य इन्द्रमूतय इति भाष्यं शुनःशेपः प्राणापानयोर्योगे मनः पवन
योर्वा योगे वा साध्ये सति यत्न स्तवविघ्नकर्तृभिः कामक्रोधादिभिः
सह युद्धे वाजे वाजे संग्रामे सत्युपस्थिते सति वयं त्वामिन्द्रं परमात्मानं
हवामहे आह्वयामः किमर्थं ऊतये रक्षणार्थं निर्विघ्नार्थमित्य
र्थः किंभूतं त्वां तवस्तरं अतिशयेन बलिनं किंभूता वयं सखायः पर
मप्रेमास्पदत्वेन यथा सखाः तदुक्तं यत्रेहित्वद्भवभीतिशान्त्यै गकास्तुगो
विंदपदारविंदं ययं नरा नाविषयानिहत्य ज्ञोशानमेभारुहलोचने
ति ४७ इति परमार्थप्रपाटीकायां षष्ठोऽध्यायः ६ ॥

वनमालीटीका

इदानीमुक्तसर्वयोगिभ्यः श्रेष्ठमसंप्रज्ञातसमाधिशालिनमाविर्भूत
स्वरूपतानन्तश्रीहरिमद्भक्तं तेलधारावदविच्छिन्नस्नेहसंततिचि
त्तवृत्तिं नियोगिनं सर्वोत्तमत्वेन वर्णयन्नुपसंहरति योगिनामिति पंच
मषष्ठी प्रागुक्तेभ्यः सर्वेभ्यो योगिभ्योऽपि भगवति मद्गतेन गुण
लयमुख्याने तैलधारावदविच्छिन्नवृत्तिप्रवाहेनान्तरात्मना मनोयस्मात्

गी॰
टी॰
७

113

ण: सन् मां भजते स एवैतेन तपाराव दविक्लिन्नत्वेदसंततिं कुर्वते स मे युक्तत
मो मतोतिशयेन युक्तो मम संमत: श्रद्धावान् गुरुवेदान्तवाक्ये विश्वास।
युक्त: भगवान्नारायण: सर्वान्तर्यामी परमानन्दमूर्ति मम स्वामी प्राणा।
दिभ्य स्नेहस्पदोपीष्टतम इति धी रागिणा विषयेष्विव स्वाभाविकानवाधि
नीय स्वयुध्या तत्कालेस्य संप्रत्यान स्वमायोस्वरूपतानेनैव मामन्त्र भवति
समाहितचित्तैमन्त्रतं चिंतयन् भक्तिस्नेहेभ्य: श्रेष्ठो मे मम सर्वत्र स्वम
तो निश्चलो तो मद्भक्त एव सर्वोपि तपोश्रेष्ठत्वा त्वमपि मद्भक्तो भवेति भा।
व: कर्माधिकारमर्यादासांगोयोगाधिपयं त्वत: स्वभक्तं योगिषु श्रेष्ठं ख
ष्ठेवदस्मापति: ४७ ॥ इतिवनमालीटीकायां षष्ठोध्याय: ६ ॥

ॐ स्मवै जयन्तीटीका

मदिष्ये परापरस्वरूपयो: प्रजापतिवाक्योदितयोर्विद्ययोर्मध्ये: परविद्यायां
परविद्योपायभूते जीवात्मस्वरूपदर्शनमभिधायेदानीं परविद्यां तत्र
पार्थसारथिर्भगवानाह योगिनामपीति योगिनामित्तीयपञ्चम्यर्थेष
ष्ठी भवति न निर्धारणेयत स्सर्वभूतस्थमित्यादिषु च तुर्विषु योगिषु वक्ष्य
माणस्य योगिनोन्तर्गतत्वाभाव: तपस्विभ्य इति पूर्ववाक्ये पञ्चमस्तंथभे
गाच्च न तु यथा तपस्व्यादीनां परस्परं न्यूनाधिकभावोस्ति तथा वक्ष्यमा
णस्य योगिनोपि तद्विषयाणां मध्ये: यत्परतम इति वृत्ति विदधि कभावो
भवेदतो निर्धारणे एव षष्ठी न तु पञ्चम्यर्थे इति चेन्न निर्धारणाधिकाया।
षष्ठ्या असंभवात् तथाहि यथा स्वर्णगिरीन्द्रगिरीणामसौ सुखा
वयवत्वेपि सुमेरो: स्वकाशादवरत्नमेव तथात्र सर्वेषामिति सर्वशब्दनिर्दि
ष्टानां सर्वभूतस्थितमित्यादिनिर्धारितप्रस्तावयोगिनामस्ता योगिन:
स्वकाशादवरत्वमेवात: पञ्चम्यर्थिकैव षष्ठीसंभवति न तु निर्धारणा
र्थिके त्यर्थ: य: सर्वेषां सर्वेभ्यस्तपस्विप्रभृतिभ्यो योगिनो योगिभ्यो
मद्भक्तो वक्ष्यमाणो योगी श्रद्धावान् सन् मद्भक्तिप्रतिपादके श्रुतिस्मृ
त्याचार्यादिवाक्येषु विश्वासपूर्वकं श्रद्धावान् सन्नु मन्मामावतिशय।
त्वरावान् मद्गतेन मयि गत: प्राप्तो मद्गतस्तेन तथा निरतिशयमस्थिय
त्वेनान्यर्थानुभवत्वभाववत्तेन अन्तरात्मना निखिलबाह्याभ्यन्तरवृत्ति
विशेषाश्रयभूतेन मनोन्तरात्मेत्युच्यते मस्त्रियवातिरेकेण मदृवि

नात्तगुणमात्रमपिस्वधारणासहमानेनमनसासमस्तकलवेतनात्म
कानंतकोटि ब्रह्मांडेष्वावनलयलीलेशात्स्ययोनिमविस्तानन्त
प्राकृतस्वाभाविककारुण्यवात्सल्यसौशील्यार्जवमाधुर्यसौंदर्यला
वण्यतेजोबलशांतिकामादिमंगलगुणमहोदधिमनंतानिर्विमर्श।
किंचसकलक्लेशशेषसहरेशनरेशादिजीवनिकरमयामयमदेविवि
धाध्यात्मादिसंसारतापतप्तनतापितस्वजनकेरवपोषणपूर्णकला
सारदशीतलकरंसजलजलदश्याममलातिसुभगसुंदरनाभीरदारा
दरणीयदिविजमनुजमनोनयनानंदकराननकं दर्पस्तुतिधरम
केयकोपालदेहंदामिनीद्युतिपरवरपीताम्बरधरंनूपुरकटिसूत्रहारके
यूरकटकांगुलीयककुण्डलकिरीटमुकुटाद्यलंकारालंकृतंनगोपा
गनापांगपंकेरुहपूजितंनंदनंदनंतमपमेपालनायाथमेविनाशाय
चप्रतियुगंनरहरिदाशरथ्यायनेकांतिकमनीयशौर्यवीर्यकारु।
ण्याद्यनेनात्मगुणशक्तिविशिष्टाकृतिकृतेयदुवंशेष्ववसुदेवसु
तेभजतेसर्वसमर्थावक्तितेनश्रवणकीर्तनादिलक्षणाभिर्भक्तिभि
स्सवनेसमदेकशरणमदर्पणसत्कुलवाव्यवेमदनस्यभक्तोऽपिकृ
तमस्तपक्लिशम्भतयोगज्ञानिकामसकर्मिणाश्रुकतराःमदेकभक्त
मस्तेभ्यःसर्वेभ्योनिरतिशयश्रेष्ठतमस्सम्यथैःमेसकललोकहि
तावतारस्यसर्वेश्वरस्यसर्वनियन्तुःसर्वात्मनःपुरुषोत्तमस्यममसमतः
अभिमतः सर्वेभ्यस्तपोयोगकर्मज्ञानादिसाधनवद्भ्योमद्भक्तिमत्तेश्व
ष्टतमस्सदेयमेनाभ्यभिप्रायः मत्कैश्रेष्ठतमास्मन्येयाभ्यामुः भक्तिरस्यभज
नेतदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनः कल्पनमेतदेवनैष्कर्म्यम् सा
ह्यानेमवलोकस्तपासीतयात्मावाअरेदृष्टव्यः श्रोतव्योमन्तव्योनिदि
ध्यासितव्यः यस्यदेवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताह्य
र्थाः प्रकाशन्तेमहात्मनः इत्याद्याः ४७ कर्मयोगंकाममथ्यसंसान
गर्भसुविस्तरम् प्राबोधयोजगद्योनिंस्तवतेपार्थसारथिम् १॥
इतिश्रीकृष्णमवेजपत्नीगीताटीकाषष्ठोध्यायः ६ ॥
इदानींसर्वयोगिश्रेष्ठंयोगिनं मधुसूदनीटीका वदन्नध्यायमुपसंहरति॥
योगिनांवसुरुद्रादित्यादिक्षुद्रदेवताभक्तानामपिसर्वेषाममध्येम

गी॰
टी॰
ष॰

पि भगवति वासुदेवे पुण्यपरिपाकविशेषाज्जातेन प्रीतिवशान्निविष्टेन म
द्गतेनान्तरात्मनान्तःकरणेन प्राग्भवीयसंस्कारपाटवात्साधुसंगा
च्च मद्भजन एव श्रद्धावानतिशयेन श्रद्दधानः सन् भजते सेवते सततं चि
न्तयति यो मां नारायणमीश्वरेश्वरं सगुणं निर्गुणं वा मनुष्योयमीश्व
रत्वाधारणीयमित्यादिभ्रमं हित्वा स एवं मद्भक्तो योगी युक्ततमः स
र्वेभ्यः समाहितचित्तेभ्यो युक्तेभ्यः श्रेष्ठो मम परमेश्वरस्य सर्वज्ञस्य मतो
निश्चितः समानेपि योगाभ्यासक्लेशे समानेपि भजनायासे मद्भक्तिशू
न्येभ्यो मद्भक्तस्यैव श्रेष्ठत्वान्न मद्भक्तः परमो युक्ततमो नायमत्र भवि
शंकास्तीति भावः तदनेनाध्यायेन कर्मयोगस्य बुद्धिशुद्धिहेतोर्मर्या
दां दर्शयता तत्कृत्वा सर्वकर्मसंन्यासस्य सांगयोगविस्तरवर्णनात् मनो
निग्रहोपायं चाभ्यासवैराग्यपूर्वकमुपदिशता योगभ्रष्टस्य पुरुषार्थ
शून्यताशंकां च शिथिलयता कर्मकांडं त्वंपदार्थनिरूपणं च समा
पितं अतःपरं श्रद्धावान्भजते यो मां इति सूचितं भक्तियोगं भजनीयं
भगवन्तं वासुदेवं तत्पदार्थं निरूपयितुमग्रिममध्यायषट्कमारभ्य
त इति शिवं ४७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवि
श्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां
श्रीभगवद्गीतागूढार्थदीपिकायां त्वंपदार्थनिरूपणं नाम षष्ठोध्यायः ६

मराठी टीका

सर्वयोगिवरश्रीशम्भुश्रीगोविन्दहरिः उपसंहरतीदानीं मध्यायं यो
गनामकं १ योगिनां वसुरुद्रादिभक्तानां भेदवेदनया योगिनां वसुरुद्रा
दिभक्तानां भेदवेदनया सर्वेषामपि मध्ये यो वासुदेवमधीश्वरे २ पुण्य
पुंजोदयात्प्रेम्णा निविष्टेनान्तरात्मना प्राग्भवार्जितसंस्कारपाटवा
त्साधुसंगमात् ३ श्रद्दधानः सदा भक्त्या चिन्तयन्पादराजमां सगुणं नि
र्गुणं वापि नारायणमधीश्वरं ४ अनन्यभक्त्या परया स मद्भक्तो यतः सम
धीः सर्वेभ्यो युक्तचित्तेभ्यः श्रेष्ठो नित्यसमाहितः ५ सर्वज्ञस्य ममात्य
न्तनिश्चितो नात्र संशयः योगाभ्यासश्रमे तुल्ये समाने भजनश्रमे ६।
मद्भक्त्यैव मुख्यत्वं मन्यताममुख्ययोगिनः तेऽमद्भक्ततया नैव युक्ता भवि
तुमर्हन्ति ७ अनायासेन यो ज्ञेयः शल्यमीमांसयाहरेः ८ योगी योगव

त्वेनसेवतिमिमांसत्कात्मसोऽवेस्थितः कर्मीकर्मजलोकभोग
रसिकस्तस्मिन्नुपायेरतः अस्माकंतनवीनवारिदरुचिर्मेदस्मि
न्नेतावितेगोगोपीजनवल्लभः सुखनिधिः कृष्णः पारणोग
तिः १४७॥ इतिसदानंदटीकाषष्ठोऽध्यायः ६॥

नीलकंठीटीका

मः कर्मप्रधानत्वं पदार्थविवेकः अतःपरंपञ्चमनाध्या
येतत्पदार्थंनिरूपयितुकामस्तदुपासनोमहाफलत्वेनस्तौति
योगिनामिति एवमेवापरेयत्तमित्यादिनाचतुर्थाध्यायशेका
द्वादशयोगास्तद्वतांयोगिनांसर्वेषांमध्येयोमद्गतेनमय्येवास
देवसमर्पितेनअंतरात्मनाचित्तेनश्रद्धावान्सन्मांभजतेसमेम
मयुक्ततमोऽतिशयेनयुक्तःश्रेष्ठोमतोऽभिप्रेतः तस्मान्मद्भक्तो
भवेतिभावः ४७॥ इतिश्रीनीलकंठटीकासमाप्तः ॥

आनंदटीका

सर्वेभ्योऽपियोगिभ्यःपरमेश्वरैकप्रणिहितचित्तोयोगीप्रकृष्टतमइतिदर्शयन्नध्यायार्थमुपसंहरति॥
यःश्रद्धावानवश्यमीश्वरप्रणिधानेनपविताःयोगात्फलप्राप्तिस्या
दितिनिश्चयवान् मद्गतेनांतरात्मनाप्रतिपादितयुक्तासंयमात्
मेदकनिष्ठेनमनसामांभजतेससर्वेषामपियोगिनांसमातिशा
यितोयोगीमतः लक्षणीयायाश्रद्धायाउद्देशोऽयमितिसिद्धं।
यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयो
ष्टावगानियोगस्येतियमादिपंचकंबहिरंगं ध्यानादित्रयमंतरं
गम् तथाहियमनियमैर्मनसोवाह्यगतीर्निरुध्यआसनेनभौतिक
पिंडात्मनःसमरसत्वमभिसंपाद्यप्रत्याहारेणेंद्रियाणिवशीकृत्य
ध्यानेनबुद्धिधाम्निमनोनिवेश्यधारणयातत्रस्थिरीकृत्ययुक्तस्यम
नःसमाधिनाचपुरुषप्रकाशसामीप्योपलब्धिस्थानेकेवल्यप्राप्ति
हेतुः संप्रज्ञातयोगोपलब्धिरितियोगानुशासनवाक्यार्थसंग्रहः संग्र
हेमेतदुद्देशपर्वं ४७॥ इतिश्रीआनंदटीकाषष्ठोऽध्यायः ६ ॥

षष्ठोऽध्यायः

ये के च न योगिनो दर्शनभेदात्तेभ्य मत्तरनिष्ठ तिपा दय **रामकंठीटीका** वंति तेषामप्ययमेवं विधो योगी श्रेष्ठ इत्यध्यायमुपसंहरति ॥

समस्तयोगिनां मध्ये स योगी यत्कृतमोतिशयेन युक्तः समाहितो म
मम मतः कोसौ यः श्रद्धावान् सर्वसिद्धिहेतुभूतया श्रद्धया युक्तः म
द्गतेनान्तरात्मना यथा प्रतिपादितत्वान्नगत्या मां परमात्मानमी
श्वरमेकं तत्त्वं परमोपेयतया योगेन प्रपन्नेनान्तःकरणेन भजन्ते वा द्रुतः ते
के यद्वापापाणनात्मत्वरोन वर्जर्वेन्मद्भक्तो भवति यथोक्तज्ञानविधिना
यथोक्तमत्स्वरूपावगमपूर्वं मामेव यत उपास्ते स एव समाहितत
मः इत्याम् यातायस्माद्भूभावंदयति यदि परं योगतामन्ययोगास्ते
योगं ज्ञानकर्मव्यतिकरात्मकराभ्यासवैराग्यगम्यम् सम्यक्संप्रा
प्तकामैः परमगुरुरितिनिग्रहयापर्यपास्यः षष्ठोध्यायो यमार्थरव
हितमतिभिस्त्यक्तसर्वान्यकार्यैः ४७ ॥ इति श्रीरामकंठीटीकायां षष्ठोध्यायः ६ ॥

[illegible]टीका

योगिनामपि सर्वेषां विशेषोस्तीत्या
ह ॥ परमात्मनाक्षेत्रज्ञस्य योजनं योगः स च सप्तभूमिका
भेदेन षोढा तत्र प्रथमो बहिर्योगः कर्मस्वध्यात्मबोधे समाधानम्
द्वितीयः कर्मयोगस्त्वारुरुक्षुविषयः कर्मसु क्रियमाणेष्वध्यात्मनि
समाहितत्वम् तृतीयो ध्यानयोगः सर्वाश्रितहृत्तीर्निरुध्यात्मन्येवैक
तानता चतुर्थो मनाख्यो योगः आनन्दप्रादुर्भावपरः सर्वं परमात्मसमा
पत्तिः समाधिरूपः पंचमो ज्ञानयोगो यत्राहं तं प्रतिभासते स च द्वि
विधः अनेनवर्गव्यापृतत्वाच्चेतनाचेतनव्यापृतत्वाच्च षष्ठो भक्तियोग
ईश्वरं भक्त्याश्रित्य स्वात्मनि समाहितत्वं कर्मसंन्यासयोगस्य विक
ल्पेनाभावेन शबलनयारुपकल्पविषयस्य कर्मयोगेन भावः ।
संन्यासयोगस्य च विकल्पाभावेन ज्ञानयोगेन भावः एवं सर्वेषां यो
गिनां योगभूमिकानिष्ठानां मध्ये योगी श्रद्धावान् ईश्वरास्तित्वविश्व
स्तः सन् ततस्तादृशेश्वरमपलपन् पुरुषमात्रपर्यवसितः मयि

प्रत्यगात्मनिस्थितेनान्तरात्मनामनसामामीश्वरंभजते प्रेमातिशयादास्य
देकृतेन सयोगिषुमध्येपरमः श्रेष्ठोममसतोजीवन्मुक्तपदभाजनत्वात् तदु
क्तं समाधिसिद्धिरीश्वरप्रणिधानात् क्लेशकर्मविपाकाशयैरपरामृष्टः पुरु
षविशेषईश्वर इतिच तेषामस्यज्ञानस्यसर्वप्राधान्यमुक्तम् यतस्सर्वगुरुभिः
स्तैश्च भवद्भक्त्यमृतास्वादाद्धेयस्यस्यात् परापिया दशासामोपलिप्सा
मित्रासवस्यवशकृतेति एवमेतावतायस्येनैतत्फलितं सांख्येनविनाबु
द्धियोगोनसिद्ध्यति बुद्धियोगंविनाकर्मयोगोनसिद्ध्यति इत्येवंतेविना
ध्यानयोगस्तंविनाभ्यासयोगस्तंविनाज्ञानयोगः भक्तियोगस्तुसर्व
त्रकृतपद इति एवंस्यकारणात्वमज्ञानस्यवनांतरीयकत्वंदर्शयामिति अतएव
वयोगभूमिकाभेदेनशैवैः सप्तप्रमातारोव्यवस्थापिताः तदुक्तम् मन्त्र
मन्त्रेशमन्त्रेशमन्त्राश्चिवपुरोगमाः अकलौ सकलश्चेतिशिवस्यैताविभूतयः ४७
इतिश्री[लामिठी]…नीटीकायां षष्ठोध्यायः ६ ॥

पंचोलैटीका

उक्तमध्यायवीजंप्रतिपन्नयमनियमपराणांमध्येभगवद्भक्तस्यश्रैष्ठ्यमा
ह भगवान् योगिनामपीति यः मद्गतेनांतरात्मना मयिवासुदेवेसमा
हितेनमत्परेणांतःकरणेनश्रद्धावान्ः मांभजतेससर्वेषांरुद्रादित्यादि
पराणांयोगिनांमध्येममयुक्ततमः अतिशयेनयुक्तोयोगीज्ञानीमम
तः अभिप्रेतः ४७ इतिश्रीपंचोलेषष्ठोध्यायः ६

रसाचीरसमसिद्धोधिनी ॥

योगिनामपीति सर्वेषांयोगिनां कर्मयोगिनामपिमध्येयः द्वि
यवीरः मद्गतेन परमेश्वरेमापितमदवतारे स्वजात्युचितंकर्मानु
ष्ठितमिति स्ववर्णाश्रमोचितकर्माचरणे दृष्टांतीभूतंमांविषयी
कृतवतांतरात्मनांतः करणेनश्रद्धावान् शास्त्राचार्योपदेशोप
लावयंभावनिश्चययुक्तः सन् मांसर्वेश्वरंभजतेसिद्ध्यसिद्ध्ये

त्वां परित्यज्यमत्सवितोषणार्थं स्वधर्मो वर्णेन सेवते परमेश्वरो
मेनेन प्रीयतामिति संकल्प्य स्वकर्माण्यनुतिष्ठेदिति यावत् स उभमा
न् मे मम प्रयुक्ततमः प्रशस्तयोगारूढः सर्वश्रेष्ठाधीमो योग्यत
मो वा मत इति भद्रं ४७॥ इति श्रीवरणवीरसमिह्वोधिन्यां श्री
गीताव्याख्यायां षष्ठोध्यायः ६॥

मधुभाष्य

४७॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्री
मद्गीताभाष्ये षष्ठोध्यायः ६॥

भाषा अनुवाद

यामियों के मध्य अर्थात् यम नियम परायण लोगोंके बीच
मे मेराभक्त ही श्रेष्ठ है यह कहते हैं कि मै जो परमेश्वर सो म
झेन अर्थात् मेरे मे मन लगाय श्रद्धासे जो हम को भजै है मेरे म
त मे सोई श्रेष्ठ इस से अर्जुन तुम मेरे भक्त होउ श्रीधर स्वामी
प्रभु को प्रणाम करते हैं कि परमानंद भक्त सेवित लक्ष्मीपति ।
की मै वन्दना करता हूं जिसने भक्तियोग शिरोमणि रूप ध्यान
योग उपदेश किया है ४७ ॥

इति जगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां षष्ठाध्यायः ६

दोहा

योगीके सभ मध्यम हिं है मो मद जाको चित्त भजें जो श्रद्ध यु
क्त मोहि सो योग श्रेष्ठ मो मत्त ४७॥ इतिश्रीभगवद्गीताया

217